अर्जित, वि. (सं.) उपार्जित, संगृहीत, संचित।

अर्ज़ी, सं. स्त्री. (अ.) प्रार्थना-निवेदन,-पत्रम्।

—दावा, सं. पुं. (अ.) अभियोग-भाषा, —पत्रम्।

अर्जुन, सं. पुं. (सं.) धनंजयः, पार्थः, कपिध्वजः, गुडाकेशः, गाण्डीविन् २. सहस्रार्जुनः ३. वृक्षभेदः ४. मयूरः। वि. श्वेत २. स्वच्छ।

अर्णव, सं. पुं. (सं.) समुद्रः २. सूर्यः ३. अन्तरिक्षं ४. चतुर् इति संख्या।

अर्त्ति, सं. स्त्री. (सं.) पीडा, व्यथा २. चापाग्रम्।

अर्थ, सं. पुं. (सं.) शब्दाशयः २. प्रयोजनं ३. कर्मन् (न.) ४. इन्द्रियविषयः ५. धनम्।

—देना, क्रि. स., अभि-धा (जु. उ. अ.) सूच् (चु.), द्युत् (प्रे.)।

—बताना, क्रि. स., व्या-ख्या (अ. प. अ.), विवृ (स्वा. उ. से.), व्याचक्ष् (अ. आ. से.), अर्थं प्रकाश् (प्रे.)।

—कर, वि. (सं.) लाभप्रद, फलावह। (-करी स्त्री.)।

—दंड, सं. पुं. (सं.) धनदण्डः।

—पति, सं. पुं. (सं.) कुबेरः २. नृपः।

—पिशाच, वि. (सं.) कृपण, लोभिन्।

—वाद, सं. पुं. (सं.) त्रिविधवाक्येषु अन्यतमम् (न्या.)।

—वेद, सं. पुं. (सं.) शिल्पशास्त्रम्।

—शास्त्र, सं. पुं. (सं. न.) धनप्राप्तिरक्षावृद्ध्याद्युपायदर्शकं शास्त्रम्।

—सचिव, सं. पुं. (सं.) अर्थमन्त्रिन्।

अर्थान्तर, सं. पुं. (सं. न.) अन्य-भिन्न-द्वितीय,-अर्थः।

—न्यास, सं. पुं. (सं.) अर्थालंकारभेदः (सा.)।

अर्थापत्ति, सं. स्त्री. (सं.) प्रमाणभेदः (न्या.) २. अलंकारभेदः (सा.)।

अर्थालंकार, सं. पुं. (सं.) अर्थचमत्कारयुतोऽलंकारः (सा.)।

अर्थी, वि. (सं.-र्थिन्) इच्छु, इच्छुक, इच्छक, अभिलाषिन् २. कार्यार्थिन्। (अर्थिनी स्त्री.) सं. पुं., वादिन्, अभियोक्तृ २. सेवकः ३. धनिकः।

अर्दन, सं. पुं. (सं. न.) पीडनं, हिंसा २. याचनम्।

अर्द्ध, वि. (सं) सामि—। सं. पुं., अर्द्धः-र्द्धं, अर्द्धे,-भागः - अंशः।

—चंद्र, सं. पुं. (सं.) अष्टम्याश्चन्द्रः २. चन्द्रकः, मयूरपक्षस्थचन्द्रचिह्नं ३. नखक्षतं ४. चन्द्रबिन्दुः (ँ) ५. बहिष्काराय ग्रीवातो ग्रहणम् ६. त्रिपुंड्रभेदः।

—भाग, सं. पुं. (सं.) अर्द्धः - र्द्धं, अर्द्धांशः।

—मागधी, सं. स्त्री. (सं.) प्राकृतभाषाभेदः (यह कभी मथुरा से पटना तक बोली जाती थी)।

—वृत्त, सं. पुं. (सं. न.) वृत्तार्द्धं, अर्द्धमंडलम् २. वृत्तपरिधेरर्द्धभागः।

—समवृत्त, सं पुं. (सं. न.) छन्दोभेदः।

अर्द्धांग, सं. पुं. (सं. न.) अर्द्ध,-भागः-अंशः २. पक्ष,-आघातः-वायुः ३. शिवः।

अर्द्धांगिनी, सं. स्त्री. (सं.) पत्नी, भार्या।

अर्द्धांगी, सं. पुं. (सं.-गिन्) शिवः। वि., अर्द्धांगरोगग्रस्त, पक्षवायुपीडित।

अर्पण, सं. पुं. (सं. न.) उपहरणं, उपनयनं, दानं २. उपायनं, उपहारः ३. स्थापनम्।

—करना, क्रि. सं., उपह्-उपनी (भ्वा. प. अ.) उपस्था (प्रे.) ऋ (प्रे. अर्पयति)।

अर्बुद, सं पुं. (सं. पुं. न.) दशकोटिसंख्या २. अरावलीपर्वतः ३. मेघः ४. मांसकीलरोगः ५. द्वैमासिको गर्भः।

अर्वा, वि. (अ०) चतुर्।

अर्भक, वि. (सं.) अल्प, लघु २. मूर्ख ३ कृश। सं. पुं., बालकः, वटुः।

अर्य्य, सं. पुं. (सं.) स्वामिन् २. ईश्वरः ३. वैश्यः। वि. श्रेष्ठ। (अर्या, अर्याणी, अर्यी स्त्री.)।

अर्य्यमा, सं. पुं. (सं.-मन्) सूर्यः २. आदित्यविशेषः ३. विशिष्टाः पितरः (बहु०) ४. उत्तराफाल्गुनीनक्षत्रम्।

अर्वाक्, अव्य. (सं.) पश्चात्, इदानींतने काले, नातिचिरात् प्राक्, अचिरं २. समीपं-पे, निकटं-टे।

अर्वाचीन, वि. (सं.) नूतन, नातिपुराण, आधुनिक (—की स्त्री.), अभिनव ।

अर्श, सं. पुं. (सं.—र्शस् न.) गुदकीलकः, गुदांकुरः ।

अर्श, सं. पुं. (अ.) आकाशः—शं २ स्वर्गः ।

अर्हंत, सं. पुं. (सं.) जिनः २. बुद्धः । वि. मान्य ।

अर्ह, वि. (सं.) पूज्य २. योग्य ।

अर्हत्, वि (सं.) मान्य, अर्चनीय ।

अल, अव्य., दे. 'अलम्' ।

अलंकार, सं. पुं. (सं.) आभरणं, मण्डनं, वि-,भूषणं २. शब्दार्थयोश्चमत्कारविशेषः (सा०)।

अलंकृत, वि. (सं.) वि-,भूषित, मंडित, धृताभरण २. संस्कृत, परिष्कृत ।

—करना, क्रि. स., वि-, भूष् (चु०), अलंकृ, परिष्कृ, संस्कृ, मण्ड् (चु०), प्रसाध् (प्रे०)।

अलंघनीय, वि. (सं.) अलंघ्य, दुरतिक्रम, दुस्तर ।

अल, सं. पुं. (सं. न.) (= विच्छू का डंक) लूमं, अ(आ)लिदंशः, द्रु(द्रो)ण-, कण्टकः—शंकुः । २. हरितालकं २. विषः, विषम् ।

अलक, सं. पुं. (सं.) कुरलः, चूर्णकुन्तलः २. केश,-पाशः-कलापः ।

अलकनंदा, सं. स्त्री. (सं)नदी विशेषः ।

अलकली, सं. स्त्री. (अं.) विक्षारः ।

अलका, सं. स्त्री. (सं.) कुबेरनगरी, यक्षपुरम् ।

—पति, सं. पुं. (सं.) कुबेरः ।

अलकावलि, सं. स्त्री. (सं.) केशकलापः ।

अलकोहल, सं. पुं. (अं.) सुषवः ।

अलक्त, अलक्तक, सं. पुं. (सं.) ला (रा) क्षा, जतु (न.), यावः, रक्ता, द्रुमामयः २. लाक्षानिर्मितरंगभेदः ।

अलक्ष्य, वि. (सं.) अदृश्य २. अतीन्द्रिय ।

अलख, वि. (सं. अलक्ष्य) दे. 'अलक्ष्य' ।

—धारी, सं. पुं. (सं. अलक्ष्यधारिन्) गोरक्षनाथानुयायिनः साधवः (बहु०)

—जगाना, मु., भिक्षायाचनम् ।

अलग, वि. (सं. अलग्न) पृथक् (अव्य.) वि-, भिन्न, वियुक्त, विच्छिन्न, असंलग्न ।

—करना, क्रि. स., पृथक् कृ, विघट्-विश्लिष् (प्रे.), वियुज् (चु०) ।

—होना, क्रि. अ., पृथक् भू, वियुज् (भा० वा.) विश्लिष् (दि. प. अ.) ।

अलगनी, सं. स्त्री. (सं. आलग्न>) वसनालंबनी ।

अलग़ोज़ा, सं. पुं. (अ.) मुरली-वंश-वेणु,-भेदः ।

अलपाका, सं. पुं. (स्पे० एलपाका) जन्तुभेदः २. तस्य ऊर्णा ३. तदूर्णानिर्मितः सूक्ष्म-वस्त्रभेदः ।

अलफ़, सं. पुं. (अ. अलिफ़) अरबीवर्णमालायाः प्रथमवर्णः ।

अलबत्ता, अव्य. (अ.) निस्सन्देहं, निस्संशयम् २. आम्, सत्यम् ३. किन्तु, परन्तु ।

अलबम, सं. पुं. (अं.) चित्रपञ्जिका ।

अलबेला, वि. (सं. अलभ्य> ?) वेषाभिमानिन्, छेक, रूपगर्वित, दर्शनीयमानिन् २. अद्भुत ३, कामचारिन्, अनवहित ।

अलभ्य, वि. (सं.) अप्राप्य २. दुर्लभ ३. अमूल्य ।

अलम्, अव्य. (सं.) यथेष्टं, पर्याप्तं, प्रचुरम् ।

अलम, सं. पुं. (अ.) शोकः, दुःखं २. ध्वजः ।

अलमनक, सं. पुं. (अं.) पंचांगं, पंजिका ।

अलमस्त, वि. (फ़ा) मत्त, क्षीव २, निश्चिन्त ।

अलमारी, सं. स्त्री. (पुर्त० अलमारियो) उत्थितपिटकः ।

अलमास, सं. पुं. (फ़ा) हीरकः, वज्रः-ज्रम् ।

अललटप्पू, वि. (देश०) दैवाधीन, आकस्मिक ।

अलवान, सं. पुं. (अ.) और्णप्रावारः ।

अलस, वि. (सं.) मन्द, मन्थर, आलस्यशील ।

अलसान-नि, सं. स्त्री. (सं. आलस्यम्) मान्द्यम्, तन्द्रिका ।

अलसाना, क्रि. अ., (हिं. अलसान) शिथिलायते (ना. धा.), शिथिली-श्लथी-मन्दी,-भू ।

अलसी, सं. स्त्री. (सं. अतसी) उमा, क्षुमा । (बीज) उमा-अतसी,-बीजम् ।

अलहदा, वि. (अ.) अन्य, भिन्न, पृथक् ।

अलात, सं. पुं. (सं. न.) अङ्गारः २. ज्वलत्काष्ठं, उल्का ।

—चक्र, सं. पुं. (सं. न.) उल्काघूर्णनजं चक्रम् ।

अलान, सं पुं. (सं. आलानं) गजबन्धनस्तम्भः २. हस्तिबन्धनशृंखला ३. बन्धनं, निगडः ।

अलाप, सं. पुं., दे. 'आलाप' ।

अलापना, क्रि. स. (सं. आलापनम्) आलप् (भ्वा. प. से.), स्वरलयम् उत्पद् (प्रे०) २. गै (भ्वा. प. अ. गायति) ।

अलामत, सं. स्त्री. (अं.) लक्षणं, चिह्नं, अभिज्ञानम् ।

अलार्म घड़ी, सं. स्त्री. (अं. एलार्म + सं. घटी) प्रबोधन,-घटी-घटिका ।

अलाव, सं. पुं. (सं. अलातं >) अग्निराशिः, अङ्गारनिकरः ।

अलावा, क्रि. वि. (अ.) विना, ऋते २. दे. 'अतिरिक्त' ।

अलिंजर, सं. पुं. (सं.) (बड़ा घड़ा) अलंजरः, मणिकः २. (झज्झर) कर्करी, गलन्तिका, आलुः (स्त्री.) ।

अलिंद[1], सं. पुं. (सं. अलीन्द्रः) भ्रमरः, द्विरेफः ।

अलिंद[2], सं. पुं. (सं.) आलीन्दः, प्रघ (घा) णः, प्रघ (घा) नः, २. बहिर्द्वारप्रकोष्ठः ।

अलि, सं. पुं. (सं.) भ्रमरः, शिलीमुखः २. पिकः ३. काकः ४. वृश्चिकः ५. कुक्कुरः ६. दे. 'अली' ।

अली[1], सं. स्त्री. (सं. आलीः) सखी, सहचरी २. श्रेणी, पंक्तिः (स्त्री.) ।

अली[2], सं. पुं. (सं. अलि) षट्पदः, भ्रमरः ।

अलीक, वि. (सं.) असत्य, अनृत, वितथ ।

अलील, वि. (अ.) रोगिन्, रुग्ण ।

अलुमीनम, सं. पुं. (अं. एलुमीनियम) रूपट्-धातु (न.) ।

अलूचा, सं. पुं. (फ़ा. आलूचः) अलुचम् ।

अलेख[1], वि. (सं.) अज्ञेय २. अगणित ।

अलेख[2], वि. (सं. अलक्ष्य) अदृश्य ।

अलेख्य, वि. (सं) लेखानर्ह ।

अलोन-ना, वि. (सं. अलवण) लवणहीन २. नीरस, (अलोनी स्त्री.) ।

अलोल-कलोल, सं. स्त्री. (सं. लोल-कल्लोलः) क्रीडा, लीला, खेला ।

अलौकिक, वि. (सं.) लोकोत्तर, लोकबाह्य २. अपूर्व, अद्भुत, ३. अति,-मर्त्य-मानुष, अमानुषिक ।

अल्ट्रावायोलेट रे, सं. स्त्री. (अं.) अतिनीलारुणरश्मिः ।

अल्प, वि. (सं.) स्वल्प, स्तोक, दभ्र, न्यून, क्षुद्र-अल्प-लघु,-परिमाण २. ह्रस्व, खर्व, वामन ।

—आहार, सं. पुं. (सं.) मितभोजनम् ।

—आहारी, वि. (सं.-रिन्) मितभुज्, अल्पाशन ।

—आयु, वि. (सं.-युस्) अचिर,-जीवन-जीविन् । सं. पुं., अजः, छागः ।

—जीवी, वि. (सं.-विन्) अचिरायुष्य ।

—ज्ञ, वि. (सं.) स्तोकज्ञ, अल्पविद् २. मंदबुद्धि ।

—ज्ञता, सं. स्त्री. (सं.) स्तोकज्ञता २. अज्ञता ।

—प्राण, सं. पुं. (सं.) अल्पप्राणोच्चार्या वर्णाः (क्, ग्, ङ्, च्, ज्, ञ् आदि) ।

—बुद्धि, वि. (सं.) मूर्ख, मूढ, दुर्मति, जड ।

—वयस्क, वि. (सं.) अप्राप्त,-व्यवहारः-वयस्कः, बालः ।

अल्पता, सं. स्त्री. (सं.) न्यूनता-त्वं, अल्पत्वं २. लघुता-त्वं ।

अल्पशः, अव्य. (सं.) स्तोकशः, अल्पाल्पं २. शनैः शनैः, क्रमशः (सब अव्य.) ।

अल्ल, सं. पुं. (अ. आल) वंशनामन् (न.), उपगोत्रनामन् (दुब्बे, चौबे आदि)

अल्लम-गल्लम, सं. पुं. (अनु.) प्रलापः, दे. 'अंडबंड' ।

अल्लाह, सं. पुं. (अ.) ईश्वरः ।

—ओ अकबर, वाक्य (अ.) ईश्वरो हि महान् ।

अल्हड़, वि. (सं. अल् = बहुत + लल् = खेलना >) विलासिन्, विनोदिन् २. अनवधान ३. अल्पवयस्क ४. उद्धत ५. अज्ञ । सं. पुं. नवजातवत्सः ।

—पन, सं. पुं., विनोदिता २. अनवधानता ३ अल्पवयस्कता ४. उद्धतता ५. अज्ञता ।

अवंति-ती, **अवन्तिका**, सं. स्त्री. (सं.) उज्जयिनी नगरी ।

अव, उप. (सं.) निश्चयानादरन्यूनतानिम्नता-व्याप्तिसूचक उपसर्गः ।

अवकाश, सं. पुं. (सं.) स्थानं, स्थलं, प्र-, देशः २. गगनं ३. दूरता ४. अवसरः ५. विश्रामः ।

अवकिरण, सं. पुं. (सं. न.) विकिरणं, विक्षेपणं, प्रासनम् ।

अवकीर्ण, वि. (सं.) प्र-वि-आ,-कीर्ण, प्र-वि-अस्त, विक्षिप्त २. ध्वस्त, नाशित ३. सं-, चूर्णित ।

अवकीर्णी, वि. (सं.-र्णिन्) क्षतव्रत, नष्टवीर्य ।

अवकुंचन, सं. पुं. (सं. न.) मोटनं, वक्रीकरणं, व्यावर्तनं, आकुञ्चनम् ।

अवकुंठित, वि. (सं.) कातर, क्लीव, भीरु ।

अवकृष्ट, वि. (सं.) वहिष्कृत २. निगलित ३. नीच । सं. पुं. दासः ।

अवकेशी, वि. (सं.-शिन्) निष्फल २. निस्सन्तान ।

अवक्रय, सं. पुं. (सं.) मूल्यं, अर्घः २. (किराया) तार्यं, तारिकं, आतारः ४. करः ।

अवगत, वि. (सं.) विदित, ज्ञात, बुद्ध, परिचित २. निगत, पतित ।

अवगति, सं. स्त्री. (सं.) ज्ञानं, बोधः, अवगमनं २. कुगतिः-निगतिः (स्त्री.) ।

अवगाढ, वि. (सं.) निविड, गुप्त २. निमग्न, प्रविष्ट ।

अवगाहन, सं. पुं. (सं. न.) जले प्रविश्य स्नानं, निमज्जनं २. प्रवेशः ३. मथनं, विलोडनं ४. अनुसन्धानं ५. मननं, विचारणा ।

अवगीत, वि. (सं.) निन्दित, लाञ्छित । सं. पुं. (सं. न.) निन्दा, अपवचनम् ।

अवगुंठन, सं. पुं. (सं. न.) आवरणं, व्यवधानं, आच्छादनं, संवरणं २. (घूँघट) आवरकः-कम् ।

अवगुंफन, सं. पुं. (सं. नं.) सं-, ग्रन्थनं, वि-, रचनं, तन्त्रीभिर्गुणैर्वा बन्धनम् ।

अवगुण, सं. पुं. (सं.) दोषः, व्यसनं २. अपराधः, स्खलितम् ।

अवग्रह, सं. पुं. (सं.) विघ्नः, प्रतिबन्धः २. अनावृष्टिः (स्त्री.) ३. सेतु-वप्र,-बन्धः, वप्रः ४. सन्धिविच्छेदः (व्या०) ५. शापः ।

अवघट, वि. (सं. अव+घट्ट>) विकट, दुर्गम ।

अवचय, सं. पुं. (सं.) उत्पाटनं, उद्धरणं, उल्लुंचनम् ।

अवच्छेद, सं. पुं. (सं.) भेदः, पृथग्भावः २. इयत्ता ३. अवधारणं, निश्चयः ४. परिच्छेदः, विभागः ।

अवच्छेदक, वि. (सं.) विभाजक, भेदक २. इयत्ताकारक ३. अवधारक ४. निश्चायक । सं. पुं., विशेषणम् ।

अवज्ञा, सं. स्त्री. (सं.) अव-अप,-मानः, अनादरः, अवधीरणं-णा २. आज्ञोल्लंघनं ३. पराजयः ४ अलंकारभेदः (सा.) ।

अवज्ञात, वि. (सं.) अवधीरित, अपमानित, तिरस्कृत ।

अवतंस, सं. पुं. (सं. पुं. न.) भूषणं, अलंकारः २. शिरोभूषणं ३. कर्णभूषणं ४. मुकुटं ५. श्रेष्ठजनः ६. माला, हारः ७. मातृव्यः ८. पाणिग्राहकः ।

अवतरण, सं. पुं. (सं. न.) अवरोहणं, अधोगमनं २. पारगमनं ३. शरीरधारणं, जन्मग्रहणं ४. प्रतिलेखः, प्रतिलिपि-प्रतिकृतिः (स्त्री.), ५. प्रादुर्भावः ६. घट्ट-, सोपानं ७. घट्टः ।

अवतरणी-णिका, सं. स्त्री. (सं.) ग्रन्थ-पुस्तक,-प्रस्तावना-भूमिका-उपोद्घातः २. रीतिः (स्त्री.) ।

अवतार, सं. पुं. (सं.) पुराणमतानुसारं देवविशेषस्य जीवविशेषस्य वा शरीरधारणम् । (विष्णु जी के २४ अवतार—ब्रह्मा, वाराह, नारद, नरनारायण, कपिल, दत्तात्रेय, यज्ञ, ऋषभ, पृथु, मत्स्य, कूर्म, धन्वन्तरि, मोहिनी, नृसिंह, वामन, परशुराम, वेदव्यास, राम, बलराम, कृष्ण, बुद्ध, कल्कि, हंस, हयग्रीव) ।

लेना, क्रि, अ., अवतृ (भ्वा. प. से.), अवरुह् (भ्वा. प. अ.), शरीरं धृ (पे.) ।

अवतारण, सं. पुं. (सं. न.) नीचैर्नयनं २. अनुकरणं ३. उद्धरणम् ।

अवतारी, वि. (सं.-रिन्) अवरोहिन्, अधोगामिन् २. देवांशधारिन्, अलौकिक ।

अवदात, वि. (सं.) श्वेत, शुभ्र २. शुद्ध ३. गौर ४. पीत ।

अवदान, सं. पुं. (सं. न.) सुकर्मन् (न.) २. त्रोटनं ३. पराक्रमः ४. शोधनं ६. उशीरः-रम्।

अवद्य, वि. (सं.) अधम, पाप, २. निन्द्य, कुत्सित।

अवध[1], सं. पुं. (सं. अयोध्या>) कोश (स) लाः (बहु) २. अयोध्या।

अवध[2], वि. (सं. अवध्य) रक्ष्य, त्राणार्ह।

अवधान, सं. पुं. (सं. न.) मनोयोगः, अवेक्षा, सतर्कता।

अवधारण, सं. पुं. (सं. न.) निर्धारणं, निश्चयः।

अवधारित, वि. (सं.) निर्धारित, निश्चित।

अवधार्य्य, वि. (सं.) निर्धारणीय, निश्चेतव्य।

अवधि, सं. स्त्री. (सं. पुं.) सीमा, पराकाष्ठा, पर्यन्तः २. नियत,-कालः-समयः ३. मृत्युकालः। अव्य. (सं.) यावत् (उ. अद्यावधि = अद्य यावत् = आज तक)।

अवधी, वि. (हिं. अवध) कोश (स) लसम्बन्धिन् २. कोस (श) लप्रान्तस्य भाषा।

अवधीरणा, सं. स्त्री. (सं.) दे. 'अवज्ञा'।

अवधीरित, वि. (सं.) अवज्ञात, तिरस्कृत।

अवधूत, सं. पुं. (सं.) सन्न्यासिन्, योगिन्, साधुः। वि. (सं.) कंपित २. विनष्ट।

अवधेय, वि. (सं.) विचारणीय, ध्येय २. श्रद्धेय ३. ज्ञातव्य।

अवनत, वि. (सं.) नीच, निम्न, नत, नीचस्थ २. पतित ३. न्यून।

अवनति, सं. स्त्री. (सं.) ह्रासः, क्षयः, हानिः (स्त्री.) २. अधोगतिः (स्त्री.) ३. नम्रता।

अवनि-नी, सं. स्त्री. (सं.) पृथिवी, भूमिः (स्त्री.)।

—**इन्द्र, ईश,** सं. पुं. (सं.) नृपः।

—**तल,** सं. पुं. (सं. न.) भू,-पृष्ठं तलम्।

—**पति,-पाल,** सं. पुं. (सं.) भूपः।

अवबोध, सं. पुं. (सं.) जागरणं २. ज्ञानम्।

अवभृथ, सं. पुं. (सं.) यज्ञशेषकर्मन् (न.) २. यज्ञान्तस्नानम्।

अवम, वि. (सं.) अधम, अन्तिम २. रक्षक, परित्रातृ २. नीच, निन्दित। सं. पुं. (सं.) चित्रपटविशेषः २. मलमासः।

अवमत, वि. (सं.) अवधीरित, तिरस्कृत।

अवमति, सं. स्त्री. (सं.) अपमानः, तिरस्कारः।

अवमर्दन, सं. पुं. (सं. न.) पीडनं, अर्दनं, उपमर्दः।

अवमान, सं. पुं. (सं.) दे. 'अवमति'।

अवमानना, सं. स्त्री. (सं.) अवधीरणं-णा, तिरस्कारः।

अवयव, सं. पुं. (सं.) अंशः, भागः २. अंगं, गात्रं, शरीरैकदेशः ३. न्याये पञ्च दश वा वाक्यांशाः (=प्रतिज्ञा, हेतुः, उदाहरणं, उपनयनं, निगमनं, जिज्ञासा, संशयः, शक्यप्राप्तिः, प्रयोजनं, संशय-व्युदासः)।

अवयवी, वि. (सं.-विन्) अङ्गिन्, सावयव २. पूर्ण, समग्र। सं. पुं., सावयवः पदार्थः ३. देहः।

अवर, वि. (सं.) अन्य, अपर २, अधम, नीच।

अवराधक, वि. (सं. आराधक) पूजक।

अवराधन, सं. पुं. (सं. आराधनं) पूजा, अर्चा।

अवरुद्ध, वि. (सं.) उप-प्रति,-रुद्ध, प्रतिहत, प्रतिबाधित २. आच्छादित, गूढ।

अवरूढ, वि. (सं.) अवतीर्ण, अधोगत।

अवरेब, सं. पुं. (सं. अव+रेव्>) वक्रतिर्यग्,-गतिः (स्त्री.) २. वस्त्रस्य तिर्यक् कर्तनम्।

—**दार,** वि., तिर्यक्कृत्त।

अवरोध, सं. पुं. (सं.) विघ्नः, व्याघातः २. अवरोधः ३. निरोधः ४. अनुरोधः ५. अन्तःपुरम्।

अवरोधन, सं. पुं. (सं. न.) निवारणं २. अन्तःपुरम्।

अवरोपण, सं. पुं. (सं. न.) उन्मूलनं, उत्पाटनम्।

अवरोह, सं. पुं. (सं.) अवतारः, पतनम् २. अवनतिः (स्त्री.) अलंकारभेदः (सा.) स्वरावतारः (संगीत)।

अवरोहण, सं. पुं. (सं. न.) अवतरणं, नीचैर्गमनम्।

अवर्ण, वि. (सं.) रंगरहित, वर्णविहीन २. कुवर्ण, कुरंग ३. वर्णधर्मशून्य। सं. पुं., अष्टादशविधोऽकारः (व्या.)।

अवर्ण्य, वि. (सं.) अवर्णनीय, अनिर्वाच्य, अकथनीय, वर्णनाविषय। सं. पुं., उपमानम्।

अवलंब, सं. पुं. (सं.) आश्रयः, शरणं, आधारः, अवष्टम्भः ।

अवलंबन, सं. पुं. (सं. न.) दे. 'अवलंब' । २. धारणं, ग्रहणम् ।

अवलंबित, वि. (सं.) आश्रित, अधीन, आयत्त;-विघ्न,-तंत्र (समासान्त में) ।

अवलंबी, वि. (सं.-विन्) दे. 'अवलंबित' २. आश्रयद (अवलंबिनी = आश्रिता स्त्री.) ।

अवलिप्त, वि. (सं.) गर्वित, दृप्त २. अक्त, दिग्ध ३. लीन ।

अवली, सं. स्त्री. (सं. आवली-लिः स्त्री.) पंक्तिः, ततिः, राजी-जिः (सब स्त्री.) २. समूहः, राशिः ।

अवलेप, सं. पुं. (सं.) दर्पः, गर्वः २. वि-प्र-अनु,-लेपः ।

अवलेपन, सं. पुं. (सं. न.) अभ्यंजनं, विलेपनं २. उद्वर्तनं, गात्रानुलेपनी ३. अहंकारः ४. दूषणम् ।

अवलेह, सं. पुं. (सं.) लेह्यः पदार्थः २. लेह्यमौषधम् ।

अवलेहन, सं. पुं. (सं. न.) जिह्वाग्रेण स्पृष्ट्वा खादनम् ।

अवलोकन, सं. पुं. (सं. न.) वि-, ईक्षणं, दर्शनं, निरूपणं २. निरीक्षणं, अवेक्षणम् ।

—करना, क्रि. सं., अव-वि-आ,-लोक् (भ्वा. आ. से., चु.) प्र-वि-अव,-ईक्ष् (भ्वा. आ. से.) ।

अवलोकनीय, वि. (सं.) दर्शनीय, ईक्षणीय ।

अवलोकित, वि. (सं.) ईक्षित, दृष्ट, निरूपित ।

अवश, वि. (सं.) वि-पर,-वश, अशक्त ।

अवशिष्ट, वि. (सं.) अवशेष, उद्वृत्त ।

अवशेष, वि. (सं.) अवशिष्ट, उद्वृत्त २. समाप्त । सं. पुं. (सं.) अवशिष्टं, शेषभागः २. अन्तः, समाप्तिः (स्त्री.) ।

अवश्यंभावी, वि. (सं.-विन्) अपरिहार्य, अनिवार्य ।

अवश्य[1], क्रि. वि. (सं. अवश्यम्) नियतं, ध्रुवं, असंशयं, नूनं, नाम, खलु (सब अव्य.) ।

अवश्य[2], वि. (सं.) उच्छृङ्खल, दुर्दमनीय, दुर्निग्रह, अविधेय, दुर्निवार । (अवश्या = दुर्दमनीया स्त्री.) ।

अवश्यमेव, क्रि. वि., दे. 'अवश्य' ।

अवश्याय, सं. पुं. (सं.) तुषारः, प्रालेयं, हिमजलम् २. अभिमानः, गर्वः ।

अवष्टंभ, सं. पुं. (सं.) आश्रयः २. स्तम्भः ३. धृष्टता ।

अवसन्न, वि. (सं.) विषण्ण, म्लान, खिन्न, शोकार्त्त २. विनाशोन्मुख २. अलस ।

अवसर, सं. पुं. (सं.) समयः, कालः २. अवकाशः, क्षणः ३. दैवं, दैवगतिः (स्त्री.) ।

अवसर्पण, सं. पुं. (सं. न.) अवरोहणं, अधोगमनम् ।

अवसाद, सं. पुं. (सं.) नाशः, क्षयः २. विषादः ३. दैन्यं ४. श्रान्तिः (स्त्री.) ५. निर्बलता ।

अवसान, सं. पुं. (सं. न.) विरामः, याननिवृत्तिः (स्त्री.), विष्टम्भः २. समाप्तिः (स्त्री.), अन्तः ३. मृत्युः ४. सीमा ५. सायंकालः ।

अवसित, वि. (सं.) समाप्त २. ऋद्ध ३. परिपक्व ४. निश्चित ५. सम्बद्ध ।

अवसृष्ट, वि. (सं.) त्यक्त २. दत्त ३. निष्कासित ।

अवसेचन, सं. पुं. (सं. न.) प्रोक्षणं, जलेनाप्लावनं २. प्र-, स्वेदनं ३. जलूकादिभिः रक्तनिष्कासनम् ।

अवस्कन्द, सं. पुं. (सं.) सैन्यावासः, शिविरम् २. जनवासः, वरयात्रावासः ।

अवस्था, सं. स्त्री. (सं.) दशा, गतिः (स्त्री.) २. समयः ३. वयस्-आयुस् (न.) ४. स्थितिः (स्त्री.) ।

अवस्थान्तर, सं. पुं. (सं. न.) अन्यावस्था, दशापरिवर्तनम् ।

अवहित, वि. (सं.) सावधान, एकाग्र, अनन्यवृत्ति ।

अवहित्था, सं. स्त्री. (सं.) आकारगुप्तिः (स्त्री.), लज्जादिवशात् चातुर्येण हर्षादेः गोपनं, भावभेदः (सा.) ।

अवहेलन, सं. पुं. (सं. न.) दे. 'अवहेलना' ।

अवहेलना, सं. स्त्री. (सं.) अवज्ञा, अपमानः २. आज्ञोल्लंघनं ३. उपेक्षा ।

—करना, क्रि. स., निकृ, अव-अप,-मन् (प्रे.), अवज्ञा (कृ. उ. अ.) २. आज्ञाम् अतिक्रम् (भ्वा. प. से.) ३. उपेक्ष् (भ्वा. आ. से.) ।

अवहेलित, वि. (सं.) तिरस्कृत, उपेक्षित ।

अवान्तर, वि. (सं.) अन्तर्गत, मध्यवर्तिन् । सं. पुं. (सं.न.) अन्तरं, अभ्यन्तरं, उदरं, गर्भः। **—दिशा,** सं. स्त्री. (सं.) विदिशा, मध्यमदिशा। **—भेद,** सं. पुं. (सं.) भागस्य भागः, अन्तर्गतभेदः ।

अवाक्, वि. (सं. अवाच्) मौनिन्, तूष्णीक, निःशब्द २. स्तब्ध, चकित । **—रहना,—होना,** क्रि. अ., तूष्णीं-जोषं,-आस् (अ. आ. से.), वाचं यम् (भ्वा. प. अ.)।

अवाङ्मुख, वि. (सं.) अधो-नत,-मुख । (-खी. स्त्री.) २. लज्जित ।

अवाची, सं. स्त्री. (सं.) दक्षिणा, दक्षिणदिशा ।

अवाच्य, वि. (सं.) विशुद्ध, निर्दोष २. निन्द्य, गर्ह्य । सं. पुं. (सं. न.) गाली, दुर्वचनम् ।

अवाप्त, वि. (सं.) प्राप्त, अधिगत, लब्ध ।

अवार, सं. पुं. (सं. पुं. न.) अर्वाक्,-तीरं-तटम् । **—पार,** सं. पुं. (सं.) सागरः, अब्धिः ।

अवि, सं. पुं. (सं.) मेषः, एडकः २. छागः ३. सूर्यः ४. मन्दारः ५. पर्वतः ६. मूषिकः । सं. स्त्री., मेषी, एडका, उरणी । **—पाल,** सं. पुं. (सं.) मेषपालकः ।

अविकल, वि. (सं.) अक्षीण, अनपचित २. समग्र, पूर्ण ३. निश्चल ।

अविकल्प, वि. (सं.) निश्चित २. असंदिग्ध ।

अविकारी, वि. (सं.-रिन्) निर्विकार २. अपरिणत ।

अविकृत, वि. (सं.) शुद्ध २. अपरिणत ।

अविगत, वि. (सं.) अज्ञात २. अज्ञेय ३. विद्यमान ।

अविचल, वि. (सं.) ध्रुव, स्थिर ।

अविच्छिन्न, वि. (सं.) निरन्तर, अविरत, सतत ।

अवितथ, वि. (सं.) सत्य, यथार्थ, तथ्य । सं. पुं. (सं. न.) सत्यं, ऋतम् ।

अविद्यमान, वि. (सं.) अनुपस्थित २. असत् ३. असत्य ।

अविद्य, वि. (सं.) निरक्षर, अज्ञ ।

अविद्या, सं. स्त्री. (सं.) अज्ञानं, अबोधः २. माया (वे.) ३. कर्मकाण्डं ४. प्रथमः क्लेशः (योग.)। **-जन्य,** वि. (सं.) मोहज, अज्ञानजनित ।

अविनाशी, वि. (सं.) अनश्वर, अक्षय, अक्षर, अव्यय, चिरस्थायिन् २. नित्य, शाश्वत ।

अविनीत, वि. (सं.) उद्धत २. दुर्दान्त ३. धृष्ट ।

अविरत, वि. (सं.) सतत, विरामरहित २. आसक्त, अनिवृत्त । क्रि. वि. (सं. न.) सततं, अनवरतम् ।

अविरल, वि. (सं.) संलग्न २. निबिड, घन ।

अविराम, वि. (सं.) सतत, अनवरत २. अविश्रान्त ।

अविवाहित, वि. (सं.) अनूढ, कुमार, अकृत,-पणिग्रह-उपयम-उद्वाह, अपरिणीत ।

अविवेक, सं. पुं. (सं.) सदसद्विवेचनराहित्यं, विचाराभावः २. अज्ञानं ३. अन्यायः ४. मिथ्याज्ञानम् (सां.)।

अविवेकी, वि. (सं.-किन्) विवेकशून्य, अज्ञानिन्, अतत्त्वज्ञ २. विचारशून्य ३. मूर्ख ४. अन्यायकारिन् ।

अविश्रान्त, वि. (सं.) विश्रान्तिशून्य २. सतत, अविराम ।

अविश्वसनीय, अविश्वस्त } वि. (सं.) विश्वासानर्ह, प्रत्ययायोग्य ।

अविश्वास, सं. पुं. (सं.) अप्रत्ययः, विश्वासाभावः ।

अविश्वासी, वि. (सं.-सिन्) शंका-संशय,-शील-बुद्धि, आ-,शंकिन् २. दे. 'अविश्वस्त' ।

अवेक्षण, सं. पुं. (सं. न.) दर्शनं, अवलोकनं २. निरीक्षणं, परीक्षणम् ।

अवेक्षणीय, वि. (सं.) दर्शनीय २. निरीक्षितव्य, परीक्षितव्य ।

अवेद्य, वि. (सं.) अज्ञेय २. अलभ्य ।

अवेद्या, वि. स्त्री. (सं.) अवोढव्या, विवाहानर्हा ।

अवैतनिक, वि. (सं.) निर्वेतन, भृतित्यागिन्, आदरवृत्ति ।

अवैदिक, वि. (सं.) वेदविरुद्ध, वेदाविहित ।

अव्यक्त, वि. (सं.) परोक्ष, अतीन्द्रिय, अगोचर, अज्ञात, अनिर्वचनीय । सं. पुं. (सं.) विष्णुः २. शिवः ३. मदनः ४. प्रकृतिः (स्त्री.),

५. आत्मन् ६. परमेश्वरः ७. मायोपाधिकं ब्रह्मन् (न.)।

अव्यपदेश्य, वि. (सं.) अकथनीय २. अनिर्देश्य ३. निर्विकल्प (न्या०)।

अव्यय, वि. (सं.) निर्विकार, अक्षय, नित्य, व्ययशून्य। सं. पु. (सं.) परब्रह्मन् (न.) २. विष्णुः ३. शिवः। (सं. न.) सर्वविभक्ति-लिंगवचनेषु एकरूपः शब्दः (उ० सदा, अद्य आदि, व्या०)।

अव्ययीभाव, सं. पुं. (सं.) समासभेदः (उ० प्रतिदिनं, व्या.)।

अव्यवस्था, सं. स्त्री. (सं.) अक्रमः, क्रमभंगः, व्यतिक्रमः, व्यस्तता, संक्षोभः २. अवधिः ३. दुर्निर्वाहः, दुर्णयः।

अव्यवस्थित, वि. (सं.) अक्रम, क्रमशून्य, २. निर्मर्याद ३. अनियतरूप ४. चंचल।

—चित्त, वि. (सं.) चंचल,-चित्त-मानस।

अव्यवहार्य, वि. (सं.) व्यवहारायोग्य, उपयोगानर्ह २. पतित, पंक्तिच्युत।

अव्यवहित, वि. (सं.) संलग्न, संसक्त, व्यवधानशून्य।

अव्यवहृत, वि. (सं.) अप्रयुक्त, अप्रचरि-(लि)त।

अव्याप्ति, सं. स्त्री. (सं.) अनभिव्यापनं, व्याप्त्यभावः २. लक्षणस्य दोषभेदः (न्या०)।

अव्याहत, वि. (सं.) व्याघातशून्य, अप्रतिरुद्ध २. सत्य।

अव्युत्पन्न, वि. (सं.) जड, मन्दमति २. व्याकरणानभिज्ञ ३, व्युत्पत्तिरहित (शब्द)।

अव्वल, वि. (अ.) प्रथम, आदिम २ उत्तम, श्रेष्ठ। सं. पुं. प्रारम्भः, उप-प्र-, क्रमः।

अशंक, वि. (सं.) निर्भय, निःशङ्क। क्रि. वि. (सं. न.) निःशंकम्।

अशकुन, सं. पुं. (सं. पुं. न.) अपशकुनः-नं, अजन्यं, अव-अशुभ- दुर्,-लक्षणम्।

अशक्त, वि. (सं.) निर्बल, अबल २. अक्षम।

अशक्य, वि. (सं.) असाध्य, अनिष्पाद्य, असम्भव।

अशन, सं. पुं. (सं. न.) भोजनं, अन्नं, २. भक्षणं, खादनम्।

अशरण, वि. (सं.) अनाथ, निराश्रय।

अशरफ़ी, सं. स्त्री. (फ़ा.) स्वर्णमुद्रा २. पुष्पभेदः।

अशांत, वि. (सं.) व्याकुल, व्यग्र, विह्वल, उद्विग्न, चपल, चंचल।

अशांति, सं. स्त्री. (सं.) अशमः, उद्वेगः, व्याकुलता, क्षोभः, व्यग्रता, सन्तोषाभावः।

अशास्त्रीय, वि. (सं.) शास्त्रविरुद्ध २. शास्त्रबाह्य।

अशिक्षित, वि. (सं.) अनक्षर, निरक्षर, अविद्य, अज्ञ, अव्युत्पन्न।

अशिष्ट, वि. (सं.) असभ्य, अविनीत, अभद्र, अनार्य।

अशिष्टता, सं. स्त्री. (सं.) असभ्यता, धृष्टता दुःशीलता, विनयाभावः।

अशुद्ध, वि. (सं.) अशुचि, अपवित्र २. अशोधित, असंस्कृत ३. भ्रान्त, वितथ।

अशुद्धता, सं. स्त्री. (सं.) अपवित्रता, अशुचिता, २. मलिनता ३. त्रुटिः-भ्रान्तिः (स्त्री)।

अशुद्धि, सं. स्त्री. (सं.) दे. 'अशुद्धता'।

अशुभ, सं. पुं. (सं. न.) अमंगलं, अहितं, अशिवं २. पापं, अपराधः। वि. अमंगल, अभद्र, अशिव।

—सूचक, वि. (सं.) उत्पात-अनिष्ट,-शंसिन्।

अशेष, वि. (सं.) निःशेष, सर्व, समग्र, सकल, संपूर्ण, २. अनन्त, असीम, अगणित, बहु, ३. समाप्त, अवसित।

अशोक, वि. (सं.) दुःख-शोक,-रहित। सं. पुं. (सं.) विशोकः, रक्तपल्लवः (वृक्ष) २. पारदः ३. शोकाभावः ४. नृपविशेषः।

—वाटिका, सं. स्त्री. (सं.) विशोकवाटः २. रावणस्य विशोकोद्यानम्।

अशौच, सं. पुं. (सं. न.) अमेध्यता, अपवित्रता, अशुद्धता।

अश्क, सं. पुं. (फा.) अश्रु (न.), नेत्रजलम्।

अश्रद्धा, सं. स्त्री. (सं.) अविश्वासः, अप्रत्ययः, भक्ति-निष्ठा,-अभावः।

अश्रान्त, वि. (सं.) स्वस्थ, अक्लान्त। क्रि. वि. (सं. न.) सततम्।

अश्रु, सं. पुं. (सं. न.) असृ (न.), वाष्पं, नयनाम्बु (न.)।

—पात, सं. पुं. (सं.) रुदितं, रोदनम्।

—मुख, वि. (सं.) साश्र. अश्रुलोचन, सवाष्प।
अश्रुत, वि. (सं.) अनिशान्त, अनाकर्णित २. अनुभवशून्य।
—पूर्व, वि. (सं.) अनाकर्णितपूर्व २. अद्भुत।
अश्लील, वि. (सं) व्रीडावह, ग्राम्य, कुत्सित, वीभत्स, अश्राव्य, अवाच्य।
अश्लीलता, सं. स्त्री. (सं.) ग्राम्यता, अवाच्यता।
अश्व, सं. पुं. (सं.) तुरगः, घोटकः।
—आरोहण, सं. पुं. (सं. न.) अश्वेन विहरणं, घोटकारोहणम्।
—आरोही, वि. (सं.-हिन्) सादिन्, तुरगिन्।
—गंधा, सं. स्त्री. (सं.) हय-वाजि,-गन्धा।
—तर, सं. पुं. (सं.) वेगसरः (खच्चर)। (-तरी = वेगसरी स्त्री.)
—पति, सं. पुं. (सं.) तुरगराजः २. सादिन् २. भरतमातुलः ३. नृपविशेषः।
—पाल, सं. पुं. (सं.) घोटकरक्षकः।
—मेध, सं. पुं. (सं.) वाजिमेधः, क्रतुभेदः।
—शाला, सं. स्त्री. (सं.) मन्दुरा, वाजिशाला।
अश्वत्थ, सं. पुं. (सं.) चलदलः, पिप्पलः।
अश्वत्थामा, सं. पुं. (सं.-मन्) द्रौणिः, द्रौणायनः, कृपीसुतः, द्रोणाचार्यपुत्रः।
अश्विनी, सं. स्त्री. (सं.) घोटकी, वडवा २, प्रथमनक्षत्रं, दाक्षायणी।
—कुमार, सं. पुं. (सं.-रौ द्वि०) अश्विनीसुतौ, देवचिकित्सकौ, दस्रौ, स्वर्वैद्यौ।
अषाढ़, सं. पुं., दे. 'अषाढ़'।
अषाढ़ी, सं. स्त्री. (सं. आषाढ़ी) आषाढ़मासस्य पूर्णिमा।
अष्ट, वि. तथा सं. पुं. (सं. अष्टन्) दे. 'आठ'
—अंग, सं. पुं. (सं. न.) योगस्याष्टांगानि (=यमः, नियमः, आसनं, प्राणायामः, प्रत्याहारः, धारणा, ध्यानं, समाधिः) २. आयुर्वेदस्य अष्टविभागाः (शल्य इ०) ३. शरीरस्याष्टांगानि यैः प्रणामो विहितः (=जानुपादहस्तवक्षःशिरोवचनदृष्टिबुद्धयः) ४. अष्टद्रव्यपरिपूजोपकरणभेदः। वि. (सं.) अष्टावयव २. अष्ट-भुज-पार्श्व।
—अध्यायी, सं. स्त्री. (सं.) पाणिनीयं व्याकरणम्।
—कोण, सं. पुं. (सं.) अष्टास्र, अष्टकोणाकृतिः (स्त्री.) २. कुण्डलभेदः। वि. अष्टास्र, अष्टास्रिय।
—धातु, सं. स्त्री. (सं. पुं.) धात्वष्टकम् (=सोना, चाँदी, ताँबा, राँगा, जसता, सीसा, लोहा, पारा)
—पदी, सं. स्त्री. (सं.) अष्टपदसमूहः २. छन्दोभेदः।
—पहर, सं. पुं. (सं.-प्रहराः) दिनस्याष्टयामाः। क्रि. वि., अहर्निशं, दिवानिशम्।
—भुजा, सं. स्त्री. (सं.) दुर्गा, विन्ध्याचलवासिनी देवी।
—मूर्ति, सं. पुं. (सं.) शिवः २. शिवस्य अष्ट मूर्तयः (=पृथिवी, जलं, अग्निः, वायुः, आकाशः, यजमानः, सूर्यः, चन्द्रः अथवा सर्वः, भवः, रुद्रः, उग्रः, भीमः, पशुपतिः, ईशानः, महादेवः)
—वर्ग, सं. पुं. (सं.) औषधविशेषाष्टकम् (=ऋषभः, जीवकः, भेदः, महादेवः, ऋद्धिः, वृद्धिः, काकोली, क्षीरकाकोली।
अष्टक, सं. पुं. (सं. न.) अष्टवस्तुसमुदायः (उ० हिंग्वष्टकं) २. अष्टपद्यात्मककाव्यम् ३. ऋग्वेदस्याष्टमो भागः ४. अष्टाध्यायी।
अष्टमी, सं. स्त्री. (सं.) तिथिभेदः। वि. स्त्री. (सं.)।
अष्टादश, वि. तथा सं. पुं. (सं.-शन्) उक्ता संख्या तद्बोधकावंकौ (१८) च।
असंख्य, वि. (सं.) असंख्येय, असंख्यात, अगणित, संख्या-गणना,-अतीत, अगण्य।
असंग, वि. (सं.) एकल, एकाकिन् २. निर्लिप्त ३. भिन्न।
असंगत, वि. (सं.) पूर्वापरविरुद्ध, असम्बद्ध, अप्रासंगिक २. अन्याय्य, अनुचित, अयुक्त।
असंगति, सं. स्त्री. (सं.) अनन्वयः, सम्बन्धाभावः २. अनौचित्यम् ३. अलंकारभेद, (सा०)।
असंतुष्ट, वि. (सं.) संतोषरहित २. अतृप्त ३. खिन्न।
असंतोष, सं. पुं. (सं.) असंतुष्टिः (स्त्री.), संतोषाभावः, २. अतृप्तिः (स्त्री.) ३. खेदः, ग्लानिः (स्त्री.)।

असंबद्ध, वि. (सं.) सम्बन्धरहित, अनन्वित २. स्वतन्त्र ३. असंगत, पूर्वापरसम्बन्धरहित।

असंभव वि. (सं.) असाध्य, अशक्य, अकरणीय। सं. पुं., अलंकारभेदः (सा०)।

असंभावित, वि. (सं.) आकस्मिक, अतर्कित।

असंभाव्य, वि. (सं.) अतर्क्य, अविचार्य २. दुष्ट।

असंयत, वि. (सं.) अनर्गल, निरंकुश, उच्छृङ्खल २. नियमरहित, अनियत ३. अक्रम।

असंशय, वि. (सं.) निर्विवाद, सन्देह-संशय-रहित २. सत्य। क्रि. वि. (सं. न.) निस्सन्देहम्।

असंस्कृत, वि. (सं.) अशिष्ट, असभ्य, अविनीत, अपरिष्कृत।

असगंध, सं. स्त्री. (सं. अश्वगन्धा) हयतुंरंग,-गन्धा, वलदा, प्रियकरी, रसायनी, कुष्ठघातिनी।

असती, सं. स्त्री. (सं.) कुलटा, पुंश्चली।

असत्, वि. (सं.) मिथ्या (अव्य.), असत्य २. अविद्यमान, सत्ता-अस्तितत्व,-हीन ३. अभद्र, दुष्ट।

असत्य, वि. (सं.) अनृत, वितथ, अतथ्य, अयथार्थ, अलीक, मृषा-, मिथ्या—।

—वादी, वि. (सं.-दिन्) मिथ्या-मृषा-अनृत,-वादिन्-भाषिन्।

असत्यता, सं. स्त्री. (सं.) अनृतत्वं, असत्यत्वं, वितथता।

असन, सं. पुं. (सं. अशनं दे०)।

असबाब, सं. पुं. (अ.) परिच्छदः, उपस्करः, वस्तुजातं, यात्रासामग्री, वस्त्र-पात्र,-सम्भारः।

असभ्य, वि. (सं.) अशिष्ट, असंस्कृत, ग्रामीण २. असभासद्, असदस्य।

असभ्यता, सं. स्त्री. (सं.) अशिष्टता, असंस्कृतिः (स्त्री.) ग्रामीणता।

असमंजस, सं. पुं. (सं. न.) सन्देहः, संशयः, द्वैधीभावः, निश्चयाभावः २. विघ्नः ३. (सं. पुं.) सगरपुत्रः। वि., असंगत, अनुपयुक्त।

—में पड़ना, क्रि. अ., आशंक्-विशंक्-विक्लुप् (भ्वा. आ. से.), संशी (अ. आ. से.), मनसा दोलायते (ना. धा.)।

असम, वि. (सं.) अतुल्य, असदृश, असदृक्ष २. अयुग्म, विषम ३. उन्नतानत, असमरेख। (सं. पुं.) अलंकार-भेदः (सा०)।

असमय, सं. पुं. (सं.) अकालः, कुसमयः, विपत्कालः। क्रि. वि. अकाले, अस्थाने, अयथाकालम्। वि. अनवसर, अ (आ) कालिक, असमयोचित।

असमर्थ, वि. (सं.) बल-शक्ति,-हीन, अशक्त, दुर्बल, २. अक्षम, अयोग्य।

असमर्थता, सं. स्त्री. (सं.) अशक्तता, अक्षमता।

असम्मत, वि. (सं.) विमत, विरुद्ध २. अस्वीकृत।

असंम्मति, सं. स्त्री. (सं.) वैमत्यं, विमति (स्त्री.) मतभेदः, विरोधः।

असमान, वि. (सं.) विजातीय, अतुल्य।

असमाप्त, वि. (सं.) असंपन्न, अनवसित, अपूर्ण।

असर, सं. पुं. (अ.) प्रभावः, प्रतापः, प्रतिष्ठा २. फलं, गुणः, परिणामः।

—करना, क्रि. सं., प्रभावं जन् (प्रे०), फलं उत्पद् (प्रे०)।

—होना, क्रि. अ., परिणामः जन् (दि. आ. से.) फलं निष्पद् (दि. आ, अ)

असल, वि. (अ.) अकृतक, अकृत्रिम, निष्कपट २. उत्कृष्ट ३. शुद्ध, अमिश्रित। सं. पुं., मूलं, तत्त्वम् ४. मूल,-धनं-द्रव्यम्।

असलह, सं. पुं. (अ० 'सिलाह' का बहु०) शस्त्रास्त्रम् २. कवचः-चम्।

असलियत, सं. स्त्री. (अ.) सत्यता, वास्तविकता २. मूलं, तत्त्वं, सारः।

असली, वि. (अ.) दे. 'असल' वि०।

असह, वि. (सं. असह्य दे०)।

असहन, वि. (सं.) दे. 'असहनशील'।

—शील, वि. (सं.) अमर्षण, अक्षमिन्, असहिष्णु, असहन, अक्षम।

—शीलता, सं. स्त्री. (सं.) असहिष्णुता, क्षमा-मर्षण-तितिक्षा,-अभावः।

असहनीय, वि. (सं.) दे. 'असह्य'।

असहयोग, सं. पुं. (सं.) असहकारिता, असाहाय्यं, असहोद्योगः।

—आंदोलन, सं. पुं. (सं. न.) असहकारिता-व्यापारः।

असह्य, वि. (सं.) असहनीय, असोढव्य, सहनायोग्य, दुःसह, दुर्विषह ।

असहाय, वि. (सं.) निराश्रय, निरवलम्ब, अगतिक, अशरण ।

असहिष्णु, वि. (सं.) दे. 'असहनशील' ।

असहिष्णुता, सं. स्त्री. (सं.) दे. 'असहनशीलता' ।

असा, सं. पुं. (अ.) दण्डः, लगुडः, यष्टिः (पुं. स्त्री.) ।

असाढ़, सं. पुं. (सं. आषाढ़ः) वर्षस्य चतुर्थमासः।

असाढ़ी, वि. (हिं. असाढ़) आषाढसम्बन्धिन् । सं. स्त्री. आषाढोप्तं शस्यं २. आषाढपूर्णिमा ।

असाधारण, वि. (सं.) विशेष, विलक्षण, अद्भुत (—णी स्त्री.) ।

असाध्य, वि. (सं.) अशक्य, अनिष्पाद्य २. दुस्साध्य, दुष्कर ३. अचिकित्स्य, दुरुपचार, निरुपाय, अप्रतिकार्य ।

असामयिक, वि. (सं.) अनवसर, असमयोचित, अ(आ)कालिक (—की स्त्री.), अप्राप्तकाल, अस्थान ।

असामर्थ्य, सं. स्त्री. (सं. न.) दे. 'असमर्थता' ।

असामी, सं. पुं. (अ. आसामी) जनः, पुरुषः २. कृषकः ३. प्रत्यर्थिन्, प्रतिवादिन् ४. अपराधिन्, दण्ड्यः ५. मित्रं, सखि (पुं.) । सं. स्त्री., परकीया २. वेश्या ३. दासवृत्तिः (स्त्री.) ४. रिक्तस्थानम् ।

खरा—, सं. पुं., ऋणशोधकः ।

डूबा—, सं. पुं., ऋणशोधाक्षमः ।

मोटा—, सं. पुं., धनाढ्यः ।

लीचड़—, सं. पुं. वद्धमुष्टिः, अदित्सुः ।

असार, वि. (सं.) निस्सार, फल्गु, निष्फल २. रिक्त ३. तुच्छ । सं. पुं., एरण्डः २. अगरुः ।

असारता, सं. स्त्री. (सं.) निस्सारता, तत्त्वराहित्यम् २. मिथ्यात्वं ३. तुच्छता ।

असालत, सं. स्त्री. (अ.) कुलीनता २. सत्यता ।

असालतन्, क्रि. वि. (अ.) स्वयं, स्वतः (दोनों अव्यय) ।

असावधान, वि. (सं.) प्रमत्त, प्रमादिन्, मन्दादर, अनवधान, अनवहित ।

असावधानता, सं. स्त्री. (सं.) प्रमादः, मनोयोगाभावः, अनवधानं, उपेक्षा ।

असावधानी, सं. स्त्री., दे. 'असावधानता' ।

असावरी, सं. स्त्री. (सं. अ (आ) शावरी) रागिणीभेदः ।

असासा, सं. पुं. (अ.) सम्पत्तिः (स्त्री.), विभवः ।

असि, सं. स्त्री. (सं. पुं.) खड्गः २. नदीविशेषः ।

असिक, सं. पुं. (सं. न.) चिबुकाधरयोर्मध्यभागः ।

असिक्नी, सं. स्त्री. (सं.) नदीविशेषः (चनाव) २. अन्तःपुरचारिणी अवृद्धा दासी ।

असित, वि. (सं.) कृष्ण, नील, श्याम, मेचक २. दुष्ट ३. वक्र ।

असिता, सं. स्त्री. (सं.) दे. 'यमुना' ।

असिद्ध, वि. (सं.) अनिष्पन्न २. अपक्व ३. अपूर्ण ४. निष्फल ५. अप्रमाणित ।

असी, सं. स्त्री. (सं. असिः पुं.; असी) काशीदक्षिणवर्तिनी नदी ।

असीम, वि. (सं.) निस्सीम, निरवधि २. अमित ३. अपार ४. अगाध ।

असील, वि. (अ. असल) दे. 'असल' ।

असीर, सं. पुं. (अ.) ग्रहकः, कारागुप्तः ।

असीरी, सं. स्त्री. (फा.) कारावासः, आसेधः, निरोधः ।

असीस, सं. स्त्री. (सं. आशिस् स्त्री.) आशीर्, वादः-वचनं, मंगलशब्दः ।

असु, सं. पुं. (सं.) प्राणाः, असवः (दोनों वहुवचन) ।

असुविधा, सं. स्त्री. (सं.>) कठिनता, सौकर्याभावः २. विघ्नः ।

असुर, सं. पुं. (सं.) दैत्यः, राक्षसः २. रात्री ३. दुर्जनः ४. पृथिवी ५. सूर्यः ६. मेघः ७. राहुः ८. उन्मादभेदः ।

—अरि, सं. पुं. (सं.) विष्णुः २. देवता ।

—गुरु, सं. पुं. (सं.) शुक्राचार्य्यः ।

असूया, सं. स्त्री. (सं.) परगुणेषु दोषारोपः २. संचारिभावभेदः (सा.) ।

असूर्यंपश्या, वि. स्त्री. (सं.) अवरोध-अन्तःपुर,वर्तिनी, अवगुण्ठनवती, अतिलज्जावती ।

असूल, सं. पुं., दे. 'उसूल' २. दे. 'वसूल' ।

असेसर, सं. पुं. (अं. एसेस्सर) सभासद् ।

असोज, सं. पुं. (सं. अश्वयुज्>) आश्विनमासः।

अस्त, वि. (सं.) गुप्त, तिरोहित २. अदृष्ट, लुप्त ३. नष्ट, ध्वस्त। सं. पुं., तिरोधानं, लोपः, अदर्शनम्।

—गत, वि. (सं. अस्तंगत) लुप्त, अस्तिमित, अदर्शनंगत।

अस्तबल, सं. पुं. (अ.) मन्दुरा, अश्व-वाजि-घोटक,-शाला।

अस्तमन, सं. पुं. (सं. न.) अदर्शनं, तिरोधानं २. सूर्यादीनामस्तोऽस्तमयो वा।

—वेला, सायं, सायंकालः, दिनावसानं, प्रदोषः।

अस्तमित, वि. (सं.) अस्तंगत, अदृष्ट, तिरोहित २. नष्ट, मृत।

अस्तर, सं. पुं. (फ़ा.) अन्तराच्छादनं, अन्तःपटः।

—कारी, सं. स्त्री. (फ़ा.) सुधालेपः २. (पलस्तर) उपनाहः, उपदेहः।

अस्त-व्यस्त, वि. (सं.) सं-प्र-वि-आ,-कीर्ण, संकुल, अव्यवस्थित।

अस्ताचल, सं. पुं. (सं.) अस्त-पश्चिम,-गिरिः-पर्वतः।

अस्तित्व, सं. पुं. (सं. न.) भावः, सत्ता, विद्यमानता।

अस्तु, अव्य. (सं.) यद् भावि तद् भवतु २. बाढं, भवतु, भद्रम् (सब अव्य.)।

अस्तेय, सं. पुं. (सं. न.) स्तेय-मोष-चौर्य-स्तैन्य,-त्यागः।

अस्त्र, सं. पुं. (सं. न.) प्रहरणं, आयुधं, क्षिपणीणिः (स्त्री.) २. शस्त्रम्।

—चिकित्सक, सं. पुं. (सं.) शल्यशास्त्रज्ञः, शस्त्रवैद्यः, शल्यतंत्रविद्।

—चिकित्सा, सं. स्त्री. (सं.) शल्यं, शस्त्रवैद्यकं, शल्यशास्त्रम्।

—विद्या, सं. स्त्री. (सं.) युद्धशास्त्रं, सांग्रामिकं, आयुध-रण,-विद्या।

—वेद, सं. पुं. (सं.) धनुर्वेदः।

—शाला, सं. स्त्री, (सं.) अस्त्र-आयुध,-आगारं, शस्त्रगृहम्।

अस्थि, सं. स्त्री. (सं. न.) कीकसं, कुल्यं, मेदोजम्।

—पंजर, सं. पुं. (सं.) कंकालः, करंकः, देहास्थिसमूहः।

अस्थिर, वि. (सं.) चपल, चंचल, तरल २. चलचित्त, लोलमति।

अस्थिरता, सं. स्त्री. (सं.) चाञ्चल्यं, तारल्यं २. चलचित्तता, मनोलौल्यम्।

अस्पताल, सं. पुं. (अं. हॉस्पिटल) आतुरालयः, चिकित्सालयः, रुग्णागारः, आरोग्यशाला २. औषधालयः।

अस्पृश्य, वि. (सं.) स्पर्शायोग्य २. अस्पर्शनीय, अन्त्यज, हीनवर्ण, दुष्कुलीन।

अस्पृह, वि. (सं.) निस्स्पृह, लोभरहित, अलोलुप।

अस्फुट, वि. (सं.) अस्पष्ट, अव्यक्त, गुप्त, परोक्ष।

अस्बाब, सं. पुं. दे. 'असबाब'।

अस्मिता, सं. स्त्री. (सं.) क्लेशभेदः (यो.) २. अहंकारः।

अस्र[1], सं. पुं. (सं.) कोणः २. केशः।

अस्र[2], सं. पुं. (सं. न.) रक्तं, रुधिरं २. अश्रु (न.), नयनजलम्।

अस्वस्थ, वि. (सं.) रुग्ण, व्याधित, रोगिन् २. व्यथित।

अस्वाभाविक, वि. (सं.) अनैसर्गिक, निसर्ग-प्रकृति-सृष्टक्रम,-विरुद्ध २. कृत्रिम, कृतक।

अस्वास्थ्य, सं. पुं. (सं. न.) रोगः, व्याधिः, गदः, आमयः।

अस्सी, वि. (सं. अशीतिः स्त्री.)। सं. पुं. उक्त संख्या, तद्बोधकावंकौ (८०) च।

अहं, सर्व (सं०)। सं. पुं. अहं,-कारः-कृतिः (स्त्री.)-भावः-पूर्विका, आत्माभिमानः।

अहंकार, सं. पुं. (सं.) गर्वः, दर्पः, मदः, मादः, आटोपः, मानः, उत्सेकः, अहं,-मानः-भावः-कृतिः (स्त्री.) २. अन्तःकरणस्य भेदविशेषः (वे.) ३. महत्तत्त्वजातो द्रव्यविशेषः (सां.) ४. अस्मिता ५. ममत्वम्।

अहंकारी, वि. (सं.-रिन्) दृप्त, गर्वित, अवलिप्त, उद्धत, मत्त, उत्सेकिन्, अभिमानिन्।

अहंवाद, सं. पुं. (सं.) आत्मश्लाघा, अहंकारोक्तिः (स्त्री.), विकत्थनम्।

अह[1], सं. पुं. (सं., अहन् न.) दिनं, दिवसः २. सूर्यः ३. विष्णुः।

अह[2], अव्य. (सं. अहह् अव्य.) आश्चर्यखेदक्लेशादिबोधकमव्ययम्।

अहद, सं. पुं. (अ.) प्रतिज्ञा, सं-प्रति,-श्रवः २. संकल्पः ३. शासनकालः।

—नामा, सं. पुं., प्रतिज्ञा-समय,-पत्रं-लेख्यम् २. सन्धिपत्रम् ।
—शिकन, सं. पुं., प्रतिज्ञालंघिन्, असत्यसन्ध।
—शिकनी, सं. स्त्री., प्रतिज्ञाभंगः, असत्यसन्धत्वम् ।
अहन्, सं. पुं. (सं. न.) दिनं, दिवसः ।
अहनिसि, अव्यः., दे. 'अहर्निश' ।
अहमक, वि. (अ.) जड, मूढ, मूर्ख ।
अहम्मति, सं. स्त्री. (सं.) अहकारः २. अविद्या ।
अहर, सं. पुं. (सं. आहर >) जलाशयः ।
अहरन, सं. स्त्री. (सं. आ+धरणं >) शूर्मः, शूर्मी, शूर्मिका, स्थूणा, शूर्मिः (पुं. स्त्री.) ।
अहरहः, अव्य. (सं.) प्रति-अनु,-दिनं, प्रत्यहं, दिने दिने ।
अहरा, सं. पुं. (सं. आहर >) गोमयपिंडराशिः २. गोमयाग्निः ३. पथिकाश्रमः ४. प्रपा ।
अहरी, सं. स्त्री. (हिं. अहरा) प्रपा २. जलाधारः ।
अहर्निश, क्रि. वि. (सं.-शं) दिवानिशं, रात्रिदिवम् २. नित्यम् (सब अव्य.) ।
अहलकार, सं. पुं. (फ़ा.) राज,-पुरुषः-भृत्यः २. प्रतिनिधिः, प्रतिहस्तः ।
अहलमद, सं. पुं. (फ़ा.) अधिकरणलेखकः ।
अहल्या, वि. (सं.) कर्षणायोग्या (भूमिः) । सं. स्त्री. गौतमपत्नी ।
अहसान, सं. पुं. (अ.) उपकारः, हितं २. कृपा ३. कृतज्ञता ।
—फरामोश, वि. (फ़ा.) कृतघ्न (-घ्नी स्त्री.), अकृत,-घ-वेदिन् ।
—फरामोशी, सं. स्त्री. (फ़ा.) कृतघ्नता, उपकारविस्मरणं, अकृतवेदिता ।
—मंद, वि. (फ़ा.) कृतज्ञ, कृतवेदिन् ।
—मंदी, सं. स्त्री. (फ़ा.) कृतज्ञता, उपकारज्ञता ।
अहह, अव्य. (सं.) आश्चर्यखेदहर्षशोकादिसूचकमव्ययम् ।
अहाँ, अव्य. (अनु.) मा, नो, न ।
अहा, अव्य. (सं. अहह) हर्षप्रशंसादिसूचकमव्ययम् ।
अहाता, सं. पुं. (अ.) परिसरभूमिः (स्त्री.), प्रांगणं (-नं) २. प्राकारः, प्राचीरम् ।
अहार, सं. पुं., दे. 'आहार' ।
अहाहा, अव्य. (सं. अहह) हर्षसूचकाव्ययम् ।
अहिंसक, वि. (सं.) अहिंस्र, अघातुक (-की स्त्री.) २. अदुःखद ।
अहिंसा, सं. स्त्री. (सं.) हिंसा-अपकार-द्रोह-वैर,-त्यागः ।
अहिंस्र, वि. (सं.) दे. 'अहिंसक' ।
अहि, सं. पुं. (सं.) सर्पः २. वृत्रासुरः ३. भूमिः (स्त्री.) ४. सूर्यः ५. राहुः ६. खलः ।
अहित, वि. (सं.) वैरिन्,द्रोहिन्, २. हानिकर (-री स्त्री.) । सं. पुं. (सं. न.) अमंगलं, अभद्रम् ।
अहिफेन, सं. पुं. (सं. पुं. न.) सर्पविषं, सर्पमुखलाला २. (अफ़ीम) अफेनं, अहिफेनम् ।
अहिवात, सं. पुं. (सं. अभिवाच > ?) सौभाग्यं, सधवात्वं, सभर्तृकात्वं, पतिमत्ता ।
अहिवातिन,-ती, (हिं. अहिवात) सौभाग्यवती, सधवा, सभर्तृका ।
अहीर, सं. पुं. (सं. आभीरः) गोपः, गोपालः, गोपालकः, गोसंख्यः, वल्लवः ।
अहीरिन,-री, सं. स्त्री. (सं. आभीरी) गोपी, गोपिका, दोहिनी, गोदोहिनी ।
अहीश, सं. पुं. (सं.) शेषनागः, सर्पराजः २. शेषावतारः (लक्ष्मणबलरामादयः) ।
अहुत, सं. पुं. (सं.) जपः, ब्रह्मयज्ञः, वेदपाठः ।
अहे, अव्य. (सं.) हे, अयि, भोः ।
अहेतु-तुक, वि. (सं.) अकारण, निष्कारण, निर्निमित्त, २. व्यर्थ, निष्फल ।
अहेर, सं. पुं. (सं. आखेटः) मृगया, मृगव्यम् २. वन्यजन्तवः (बहु०) ।
अहेरिया, अहेरी, सं. पुं. (हिं. अहेर) व्याधः, लुब्धकः मृगयुः, आखेटकः ।
अहो, अव्य. (सं) हे, अरे २. करुणाखेदहर्षप्रशंसादिसूचकमव्ययम् ।
अहोभाग्य, सं. पुं. (सं. न.) सौभाग्यं, पुण्योदयः, भाग्योपचयः ।
अहोर-वहोर, क्रि. वि. (हिं. बहुरना) भूयोभूयः वारं वारं (दोनों अव्य०) ।
अहोरात्र, सं. पुं. (सं. पुं. न.) दिवानिशं, अहर्निशं, दिवारात्रं, नक्तंदिवम् (सब अव्य.) ।

आ

आ, देवनागरीवर्णमालाया द्वितीयः स्वरवर्णः, आकारः।

आः, अव्य. (सं.) स्वीकृत्यनुकंपाकोपशोकस्मृत्यादिसूचकमव्ययम्।

आँक, सं. पुं. (सं. अंकः) चिह्नं, अभिज्ञानम् २. संख्याचिह्नं, अंकः ३. वर्णः, अक्षरम् ४. सिद्धान्तः ५. अंशः, भागः ६. वंशः ७. उत्संगः, क्रोडम् ८. रेखा ९. मूल्यसंकेतः।

आँकड़ा, सं. पुं (हिं. आँक) संख्याचिह्नम्. अंकः २. व्यावर्तनकीलः (पेंच)।

आँकड़े, पुं. (हिं. आँक) अंकाः।

आँकना, क्रि. स. (सं. अंकनम्) अंक् (चु., भ्वा. आ. से.), चिह्नयति-मुद्रयति (ना. धा.), लांछ् (भ्वा. प. से.), २. ऊह् (भ्वा. आ. से.), तर्क् (चु.)।

आँकुस, सं. पुं, दे. 'अंकुश'।

आँख, सं. स्त्री. (सं. अक्षि न.) चक्षुस् (न.), वि-,लोचनं, नेत्रं, नयनं, ईक्षणं, दृश्-दृष्टिः (दोनों स्त्री.) २. नयनाकारं चिह्नम् ३. सूचीछिद्रम् ४. कृपा ५. विवेकः ६. निरीक्षणम्।

—अंजनी, सं. स्त्री (सं. अक्षि+अंजनम् >) पक्ष्मपिटिका।

—का गोला, स. पुं., अक्षिगोलकम्।

—का पर्दा, सं. पुं., अक्षिपटलम्।

—मिचौली, सं. स्त्री., अक्षिमेषणी, बालक्रीडाभेदः।

—लगी, सं. स्त्री., उपपत्नी, भुजिष्या।

—आना, मु., नेत्रपाकः।

—उठा कर न देखना, मु., अवगण्-अवधीर् (चु.)।

—उठाना, मु., दृश् (भ्वा. प. अ.) २. अपकर्तुं यत् (भ्वा. आ. से.)।

—का काजल चुराना, मु., चौर्यपाटवम्।

—का तारा, मु., तारका, कनीनिका २. स्नेहभाजनम् २. एकलः पुत्रः।

—की मैल, सं. स्त्री., दूषिका, अक्षिमलम्।

आँखें चार करना, मु., परस्परावलोकनम्।

—चुराना वा छिपाना, मु., निली (दि. आ. अ.) २. परदर्शनं परिहृ (भ्वा. प. अ.)।

—झपकना, मु., निद्रावश (वि.) भू २. निमिष् (तु. प. से.), निमील् (भ्वा. प. से.)।

—ठंढी करना, मु., दर्शनेन प्रसद् (भ्वा. प. अ.)।

—डबडबाना, मु., साश्रुनयन (वि.) भू।

—दिखाना, मु., सरोषं वीक्ष् (भ्वा. आ. से.) २. भी-त्रस् (प्रे.)।

—नीची होना, मु., लज्ज्-त्रप् (भ्वा आ. से.)।

—नीली पीली करना, मु., अत्यन्तं कुप् (दि. प. से.)।

—पर पर्दा पड़ना, मु., विमुह् (दि. प. से.)।

—पर बैठाना, मु., अत्यन्तं संमन् (प्रे.)।

—फड़कना, मु., नेत्रं स्फुर् (तु. प. से.)।

—फेर लेना, मु., अवमन् (दि. आ. से.) २. प्रतिकूल (वि.) जन् (हि. आ. स.)

—बंद कर लेना, मु., मृ (तु. आ. अ.)।

—बिछाना, मु., प्रेम्णा प्रविश् (प्रे.) २. सस्नेहं प्रतीक्ष् (भ्वा. आ. से.)।

—भर आना, मु., साश्रुनेत्र (वि.) जन्।

—मटकाना, मु., सहावं वीक्ष् (भ्वा. आ. से.)।

—मारना, मु., निमेषेण सूच् (चु.)।

—मिंच जाना, मु., मृ (तु. आ. अ.) २. दे. 'झपकना'।

—मिलाना, मु., सहावं दृश् (भ्वा. प. अ.)।

—मीचना, नेत्रे निमील् (भ्वा. प. से.)।

—में घर करना, मु., हृदये वस् (भ्वा. प. अ.)।

—में चरबी छाना, मु., दर्पान्ध (वि.) जन् (दि. आ. से.)।

—में धूल झोंकना, मु., प्रतृ (प्रे.)।

—लगना, मु., स्वप् (अ. प. अ.) २. बद्धभाव (वि.) भू।

—लड़ना, मु., अनुरागः जन्।

—सेंकना, मु., सौन्दर्यदर्शनेन प्रसद् (भ्वा. प. अ.)।

—से गिरना, मु., अवगण्-अवमन् (कर्म.)।

आँगन, सं. पुं. (सं. अंगनं-णन्) अजिरं, प्रांगणम्।

आंगिक, वि. (सं.) शारीरिक, दैहिक, कायिक (-की स्त्री.)। सं. पुं., अभिनयभेदः।

आँच, सं. स्त्री. (सं. अर्चिस् स्त्री., न०) तापः, दाहः, उष्णता, उष्मः २. अग्नि,-ज्वाला-शिखाजिह्वा ३. अग्निः, अनलः ४. हानिः (स्त्री.) ५. विपत्तिः (स्त्री.)।

—आना वा खाना वा पहुँचना वा लगना, क्रि. अ., तप् (दि. आ. अ.), उष्णी भू।
—देना, क्रि. स., तप् (प्रे.)।
—न आने देना, मु., कष्टात् त्रै (भ्वा. आ.अ.)।
आँचल, सं. पुं. (सं. अंचलः-लम्) पटान्तः, वस्त्रप्रान्तः २. प्रान्तभागः।
—देना, मु., स्तन्यं दा (जु. उ. अ.)।
—में बाँधना, मु., स्मरणार्थं पटप्रान्ते ग्रंथिदानम् २. नित्यं पार्श्वे स्थापनम्।
आँजन, सं. पुं., दे. 'अंजन'।
आँट, सं. स्त्री. (हिं. अंटी) करतले अंगुष्ठतर्जन्योर्मध्यस्थानम् २. पणः, ग्लहः (दाँव) ३. विरोधः ४. नीवी, बंधनम् ५. पोटलिका।
—साँट, सं. स्त्री., सहकारिता २. संश्लेषः ३. कुमंत्रणा।
आँटी, सं. स्त्री. (हिं. आँटना) लंबतृणपोटलिका २. सूत्र,-पंजी-पंजिका ३. बालक्रीडोपयोगी काष्ठखंडभेदः ४. शाटीग्रन्थिः (पुं.)।
आँठी, सं. स्त्री. (सं. अष्ठिः स्त्री.) फल,-बीजगर्भः २. ग्रन्थिः ३. नवोढास्तनः।
आँत, सं. स्त्री. (सं. अन्त्रम्) पुरीतत् (पु. न.) परितत् (पुं. न.)
—उतरना, मु., अंत्रस्य सेन अंत्रवृद्ध्या वा पीड् (कर्म.)।
—छोटी, क्षुद्रान्त्रम्।
—बड़ी, बृहदन्त्रम्।
आंतरिक, वि. (सं.) अन्तर्गत, अन्तःस्थ, आन्तर, आभ्यन्तर (-री स्त्री.), अन्तः-(उ. अन्तर्वेदना) २. मानसिक, हार्दिक, आत्मिक।
आंदोलन, सं. पुं. (सं. न.) चेष्टा, प्रवृत्तिः (स्त्री) २. असकृत्कंपनम् ३. क्षोभः, विप्लवः, प्रकोपः।
आँधी, सं. स्त्री. (सं. अंधस् >) वात्या, चंड मरुत्-अति,-वातः, प्रभंजनः, प्रकंपनः।
आँध्र, सं. पुं. (सं. आन्ध्राः) दक्षिणापथे प्रान्तविशेषः २. आन्ध्रवासिन्।
आँय-बाँय, सं. स्त्री. (अनु०) प्रलापः, जल्पितम्।
आँव, सं. स्त्री. (सं. आम >) श्लेष्मन् (पुं.)।
—गिरना, क्रि. अ. आमातिसारेण पीड् (कर्म०)।
आँवल, सं. पुं. (सं. उल्वम्) कलल (पुं., न.), जरायु (न.)।
—नाल, सं. स्त्री., नाभि,-नालं-नाडी।
आँवला, सं. पुं. (सं. आमलकः-कम्-की) अमृता, शिवा, शान्ता, धात्री, श्रीफला।
आँवाँ, सं. पुं. (सं. आपाकः) कुम्भकारपात्रपाकस्थानम्।
आंशिक, वि. (सं.) आंगिक, भागिक, खाण्डिक।
आँसू, सं. पुं. (सं. अश्रु न.) वाष्पः, अस्रं, नेत्र-नयन,-जलं-वारि-उदकम्।
—गिराना, क्रि. स., रुद् (अ. प. से.)।
—पी जाना, मु., अश्रूणि अव-सं-नि, रुध् (रु. उ. अ.)।
—पोंछना, मु., आ-समा,-श्वस् (प्रे.)।
आई, सं. स्त्री. (हिं. आना) मृत्युः। क्रि. अ. आगता।
आईना, सं. पुं. (फ़ा.) मुकुरः, दर्पणः।
आक, सं. पुं. (सं. अर्कः) मन्दारः, क्षीरदलः, तूलफलः, सूर्याह्वः, सदापुष्पः।
—की बुढ़िया, मु., मन्दारपुष्पम् २. अतिवृद्धा नारी।
आकर, सं. पुं. (सं.) ख(खा)नी-निः (स्त्री.) उत्पत्तिस्थानम् २. निधिः, भाण्डागारम् ३. प्रकारः, भेदः।
—भाषा, सं. स्त्री., मूलप्राचीनभाषा (उ० हिन्दी की आकरभाषा संस्कृत, उर्दूकी फ़ारसी।
आकर्षक, वि. (सं.) आकर्षणकर २. मनोहर।
आकर्षण, सं. पुं. (सं. न.) आकर्षः, आवर्जनम्, अनुकर्षः, अनुकर्षणम्।
—करना, क्रि. स., आ-समा,-कृष् (भ्वा. प. अ.), आवृज् (चु.) २. विमुह् (प्रे०)।
आकर्षित, वि. (सं.) कृताकर्षण २. प्रलोभित।
आकलन, सं. पुं. (सं. न.) ग्रहणम् २. संचयः ३. गणनम् ४. अनुष्ठानम् ५. निरीक्षणम्।
आकस्मिक, वि. (सं.) अकाण्ड, अचिन्तितपूर्व, हठाज्जात।
आकांक्षा, सं. स्त्री. (सं.) इच्छा, अभिलाषः, स्पृहा, वाञ्छा २. अपेक्षा ३. अनुसंधानम् ४. वाक्ये शब्दस्य शब्दान्ताश्रितत्वम्।
आकांक्षी, वि. (सं.-क्षिन्) इच्छुक, अभिलाषिन्, ईप्सु, सस्पृह।

आकार, सं. पुं. (सं.) आकृतिः-मूर्त्तिः (स्त्री.), रूपम् २. कायपरिमाणम् ३. अवयवसंस्थानम् ४. चिह्नम् ५. चेष्टा ६. 'आ' इति वर्णः ७. आह्वानम् ।

—गुप्ति, सं. स्त्री. (सं.) अवहित्था ।

आकालिक, वि. (सं.) असामयिक ।

आकाश, सं. पुं. (सं. पुं. न.) गगनं, नभस्, वियत्, व्योमन् (सब न.), अंबरं, अन्तरिक्षं, खं, नाकः, दिव्, द्यो (दोनों स्त्री.), विहायस् (पुं. न.), विहायसः, अभ्रं, पुष्करं, अनन्तं, विष्णुपदं, तारापथः ।

—कुसुम, सं. पुं. (सं. न.) खपुष्पं, शश,-विषाणं-शृङ्गम्, असंभवं वस्तु (न.) ।

—गंगा, सं. स्त्री. (सं.) मन्दाकिनी, स्वर्णदी ।

—चारी, वि. (सं.-रिन्) खेचर, नभश्चर (-चरी स्त्री.) । सं. पुं. सूर्यादिग्रहाः २. वायुः ३. खगः ४. देवः ५. राक्षसः ।

—बेल, सं. स्त्री. (सं.-वल्ली) अमरवल्लरी, खवल्ली, व्योमलतिका ।

—भाषित, सं. पुं. (सं. न.) गगनलपितम्, नाट्ये भाषणभेदः ।

—वाणी, सं. स्त्री. (सं.) देववाणी, अशरीरिणी वाक् (स्त्री.) ।

—वृत्ति, सं. स्त्री. (सं.) अनियतो धनागमः ।

—चूमना, मु., अभ्रं लिह् (अ० प. अ.), गगनं चुम्ब् (भ्वा. प. से.) ।

—पाताल एक करना, मु., अत्यर्थं प्रयत् (भ्वा. आ. से.) ।

—पाताल का अन्तर, मु., महदन्तरं, महान् भेदः ।

आकुञ्चन, सं. पुं. (सं. न.) संकोचनं, समाकर्षः, संपीडनं, प्रसृतस्य संक्षेपणं, वक्रत्वसम्पादनम् ।

आकुंचित, वि. (सं.) संकोचित २. वक्र ।

आकुल, वि. (सं.) व्याकुल, उद्विग्न, व्यग्र, क्षुब्ध, अशान्त, व्यस्त, विह्वल, कातर २. समाकीर्ण, संकुल ।

आकुलता, सं. स्त्री. (सं.) उद्वेगः, क्षोभः, अशान्तिः (स्त्री.) ।

आकूति, सं. स्त्री. (सं.) अभिप्रायः, आशयः २. उत्साहः ३. सदाचारः ।

आकृति, सं. स्त्री. (सं.) आकारः, रूपं, मूर्त्तिः (स्त्री.) २. मुखं, आननम् ३. अवयवसंस्थानं, शरीररचना ४. मुद्रा, चेष्टा ५. जातिः (स्त्री. न्या.) ।

आकृष्ट, वि. (सं.) आकर्षित, कृताकर्षण ।

आक्रमण, सं. पुं. (सं. न.) आक्रमः, अवस्कन्दः, अभिद्रवः, अभिप्रयाणं, आपातः २. रोधनं, अव-उप,-रोधः ३. आक्षेपणं, निन्दनम् ।

आक्रांत, वि. (सं.) अभिद्रुत, अभिप्रयात, २. अभि-परा-वशी,-भूत ३. परिवेष्टित ४. व्याप्त, आकीर्ण ।

आक्रोश, सं. पुं. (सं.) शापः, आक्षेपः, गालीदानम् ।

आक्षेप, सं. पुं. (सं.) अपवादः, दोषारोपः २. पातनं, प्रासनम् ३. कटूक्तिः (स्त्री.) ४. अंगकंपयुतो वातरोगभेदः ।

आक्साइड, सं. पुं. (अं.) जारेयम् ।

आक्सिजन, सं. पुं. (अं.) जारकं, ओषजनम् ।

आखंडल, सं. पुं. (सं.) इन्द्रः ।

—सूनु, सं. पुं. (सं.) अर्जुनः ।

आखत, सं. पुं. (सं. अक्षताः) अखंडितव्रीहयः । वि., अखंडित ।

आखर, सं. पुं., दे. अक्षर ।

आखिर, वि. (अ०) अन्तिम, अन्त्य २. समाप्त । सं. पुं. अन्तः, अवसानम् ३. परिणामः, फलम् । क्रि. वि., अन्ततः २. विवश (वि.) भूत्वा ३. अवश्यम् ४. कथंचित् ।

—कार, क्रि. वि., अन्ते, अन्ततः ।

आखिरी, वि. (फा.) अन्तिम, अन्त्य, चरम ।

आखेट, सं. पुं. (सं.) मृगया, दे. 'शिकार' ।

आखेटक, सं. पुं. (सं.) व्याधः, आखेटिन् ।

आख्या, सं. स्त्री. (सं.) नामन् (न.), संज्ञा २. यशस् (न.), कीर्तिः (स्त्री.) ३. विवरणं, व्याख्या ।

आख्यात, वि. (सं.) विख्यात, प्रसिद्ध २. कथित ३. तिङन्तक्रिया ।

आख्यान, सं. पुं. (सं. न.) कथा, आख्यायिका २. वर्णनं, वृत्तान्तः ।

आख्यायिका, सं. स्त्री. (सं.) कथा, वृत्तान्तः, आख्यानम् २. आख्यानभेदः ।

आगन्तुक, वि. (सं.) आयातृ, आगन्तृ २. अतिथि, अभ्यागत ।

आग, सं. स्त्री. (सं. अग्निः) अनलः, पावकः, दहनः, ज्वलनः, वह्निः, कृशानुः, हुताशनः, हुतवहः, उषर्बुधः, हव्यवाहनः, चित्रभानुः, शुक्रः, शुचिः २. तापः ३. कामाग्निः ४. वात्सल्यम् ५. ईर्ष्या । वि., अत्युष्ण २. क्रुद्ध ।

—का पुतला, मु., क्रोधिन् २. चपल ३. निपुण ।

—खाना अँगार हगना, मु., दुष्कृतस्य फलं विपद् (स्त्री.), यो यत् वपति बीजं हि सोपि तल्लभते फलम् ।

—पानी (फूस) का वैर, मु., सहजं वैरम्, शाश्वतिको विरोधः ।

—बबूला (बगूला) होना, मु., नितरां कुप् (दि. प. से.) ।

—भड़काना, मु., वैरोद्दीपनं, क्रोधोद्दीपनम् ।

—लगना, मु., ज्वलनम् २. कुप् ३. ईर्ष्य् (भ्वा. प. से.) ४. वस्तूनां बहुमूल्यता ।

—लगाना, मु., आवेशवर्धनम्, क्रोधोत्पादनम् २. नाशनम् ।

—लगा कर पानी को दौड़ना, मु., कलिमुत्पाद्य शान्तये प्रयत्नः ।

—लगने पर कूआँ खोदना, मु., संदीप्ते भवने कूपखननम् ।

—लगा कर तमाशा देखना, मु., कलिमुत्पाद्य मनोविनोदनम् ।

—होना, मु., अत्यर्थं कुप् ।

पानी में आग लगाना, मु., अशक्यकरणं, खपुष्पत्रोनटनम् ।

पेट की आग, मु., क्षुधा, बुभुक्षा ।

आगत, वि. (सं.) प्राप्त, उपस्थित २. अतिथि ।

—स्वागत, सं. पुं. (न.) आतिथ्यं, सत्कारः ।

आगम, सं. पुं. (सं.) आगमनं, प्राप्तिः (स्त्री.) २. भावि-आगामि,-कालः ३. भाग्यं, दैवम् ४. संगमः, समागमः ५. आयः ६. प्रकृतिप्रत्ययानुपपत्तौ आगन्तुको वर्णः (व्या.) ७. उत्पत्तिः (स्त्री.) ८. शब्दप्रमाणम् (यो.) ९. वेदः, शास्त्रम् १०. तन्त्रशास्त्रम् ११. नीतिशास्त्रम् ।

—ज्ञानी, वि. (सं.-ज्ञानिन्) पूर्ववादिन्, अग्रनिरूपक, सिद्ध, आदे (प्+ट्+) = ष्ट ।

आगमन, सं. पुं. (सं. न.) आगतिः (स्त्री.), आगमः २. आयः, लाभः ।

आगर[1], सं. पुं. (सं. आकरः) ख (खा) नी-निः (स्त्री.) २. समूहः ३. निधिः ४. लवण-गर्तः ।

आगर[2], सं. पुं. (सं. अर्गलं-ला) द्वारविष्कंभः ।

आगर[3], सं. पुं. (सं. आगारम्) गृहं, सदनम् २. तृण,-पटलं-छदिस् (स्त्री.) ।

आगर[4], वि. (सं. अग्रय) श्रेष्ठ, उत्तम २. दक्ष ।

आगा, सं. पुं. (सं. अग्रम्) अग्र-पुरो,-भागः २. उरस्, वक्षस् (दोनों न.) ३. मुखम् ४. मस्तकम् ५. जननेन्द्रियम् ६. कंचुकादीनामग्रभागः ७. सेनाग्रम् ८. नौकाग्रभागः ९. गृहाग्रवर्ति अंगनम् १०. अंचलः-लम् ११. आगामिकालः १२. परिणामः ।

—पीछा, सं. पुं. (सं. अग्र + पश्च >) संशयः, विमर्शः २. परिणामः ३. अग्रपश्चभागौ ।

—पीछा करना, मु., दोलायते (ना. व्या.) ।

—पीछा सोचना, मु., परिणामचिन्तनम् ।

आगामी, वि. (सं.-मिन्) भाविन्, भविष्यत् ।

आगार, सं. पुं. (सं. न.) अगारं, गृहं, गेहम्, स्थानम् २. कोषः ।

आगे, क्रि. वि. (सं. अग्रे) अग्रतः, पुरतः, पुरस्तात् (सब अव्य.) २. समक्षं, अभिमुखम्, मुखम्, सम्मुखम् (सब अव्य.) ३. जीवनकाले, उपस्थितौ ४. आगामिसमये ५. अनन्तरं, तदनु ६. पूर्वं ७. क्रोडे ।

—आना, मु., प्रत्युद्गम् (भ्वा. प. अ.) ।

—निकलना, मु., अतिशी (अ. आ. से.) ।

—पीछे, मु., आनुपूर्व्येण, अनुपूर्वशः २. प्रत्यक्षं परोक्षं च (वा) ३. पूर्वं पश्चाद् वा ४. यथावकाशम् ५. अक्रमम् ।

आग्नेय, वि. (सं.) अग्नि,-मय-संबंधिन् २. अग्निदेवताक ३. दाहक । सं. पुं., (सं. न.) सुवर्ण २. रुधिरं ३. घृतं ४. दीपनौषधम् । सं. पुं. (सं. पुं.) कार्तिकेयः २. अगस्त्यः ३. देशविशेषः ४. अग्निपूजकः ५. ब्राह्मणः ६. अग्निकोणः ७. ज्वालामुखः ।

—अस्त्र, सं. पुं. (सं. न.) अग्निवर्षकोऽस्त्रभेदः ।

आग्नेयी, सं. स्त्री. (सं.) अग्नेः पत्नी २. अग्निदीपनमौषधम् ३. दक्षिणपूर्वा दिशा ।

आग्रह, सं. पुं. (सं.) अति-,निर्बन्धः, अति,-याचना-प्रार्थना २. तत्परता, परायणता ३. बलं, आवेशः ।

आग्रहायण, सं. पुं. (सं.) मार्गशीर्षमासः ।

आग्रही, वि. (सं.-हिन्) अविनेय, निर्बन्धवत्, दुराग्रह, स्वैरिन् ।

आघात, सं. पुं. (सं.) प्रहारः, आक्रमणम् २. प्रसारणं, प्रक्षेपः ३. वधस्थानम् ।

आघ्राण, सं. पुं. (सं. न.) गन्धग्रहणम् २. अतितृप्तिः (स्त्री.), पूर्णकामता ।

आचमन, सं. पुं. (सं. न.) उपस्पर्शः, आच (चा) मः, जलपानम् ।

—करना, क्रि. स., आचम् (भ्वा. प. से., आचामति ।

आचमनी, सं. स्त्री. (सं. आचमनीय >) आचमनोपयोगी चमसभेदः ।

आचरण, सं. पुं. (सं. न.) अनुष्ठानं २.आचारः, व्यवहारः ३. स्वच्छता ४. रथः ।

आचरणीय, वि. (सं.) अनुष्ठातव्य २. कर्तव्य ।

आचरित, वि. (सं.) कृत, विहित, अनुष्ठित ।

आचार, सं. पुं. (सं.) व्यवहारः २. चरितं, चरित्रं, चारित्रं, वृत्तं, शीलम् ३. शौचं, शुद्धिः (स्त्री.) ४. स्नानम् ५. आचमनम् ।

—भ्रष्ट, वि. (सं.) दुर्वृत्त, चरित्रहीन, अनाचार ।

—विचार, सं. पुं. (सं.-रौ) चरित्रं मनोभावश्च २. चरित्रम्, दे. 'आचार' ।

आचार्य, सं. पुं. (सं.) उपनेतृ, गुरुः २. वेदाध्यापकः ३. यज्ञे कर्मोपदेशकः ४. पुरोहितः ५. उपाध्यायः, अध्यापकः ६. ब्रह्मसूत्राणां चत्वारः प्रधानभाष्यकाराः-सर्वश्रीशंकररामानुजमध्ववल्लभाचार्याः ६. वेदभाष्यकृत् ७. प्रकाण्डपण्डितः ।

—कुल, सं. पुं. (सं. न.) गुरुकुलम् ।

आचार्या, सं. स्त्री. (सं.) मंत्रोपदेष्ट्री, वेदभाष्यकर्त्री, वेदाध्यापिका ।

आचार्याणी, सं. स्त्री. (सं.-नी) आचार्यपत्नी ।

आचार्यी, वि. स्त्री. (सं.) आचार्यसंबंधिनी ।

आच्छन्न, वि. (सं.) आच्छादित, आवृत २. गुप्त, तिरोहित ।

आच्छादक, वि. (सं.) आवरक, पिधायक, वेष्टक ।

आच्छादन, सं. पुं. (सं. न.) आवरणं, पुटं, वेष्टनं, अवगुंठनं, पिधानं २. प्रच्छदपटः ३. आवरणक्रिया ।

आच्छादित, वि. (सं.) आवृत, पिहित, तिरोहित ।

आज, क्रि. वि. (सं. अद्य अव्य.) वर्तमाने दिने २. अद्यत्वे, अस्मिन् काले । सं. पुं., वर्तमानो दिवसः २. संप्रति, साम्प्रतम् ।

—कल, क्रि. वि. (सं. अद्यकल्यम्) एतेषु दिनेषु २. अद्यत्वे, अद्य श्वो (कल्यं) वा ।

—तक, क्रि. वि. अद्य,-यावत्-पर्यन्तम्, अधुना-इदानीं,-यावत्-पर्यन्तम् ।

—कल करना, मु., व्याक्षिप् (तु. उ. अ.) ।

—कल का मेहमान, मु., मरणासन्न, आसन्ननिधन, मुमूर्षु ।

आजन्म, क्रि. वि. (सं.) यावज्जीवम् २. जन्मनः प्रभृति ।

आजा, सं. पुं. (सं. आर्यः >) पितामहः ।

आजाद, वि. (फा.) दे. 'स्वतंत्र' ।

आजादी, सं. स्त्री. (फा.) दे. 'स्वतंत्रता' ।

आजानु, वि. (सं.) जानु-अष्ठीवत्,-पर्यन्त ।

—बाहु, वि. (सं.) जानुस्पृग्बाहु २. दीर्घबाहु ३. वीर, शूर ।

आजीवन, क्रि. वि. (सं. न.) दे. 'आजन्म' ।

आजीविका, सं. स्त्री. (सं.) आजीवः, वृत्तिः (स्त्री.), उप-,जीविका ।

आज्ञा, सं. स्त्री. (सं.) आ-नि,-देशः, शासनं, नियोगः २. स्वीकृतिः-अनुमतिः (स्त्री.) ।

—देना, क्रि. स., आ-नि-समा,-दिश् (तु. उ. अ.), आज्ञा (प्रे. आज्ञापयति) ।

—मानना, क्रि. स., आज्ञां अनुवृत् (भ्वा. आ. से.)—पा, (प्रे. पालयति) ।

—कारी, वि. (सं.-रिन्) आज्ञा-वचन,-अनुवर्तिन्-ग्राहिन्-सेविन्-पालक ।

—पत्र, सं, पुं. (सं. न.) निदेश-आदेश,-पत्रम् ।

—पालक, वि. (सं.) दे. 'आज्ञाकारी' ।

—पालन, सं. पुं. (सं. न.) आज्ञा,-अनुवर्तनं-कारिता ।

—भंग, सं. पुं (सं.) आज्ञातिक्रमः, आज्ञोल्लंघनम् ।

आज्य, सं. पुं. (सं. न.) घृतम् ।

आटा, सं. पुं. (सं. अट्टम् वा अट् >) गोधूम-चूर्ण, अन्न-, चूर्ण, क्षोदः, पिष्टान्नं, गुंडिकः ।

—गीला होना (गरीबी में), मु., दारिद्र्ये कष्टान्तरापातः ।

आटे दाल का भाव मालूम होना, मु., व्यवहारज्ञानम् ।

आटे दाल की फिक्र, मु., आजीविकाचिन्ता ।

आटोप, सं. पुं. (सं.) आच्छादनम् २. आडंबरः ३. दर्पः ४. उदरगुडगुडाशब्दः ।

आठ, वि. (सं. अष्टन्) । सं. पुं., उक्ता संख्या, तद्बोधकोंऽकः (८) च ।

—आठ आँसू रोना, मु., अश्रुधारापातनम् ।

आठों प्रहर, मु., अहर्निशं, दिवानिशम् (अव्य.)

आठवाँ, वि. (हिं. आठ) अष्टम (-मी स्त्री.) ।

आडंबर, सं. पुं. (सं.) गंभीरशब्दः २. तूर्यरवः ३. गजगर्जनम् ४. कपटवेषः, दंभः, मिथ्यायोजनम् ५. आच्छादनम् ६. पटमंडपः ७. पटहः ।

आड़, सं. स्त्री. (सं. अल्=रोकना >) व्यवधानं, तिरस्करिणी, प्रतिसीरा, ज(य)वनिका २. आश्रयः, शरणम् ३. प्रतिबन्धः, विघ्नः ४. इष्टकाखण्डः ५. स्थूणा, उपस्तम्भः ।

आड़ा, सं. पुं. (सं. आली >) रेखायुतो वस्त्रभेदः २. (पोतस्य) स्थूल-बृहत्,-काष्ठम् । वि., अनुप्रस्थ, दिगन्तसम, समस्थ २. तिर्यच्, जिह्म ।

आड़े आना, मु., बाध् (भ्वा. आ. से.) २. विपत्तौ साहाय्यं दा (जु. उ. अ.) ३. द्विष् (अ. उ. अ.) ।

आड़े हाथों लेना, मु., निभर्त्स् (चु.) ।

आढ़, सं पुं. (सं. आढकः-कम्) चतुःप्रस्थ-परिमाणम्, द्रोणचतुर्थांशः ।

आढ़त, सं. स्त्री. (हिं. आढ़ना = जमानत देना) परार्थविक्रयः २. परार्थविक्रयभृतिः (स्त्री.) ।

आढ़ती, सं. पुं. (हिं. आढ़त) परार्थविक्रेतृ ।

आढ्य, वि. (सं.) सम्पन्न, धनिन् २. युक्त ।

आतंक, सं. पुं. (सं.) भयं, त्रासः २. प्रतापः, गौरवम् ३. रोगः, ज्वरः ४. मुरजध्वनिः ।

आततायी, सं. पुं. (सं.-यिन्) अग्निदः २. गरदः, विषदः ३. शस्त्रपाणिः ४. धनापहः ५. क्षेत्रहारिन् ६. दारापहारिन् । (-यिनी स्त्री.) ।

आतप, सं. पुं. (सं.) दिनज्योतिस् (न.), सूर्यालोकः, तापनः २. उष्णता ३. ज्वरः ।

आतपत्र, सं. पुं. (सं. न.) छत्रं, आतप-घर्म,-वारणम् ।

आतश, सं. स्त्री. (फ़ा.) अग्निः ।

—बाजी, सं. स्त्री. (फा.) अग्निक्रीडनकानि, (न. बहु.), अग्निक्रीडा ।

आतशक, सं. पुं. (फा.) उपदंशः, मेढ्ररोगभेदः ।

आतिथेय, वि. (सं.) अतिथि,-सेवक-पूजक ।

आतिथ्य, सं. पुं. (सं. न.) अतिथिसेवा २. अतिथ्यर्थवस्तु (न.) ।

आतिशय्य, सं. पुं. (सं. न.) अतिशयत्वं, आधिक्यं, बहुत्वम् ।

आतुर, वि. (सं.) आकुल, व्याकुल, व्यग्र, उद्विग्न, अधीर २. उत्सुक, उत्कण्ठित ३. दुःखित ४. रोगिन् ।

आतुरता, सं. स्त्री. (सं.) व्याकुलता, व्यग्रता २. त्वरा, संभ्रमः ।

आत्म, वि. (सं. आत्मन् >) स्व, निज, स्वीय, स्वकीय ।

—अभिमान, सं. पुं. (सं. न.) स्वप्रतिष्ठा, स्वगौरवम् ।

—अवलंबी, वि. (सं.-विन्) आत्मविश्वासिन्, स्वाश्रित ।

—उद्धार, सं. पुं. (सं.) मुक्तिः (स्त्री.), मोक्षः ।

—उन्नति, सं. स्त्री. (सं.) आत्मकल्याणम् २. स्वाभ्युदयः ।

—घात, सं. पुं. (सं.) आत्म-स्व-निज,-हत्या-घातः-वधः, प्राण-जीवित,-त्यागः-उत्सर्गः ।

—घात करना, क्रि. स., आत्मानं हन् (अ. प. अ.) ।

—घाती, वि. (सं.) आत्म,-घातक-घातिन्-नाशिन्-हन् ।

—ज, सं. पुं. (सं.) पुत्रः २. कामदेवः ३. रुधिरम् ।

—ज्ञान, सं. पुं. (सं. न.) ईश-जीव,-ज्ञानम् २. ब्रह्मसाक्षात्कारः ।

—त्याग, सं. पुं. (सं.) परहिताय स्वार्थत्यागः ।

—दर्शन, सं. पुं. (सं. न.) समाधिना जीवेश्वरदर्शनम् ।

—**निवेदन,** सं. पुं. (सं. न.) आत्मसमर्पणं, सर्वस्वार्पणम् २. स्वविषये कथनम् ३. भक्तिभेदः।

—**प्रशंसा,** सं. स्त्री. (सं.) आत्मश्लाघा, स्वस्तुतिः, निजनुतिः (दोनों स्त्री.)।

—**भू,** वि. (सं.) निजशरीरज २. स्वयंभू। सं. पुं., पुत्रः २. कामदेवः ३. ब्रह्मन् (पुं.) ४. विष्णुः ५. शिवः।

—**विश्वास,** सं. पुं. (सं.) स्व-निज,-प्रत्ययः-विश्रम्भः।

—**विद्या,** सं. स्त्री. (सं.) ब्रह्मविद्या, अध्यात्मविद्या, आत्मज्ञानम् २. मोहनविद्या (=मेसमरिजम)।

—**हत्या,** सं. स्त्री., दे. 'आत्मघात'।

—**आत्मक,** वि. (सं.)-अन्वित,-रूप,-युक्त,-मय (उ. गद्यात्मक =गद्य,-रूप-मय)।

आत्मा, सं. स्त्री. (सं. आत्मन् पुं.) जीवः,-चेतनः, जीवात्मन् २. चित्तम् ३. बुद्धिः (स्त्री.) ४. अहङ्कारः ५. मनस् (नः) ६. ब्रह्मन् (न.), परमात्मन् (पुं.) ७. देहः ८. धृतिः (स्त्री.) ९. स्वभावः, धर्मः १०. सूर्यः ११. अग्निः १२. वायुः।

आत्मिक, वि. (सं.) अध्यात्म-(समास में) आत्म,-विषयक-सम्बन्धिन् २. स्वीय ३. मानसिक।

आत्मीय, वि. (सं.) स्वीय, स्वकीय। सं. पुं., स्वजनः, बन्धुः, मित्रम्।

आत्मीयता, सं. स्त्री. (सं.) बन्धुत्वं, सौहार्दम्।

आत्यन्तिक, वि. (सं.) अनन्त, असीम, अत्यधिक।

आत्रेय, वि. (सं.) अत्रिगोत्र, अत्रिसंबन्धिन्। सं. पुं. अत्रिपुत्रः।

आथर्वण, सं. पुं. (सं.) अथर्ववेदज्ञो ब्राह्मणः, पुरोहितः २. अथर्वपुत्रः ३. अथर्ववेदे विहितं कर्मन् (न.)।

आदत, सं. स्त्री. (अ.) शीलं, स्वभावः, प्रकृतिः (स्त्री.) २. अभ्यासः, नित्यप्रवृत्तिः (स्त्री.)।

आदम, सं. पुं. (अ.) आदिमः, प्रजापतिः (इस्लाम) २. मनुष्यः।

आदमियत, सं. स्त्री. (अ.) मानवता, मनुष्यत्वं २. सभ्यता, शिष्टता।

आदमी, सं. पुं. (अ.) मनुष्यः, मनुष्यजातिः (स्त्री.) २. दासः।

—**बनना,** मु., सभ्यतां शिक्ष् (भ्वा. आ. से.)। फ़ी—, क्रि. वि., प्रतिमनुष्यम्, प्रतिजनम्।

आदर, सं. पुं. (सं.) संमानः, सत्कारः, सत्क्रिया, प्रतिष्ठा, अर्हणा, अर्चा।

—**करना,** क्रि. स., आदृ-(द्+ऋ)(तु. आ. अ.), सत्कृ, पूज्-अर्च् (चु.), संमन्-संभू (प्रे.)।

—**पाना,** क्रि. अ., सत्-पुरस्,-कृ (कर्म.), आदृ-(द्+ऋ) पूज्-सेव् (कर्म.)।

—**से,** क्रि. वि., सादरं, सप्रश्रयम्, आदरेण।

आदरणीय, वि. (सं.) मान्य, माननीय, पूज्य, सत्कार्य, पूजनीय।

आदर्श, सं. पुं. (सं.) मुकुरः, दर्पणः, आत्मदर्शः २. प्रतिरूपं, प्रतिमा, प्रतिमानम् ३. टीका, भाष्यं, व्याख्या ४. अतुल्य, अनुपम।

आदान, सं. पुं. (सं. न.) ग्रहणं, स्वीकारः, स्वीकरणम्।

—**प्रदान,** सं. पुं. (सं. न.) ग्रहणवितरणं, दानादानं २. परस्परतितिक्षा, न्याय्याचरणम्।

आदि, वि. (सं.) प्रथम, अग्रिम, आदिम, आद्य। सं. पुं., उपक्रमः, आरंभः २. मूलं, उत्पत्तिहेतुः। अव्य.,-प्रभृति,-आद्य (ससासान्त में)।

—**कवि,** सं. पुं. (सं.) वाल्मीकिः।

—**कारण,** सं. पुं. (सं. न.) मूलकारणम् (प्रकृतिः ईश्वरो वा)।

—**से अन्त तक,** क्रि. वि., आद्यन्तम्, आदितोऽन्तं यावत्।

आदिक, अव्य. (सं. वि.)-आदि,-आद्य, -प्रभृति (सब समासान्त में)।

आदित्य, सं. पुं. (सं.) अदितिपुत्रः २. देवः ३. सूर्यः ४. इन्द्रः ५. वामनः ६. वसुः ७. विश्वेदेवाः ८. मन्दारवृक्षः।

—**वार,** सं. पुं. (सं.) रवि-भानु,-वारः-वासरः

आदिम, वि. (सं.)प्रथम, आद्य, आदि।

—**निवासी,** सं. पुं., (सं.-सिन्) आदिवासिन्।

आदिष्ट, वि. (सं.) आज्ञप्त,आज्ञापित, लब्धाज्ञ, प्राप्तादेश।

आदी, वि. (अ.) अभ्यस्त, अभ्यासिन्।

आदृत, वि. (सं.) सत्कृत, संमानित, पूजित।

आदेय, वि. (सं.) ग्रहणीय, परि-प्रति,-ग्राह्य।

आदेश, सं. पुं. (सं.) आज्ञा, निदेशः, शासनं, नियोगः, देशना २. उपदेशः ३. प्रणामः ४. ग्रहफलम् ५. वर्णस्य वर्णान्तरोत्पत्तिः (स्त्री., व्या.)।

आद्यंत, क्रि. वि. (सं. न.) दे. 'आदि से अन्त तक'।

आद्य, वि. (सं.) प्रथम, आदिम, आदि २. अग्रय, प्रधान।

आद्योपांत, क्रि. वि., दे. 'आदि से अन्त तक'।

आध, वि. (सं. अर्द्ध) सामि-(अव्य. उ. सामिभुक्तं)।

—आना, सं. पुं,. अर्द्धांषः।

आधा, वि. (सं. अर्द्ध) सामि। सं. पुं., अर्द्धः, अर्द्धन्, अर्द्ध,-भागः-अंशः।

—आना, सं. पुं., अर्द्धाणः-णकः।

—सीसी, सं. स्त्री., अर्द्धावभेदकः, सूर्यावर्त्तः, अर्द्धशिरोवेदना।

—तीतर आधा बटेर, मु., चित्रविचित्र, असंगत।

आधान, सं. पुं. (सं. न.) स्थापनं २. न्यसनम्।

आधार, सं. पुं. (सं.) आश्रयः, अवलंबनम् २. आलवालम् ३. पात्रम् ४. गृह-भित्ति,-मूलं, वेश्मभूः (स्त्री.) ५. आश्रयदायकः, पालकः।

—आधेय संबंध, सं. पुं. (सं.) आश्रयाश्रयि-संबंधः (उ. घृतपात्रयोः)।

—होना, मु., स्तोका तृप्तिः (स्त्री.) भू।

आधि, सं. स्त्री. (सं. पुं.) मानसी व्यथा, चिन्ता २. बन्धकः, न्यासः, निक्षेपः।

आधिकारिक, सं. पुं. (सं. न.) मूलकथावस्तु (न.) २. कर्मचारिन्। वि., अधिकारयुक्त।

आधिक्य, सं. पुं. (सं. न.) बाहुल्यं, प्राचुर्यं, अतिशयः।

आधिदैविक, वि. (सं.) देवप्रेरित, देवताकृत (उ. अतिवृष्टिः)।

आधिपत्य, सं. पुं. (सं. न.) स्वामित्वं, प्रभुत्वं, अधिकारः, शासनम्।

आधिभौतिक, वि. (सं.) मनुष्यपश्वादिप्रेरित (उ. सर्पदंशदुःखम्)।

आधीन, वि., दे. 'अधीन'।

आधी रात, सं. स्त्री. (सं. अर्द्धरात्रः) मध्यरात्रः, निशीथः, रात्रिमध्यम्।

आधुनिक, वि. (सं.) नूतन, नवीन, अधुनातन, इदानींतन, अर्वाचीन, सांप्रतिक।

आधेय, सं. पुं. (सं. न.) आधारस्थं वस्तु (न.), आश्रितः पदार्थः। वि., स्थापनीय, न्यसनीय।

आध्यात्मिक, वि. (सं.) ब्रह्मजीवविषयक, देह-चित्तजीवसंबंधिन् (उ. ज्वरमोहशोकादयः)।

आनंद, सं. पुं. (सं.) आह्लादः, मुदा, आ-प्र, -मोदः, संमदः, हर्षः, प्रमदः, शान्तिः (स्त्री.), सुखम्, प्रसन्नता। वि., आनन्दित, प्रसन्न।

—करना, क्रि. अ., नन्द् (भ्वा. प. से.), मुद् (भ्वा- प. से.)।

—देना, क्रि. स., आह्लाद्-नंद्-प्रमुद् (प्रे.)।

—बधाई, सं. स्त्री., अभिनन्दनम् २. मंगलोत्सवः।

—मंगल, सं. पुं. (सं. न.) आनन्दः, मोदः, कुशलम्।

आनन्दित, वि. (सं.) प्रमुदित, सानन्द, सुखिन्।

आन[1], सं. स्त्री. (सं. आणिः पुं., स्त्री.) सीमा, मर्यादा २. शपथः, समयः ३. विजयघोषणा ४. प्रतिज्ञा, सं-प्रति,-श्रवः।

—रखना, मु., प्रतिज्ञां पा (प्रे. पालयति)।

आन[2], सं. स्त्री. (फा.) छविः (स्त्री.), सौन्दर्यम् २. अभि-, मानः ३. लज्जा, संकोच।

—बान, सं. स्त्री., वैभवं, शोभा, हावभावाः।

—बान वाला, वि., सुवसन, सुप्रभ।

आन[3], सं. स्त्री. (अ.) क्षणः, पलं, निमेषः।

—की आन में, मु., सद्यः, झटिति, आशु (सब अव्यय)।

आनक, सं. पुं. (सं.) पटहः, भेरी, मृदंगः २. स्तनयित्नुर्मेघः।

आनन, सं. पुं. (सं. न.) आस्यं, मुखं, वदनम्।

आनन-फानन, क्रि. वि. (अ.) क्षणेन, क्षणात्।

आनरेबल, वि. (अं.) मान्य।

आनरेरी, वि. (अं.) अवैतनिक, आदरवृत्ति।

—मैजिस्ट्रेट, सं. पुं. (अं.) अवैतनिको दण्डाध्यक्षः।

आना[1], सं. पुं. (सं. आणकः) रूप्यकस्य षोडशः २. कस्यचिद् वस्तुनः षोडशो भागः।

आना[२], क्रि. अ. (सं. आगमनम्) आगम् (भ्वा. प. अ.), आया (अ. प. अ.), आव्रज् (भ्वा. प. से.)। सं. पुं., आयानं, उपस्थानं, आगमनम्।

आई-गई, (बात) वि., अतीता, विस्मृता (वार्त्ता)।

आए दिन, क्रि. वि., अन्वहं, प्रतिदिनम्।

आ धमकना, क्रि. अ., अकस्मात् आगम्।

आनाकानी, सं. स्त्री., अप-व्यप,-देशः, छलेन परिहरणम् २. अनवधानम् ३. कर्णे जपनम्।

आनाकानी करना, क्रि. अ., अप-व्यप,-दिश् (तु. उ. अ.), छलेन परिह (भ्वा. उ. अ.)।

—जाना सं. पुं., गतागतम् २. पुनर्जन्मन् (न.)।

आनुपूर्वी, सं. स्त्री. (सं.) अनुक्रमः, आनुपूर्व्यं, परंपरा।

आनुमानिक, वि. (सं.) अनुमान-तर्क,-सिद्ध, संभाव्य, काल्पनिक।

आनुषंगिक, वि. (सं.) प्रासंगिक, गौण।

आन्वीक्षिकी, सं. स्त्री. (सं.) तर्कविद्या, न्यायः २. आत्मविद्या।

आप, सर्व. (सं. आत्मन् >) स्वयं-स्वतः (अव्य.), २. भवत् (भवती स्त्री.)।

—बीती, सं. स्त्री. स्वानुभूत, प्रत्यक्षीकृत।

आप, सं. पुं. (सं. आपः स्त्री. बहु.) पानीयं, जलम्।

आपगा, सं. स्त्री. (सं.) नदी, तटिनी।

आपत्काल, सं. पुं. (सं.) दुष्कालः, दुस्समयः २. विपत्तिः (स्त्री.)।

आपत्ति, सं. स्त्री. (सं.) दुःखं, क्लेशः २. विपत्तिः, विपद्, आपद् (सब स्त्री.) ३. कुसमयः ४. दोषारोपणम् ५. आक्षेपः, अपवादः।

आपद्, सं. स्त्री. (सं.) दे. 'आपत्तिः'।

—ग्रस्त, वि., आ-वि,-पन्न, आर्त्त, दुर्गत।

—धर्म, सं. पुं. (सं.) विपन्नकर्तव्यं, कुसमय-धर्मः।

आपदा, सं. स्त्री., दे. 'आपत्ति'।

आपन्न, वि. (सं.) आपद्ग्रस्त २. प्राप्त।

आपस, सं. पुं. (हिं. आप+से) सम्बन्धः, भ्रातृत्वं, बन्धुत्वम्।

—का, वि., आत्मीयानां, बन्धूनाम् २. परस्परस्य, अन्योऽन्यस्य, मिथः (अव्य.), इतरेतरस्य।

—में, क्रि. वि., परस्परं, अन्योन्यं, मिथः।

आपसी, वि. (हिं. आपस) पारस्परिक।

आपा, सं. पुं. (हिं. आप) आत्मत्वं, स्वसत्ता २. गर्वः ३. चैतन्यं, चेतना।

—धापी, सं. स्त्री., स्वार्थपरता, स्वस्वहितचिंता २. संघर्षः, अहमहमिका, अहं,-पूर्विका-प्रथमिका।

—पंथी, वि., कुमार्गिन्, कुपथगामिन्।

आपे में आना, मु., चैतन्यलाभः।

आपे में न रहना, मु., क्रोधादिभिः बुद्धि-मति,-नाशः।

आपात, सं. पुं. (सं.) पतनं, अवनतिः (स्त्री.) २. अकस्मात् उपागमः ३. आरम्भः ४. अन्तः।

आपाततः, क्रि. वि. (सं.) अकस्मात्, सहसा, अकाण्डे २. अन्ते, अन्ततः।

आपेक्षिक, वि. (सं.) सापेक्ष २. पराश्रित, परावलंबिन्।

आप्त, वि. (सं.) अधिगत, प्राप्त, लब्ध २. कुशल, दक्ष ३. साक्षात्कृतधर्मन्, भ्रान्तिशून्य। सं. पुं., ऋषिः २. शब्दप्रमाणम्।

—काम, वि. (सं.) पूर्णकाम, तृप्त, संतुष्ट।

आप्ति, सं. स्त्री. (सं.) लाभः, प्राप्तिः (स्त्री.)।

आप्लुत, वि. (सं.) स्नात, कृतस्नान २. सिक्त, उक्षित, आर्द्र २. सं. पुं., स्नातकः, गृहिन्।

आफत, सं. स्त्री. (अ.) दे. 'आपत्तिः' (१-३)।

—का परकाला, सं. पुं., लोककंटकः, कुचेष्टकः २. क्षिप्रकारिन्।

आफिस, सं. पुं. (अं.) कार्यालयः।

आब, सं. स्त्री. (फा.) कान्तिः-द्युतिः (स्त्री.), २. उत्कर्षः ३. शोभा, श्रीः (स्त्री.)। सं. पुं., आपः (स्त्री, बहु.), जलम्।

—कारी, सं. स्त्री. (फा.) मद्यनिष्कर्षशाला, शुंडा, संधानी २. मादकद्रव्यनिरीक्षको शासन-विभागविशेषः।

—ताब, सं. स्त्री. (फ़ा.) शोभा, विभूतिः (स्त्र.)।

—दाना, सं. पुं, (फ़ा) आ-उप,-जीविका २. जलान्नं, अन्नजलम्।

—पाशी, सं. स्त्री. (फ़ा) जलसेकः, प्लावनम्।

—शार, सं. पुं. (फ़ा.) निर्झरः, जलप्रपातः।

आवेहयात, सं. पुं. (फ़ा.) अमृतं, सुधा।
आवोहवा, सं. स्त्री. (फ़ा.) जलवायु (न.)।
आवद्ध, वि. (सं.) निगृहीत, नियंत्रित।
आवनूस, सं. पुं. (फ़ा.) कोविदारः, युगपत्रकः।
—का कुन्दा, मु. अतिकृष्णो मनुष्यः।
आवाद, वि. (फ़ा.) लोकाध्युषित, जनाकीर्ण २. उर्वर, बहुशस्यद ३. संपन्न।
आवादी, सं. स्त्री. (फ़ा.) जनाकीर्णस्थानम् २. जनसंख्या ३. शस्यदा भूमिः (स्त्री.)।
आब्दिक, वि. (सं.) वार्षिक-सांवत्सरिक (-की स्त्री.)।
आभरण, सं. पुं. (सं. न.) अलंकारः, मंडनं, भूषणम् २. पोषणं, संवर्द्धनम्।
आभा, सं. स्त्री. (सं.) कान्तिः-दीप्तिः (स्त्री.) २. प्रति,-विंबं-च्छाया।
आभाणक, सं, पुं. (सं.) लोकोक्तिः (स्त्री.)।
आभार, सं. पुं. (सं.) उपकारः २. गार्हस्थ्य-भारः ३. भारः, भरः।
आभारी, वि. (सं.-रिन्) कृतज्ञ, कृतवेदिन्।
आभास, सं. पुं. (सं.) प्रति,-विंबं-च्छाया २. संकेतः ३. मिथ्याज्ञानम्।
आभीर, सं. पुं. (सं.) गोपः।
आभूषण, सं. पुं. (सं. न.) दे. 'आभरण'।
आभ्यंतर, वि. (सं.) अन्तःस्थ, आन्तर, गर्भस्थ, अन्तर्गत, आभ्यन्तरिक।
आभ्युदयिक, वि. (सं.) मांगलिक, शंकर, शुभ।
आमंत्रण, सं. पुं. (सं. न.) आह्वानम् २. निमंत्रणम्।
आमंत्रित, वि. (सं.) आकारित, आहूत २. निमंत्रित।
आम[1], सं. पुं. (सं. आम्रः-म्रं) १. (वृक्ष) आम्रः, रसालः, सहकारः, कामशरः, वसन्तदूतः, कोकिलोत्सवः २. (फल) आम्रं, आम्र-रसाल-सहकार,-फलम्।
—के आम, गुठली के दाम, मु., उभयतो लाभः।
—जाने से काम या पेड़ गिनने से, मु. अर्थः प्रयोजनं न तु वृक्षगणना।
आम[2], वि. (सं.) अपक्व, दे. 'कच्चा'।
आम[3], सं. पुं. (सं. न.) अजीर्णान्नम् (पुं.) २. अजीर्णभेदः।
—अतिसार, सं. पुं. (सं.) अतिसारभेदः, संग्रहणी।
आम[4], वि. (अ.) सामान्य, प्राकृत, अवर, २. विख्यात, प्रसिद्ध।
—फ़हम, वि. (अ.) सुबोध, सुविज्ञेय।
आमद, सं. स्त्री. (फ़ा.) आगमनं २. आयः।
आमदनी, सं. स्त्री. (फ़ा.) आयः, धनागमः।
आमना-सामना, सं. पुं. (हिं. सामना) समागमः।
आमने-सामने, क्रि. वि. (हिं. सामना) परस्परस्य पुरतः, अन्योऽन्यस्य सम्मुखम्।
आमय, सं. पुं. (सं.) रोगः, व्याधिः।
आमरण, क्रि. वि. (सं. न.) मृत्युं यावत्, निधनावधि, आमृत्योः।
आमला, सं. पुं. दे. 'आँवला'।
आमाशय, सं. पुं. (सं.) अन्नाशयः, जठरः-रम्।
आमिष, सं. पुं. (सं. पुं. न.) मांसं २. भोग्य-पदार्थः ३. लोभः ४. उत्कोचः।
आमी, सं. स्त्री. (हिं. आम) आम्रकम्।
आमुख, सं. पुं. (सं. न.) रूपकप्रस्तावना।
आमोद, सं. पुं. (सं.) आनन्दः, मनोविनोदः २. सुगन्धः।
—प्रमोद, सं. पुं., आह्लादः, हर्षः २. हास्य-विनोदौ, नर्मालापः।
आम्र, सं. पुं. (सं.) दे. 'आम'।
आयँती-पायँती, सं. स्त्री. (अनु.+फ़ा पायताना) खट्वायाः शीर्षपादभागौ।
आय, सं. स्त्री. (सं. पुं.) धन-अर्थ,-आगमः-लाभः।
—व्यय, सं. पुं. (सं.-व्ययौ) आगमोत्सर्गौ।
—व्यिक, सं. पुं. (सं. न.) व्याकलपः (= वजट)।
आयत[1], वि. (सं.) विस्तृत, विशाल।
आयत[2], सं. स्त्री. (अ.) इंजील-कुरान,-वाक्यम्।
आयसु, सं. स्त्री. (सं. आदेशः) आज्ञा।
आया[1], क्रि. अ. (हिं. आना) आगतः।
—गया, सं. पुं., अतिथिः।
आया[2], सं. स्त्री. (पुर्त.) धात्री, मातृका।
आया[3], अव्य. (फ़ा.) किम्, यत्।
आयात, सं. पुं. (सं. न.) विदेशादानयनम् २. विदेशादानीतः पण्यसमूहः।

आयास, सं. पुं. (सं.) प्रयत्नः २. श्रमः।

आयु, सं. स्त्री. (सं.-आयुस् न.) वयस् (न.), जीवितकालः, नित्यगः, विजीवितम्।

आयुध, सं. पुं. (सं. न.) अस्त्रं, शस्त्रं, प्रहरणं, हेतिः (स्त्री.)।

आयुर्वेद, सं. पुं. (सं.) वैद्यकं, वैद्यशास्त्रं, चिकित्साशास्त्रम्।

आयुष्मान्, वि. (सं.) (सं.-मत्) चीर-दीर्घ,-जीविन्। (आयुष्मती स्त्री.)।

आयुष्य, वि. (सं.) पथ्य। सं. पुं., वयस् (न.)।

आयोजन, सं. पुं. (सं. न.) द्रव्यासादनं, सामग्रीसंपादनम् २. नियुक्तिः (स्त्री.) ३. उद्योगः ४. सामग्री।

आयोडीन, सं. स्त्री. (अं.) जम्बुकी, नीलीनम्।

आरंभ, सं. पुं. (सं.) उपक्रमः, प्रारंभः, आदिः २. उत्पत्तिः (स्त्री.)।

—करना, क्रि. स., आ-प्रा,-रभ्, प्र-उप,-क्रम् (सब भ्वा. आ. अ.)।

आर[1], सं. पुं. (सं. न.) मुंड,-लोहं आयसम् २. पित्तलम् ३. तटः-टं-टी-टा ४. कोणः ५ अरः, अरम्।

आर[2], सं स्त्री. (सं. अलम्=डंक) वृश्चिकादीनां दंशः, दंशचंचुः २. अंकुशः ३. कीलः।

आर[3], सं. स्त्री. (सं. आरा) चर्मप्रभेदिका।

आर[4], सं. पुं. (हिं. अड़) आग्रहः, निर्बन्धः।

आर[5], स. स्त्री. (अ.) संकोचः, लज्जा।

आरक्त, वि. (सं.) ईषद्रक्त २. लोहित।

आरण्य, वि. (सं.) वन्य, वनजात, वनसंबंधिन्।

आरण्यक, वि. (सं.) दे. आरण्य। सं. पुं. (सं. न.) ग्रन्थभेदः।

आरती, सं. स्त्री. (सं. आरात्रिकम्) नीराजनानम्, देवमूर्तिपरितो दीपचालनम् २. नीराजनापात्रम् ३. नीराजनास्तोत्रम्।

आरपार, सं. पुं. (सं. आरपारम्>) तटद्वयंयी, पारावारं-रौ-रे। क्रि. वि., आवारपारम्, अवारात् पारं यावत्; आद्यन्तं, समग्रम्।

आरब्ध, वि. (सं.) उपक्रान्त, कृतारम्भ।

आरभटी, सं. स्त्री. (सं.) क्रोधाद्युग्रभावानां चेष्टा २. रूपके यमकबहुलो वृत्तिभेदः।

आरसी, सं. स्त्री. (सं. आदर्शः) दर्पणः, मुकुरः २. दक्षिणहस्तांगुष्ठभूषणभेदः।

आरा, सं. पुं. (सं. आरा>) क्रकचः-चम्। करपत्रं, पत्रदारणः २. चर्मप्रभेदिका ३. अरः, अरम्।

—कश, सं. पुं. (फ़ा.) क्राकचिकः, दारुदारणः।

—कशी, सं. स्त्री., क्रकचेन काष्ठविपाटनम्।

आराधक, वि. (सं.) उपासक, पूजक।

आराधन, सं. पुं. (सं. न.) भक्तिः (स्त्रि.), सेवा, परिचर्या २. तर्पणं तोषणं, प्रसादनम्।

आराधना, सं. स्त्री. (सं.) दे. 'आराधन'।

—करना, क्रि. स., पूज् (चु.), उपास् (अ. आ. से.), अभि-, अर्च् (भ्वा. प. से.), आराध् (प्रे.)।

आराधनीय, वि. (सं.) आराध्य, सेवनीय, पूजनीय, अर्चनीय।

आराम[1], सं. पुं. (सं.) उपवनं, उद्यानं, पुष्पवाटिका।

आराम[2], सं. पुं. (फ़ा.) सुखम् २. विश्रामः ३. स्वास्थ्यम्।

—करना, क्रि. अ., १. कार्यात् निवृत् (भ्वा. आ. से.) २. विश्राम् (दि. प. से.) ३. शी (अ. आ. से.)।

—कुरसी, सं. स्त्री., विश्रामासन्दी।

—तलब, वि., अलस, सुखेच्छुक।

आरी, सं. स्त्री. (हिं. आरा) लघुक्रकचः, क्रकचकं, करपत्रकम् २. दंडाग्रलग्नो लोहकीलः ३. आरा, चर्मप्रभेदिका।

आरूढ, वि. (सं.) अधिरूढ, अध्यासीन, कृतारोहण २. दृढ़, स्थिर।

—होना, क्रि. अ., आ-अधि,-रुह् (भ्वा. प. अ.), अध्यास् (अ. आ. से.)।

—करना, क्रि. स., आ-अधि,-रुह् (प्रे. आरोपयति)।

आरोग्य, वि. (सं. आरोग्यम् >) नीरोग, स्वस्थ। सं. पुं. (सं. न.) दे. 'आरोग्यता'।

आरोग्यता, सं. स्त्री. (सं. आरोग्यम्) स्वास्थ्यं, नीरोगता, अनामयम्।

आरोप, सं. पुं. (सं.) आरोपणं, संस्थापनं, स्थिरीकरणम् २. स्थानान्तरे आरोपणं स्थापनं

वा ३. भ्रमः ३. वस्तुनि वस्त्वन्तरधर्मकल्पनम्।

आरोपना, क्रि. स. (सं. आरोपणम्) (स्थानान्तरे) आरुह् (प्रे., आरोपयति), निविश् (प्रे.), सं-प्रति,-स्था (प्रे.),

आरोपित, वि. (सं.) स्थापित, निहित, निवेशित।

आरोह, सं. पुं. (सं.) उद्गमः, उदयः, अधिरोहणम् २. आक्रणम् ३. गजादिपृष्ठेऽधिरोहणम् ४. उत्तमयोनिप्राप्तिः (स्त्री.) ५. कारणात् कार्यप्रादुर्भावः ६. विकासः ७. स्वरोत्कर्षः ८. नितम्बः

आरोहण, सं. पुं. (सं. न.) उद्गमनं, अधिरोहणम् २. अंकुरप्ररोहणम् ३. सोपानं, निःश्रेणी।

आरोही, वि. (सं.-हिन्) आरोहक, उद्गामी २. उन्नतिशील। सं. पुं., उत्कर्षोन्मुखः स्वरः २. आरूढः, अश्वादिपृष्ठस्थः।

आर्जव, सं. पुं. (सं. न.) ऋजुता, सरलता, निष्कपटता २. सुकरता ३. व्यवहारशुद्धिः (स्त्री.).

आर्ट, सं. पुं. (अं.) कला, शिल्पं, २. कौशलं, नैपुण्यम्।

आर्त्त, वि. (सं.) व्यथित, पीडित २. दुर्गत ३. रुग्ण।

—नाद, सं. पुं., आर्त्तध्वनिः, आर्त्तस्वरः।

आर्त्ति, सं. स्त्री. (सं.) पीडा, व्यथा २. आपद्-विपद् (स्त्री.)

आर्थिक, वि. (सं.) धन-द्रव्य-वित्त,-विषयक, मौद्रिक।

आर्द्र, वि. (सं) क्लिन्न, उन्न, उक्त, सिक्त।

आर्द्रता, सं. स्त्री. (सं.) क्लिन्नता, सरसता।

आर्द्रा, सं. स्त्री. (सं.) षष्ठनक्षत्रम् २. आषाढारम्भः ३. आर्द्रकम्।

आर्य, वि. (सं.) श्रेष्ठ, भद्र २. मान्य, पूज्य ३. कुलीन, सत्कुलज (आर्या स्त्री.)। सं. पुं. (सं.) सज्जनः, कुलीनमानवः २. पूज्यमनुष्यः ३. स्वामिन् ४. श्वशुरः ५. जातिविशेषः ६. आर्यजातीयः ७. गुरुः ९ मित्रम्।

—आवर्त, सं. पुं. (सं.) विन्ध्यहिमाचलयोर्मध्यदेशः २. भारतवर्षम्।

—पुत्र, सं. पुं. (सं.) श्रेष्ठस्य पुत्रः २. पतिः।

—समाज, सं. पुं. (सं.) महर्षिदयानन्दसंस्थापितः समाजविशेषः।

आर्या, सं. स्त्री. (सं.) पार्वती २. श्वश्रूः (स्त्री.) ३. पितामही ४. छन्दोभेदः।

आर्ष, वि. (सं.) १-३. ऋषि,-संबंधिन्-प्रणीत-सेवित ४. वैदिक।

—प्रयोग, सं. पुं. (सं.) प्राचीनग्रंथानामर्वाचीनव्याकरणविरुद्धाः प्रयोगाः।

आलंकारिक, वि. (सं.) अलंकारविषयक २. अलंकारयुत ३. अलंकारविद्।

आलंब, सं. पुं. (सं.) अवलंबः, आश्रयः २. गतिः (स्त्री.), शरणम्।

आलंबन, सं. पुं. (सं. न.) अवलंबः, आश्रयः २. रसोत्पत्तौ विभावभेदः (सा.) ३. कारणं, साधनम्।

आलन, सं. पुं. (?). लेपनाय कर्दममिश्रितं तृणादिकम् २. शाकादिमिश्रितं चणकादिचूर्णम्।

आलमारी, सं. स्त्री., दे. 'अलमारी'।

आलय, सं. पुं. (सं.) गृहम् २. स्थानम्।

आलवाल, सं. पुं. (सं. न.) आवालं, आवापः।

आलस, सं. पुं., दे. 'आलस्य'।

आलसी, वि. (हिं. आलस) अलस, तन्द्रिल, तन्द्राळु, शीतक, तुंदपरिमृज, उद्योगविमुख।

आलस्य, सं. पुं. (सं. न.) मान्द्यं, तन्द्रिका, जाड्यं, कार्यद्वेषः।

आला[1], सं. पुं. (सं. आलयः>) भित्तिस्तंभादिषु दीपकार्थं स्थानम् २. काष्ठफलकः।

आला[2], वि. (अ.) उत्तम, श्रेष्ठ।

आलान, सं. पुं, (सं. न.) गजबंधन,-स्तम्भः-रज्जुः (स्त्री.) २. बंधनं, रज्जुः।

आलाप, सं. पुं. (सं.) संलापः, संभाषणं, कथोपकथनं, वार्त्तालापः २. तानः, सप्तस्वरसाधनम् (संगीत)।

आलापना, क्रि. स. (सं. आलपनं >) गै (भ्वा. प. अ.)।

आलिंगन, सं. पुं. (सं. न.) परि (री) रंभः, परिष्वंगः, संश्लेषः, उपगूहनं, श्लिषा।

—करना, क्रि. स., आलिंग् (भ्वा. प. से.), आश्लिष् (दि. प. अ.), उपगुह् (भ्वा. उ. से., उपगूहति)।

आलि[१], सं. स्त्री. (सं.) वयस्या, सखी, सहचरी २. पंक्तिः (स्त्री.) ३. सेतुः ४. रेखा।

आलि[२], सं. पुं. (सं.) वृश्चिकः २. भ्रमः।

आली, सं. स्त्री. (सं.) सखी, वयस्या २. पंक्तिः, ततिः (स्त्री.)।

आलू, सं. पुं. (सं. आलुः.) सुकन्दं, शुभ्रालुः, शुक्लकन्दः-न्दम्।

—बुखारा, सं. पुं., आलूकं, आलुकं रक्तफलं. भल्लूकम्।

आलूचा, सं. पुं. (फा.)*आलूच्चः, वृक्षभेदः २. *आलूच्चम्, फलभेदः।

आलेख, सं. पुं. (सं.) लेखः, लेख्यं, लिखितम् २. लिपी, लिपिः (स्त्री.)।

आलेख्य, सं. पुं. (सं. न.) चित्रं, प्रतिरूपं। वि. लेखार्ह।

आलोक, सं. पुं. (सं.) भा, आभा, प्रभा, प्रकाशः २. त्विष्, दीप्तिः, कान्तिः (सब स्त्री.)।

आलोचक, वि. (सं.) समालोचक, समीक्षक २. दर्शक।

आलोचन, सं. पुं (सं. न.) गुणदोष,-परीक्षणं-निरूपणं-परीक्षा, सम्-, आलोचना २. दर्शनम्।

आलोचना, सं. स्त्री. (सं.) दे. 'आलोचन'।

आलोडन, सं. पुं. (सं. न.) मंथनं, मंथः २. प्रगाढ़विचारः।

आलोडित, वि. (सं.) मथित २. संक्षोभित ३. विचारित।

आल्हा, सं. पुं. (देश.) वीरछन्दस् (न.) २. महोबावासी प्राचीनो वीरविशेषः ३. विस्तृत-वर्णनम्।

आवभगत, सं. स्त्री. (हिं. आना+सं. भक्तिः) सत्कारः, उपचारः, सेवा, पूजा।

आवरण, सं. पुं. (सं. न.) आच्छादनं, पुटं २. आच्छादनवस्त्रं, प्रच्छदपटः ३. तिरस्करिणी, व्यवधानं ४. कोशः, कोषः, वेष्टनम् ५. चर्मन् (न.), फलकम् (हिं. ढाल)।

—पत्र, सं. पुं. (सं. न.) मुख,-पृष्ठ-पत्रम्।

आवर्त्त, सं. पुं. (सं.) जलभ्रमः, भ्रमरकः. भ्रमिः (स्त्री.) २. अवृष्टजलो मेघः ३. राजावर्त्तः, रत्नभेदः।

आवर्तन, सं. पुं. (सं. न.) परि-, भ्रामणं, व्या-परि,-वर्तनम् २. विलोडनम् ३. पुनः पुनर्भावः, आवृत्तिः (सब स्त्री.)।

आवली, सं. स्त्री. (सं.) आवलिः, पंक्तिः, ततिः (सब स्त्री.)।

आवश्यक, वि. (सं.) अवश्यकर्तव्य, शीघ्रकार्य, गुर्वर्थ २. अनिवार्य।

आवश्यकता, सं. स्त्री. (सं.) आवश्यकत्वं, अपेक्षा ३. प्रयोजनम्।

आवश्यकीय, वि., दे. 'आवश्यक'।

आवा, सं. पुं., दे. 'आँवा'।

आवागमन, सं. पुं. (हिं. आना+सं. गमनम्) पुनरुत्पत्तिः (स्त्री.), पुनर्जन्मन् (न०), प्रेत्यभावः, देहान्तरप्राप्तिः (स्त्री.)।

आवाज, सं. स्त्री. (फ़ा.) शब्दः, नादः, स्वनः, ध्वनिः, घोषः २. गानस्वरः ३. उच्चस्वरः।

—उठाना, मु., विपरीतं वद् (भ्वा. प. से.)।

—बैठना, मु., स्वरभंगः जन् (दि. आ. से.)।

आवारा, वि. स्त्री. (फा.) परिभ्रमक, अकर्मण्य २. अज्ञातनिवास ३. दुर्वृत्त, जाल्म।

आवास, सं. पुं. (सं.) गृहं, गेहं, सदनम्।

आवाहन, सं. पुं. (सं. न.) मंत्रैर्देवताह्वानम्, आमंत्रणम् २. निमंत्रणम्।

आविर्भाव, सं. पुं. (सं.) प्रकाशनं, प्राकट्यं, विवृतिः (स्त्री.) २. उत्पत्तिः (स्त्री.)।

आविर्भूत, वि. (सं.) प्रकटित, प्रकाशित २. उत्पन्न।

आविष्कर्ता, वि. (सं.-कर्तृ) आविष्कारक, प्रकटयितृ, प्रकाशक, कल्पक।

आविष्कार, सं. पुं. (सं.) अज्ञाततत्त्वप्रकाशनम् २. अपूर्ववस्तुनिर्माणम् ३. प्रकाशः, प्राकट्यम्।

आविष्कारक, वि. (सं.) दे. 'आविष्कर्ता'।

आविष्कृत, वि. (सं.) प्रकटित, प्रकाशित २. प्रथमं निर्मित-रचित।

आविष्ट, वि. (सं.) भूतप्रेतादिपीडित २. अभिभूत।

आवृत, वि. (सं.) प्र-समा-आ,-च्छादित, संवृत, पिहित २. परिवृत, वलयित।

आवृत्ति, सं. स्त्री. (सं.) अभ्यासः, क्रिया,-सातत्यं-प्रबन्धः २. अध्ययनम्।

आवेग, सं. पुं. (सं.) आवेशः, चित्तोद्वेगः, उत्तेजनं, उद्दीपनम् २. त्वरा ३. संचारिभाव-भेदः (सा.)।

आवेदन, सं. पुं. (सं. न.) दे. 'निवेदन'।

आवेश, सं. पुं. (सं.) आवेगः, आतुरता २. व्याप्तिः (स्त्री.), संचारः ३. प्रवेशः ४. भूतबाधा ५. अपस्माररोगः।

आवेष्टन, सं. पुं. (सं. न.) गोपनं, निगूहनम् २. अवगुंठनं, पिधानं, पुटः, कोशः।

आवेष्टित, वि. (सं.) अवगुंठित, आवृत।

आशंका, सं. स्त्री. (सं.) संदेहः, संशयः २. अनिष्टभावना ३. भयं, त्रासः।

आशंकित, वि. (सं.) भीत, त्रस्त ३. संदेहात्मक।

आशय, सं. पुं. (सं.) तात्पर्यं, अभिप्रायः, अर्थः २. वासना ३. स्थानं, आधारः ४. गर्तः।

आशा, सं. स्त्री. (सं.) आशंसा, आकांक्षा, अपेक्षा २. स्पृहा, वाञ्छा, मनोरथः २. दिशा ३. दक्षप्रजापतेः पुत्री ४. रागभेदः।

—करना, क्रि. अ., आशंस् (भ्वा. आ. से.), उत्-प्रति-अप,-ईक्ष् (भ्वा. आ. से.), आशास् (अ. आ. से.)।

—अतीत, वि. (सं.) आशंसाधिक।

—वाद, सं. पुं. (सं.) सदाशावत्तासिद्धान्तः।

—वान्, वि. (सं.) साश, आशान्वित।

आशिक, वि. (अ.) प्रणयिन्, अनुरागिन्, आसक्त, अनुरक्त।

आशिष, सं. स्त्री. (सं. आशिस्) दे. 'आशीर्वाद'।

आशीर्वाद, सं. पुं. (सं.) आशिस् (स्त्री.) आशीर्वचनं, हिताशंसनं, मंगलप्रार्थना, आशास्यं, शुभकामना।

—देना, क्रि. स., आशिषं दा (जु. उ. अ.), वि.-प्रायः लोट् व आशीर्लिङ् के रूपों से (उ. पुत्रं आयुषि आप्याः दा)।

आशु, क्रि. वि. (सं.) शीघ्रं, द्रुतं, सत्वरं (सब अव्य.)।

—कवि, सं. पुं. (सं.) सद्यः काव्यकारः।

—तोष, सं. पुं. (सं.) क्षिप्रः।

आशुग, वि. (सं.) शीघ्र-द्रुत-वेग,-गामिन्।

सं. पुं. (सं.) शरः २. वायुः।

आश्चर्य, सं. पुं. (सं. न.) विस्मयः, कौतुकं, चमत्कारः, चित्रं, अद्भुतम्।

—करना, क्रि. अ., विस्मि (भ्वा. आ. अ.)।

—जनक, वि. (सं.) विस्मापक, अद्भुत, विचित्र।

आश्रम, सं. पुं. (सं.) तपोवनं, मुनिवसतिः (स्त्री.) २. मठः, विहारः ३. विश्रामशाला ४. मनुष्यायुषः चत्वारो विभागाः (ब्रह्मचर्यगृहस्थ-वानप्रस्थसंन्यासाश्रमाः)।

आश्रय, सं. पुं. (सं.) अव-आ,-लंबः, आधारः २. अवष्टम्भः, उपघ्नः ३. शरणं, गतिः (स्त्री.) ४. गृहं, सदनम्।

—दाता, वि. (सं.-तृ) रक्षक, रक्षितृ, त्रातृ।

आश्रित, वि. (सं.) आश्रयप्राप्त, अवलंबित २. अधीन, शरणागत। सं. पुं., सेवकः, दासः।

आश्वासन, सं. पुं. (सं. न.) सान्त्वनं, आशा-प्रदानं, समाश्वासनं, प्रोत्साहनं, उत्तेजनम्।

आश्विन, सं. पुं (सं.) आश्वयुजः, शारदः, इषः।

आषाढ, सं. पुं. (सं.) अषाढः, शुचिः।

आस, सं. स्त्री. (सं. आशा) आशंसा २. लालसा ३. आश्रयः ४. दिशा।

आसक्त, वि. (सं.) तत्पर, लीन, मग्न, प्रसित २. अनुरक्त, बद्धराग, प्रणयिन्।

आसक्ति, सं. स्त्री. (सं.) तत्परता, लीनता, मग्नता २. अनुरागः, प्रेमन्, कामः।

आसन, सं. पुं. (सं. न.) उपवेशननप्रकारः २. स्थितिः (स्त्री.) २. अष्टांगयोगस्य तृतीय-मंगम् ३. उपवेशनाधारः, पीठं ४. साधुवसती ५. नितम्बः ६ शत्रुदुर्गादीनवरुध्य स्थितिः।

—डोलना, मु., चेतो विकृ (कर्म.)।

आसन्न, वि. (सं.) समीप, निकट, निकटस्थ।

—प्रसवा, वि. स्त्री. (सं.) निकटप्रसूतिः (स्त्री.)

—भूत, सं. पुं., वर्तमानसंपृक्तो भूतकालः।

आस-पास, क्रि. वि. (अनु. आस + सं. पार्श्वः) परितः, अभितः (दोनों द्वितीया के साथ), समंततः, समंतात्, विष्वक्, सर्वतः (सब अव्य.)।

आसमान, सं. पुं. (फा., सं. अदमानः >) गगनं, दे. 'आकाश' २. स्वर्गः।

—के तारे तोड़ना, मु., असंभवानि कार्याणि कृ।

—को चूमना,
—से बातें करना } मु., गगनं चुम्ब् (भ्वा. प. से.), अभ्रं कष् (भ्वा. प. से.)।

आसमानी, वि. (फा.) आकाशीय २. ईश्वरीय।

आसरा, सं. पुं. (सं. आश्रयः) अवलंबः, आधारः २. भरणपोषणाशा ३. आश्रयदः ४. शरणं, गतिः (स्त्री.) ५. प्रतीक्षा ६. आशा।
—देना, क्रि. स., रक्ष् (भ्वा. प. से.)।
—लेना, क्रि. अ., आश्रि (भ्वा. उ. से.), शरणं गम्।
आसव, सं. पुं. (सं.) मद्यभेदः २. सुरा, मदिरा ३. औषधप्रकारः ४. दे. 'अरक'।
आसा, सं. स्त्री., दे० 'आशा'।
आसा, सं. पुं. (अ. असा) सुवर्णदंडः, रजतयष्टिः (पुं. स्त्री.)।
आसाढ़, सं. पुं. दे. 'आषाढ़'।
आसान, वि. (फा.) सुकर, सुगम, सुखसाध्य।
आसानी, सं. स्त्री. (फा.) सुकरता, सुगमता।
आसाम, सं. पुं. (सं. असम >) कामरूपाः, असमप्रान्तः, भारतस्य प्रान्तविशेषः।
आसावरी, सं. स्त्री. (सं. आशावरी) श्रीरागस्य रागिणीभेदः।
आसीन, वि. (सं.) निषण्ण, उपविष्ट।
आसीस, सं. स्त्री., दे. 'आशीर्वाद'।
आसुर, वि. (सं.) राक्षस, पैशाच, असुरसंबंधिन्। सं. पुं. (सं.) असुरः।
आसुरी, वि. स्त्री. (सं.) असुरसंबंधिनी, राक्षसी, पैशाची।
—चिकित्सा, सं. स्त्री., शल्यचिकित्सा।
—माया, सं. स्त्री. पैशाचं छलम्।
—संपत्, सं. स्त्री. (सं.-द्) पैशाची वृत्तिः (स्त्री.)।
आसोज, सं. पुं. (सं. आश्वयुजः) दे. 'आश्विन'।
आस्तरण, सं. पुं. (सं. न.) कुथः, गजपृष्ठस्थं चित्रकंबलम् २. शय्या, कुशासनम्।
आस्तिक, वि. (सं.) ईशवेदपरलोकविश्वासिन् २. ईश्वरसत्तावादिन् ३. श्रद्धालु।
आस्तिकता, सं. स्त्री. (सं.) ईशवेदपरलोकेषु विश्वासः २. ईश्वरप्रत्ययः।
आस्तीन, सं. स्त्री. (फा.) पिप्पलः, कोशनालिका, चोलादीनां बाहुभागः।
—का साँप, मु., गूढशत्रुः, गुप्तवैरिन्।
आस्था, सं. स्त्री. (सं.) श्रद्धा, भक्तिः (स्त्री.), अर्हणा, आदरः २. सभा, आस्थानम् ३. आलंबनं, अपेक्षा।
आस्थान, सं. पुं. (सं. न.) उपवेशनस्थलं, समामंडपः २. सभा।
आस्पद, सं. पुं. (सं. न.) स्थानम् २. कार्यम् ३. प्रतिष्ठा ४. वंशः, कुलम्।
आस्य, सं. पुं. (सं. न.) वदनं, तुंडम् २. मुखमंडलं, मुखम्।
आस्वादन, सं. पुं. (सं. न.) स्वादनं, रसनम्।
आह[1], अव्य. (सं. अहह) कष्टं, हा, हन्त, आः, हा, अहो (सब अव्य.)।
आह[2], सं. स्त्री. (फ़ा.) निःश्वासः, उच्छ्वासः, दीर्घश्वासः।
—भरना, क्रि. अ., दीर्घं उत्-नि,-श्वस् (अ. प. से.)।
आहट, सं. स्त्री. (हिं. आना+हट प्रत्य.) पादशब्दः, चरणनिक्षेपध्वनिः २. विद्यमानतासूचकध्वनिः।
आहत, वि. (सं.) क्षत, व्रणित, विद्ध, भिन्नदेह २. गुण्यसंख्या ३. परस्परविरुद्ध (वाक्य) ४. सद्यःक्षालित ५. जीर्ण ६. कंपित। सं. पुं., पटहः।
आहरण, सं. पुं. (सं. न.) आच्छेदनं, सहसा आकलनम् २. अपनयनम् ३. आनयनम् ४. ग्रहणम्।
आहरन, सं. पुं. (सं. आहननम् >) शूर्मिः (स्त्री.), शूर्मी, स्थूणा।
आहाँ, अव्य. (अनु.) मा, न, नो, नहि।
आहा, अव्य, (सं. अहह) अहो, ही, आः।
आहार, सं. पुं. (सं.) भक्षणं, भोजनं, जेमनं, जग्धिः (स्त्री.) २. खाद्य-भक्ष्य,-सामग्री।
—विहार, सं. पुं. (-रौ) चर्या, वर्तनं, वृत्तं, आचारव्यवहारौ।
आहार्य, वि. (सं.) भक्ष्य, खाद्य २. ग्रहीतव्य ३. आहरणीय ४. कृत्रिम। सं. पुं., चतुर्थोऽनुभावः (सा.)।
अभिनय, सं. पुं. (सं.) वचनचेष्टारहितोऽभिनयः (सा.)।
आहिस्ता, क्रि. वि. (फा.-तः) शनैः, मन्दम्।
—आहिस्ता, क्रि. वि., शनैः शनैः, मन्दं मन्दम्।

आहुति, सं. स्त्री. (सं.) हवनं, देवयज्ञः, होमः, होत्रम् २. हवनसामग्री ३. सामग्र्याः सकृत् होतव्या मात्रा।

—देना, क्रि. स., हु (जु. उ. अ.), यज् (भ्वा. उ. अ.)।

आह्निक, वि. (सं.) दैनिक, दैनंदिन, प्रत्यहिक। क्रि. वि., अहरहः, अनु-प्रति,-दिनम्। सं. पुं., दिनस्य कार्यम् २. महाभाष्यखण्डः ३. अध्यापकः ४. दैनिकी भृतिः (स्त्री.)।

आह्लाद, सं. पुं. (सं.) आनंदः, हर्षः, मोदः।

आह्लादक, वि. (सं.) आह्लादप्रद, हर्षजनक, आनन्ददायक।

आह्लादित, वि. (सं.) प्रसन्न, मुदित।

आह्वान, सं. पुं. (सं. न.) आहूतिः (स्त्री.), आकारणं, आमंत्रणम् २. आह्वानपत्रम् (= सम्मन) ३. यज्ञे देवताकारणम्।

—करना, क्रि. स., आह्वे (भ्वा. उ. अ.), आकृ (प्रे.) २. देवतां आवह् (प्रे.)।

इ

इ, देवनागरीवर्णमालायाःतृतीयः स्वरः, इकारः।

इंगला, सं. स्त्री. (सं. इडा) मानवशरीरे वामपार्श्वस्था वक्रा नाडी।

इंगलिश, वि. (अं.) आंग्लदेशीय। सं. स्त्री. आंग्लभाषा।

इंगलिस्तान, सं. पुं. (अं. इंगलिश + फ़ा. स्तान) आंग्लदेशः।

इंगित, सं. पुं. (सं. न.) इङ्गः, संकेतः, आकारः, दैहिकचेष्टा। वि., संकेतित।

इंगुदी, सं. स्त्री. (सं.) तापसतरुः, शूलारिः।

इंच, सं. पुं. (अं.) अंगुलः २. अत्यल्पं, रेखामात्रम्।

इंजन, सं. पुं. (अं. एंजिन) यंत्रम् २. वाष्पशकटीकर्षकयन्त्रम्।

इंजीनियर, सं. पुं. (अं. एंजीनियर) यंत्रकारः, यंत्रकलाभिज्ञः, वास्तुविद्याविशारदः।

इंजेक्शन, सं. पुं. (अं.) सूचीभरणम्।

इंट्रेंस, सं. पुं. (अं.) (एंट्रेंस) द्वारं २. प्रवेशः ३. आंग्लविद्यालयस्य नवमदशमकक्षे (द्वि.)

—परीक्षा, सं. स्त्री., प्रवेशिका परीक्षा।

इंडुवा, सं. पुं. (सं. गेण्डुकः >) घटाद्याधारभूतं शीर्षस्थं वर्तुलवस्त्रम्।

इंतजाम, सं. पुं (अ.) संविधा, प्रबन्धः।

इंदिरा, सं. स्त्री. (सं.) पद्मा, कमला, दे. 'लक्ष्मी'।

इंदीवर, सं. पुं. (सं. न.) नील,-कमलं- उत्पलम् २. कमलम्।

इंदु, सं. पुं. (सं.) चन्द्रः २. कर्पूरः-रम्।

इंद्र, वि. (सं.) संपन्न २. श्रेष्ठ। सं. पुं., देवराजः, पाकशासनः, पुरंदरः, शक्रः, वज्रिन्, सुरपतिः, शचीपतिः, जयंतः, सहस्राक्षः, नाकनाथः, वज्रपाणिः २. सूर्यः ३. विद्युत् (स्त्री.) ४. नृपः ५. ज्येष्ठानक्षत्रम् ६. चतुर्दशसंख्या ७. व्याकरणस्य आदिम आचार्यः ८. जीवः, प्राणाः।

—का अखाड़ा, सं. पुं. इन्द्रसभा २. संगीतसभा।

—जाल, सं. पुं. (सं. न.) मायाकर्मन् (न.), कुहकम्।

—जाली, वि. (सं.-लिन्) मायाविन्, कुहुककारिन्।

—जीत, सं. पुं. (सं.-जित्) मेघनादः।

—जौ, सं. पुं. (सं.-यवः) कुटज-शक्र,-बीजम्।

—धनुष, सं. पुं. (सं.-धनुस् न.) इन्द्रचापं, सुरधनुस्।

—नील, सं. पुं. (सं.) नील,-उपलः-मणिः (= नीलम)।

—नीलक, सं. पुं. (सं.) मरकतं, अश्मगर्भः, हरिन्मणिः (= ज़मुर्रद)।

—प्रस्थ, सं. पुं. (सं. न.) युधिष्ठिरनिर्मापितं दिल्लीसमीपवर्ति नगरम्।

—लोक, सं. पुं. (सं.) नाकः, स्वर्गः :

इंद्रा, सं. स्त्री. (सं.) दे. 'इन्द्राणी'।

इंद्राणी, सं. स्त्री. (सं.) शची, ऐन्द्री, पौलोमी, माहेन्द्री, पुलोजमा २. स्थूलैला ३. सूक्ष्मैला ४. निर्गुण्डी।

इंद्रानुज, सं. पुं. (सं.) विष्णुः।

इंद्रायन, सं. पुं. (सं. इन्द्राणी) सुरसा, निर्गुण्डी, सिंदुवारः।

—का फल, सं., वहीरम्बोऽन्तर्दुष्टः।

इंद्रायुध, सं. पुं. (सं. पुं. न.) इन्द्रचापः २. वज्रं, पविः।

इंद्रिय, सं. स्त्री. (सं. न.) करणं, अक्षं, हृषीकं, ग्रहणं, विषयिन् (न.) २. जननेन्द्रियम् ३. वीर्यम् ४. 'पंच' इति संख्या।

—अर्थ, सं. पुं. (सं.) इन्द्रियविषयः (रूप-रसादि)।

—जित्, वि. (सं.) जितेन्द्रिय, हृषीकेशः।

—निग्रह, सं. पुं. (सं.) इन्द्रिय,-दमनं-जयः, दमः।

—वश, वि. (सं.) विषयिन्, विषयवशः।

इंधन, सं. पुं. (सं. न.) इध्मं, एधं, एधस् (न.)।

इंसाफ, सं. पुं. (अ.) न्यायः, धर्मः २. निर्णयः, विवेकः।

इंस्पेक्टर, सं. पुं. (अं.) निरीक्षकः, द्रष्टृ।

इक, वि., दे. एक।

इकट्ठा, वि. (सं. एकस्थ) एकीकृत, समवेत, गणीभूत।

—करना, क्रि. स., एकत्र कृ; सं-नि,-चि (स्व. उ. अ.)।

इकट्ठे, क्रि. वि. (हिं. इकट्ठा) एकीभूय, संभूय, मिलित्वा।

इकतार, क्रि. वि. (सं. एकतारः>) सततं, निरन्तरम्।

इकतारा, सं. पुं. (सं. एकतारः>)एक,-तारः-तंत्रीकः, वाद्यभेदः।

इकतीस, वि. (सं. एकत्रिंशत् स्त्री. एक.) सं. पुं., उक्ता संख्या, तद्बोधकावंकौ (३१) च।

इकरार, सं. पुं. (अ.) प्रतिज्ञा, संगरः, प्रति-सं,-श्रवः २. अंगी-स्वी,-कारः।

—नामा, सं. पुं. (फा.) प्रतिज्ञा-समय,-पत्र-लेख्यम्।

इकलौता, सं. पुं. (सं. एकल>) भगिनीभ्रातृ-हीनः, पित्रोः एकलः पुत्रः।

इकसठ, वि. (सं. एकषष्टिः स्त्री. एक.), सं. पुं. उक्ता संख्या, तद्बोधकावंकौ (६१) च।

इकसार, वि. (सं. एकसार>) समान, सदृश।

इकहत्तर, वि. (हिं. इक + सत्तर) एकसप्ततिः (स्त्री. एक.), सं. पुं, उक्ता संख्या तद्बोध-कावंकौ (७१) च।

इकहरा, वि. (सं. एकस्तर) दे. 'एकहरा'।

इकाई, सं. स्त्री. (हिं. इक) एका व्यक्तिः (स्त्री.) २. एकांकः ३. त्रैराशिकम् (=इकाई का कायदा)।

इकानवे, वि. (हिं. इक + नवे) एकन-वतिः (स्त्री. एक.), सं. पुं., उक्ता संख्या तद्बोधकावंकौ (९१) च।

इकावन, वि. (सं. एकपंचाशत् स्त्री. एक.) सं. पुं., उक्ता संख्या तद्बोधकावंकौ (५१) च।

इकासी, वि. (हिं. इक + अस्सी) एकाशीतिः (स्त्री. एक.) सं. पुं., उक्ता संख्या तद्बोधकावं-कौ (८१) च।

इकोतर, वि. (सं. एकोत्तर) एकाधिक।

इक्का, वि. (सं. एक) एकाकिन्, एकल। २. अतुल्य, असम। सं. पुं., वाहन-यान-प्रव-हण,-भेदः २. एकांकयुतं क्रीडापत्रम् ३. एकाकी योधः।

—दुक्का, वि., विरल २. मार्गभ्रष्ट ३. यूथभ्रष्ट।

इक्षु, सं. पुं. (सं.) मधु-गुड,-तृणः, महारसः, रसालः, पयोधरः।

—रस, सं. पुं. (सं.) मधुतृण,-सारः-द्रवः-निर्यासः।

—सार, सं. पुं. (सं.) गुडः।

इक्ष्वाकु, सं. पुं. (सं.) वैवस्वतमनोः पुत्रः सूर्यवंशीयः प्रथमनृपः।

—नंदन, सं. पुं. (सं.) श्रीरामचन्द्रः।

इख्तियार, सं. पुं. (अ.) प्रभावः, अधि-कारः २. अधिकारक्षेत्रम् ३. सामर्थ्यम् ४. स्वामित्वम्।

इच्छा, सं. स्त्री. (सं.) स्पृहा, आकांक्षा, ईहा, वाञ्छा, अभिलाषः, मनोरथः, इष्टं, अभीष्टं,, ईप्सितं, कामना।

—करना, क्रि. स. इष् (तु. प. से.), अभि-लष्, वांछ् (दोनों भ्वा. प. से.), कम् (भ्वा. आ. से., कामयते), स्पृह् (चु., चतुर्थी के साथ), (सन्नंत रूपों से भी, उ. पढ़ने की इच्छा करता है=पिपठिषति)।

—अनुकूल, क्रि. वि. (सं. न.) यथारुचि, यथेच्छं, यथेष्टं, यथाकामम्।

—भेदी, सं. पुं. (सं.—दिन्) यथेष्टविरेचक-मौषधम्।

इच्छित, वि. (सं.) अभीष्ट, वांछित, अभि-लषित।

इच्छुक, वि. (सं.) इच्छु, अभिलाषिन्, आकांक्षिन्। (टि. सन्नंत रूपों से भी, उ० पढ़ने का इच्छुक=पिपठिषुः। तुमुन्नन्त रूप के बाद 'काम' वा 'मनस्' लगाकर भी, उ० जाने का इच्छुक=गन्तु,-कामः-मनाः)।

इजराय, सं. पुं (अ.) प्रचालनं २. अनुष्ठानम्।

—डिगरी, सं. पुं. (अ. + अं. डिकरी) राजाज्ञासंपादनम्।

इजलास, सं. पुं. (अ.) अधिवेशनम् २. न्यायालयः।

इज़हार, सं. पुं. (अ.) प्रकाशनम् २. साक्ष्यम्।

इजाज़त, सं. स्त्री. (अ.) अनुमतिः (स्त्री.), अनुज्ञा २. आज्ञा, आदेशः।

इजार, सं. स्त्री. (अ.) दे 'पाजामा'।

—बंद, सं. पुं. (अ. + फा.) दे. 'नाड़ा'

इजारा, सं. पुं. (अ.) पणः, समयः २. पट्टः, पट्टोलिका ३. स्वत्वम्।

इजारे (र) दार, सं. पुं. (अ.+फ़ा.) पणकर्तृ, नियमकृत्।

इज्जत, सं. स्त्री. (अ.) सं-,मानः, आदरः।

—उतारना, मु., लघू-नि,-कृ।

—रखना, मु., अपमानात् रक्ष् (भ्वा. प. से.)।

इठलाना, क्रि. अ. (हिं. ऐंठ) सगर्वं चेष्ट् (भ्वा. आ. से.) २. हावं दृश् (प्रे.) ३. परक्लेशाय अशवत् आचर् (भ्वा. प. से.)।

इठलाहट, सं. स्त्री. (हिं. इठलाना) आटोपः, गर्वः २. हावभावः।

इडा, सं. स्त्री. (सं.) भूमिः (स्त्री.) २. गौः (स्त्री.) ३. वाणी ४. स्तुतिः (स्त्री.) ५-७. यज्ञपात्रदेवता-आहुति,-विशेषः ८. अन्नं, हविस् (न.) ९. नर्मोदेवता १०. दुर्गा १२. पार्वती १२. कश्यपपत्नी १३. वसुदेवपत्नी १४. दुग्धपत्नी १५. स्वर्गः १६. नाडीभेदः।

इतना, वि. [सं. एतावत् वा हिं. ई (यह) + तना (प्रत्य.)] एतावत्, एतन्मात्र, इयत् (स्त्री., एतावती, इयती)।

इतने में, क्रि. वि. एतावन्मध्ये; अत्रान्तरे २. अत्रिमलेव समये।

इतमीनान, सं. पुं. (अ.) तोषः सं, शान्तिः (स्त्री.)।

इतर[1], सं. पुं. (अ. इत्र) दे. 'अतर'।

इतर[2], वि. (सं) अन्य, अपर, पर २. नीच ३. सामान्य, साधारण।

—इतर, क्रि. वि., परस्परं, अन्योन्यं, मिथः (सब अव्य.)।

—इतराश्रय, सं. पुं. (सं.) अन्योन्याश्रयः।

इतराना, क्रि. अ. (सं. उत्तरणं >) गर्व् (भ्वा. प. से.), प्रगल्भ् (भ्वा. आ. से.)।

इतवार, सं. पुं. (सं. आदित्यवारः) रवि-आदित्य भानु,-वारः-वासरः।

इति, अव्य. (सं.) इति शम्, इत्योम्, समाप्तिसूचकमव्ययम्। सं. स्त्री., अवसानं, अन्तः, समाप्तिः (स्त्री.)।

—कर्तव्यता, सं. स्त्री. (सं.) कर्मानुष्ठानविधिः (पुं.)।

—वृत्त, सं. पुं. (सं. न.) पुरावृत्तं, (पुरातनी) कथा।

—श्री, सं. स्त्री. (सं.) अन्तः, समाप्तिः (स्त्री.)

इतिहास, सं. पुं. (सं.) पुरावृत्तं, पूर्ववृत्तान्तः, पुराभूतम्।

इत्तफ़ाक, सं. पुं. (अ.) संघटनं-ना, संघट्टनं-ना २. सौहार्दम्, साम्मत्यम् ३. अवसरः, अवकाशः।

इत्तला, सं. स्त्री. (अ.) विज्ञापनं, ख्यापनं, सूचना, बोधनम्।

इत्थं, क्रि. वि. (सं.) एवं, अनेन प्रकारेण।

इत्थंभूत, वि. (सं.) ईदृश, एतादृश।

इत्यादि, अव्य. (सं.) आदि, प्रभृति, आद्य (सब समासान्त में; उ. पिकाकादयः)।

इत्यादिक, वि (सं.) दे. 'इत्यादि'।

इत्र, सं. पुं. (अ.), दे. 'अतर'।

इधर, क्रि. वि. (सं. अत्र) इतः, एतत्स्थानं प्रति २. अत्र, इह, अस्मिन् स्थाने।

—उधर, क्रि. वि., इतस्ततः, अत्र-तत्र, अनियतस्थले २. उभयतः, उभयत्र ३. अभितः, परितः, (दोनों के साथ द्वितीया), सर्वतः, विश्वतः, समततः, समन्तात्।

—उधर की बात, मु., जन,-प्रवाद-श्रुतिः (स्त्री.)।

—की उधर लगाना, मु., कलहं कृ (प्रे.)।

—की दुनिया उधर होना, मु., असंभवं भवेत् चेत् ।

इन[1], सर्व, (हिं. इस) एतद्, इदम् ।

—दिनों, क्रि. वि., वर्तमाने, अद्यत्वे ।

इन[2], सं. पुं. (सं.) सूर्यः २. स्वामिन् ।

इनकमटैक्स, सं. पुं. (अं.) आयकरः ।

इनकार, सं. पुं. (अ.) प्रत्याख्यानं, प्रति-नि,-षेधः ।

—करना, क्रि. स., प्रति-नि,-षिध् (भ्वा. प. वे.)

इनसान, सं. पुं. (अ.) मनुष्यः ।

इनसानियत, सं. स्त्री. (अ.) मनुष्यत्वम् २. सज्जनता, शिष्टता ।

इनाम, सं. पुं. (अ. इनआम) पुरस्कारः, पारितोषिकम् ।

इनायत, सं. स्त्री. (अ.) कृपा २. उपकारः ।

इने-गिने, वि. (अनु० इन+हि. गिनना) कतिचन, स्तोकाः २. अल्पसंख्याकाः ।

इबारत, सं. स्त्री. (अ.) लेखः २. लेखशैली ।

इमरती, सं स्त्री. (सं. अमृतम् >) कंकणी, मिष्टान्नभेदः ।

इमली, सं. स्त्री. (सं. अम्लिका) आम्लि (ली)-का, चिंचा, तिंतिडि (डी) का २. अम्लिका-चिंचा,-फलम् ।

इमाम, सं. पुं. (अ.) पुरोहितः २. नेतृ ।

—बाड़ा, सं. पुं. (अ.+हिं.) मुहर्रमपर्वानुष्ठानवाटः ।

इमारत, सं. स्त्री. (अ.) भवनं, गृहम् ।

इम्तहान, सं. पुं. (अ.) परीक्षा ।

इम्ला, सं. स्त्री. (अ.) श्रुतलेखः २. अक्षर-वर्ण,-विन्यासः ।

इयत्ता, सं. स्त्री. (सं.) सीमा, परिमाणम् ।

इरादा, सं. पुं. (अ.) संकल्पः, निश्चयः ।

इरावती, सं. स्त्री. (सं.) कश्यपसुता २. नदी-विशेषः (= रावी) ३. ओषधिभेदः (= पत्थरचट) ।

इर्द-गिर्द, क्रि. वि. (अनु० इर्द+फ़ा. गिर्द) परितः, अभितः, सर्वतः २. उभयतः, इतस्ततः ।

इलज़ाम, सं. पुं. (अ.) अभियोगः, दोष-, आरोपः ।

इलहाम, सं. पुं. (अ.) देववाणी ।

इला, सं. स्त्री. (सं.). पृथिवी २. पार्वती ३. वाणी ४. बुद्धिमती नारी ५. गौः (स्त्री.) ।

इलाका, सं. पुं. (अ.) प्रदेशः, भूभागः । २. संबंधः ।

इलाज, सं. पुं. (अ.) चिकित्सा, उपचारः २. औषधं, ओषधिः (स्त्री.) ३. युक्तिः (स्त्री.), प्रतीकारः ।

इलायची, सं. स्त्री. (सं. एला) (बड़ी) एला, चंद्रबाला, बहुला, त्रिदिवा २. (छोटी) कुंतिः-त्रुटिः (स्त्री.), नंदिनी ।

—दाना, सं. पुं., (हिं.+फ़ा.) एलाबीजम् २. कुंतिबीजम् २. तद्बीजयुक्तो मिष्टान्नभेदः ।

इलाही, वि. (अ.) दैव, ईश्वरीय । सं. पुं., ईश्वरः ।

इल्म, सं. पुं. (अ.) विद्या, ज्ञानम् ।

इल्लत, सं. स्त्री. (अ.) रोगः २. बाधा ३. अपराधः ४. व्यसनम् ।

इव, अव्य. (सं.) यथा, तुल्य, सदृश, समान,-वत् ।

इशारा, सं. पुं. (अ.) संकेतः, इंगितम् २. संक्षिप्तकथनम् ३. गुप्तप्रेरणा ।

इश्क, सं. पुं. (अ.) अनुरागः, प्रणयः ।

इश्तहार, सं. पुं. (अ.) विज्ञापनं, विज्ञप्तिः (स्त्री.) २. घोषणा, ख्यापनम् ।

इषु, सं. पुं. (सं.) बाणः, सायकः ।

इषुधी, सं. पुं. (सं.-धिः) तूणीरः, तूणी ।

इष्ट, वि. (सं.) वांछित, अभिलषित, आकांक्षित २. अभिप्रेत ३. पूजित । सं. पुं., (सं. न.) धर्मकृत्यं, अग्निहोत्रादिकर्माणि २. कुलदेवः ३. मित्रम् ४. अरिंडः ५. इष्टका ।

—देव, सं. पुं. (सं.) कुलदेवता ।

—देवता, सं. स्त्री. (सं.) आराध्यदेवः ।

इष्टापूर्त, सं. पुं. (सं. न.) यज्ञखातादिकर्मन् (न.)।

इष्टि, सं. स्त्री. (सं.) अभिलाषः २. यज्ञः ३. पतंजलिकृतो व्याकरणनियमः ।

इस, सर्व. (सं. एषः) एतद, इदम् ।

इसपंज, सं. पुं. (अं. स्पंज) सुषिरदेहपिंडः २. परान्नपुष्टः ।

इसबगोल, सं. पुं. (फ़ा. यशबगोल) श्लक्ष्ण-स्निग्ध,-जीरकः ।

इसे, सर्व. (हिं. इस) १. (इसको) एतं (पुं.), एतां (स्त्री.), एतद् (न.), इमं (पुं.), इमां (स्त्री.), इदम् (न.) २. (इस के लिए) एतस्मै (पुं. न.), एतस्यै (स्त्री.), अस्मै (पुं. न.), अस्यै (स्त्री.)।

इस्तरी, सं. स्त्री. (सं. स्तरी >) स्तरणी, रजकलोहः-हम्।

इस्तीफ़ा, सं. पुं. (अ. इस्तैफा) त्यागपत्रम्।

इस्तेमाल, सं. पुं. (अ.) उपयोगः, व्यवहारः, प्रयोगः।

इह, क्रि. वि. (सं.) अत्र २. भूलोके। सं. पुं., भूलोकः।

—लीला, सं. स्त्री. (सं.) जीवनम्।

इहाता, सं. पुं. (अ.) वाटः-टी, प्रांगणं-नं, परिसरभूमिः (स्त्री.)।

ई

ई, देवनागरीवर्णमालायाः चतुर्थः स्वरवर्णः, ईकारः।

ईंगुर, सं. पुं. (सं. हिंगुलः-लम्) हिंगुलिः, हिंगुलु (पुं. न.), सिन्दूरम्।

ईंट, सं. स्त्री. (सं. इष्टका) इष्टिका। (पक्की) क्षरुका, पक्वेष्टका २. इष्टकाकारो धातुखंडः।

—से ईंट बजाना, मु., ध्वंस्-उन्मूल्-विनश्-निपत् (सब प्रे.)।

—पत्थर, मु., न किमपि, न किंचित्। डेढ़ वा ढाई ईंट की मस्जिद अलग बनाना, मु., असामान्यं आचर् (भ्वा. प. से.)।

ईंधन, सं. पुं., दे. 'इंधन'।

ईक्षण, सं. पुं. (सं. न.) अवलोकनं, दर्शनम् २. नेत्रम् ३. विवेचनम्।

ईख, सं. स्त्री. दे. 'इक्षु'।

ईजाद, सं. स्त्री., दे. 'आविष्कार'।

ईटि, सं. स्त्री. (सं. इष्टिः) सख्यं, सौहार्दम् २. प्रयत्नः।

ईति, सं. स्त्री. (सं.) कृषेः षट् उपद्रवाः (यथा- अतिवृष्टिः, अनावृष्टिः, शलभाः, मूषिकाः, खगाः, राज्ञोरात्मनश्च) २. विघ्नः ३. दुःखम्।

ईथर, सं. पुं. (अं.) दक्षु (न.), आदृम्।

ईद, सं. स्त्री. (अं.) यवनोत्सवभेदः।

—का चाँद, मु., दिवाप्रदीपः, दुर्लभदर्शनः।

ईदृश, क्रि. वि. (सं. न.) इत्थं, अनेन प्रकारेण। वि., दे. 'ऐसा'।

ईप्सा, सं. स्त्री. (सं.) इच्छा, अभिलाषः।

ईप्सित, वि. (सं.) अभिलषित, इष्ट।

ईमान, सं. पुं. (अ.) धर्मः २. सत्यम्। २. अविचलबुद्धिः (स्त्री.) ४. श्रद्धा।

—दार, वि. (अ. + फा.) धार्मिक, न्यायवर्तिन् २. निष्कपट ३. आस्तिक ४. विश्वसनीय।

ईरान, सं. पुं. (फ़ा.) पारसीकः।

ईरानी, वि. पारस (—सी स्त्री.)। सं. स्त्री., पारसी, पारसीकभाषा। सं. पुं., पारसीकाः, पारसीकवासिनः (बहु.)।

ईर्ष्या, सं. स्त्री. (सं.) मत्सरः, मात्सर्यं, परोत्कर्षासहिष्णुता, असूया।

ईर्ष्यालु, वि. (सं.) मत्सरिन्, असूयक, ईर्ष्यिन्, परोत्कर्षासहन।

ईश, सं. पुं. (सं.) प्रभुः, पतिः, स्वामिन् २. परमेश्वरः ३. नृपः ४. शिवः ५. 'एकादश' इति संख्या।

ईशान, सं. पुं. (सं.) स्वामिन्, प्रभुः २. महादेवः ३. पूर्वोत्तरदिक्कोणः।

ईश्वर, सं. पुं. (सं.) परमेश्वरः, परमात्मन्, जगदीश्वरः, परमेशः २. स्वामिन् ३. शिवः। वि., आढ्य।

प्रणिधान, सं. पुं. (सं. न.) ईश्वरे श्रद्धातिशयः, स्वकर्मणामीश्वरार्पणम्।

ईश्वरीय, वि. (सं.) दिव्य, दैव, ईशसंबंधिन्।

ईषत्, अव्य. (सं.) अल्पं, स्तोकं, न्यूनम्।

ईसबगोल, सं. पुं., दे. 'इसबगोल'।

ईसवी, वि. (फ़ा.) खिस्तसंबंधिन्।

—सन्, सं. पुं. (फ़ा + अ.) खिस्ताब्दः।

ईसा, सं. पुं. (अ.) खिस्तः, जीशुः।

ईसाई, वि. (फ़ा.) खिस्तानुयायिन्।

ईहा, सं. स्त्री. (सं.) चेष्टा २. उद्योगः ३. अभिलाषः ४. सोनः (हिं.)।

उ

उ, देवनागरीवर्णमालायाः पंचमः स्वरवर्णः, उकारः।

उँगली, सं. स्त्री. (सं. अंगुली), अंगुलः, अंगुरी, करशाखा (उँगलियों के क्रमशः नाम—अंगुष्ठः, तर्जनी, मध्यमा, अनामिका, कनिष्ठा)।

—का पटाखा, सं. पुं., अंगुलीमोटनं, मुचुटी।

उँगलियों पर नचाना, मु., यथेच्छं कृ (प्रे.)।

—उठाना, मु., निन्द् (भ्वा. प. से.), अधिक्षिप् (तु. प. अ.) २. मनागपि अपकृ।

कानी—, सं. स्त्री., कनिष्ठा।

कानों में उँगली देना, मु., औदासीन्येन परवचनानि न श्रु (भ्वा. प. अ.)।

दाँतों तले उँगली दबाना, मु., अत्यर्थं विस्मि (भ्वा. आ. अ.), चकितचकित (वि.) भू।

पाँचों उँगलियाँ घी में होना, मु., सर्वथा समृध् (दि. प. से.)।

उँचन, सं. स्त्री. (सं. उदंचनम् >) खट्वायाः पादभागस्था रज्जुः (स्त्री.)।

उंचास, वि., दे. 'उनचास'।

उंछ, सं. स्त्री. (सं. पुं.) उपात्तशस्यात् क्षेत्रात् शेषावचयनम्, उञ्छनम्।

—वृत्ति, सं. स्त्री. (सं.) उञ्छेन जीवननिर्वाहः। वि., उञ्छशील।

उँडेलना, क्रि. स. (सं. अव + हिं. डालना ?) प्र-, स्रु (प्रे.) निर्गल् (प्रे.), प्रस्यंद् (प्रे.), च्युत् (प्रे.)।

उंदुर, सं. पुं. (सं. उंदरुः) मूष (षि) कः।

उँह, अव्य. (अनु.) घृणोपेक्षानिषेधपीडादिसूचकमव्ययम्, धिक्, न, नहि, आः, हा इ०।

उऋण, वि. (सं. उत् + ऋण) अनृण, ऋणमुक्त।

उकड़ूँ, सं. पुं. (सं. उत्कुतोरु) उपवेशनप्रकारविशेषः।

—बैठना, क्रि. अ., अवनतसक्थि आस् (अ. आ. से.)।

उकताना, क्रि. अ. (सं. उत्क >) खिद्—निर्विद् (दि. आ. अ.), उद्विज् (तु. आ. अ.)।

उकताया हुआ, वि. खिन्न, निर्विण्ण।

उकसना, क्रि. अ. (सं. उत्कर्षणं >) सं-वि,-क्षुभ् (दि. प. से.), उत्-सं,-तप् (दि. आ. अ.) २. उद्गम्, उन्नम् (भ्वा. प. अ.) ३. प्ररुह् (भ्वा. प. अ.) ४. विश्लिष् (दि. प. अ.)। सं. पुं., संक्षोभः; संतापः; उद्गमः; प्ररोहः; विश्लेषः।

उकसाना, क्रि. स. (हिं. उकसना) उत्तिज्, उद्दीप्, प्रोत्सह्, सं-वि,-क्षुभ्, प्रचुद् (सब प्रे०) २. उत्था-उद्गम् (प्रे.) ३. अपसृ (प्रे.)। सं. पुं, उत्तेजनं, उद्दीपनं; उत्थापनं; अपसारणम्।

उक्त, वि. (सं.) कथित, उदित, भाषित, लपित, व्याहृत, उदीरित।

उक्ति, सं. स्त्री. (सं.) कथनं, वचनम् २. अद्भुतवाक्यम् ३. संमतिः (स्त्री.)।

उक्थ, सं. पुं. (सं. न.) सामवेदः २. स्तोत्रं ३. प्राणः।

उक्षा, सं. पुं. (सं. उक्षन्) वृषभः २. सूर्यः।

उखड़ना, क्रि. अ. (सं. उत्खननम्) उन्मूल्, उत्खन्, समूलं उद्वह् (सब कर्म.) २. (दृढस्थितेः) पृथक् भू ३. संधेः चल् (भ्वा. प. से.) वा त्रुट् (दि. प. से.) ४. स्वर-ताल,-च्युत (वि.) भू (संगीत) ५. अपसृ (भ्वा. प. अ.), विद्रु (भ्वा. प. अ.) ६. सीवनं त्रुट् सं. पुं., उन्मूलनं, उत्खननं; संधेश्चलनं; स्वर-ताल,-भंग; अपसरणं; सीवनत्रोटनम्।

दम—, मु., स्वरभंगः २. प्राणनिष्क्रमणम्।

पैर—, मु., विद्रवणं, पलायनम्।

उखड़वाना, क्रि. प्रे. (हिं. उखड़ना) अन्येन उन्मूल्—उत्पट्—उत्खन्—व्यपरुह्—उच्छिद् (सब प्रे.)।

उखली, सं. स्त्री. (सं. उलूखलम्) उदूखलम्।

उखा, सं. स्त्री., (सं.) स्थाली. दे. 'देग'।

उखाड़, सं. स्त्री. (हिं. उखाड़ना) उन्मूलनं, उत्पाटनं, उत्खननम्।

उखाड़ना, क्रि. स. (हिं. उखड़ना) उन्मूल्-उत्पट्-उत्खन्-व्यपरुह्-उच्छिद् (सब प्रे.) २. सन्धिं चल् (प्रे.) ३. वि-परा,-जि (भ्वा. आ. अ.) ४. अपसृ (प्रे.) ५. विनश् (प्रे.)

गड़े मुर्दे—मु. विस्मृतकलहान् पुनः उद्दीप् (प्रे.)।

उगना, क्रि. अ. (सं. उद्गमनम्) उद्गम् (भ्वा. प. अ.), उदि (=उत्+इ; अ. प. अ.), उदय् (=उत्+अय्, भ्वा आ. से.) २. स्फुट् (तु. प. से.), उद्भिद् (कर्म.) प्ररुह् (भ्वा. प. अ.) ३. उत्पद् (दि. आ. अ.), जन् (दि. आ. से.) । सं. पुं. उद्गमः, उदयः, उद्भेदः, प्ररोहः, प्र-, स्फुटनम्, उत्पत्तिः (स्त्री.) । उगा हुआ, वि., उद्गत, उदित; उद्भिन्न, प्ररूढ; प्र-, स्फुटित, उत्पन्न ।

उगलना, क्रि. स. (सं. उद्गिरणम्) उद्गृ (तु. प. से.), वम् (भ्वा. प. से.), छर्द् (चु.) । २. अन्यायप्राप्तधनं प्रतिदा (जु. उ. अ.) ३. गोपनीयं प्रकाश् (प्रे.) ४. बहिष्कृ (त. उ. अ.) ।

जहर—, मु., अरुंतुदं वचनं वद् (भ्वा. प. से.)

उगलवाना, क्रि. प्रे. (हिं. उगलना) वम्-उद्गृ (प्रे.) २. अपराधं स्वीकृ (प्रे.) ३. अन्यालब्धं धनं प्रतिदा (प्रे. प्रतिदापयति) ।

उगाना, क्रि. स., (हिं. उगना) प्ररुह् (प्रे.), (अन्नादिकं) उत्पद् (प्रे.) ३. प्रहाराय शस्त्रादिकं उन्नम् (प्रे.) ।

उगाल, सं. पुं. (सं. उद्गारः) मुखस्रावः, लाला २. कफः, श्लेष्मन् (पुं.) ३. जीर्णवस्त्रम् ।

—दान, सं. पुं., प्रतिग्राहः, पतद्ग्रहः ।

उगालना, क्रि. स. (हिं. उगलना) उद्गृ (त. प. से.) २. रोमंथायते (ना. धा.) ।

उगाहना, क्रि. स. (सं. उद्ग्रहणम् >) (करं ऋणं वा) समाह (भ्वा. उ. अ.), संभृ (जु. उ. अ.), अव-वि-सं-नि, चि (स्वा. उ. अ.) ।

उगाही, सं. स्त्री. (हिं. उगाहना) (धनस्य) समाहारः, संभरणं, संग्रहणं, समुच्चयनम् २. संगृहीतं धनम् ३. भूमिकरः ४. ऋणादिकस्य अंशशः संग्रहणम् ५. कुसीदं, वार्द्धुषवृत्तिः (स्त्री.) ।

उग्र, वि. (सं.) प्रचंड, तीव्र, प्रबल, घोर, रौद्र । सं. पुं. (सं.) शिवः २. विष्णुः ३. सूर्यः ।

उग्रता, सं. स्त्री. (सं.) प्रचण्डता, भयंकरता, निर्दयता, दारुणता ।

उग्रा, सं. स्त्री. (सं.) दुर्गा, महाकाली २. कर्कशा नारी ३. वचा ४. छिक्किकौषधम् ।

उघड़ना, क्रि. अ. (सं. उद्घटनम्) उद्घट् (कर्म.), अपा-वि,-वृ (कर्म.) २. नग्नी-विवस्त्री,-भू ३. प्रकाश् (भ्वा. आ. से) ४. रहस्यं भिद् (कर्म.) ।

उघाड़ना, क्रि. स. (हिं. उघड़ना) उद्घट् (प्रे.) अपा-वि,-वृ (स्वा. उ. से.) २. नग्नी-विवस्त्री,-कृ ३. प्रकट् (प्रे.) ४. रहस्यं भिद् (प्रे.) ।

उघाड़ा, वि. (हिं. उघाड़ना) विवस्त्र, नग्न २. प्रत्यक्ष ३. प्रकाशित ।

उचकन, सं. पुं. (हिं. उचकना) आधारः, अवलंबः, पात्रादिकस्याधारभूतः प्रस्तरखंडः ।

उचकना, क्रि. अ. (सं. उच्चकरणं >) प्रपदेन उत्स्था (भ्वा. प. अ.), पादाग्रेण कार्यं उन्नम् (प्रे.) २. उत्प्लु (भ्वा. आ. अ.) ।

उचकाना, क्रि. स. (हिं. उचकना) उचकना के धातुओं के प्रेरणार्थक रूप ।

उचक्का, सं. पुं. (हिं. उचकना) वंचकः, प्रतारकः, धूर्तः २. ग्रंथि,-छेदकः-चौरः ।

उचटना, क्रि. अ. (सं. उच्चटनम् >) विक्षिप् (दि. प. अ.), विघट् (भ्वा. आ. से.), वियुज् (कर्म.) २. विरज् (कर्म.), उपेक्ष् (भ्वा. आ. से.) ।

उचटाना, क्रि. स. (सं. उच्चाटनम् >) विक्षिप्-विघट्-विच्छिद् (प्रे.) ।

उचाट, सं. पुं (सं. उच्चाटः >) विरक्तिः (स्त्री.), वैराग्यं, औदासीन्यं, अन्यमनस्कता । वि., उदासीन, विरक्त ।

—होना, क्रि. अ. निर्विद्-खिद् (दि. आ. अ) ।

उचित, वि. (सं.), युक्त, संगत, उपपन्न ।

उच्च, वि. (सं.) उन्नत, उच्छ्रित, उद्-तुंग, उद्गत २. उत्तम, श्रेष्ठ ।

उच्चता, सं. स्त्री. (सं.) उच्च् (च्छ) यः, आरोहः, उत्सेधः, तुङ्गता २. श्रेष्ठत्वं, महत्त्वम् ।

उच्चाटन, सं. पुं. (सं. न.) विश्लेषणं, पृथक्करणम् २. उत्पाटनं, उन्मूलनम् ३. तांत्रिकाभिचारभेदः ४. विरक्तिः (स्त्री.) ।

उच्चार, सं. पुं. (सं.) मापनं २. पुरीषम् ।

उच्चारण, सं. पुं. (सं. न.) उदीरणं, भाषणम् २. भाषणविधिः ।

—करना, क्रि. स., उच्चर्-उदीर् (प्रे.), व्याहृ (भ्वा. प. अ.), गद्-वद् (भ्वा. प. से.) ।

उच्चारित, वि. (सं.) उदीरित, उदित, भाषित, व्याहृत ।

उच्चैःश्रवा, सं. पुं. (सं.-श्रवस्) समुद्रमंथनजः श्वेतघोटकः २. एड, ईषद्-, वधिरः ।

उच्छिन्न, वि. (सं.) खण्डित, लून २. उन्मूलित ३. नष्ट ।

उच्छिष्ट, वि. (सं.) भुक्तावशिष्ट, जुष्ट २. व्यवहृतचर । सं. पुं. भुक्तावशिष्टवस्तु (न.), जुष्टं २. मधु (न.) ।

उच्छू, सं. पुं. (अनु.) जलादिरोधजः कासभेदः ।

उच्छृंखल, वि. (सं.) निरंकुश, स्वैरिन्, उद्दाम, उद्दण्ड, अशिष्ट, अविनीत २. उत्सूत्र, विधि-क्रम-नियम,-विरुद्ध ।

उच्छेद, सं. पुं. (सं) उन्मूलनं, उत्पाटनं, विश्लेषणं, खण्डनम् २. नाशः, ध्वंसः ।

—करना, क्रि. स., उन्मूल्-उत्पट्-विश्लिष्-नश्- (प्रे.) ।

उच्छेदन, सं. पुं. (सं. न.) दे. 'उच्छेद' ।

उच्छ्वास, सं. पुं. (सं.) आहरः, आनः २. श्वासः ३. ग्रन्थपरिच्छेदः ।

उछंग, सं. पुं. (सं. उत्संगः) क्रोडम् २. हृदयम् ।

उछल-कूद, सं. स्त्री. (हिं. उछलना-कूदना) क्रीडा, खेला, विहारः, कूर्दनं, क्रीडाकूर्दनम् २. चांचल्यं, अधीरता ।

उछलना, क्रि. अ. (सं. उच्छलनम्) उच्छल्-वल् (भ्वा. उ. से.), उत्प्लु (भ्वा. आ. अ.), उत्पत् (भ्वा. प. से.) २. अत्यन्तं प्रसद् (भ्वा. प. अ:) ३. तृ (भ्वा. प. से.) । सं. पुं., उच्छलनं, उत्पतनं, उत्-, प्लवनं, वल्गितं, प्लवः, झंपः-पा ।

उछाल, सं. स्त्री (सं. पुं.) दे. 'उछलना' सं. पुं. । २. प्लवनावधिः, प्लुतिसीमा ३. वमनम् ।

उछालना, क्रि. स. (सं. उच्छालनम्) उच्छल् (प्रे.), उत्क्षिप् (तु. प. अ.) २. प्रकट् (प्रे.) ।

उछाह, सं. पुं. (सं. उत्साहः) उत्सुकता, व्यग्रता २. हर्षः, आनन्दः ३. उत्सवः ४. रथयात्रा ।

उजड़ना, क्रि. अ. (सं. अवजटनम् >) विजन-निर्जन (वि.) भू २. नि-अव,-पत् (भ्वा. प. से.), स्रंस्-भ्रंश् (भ्वा. आ. से.) ३. क्षयं या (अ. प. अ.)

उजड्ड, वि. (सं. उत्+जड >) जड, मूढ, अज्ञ २. असभ्य, अशिष्ट ३. उद्दंड, निरंकुश ।

उजबक, सं. पुं. (तु.) जातिविशेषः २. मूर्खः ।

उजरत, सं. स्त्री. (अ.) भृतिः (स्त्री.), वेतनम् २. कर्मण्या, निष्क्रयः ।

उजलत, सं. स्त्री. (अ.) शीघ्रता, त्वरा ।

उजला, वि. (सं. उज्ज्वल) श्वेत, शुक्ल, शुभ्र, धवल, सित, धौत, गौर २. स्वच्छ, निर्मल ३. दीप्त, दिव्य, प्रकाशमान ।

उजागर, वि. (सं. उत्+जागरित >) प्रकाशमान २. प्रसिद्ध ।

उजाड़, सं. पुं. (हिं. उजड़ना) जीर्ण-शीर्ण,-स्थानम् २. निर्जन-विजन,-स्थानम् ३. वनम्, अरण्यम् । वि., जर्जर, जीर्ण २. शून्य, विजन ३. एकान्त, निभृत ।

उजाड़ना, क्रि. स. (हिं. उजड़ना) निर्जनी-शून्यी,-कृ, अवसद् (प्रे.) २. नि-अव,-पत् (प्रे.) वि-प्र,-नश् (प्रे.), प्र-वि,-ध्वंस् (प्रे.), उन्मूल्-उत्पट् (चु.) ।

उजाड़ू, वि. (हिं. उजाड़ना) अतिव्ययिन् २. मुक्तहस्त ।

उजाला, सं. पुं. (सं. उज्ज्वालः) प्रकाशः, आलोकः, द्युतिः-दीप्तिः (स्त्री.) । वि., उज्ज्वल, प्रकाशमान ।

उजाली, सं. स्त्री. (हिं. उजाला) चन्द्रिका, ज्योत्स्ना । वि. उज्ज्वला, दीप्ता ।

—दूसरे को, मु., अन्योऽन्यं, परस्परं, इतरेतरम् । वि. मिथः (अव्य.), परस्पर, इतरेतर ।
—पेट के, मु., सोदर, सहोदर, सोदर्य ।
—बात, मु., सत्य प्रतिज्ञा २. यथार्थवचनम् ।
—सा, मु., तुल्य, सदृश, सम ।
—स्वर से कहना, मु., ऐकमत्येन वद् (भ्वा.-प. से.) ।
केवल—, वि., असहाय, अद्वितीय ।
कोई—, कश्चित्, काचित्, किंचित् ।
दो में से—, वि., अन्यतर, एकतर, अन्यतरा, अन्यतरत् (न.) ।
बहुतों में से—, अन्यतम, एकतम, एकतमा, एकतमत् (न.) ।
एकचित्त, वि. (सं.) अवहित, स्थिरचित्त २. अभिन्नहृदय ।
एकचित्तता, सं. स्त्री (सं.) अवधानं, मनोयोगः २. ऐकमत्यं, संमतिः (स्त्री.) ।
एकछत्र, वि. (सं.) एकशासकाधीन । क्रि. वि. ऐकाधिपत्येन ।
एकड़, सं. पुं. (अं.) क्षेत्रफलमानभेदः, एकड़म् (१$\frac{3}{5}$ बीघा =४८४० वर्गगज) ।
एकतरफ़ा, वि. (फ़ा. यकतरफः) एकपक्षीय २. सपक्षपात ३. एकपार्श्वसंबंधिन् ।

—डिगरी, सं. स्त्री. (फ़ा+अं.) एकपक्ष्यनिदेशः ।

एकता, सं. स्त्री. (सं.) संघटनं, ऐक्यम्, संहतिः (स्त्री.), संगमः, समवायः २. साम्यं, तुल्यता ।

एकतान, वि. (सं.) एकाग्रचित्त, मग्न, लीन ।

एकतारा, सं. पुं. (हिं. एक+तार) एकतारः, वाद्यभेदः ।

एकत्र, क्रि. वि. (सं.) एक,-स्थले-स्थाने ।

—करना, क्रि. स., संग्रह् (क्र्. उ. से.) ।

—होना, क्रि. अ., संमिल् (भ्वा. प. से.) ।

एकत्रित, वि. (सं. एकत्र>) संघीभूत, संचित, संगृहीत ।

एकत्व, सं. पुं. (सं. न.) दे. 'एकता' ।

एकदंत, सं. पुं. (सं.) गणेशः, लंबोदर ।

एकदेशीय, वि. (सं.) एकदेश्य, एकस्थानीय ।

एकनिष्ठ, वि. (सं) एकोपासक ।

एकरंग, वि. (सं.) समान, सवर्ण २. शुद्धात्मन् ।

एकरस, वि. (सं.) तुल्य, सदृश २. अव्यय, अपरिणामिन्, परिवर्तनरहित ।

एकरूप, वि. (सं.) स-सम-समान,-रूप, तुल्य, समान ।

एकवचन, सं. पुं. (सं. न.) एकवाचकं वचनम् (व्या.) ।

एकवाक्यता, सं. स्त्री. (सं.) सांमत्यं, ऐकमत्यम् ।

एकहरा, वि. (-सं. एकस्तर) एकास्तर, एकफलक २. एक,-सूत्र-गुण ३. तनु, सूक्ष्म ।

—बदन, सं. पुं., कृशदेहः ।

एकांकी, सं. पुं. (सं.-किन्) रूपकभेदः २. एकांकयुक्तं रूपकम् ।

एकांगी, वि. (सं.-गिन्) एकपक्षीय २. दुर्दम ।

एकांत, वि. (सं.) अत्यन्त २. एकाकिन्, पृथक्स्थित । सं. पुं. (सं.) विजनं, विविक्तम् ।

—वास, सं. पुं. (सं.) संसर्गाभावः ।

—वासी, वि. (सं.-सिन्) निर्जन-विजन,-वासिन् ।

एका, सं. पुं. (हिं. एक) संहतिः (स्त्री.), ऐक्यम्, संघटनम् ।

एकाएक, क्रि. वि. (सं. एक+एक>) अकस्मात्, एकपदे, सहसा, अकांडे ।

एकाकार, सं. पुं. (सं.) सारूप्यं, साम्यम् वि., सरूप, सम, समान ।

एकाकी, वि. (सं.-किन्) एकल, दे. 'अकेला' ।

एकाक्ष, वि. (सं.) काण, चन्द्रलोचन । सं. पुं., काकः २. शुक्राचार्यः ।

एकाग्र, वि. (सं.) स्थिरबुद्धि, धीर २. अनन्यचित्त, एकतान, एकाग्रवृत्ति ।

—चित्त, वि., दे. 'एकाग्र' २. ।

एकाग्रता, सं. स्त्री. (सं.) अनन्य,-चित्तता-मनस्कता, एकतानता ।

एकात्मता, सं. स्त्री. (सं.) एकत्वं, एकता, एकरूपता, ऐक्यं, भेदाभावः ।

एकादशी, सं. स्त्री. (सं.) हरि,-दिनं-दिवसः-वासरः ।

एकाधिकार, सं. पुं. (सं.) एक,-व्यापारः-व्यवसायः २. अनन्यसाधारणोऽधिकारः ।

एकाधिपति, सं. पुं. (सं.) अधीश्वरः, अधिराजः, सम्राज्, महाराजः ।

एकाधिपत्य, सं. पुं. (सं. न.) एक,-प्रभुत्वं-स्वामित्वम्, पूर्णप्रभुत्वम् ।

एकार्थक, वि. (सं.) सम-समान-तुल्य,-अर्थक । सं. पुं., पर्यायशब्दः ।

एकावली, सं. स्त्री. (सं.) अलंकारभेदः (सा.) २. एकयष्टिका, एकतारो हारः ।

एकीकरण सं. पुं. (सं. न.) एकतासाधनं, एकत्वसंपादनम् ।

एकीभाव, सं. पुं. (सं.) संघटनं, संयोगः, संश्लेषः ।

एकीभूत, वि. (सं.) संयुक्त, मिश्रित, संहत ।

एक्का, वि. (सं. एक>) एक,-विषयक-संबंधिन् २. एकाकिन्, एकल । सं. पुं. वृथाभ्रष्टः प्राणिन् २. एकपशुवाह्यो द्विचक्रो वाहनभेदः ३. सैनिकभेदः ४. एकचिह्नयुक्तं क्रीडापत्रम् ।

एक्कावान, सं. पुं. (हिं. एक्का) सारथिः, सूतः, हयंकषः ।

एक्की, सं. स्त्री. (हिं. एक्का) एकवृषभवाह्यं शकटम्, वृषवाहनम् ।

एक्सरे, सं. स्त्री. (अं.) एक्सरश्मिः ।

एजेंट, सं. पुं. (अं.) प्रतिनिधिः, आ २. दे. 'अढ़तिया' ३. कारकः ।

एजेंसी, सं. स्त्री. (अं.) परद्रव्यक्रयविक्रयस्थानम् २. प्रातिनिध्यम् ३. कारकत्वम् ।

एटम, सं. पुं. (अं.) अणुः ।

—बम, सं. पुं., अणुबंबम् ।

एड़, सं. स्त्री. [सं. एडु (डू) कम्] पार्ष्णिः (पुं. स्त्री.), पाद,-मूलं-तलम्, गोहिरम् ।

—लगाना, मु., घोटकादीन् पार्ष्णिना प्रचुद् (प्रे.) २. उत्तिज् (प्रे.) ३. बाध् (भ्वा. आ. से.) ।

एडिटर, सं. पुं. (अं.) संपादकः ।

एडिटरी, सं. स्त्री. (अं. एडिटर >) संपादकता ।

एड़ी, सं. स्त्री. [सं. एडु (डू) कं] दे. 'एड़' ।

—रगड़ना, मु., सुदीर्घकालं कष्टं सह् (भ्वा. आ. से.) २. चिररोगेण पीड् (कर्म) ।

—से चोटी तक, मु., आपादशीर्षम्, आद्यन्तम्

एतबार, सं. पुं. (अ.) विश्वासः, प्रत्ययः ।

एतराज, सं. पुं. (अ.) आपत्तिः (स्त्री.), बाधः, विरोधः, आक्षेपः, प्रत्यवायः ।

एरंड, सं. पुं. (सं.) चित्रकः, पंचाङ्गुलः, दीर्घपत्रकः, गन्धर्वहस्तकः ।

एलची, सं. पुं. (तु.) राज-, दूतः, संदेशहरः ।

एला, सं. स्त्री. (सं.) बाला, हिमा, चंद्रिका, बहुलगंधा, ऐन्द्री, द्राविड़ी ।

एलान, सं. पुं. (अ.) घोषणा, विज्ञप्तिः (स्त्री.) ।

एवं, क्रि. वि. (सं.) इत्थं, अनया रीत्या २. अपि, च ।

एव, अव्य. (सं.) केवलम्,-मात्र २. अपि, च, अपि च ।

एवज, सं. पुं. (फ़ा.) प्रति (ती) कारः, प्रति,-क्रिया-अपकारः २. क्षति,-निष्कृतिः (स्त्री.)-पूरणम् ३. प्रतिनिधिः ।

एशिया, सं. पुं. (यू. इव. अशु = पूर्वदिशा >) पंचमहाद्वीपेषु अन्यतमः ।

एशियाई, वि. (अं. एशिया >) एशियासंबंधिन्

एषणा, सं. स्त्री. (सं) आकांक्षा, स्पृहा, वांछा, इच्छा ।

एहतियात, सं. स्त्री. (अ.) अवधानं, अवेक्षा २. अल्पाहारः ।

एहसान, सं. पुं. (अ.) कृपा, उपकारः २. कृतज्ञता ।

—मंद, वि., कृतज्ञ, कृतवेदिन् ।

ऐ

ऐ, हिन्दीवर्णमालाया नवमः स्वरवर्णः, ऐकारः ।

ऐं, अव्य. (अनु.) किं, कथं, ननु २. अहो, अद्भुतं, आश्चर्यम् ।

ऐंच, सं. स्त्री. (हिं. ऐंचना) आ-समा,-कर्षः-कर्षणम्, प्रसारः, आयामः, विततिः (स्त्री.) ।

ऐंचना, क्रि. स. (हिं. खींचना) कृष् (भ्वा. प. अ.), २. विस्तृ (प्रे.), वितन् (त. उ. से.) ३. अप-अव,-कृष् ।

ऐंचाताना, वि. (हिं. ऐंचना + तानना) वक्रदृष्टि, केकर, केदर, वलिर ।

ऐंचातानी, सं. स्त्री. (पूर्व.) उभयतः कर्षणं २. संघर्षः, स्पर्द्धा, अहमहमिका ।

ऐंठ, सं. स्त्री. (हिं. ऐंठना) गर्वः, दर्पः आटोपः २. सगर्वगतिः ३. द्वेषः, मात्सर्यम् ४. दे. 'ऐंठन' ।

ऐंठन, सं. स्त्री. (पूर्व.) व्यावर्तनं, आ-, कुञ्चनं, वक्रता २. चूर्णः, वस्त्रभंगः ३. आकर्षणम् ४. गात्रोपघातः, उद्वेष्टनम् ।

ऐंठना, क्रि. स. (सं. आवेष्टनम्) व्या-परि,-वृत् (प्रे.), मुट्-मुड् (चु.), आकुंच् (भ्वा. प. से.) २. पीडयित्वा आदा (जु. आ. अ.), बलेन निष्कृष् (भ्वा. प. अ.) ३. छलेन आदा । क्रि. अ., आकुंच् (कर्म.), व्यावृत् (भ्वा. आ. से.) २. प्र-वि,-तन् (कर्म.) ३. गर्व् (भ्वा. प. से.) ४. प्रलप् (भ्वा. प. से.) ५. दे. 'मरना' ।

ऐंठू, वि. (हिं. ऐंठना) गर्वित, दृप्त ।

ऐंड़, सं. पुं. (हिं. ऐंठ) दे. 'ऐंठ' (१) । २. आवर्तः, भ्रमः । वि., निर्गुण, अकिंचित्कर ।

—दार, वि. (हिं. + फा.) सगर्व, अहंमानिन् २. उज्ज्वल ।

—ऐंड़ना, क्रि. अ. (हिं. ऐंठना) व्यावृत् (भ्वा. आ. से.) २. अंगानि आतन् (त. उ. से.) ३. गर्व् (भ्वा. प. से.) । क्रि. स., दे. 'ऐंठना' क्रि. सं. (१) ।

ऐंड़ाना, क्रि. अ. (हिं. ऐंड़ना) अंगानि आतन् (त. उ. से.) २. सगर्वं चल् (भ्वा. प. से.)।

ऐंद्र, वि. (सं.) इन्द्र-शक्र,-विषयक, पौरन्दर। सं. पुं., ऐन्द्रिः, इन्द्रपुत्रः।

ऐंद्रजालिक, सं. पुं. (सं.) मायिन्, मायिकः, कुहुकजीविन्।

ऐंद्रिय, वि. (सं.) ऐन्द्रियक, इन्द्रिय,-विषयक-ग्राह्य-संबंधिन्।

ऐ, अव्य. (सं. अयि) भोः, हे, अरे।

ऐकांतिक, वि. (सं.) सिद्ध, सम्पन्न २. संपूर्ण ३. निर्दोष ४. अनन्यसम्बद्ध।

ऐक्ट, सं. पुं. (अं.) अधिनियमः २. रूपक-नाटक, अंकः ३. कृतिः (स्त्री.)।

—करना, क्रि. स., अभि नी (भ्वा. प. अ.), नट् (चु.)।

ऐक्टर, सं. पुं. (अं.) नर्तकः, नटः, शैलूषः, कुशीलवः, अभिनेतृ।

ऐक्ट्रेस, सं. स्त्री. (अं.) नटी, नर्तकी, अभिनेत्री।

ऐक्य, सं. पुं. (सं. न.) एकता, एकत्वम् २. दे. 'एका'।

ऐच्छिक, वि. (सं.) वैकल्पिक (-की स्त्री.), स्वेच्छातंत्र, रुच्यधीन, सविकल्प।

ऐड्वोकेट, सं. पुं. (अं.) पक्षसमर्थकः, परार्थं वक्तृ।

ऐतिहासिक, वि. (सं.) इतिहास,-विषयक-संबंधिन् २. इतिहासज्ञ, पुरावृत्तवेत्तृ।

ऐतिह्य, सं. पुं. (सं. न.) पारंपर्योपदेशः, प्रमाण-भेदः (न्या.)।

ऐन[1], सं. पु., दे. 'अयन'।

ऐन[2], वि. (अ.) न्याय्य, उचित २. संपूर्ण। सं. स्त्री. नेत्रं, नयनम्।

ऐनक, सं. स्त्री. (अ. ऐन >) उपनेत्रं-त्रे, नेत्रकाचौ।

ऐब, सं पुं. (अ.) दोषः, विकारः, २. व्यसनं, अवगुणः।

ऐबी, वि. (अ.) दोषिन्, व्यसनिन् २. कुचेष्टकः।

ऐयार, सं. पुं. (अ.) मायाविन्, धूर्त्तः, छलिन्।

ऐयारी, सं. स्त्री. (अ.) कपटित्वं, धूर्तता, माया-विता।

ऐयाश, वि. (अ.) भोगिन्, विलासिन् २. कामुक, लंपट।

ऐयाशी, सं. स्त्री. (अ.) विलासिता २. कामुकता।

ऐरागैरा, सं. पुं. (अ. गैर + अनु. ऐर) परः, अपरिचितः २. तुच्छजनः।

ऐरावत, सं. पुं. (सं.) इन्द्रगजः, चतुर्दन्तः, सदादानः, अभ्रमातंगः २. विद्युद्युक्तो मेघः ३. इन्द्रचापः।

ऐरावती, सं. स्त्री. (सं.) ऐरावतभार्या २. विद्युत् (स्त्री.) ३. पंचनदप्रान्ते नदीविशेषः (=रावी)।

ऐश, सं. पुं. (अ.) विलासः, सुखं, भोगः २. सुखसाधनम्।

—व आराम, सं. पुं., सुखभोगौ, आमोद-प्रमोदौ।

ऐश्वर्य, सं. पुं. (सं. न.) धनं, अर्थः, द्रव्यं, वित्तं, विभवः, संपत्तिः (स्त्री.) २. अणिमादयो योग-सिद्धयः (स्त्री. बहु.) ३. प्रभुत्वं, आधिपत्यम्।

ऐश्वर्यशाली, वि. (सं. लिन्) ऐश्वर्यवत्, धनिक, धनाढ्य, सम्पन्न।

ऐसा, वि. (सं. ईदृश) एवंविध, एतत्तुल्य, एतादृश। (स्त्री., ईदृशी, एतादृशी)।

—वैसा, मु., तुच्छ, साधारण।

ऐसे, क्रि. वि. (हिं. ऐसा) इत्थं, एवं, अनेन प्रकारेण।

ऐहिक, वि. (सं.) सांसारिक, व्यावहारिक, लौकिक।

ओ

ओ, हिंदीवर्णमालाया दशमः स्वरवर्णः, ओकारः।

ओं[1], अव्य. (सं.) आ, एवं, एवमेव, वाढम्, अथ किं, तथा, तथास्तु, अस्तु।

ओं[2], सं. पुं. (सं. अव्य.) प्रणवः, ओंकारः।

ओंकार, सं. पुं. (सं.) ओम् इति शब्दः, प्रणवः।

ओंठ, सं. पुं. (ओष्ठः) दंत-रदन-दशन-रद,-छदः-पटः। (ऊपर का) ऊर्ध्वौष्ठः। (नीचे का) अधरः।

—चबाना, मु., कुप् (दि. प. से.)।
ओ, अव्य. (अनु.) भोः, अयि, हे, अरे २. च, अपि च ३. अहो, ही ४. स्मरणानुकंपादि-सूचकमव्ययम्।
ओक[1], सं. पुं. (सं. ओकस् न.) गृहं, आलयः २ शरणं, आश्रयः।
ओक[2], सं. स्त्री. (अनु.) वमनेच्छा, विवमिषा।
ओकना, क्रि. अ. (हिं. ओक[1]) उद्–,वम् (भ्वा. प. से.) २. महिषीव रेभ् (भ्वा. आ. से.)।
ओकाई, सं. स्त्री. (हिं. ओकना) वमनं २. वमनेच्छा।
ओखली, सं. स्त्री. (सं. उलूखलम्) काष्ठमयं पाषाणमयं वा उदू (लू) खलम्।
ओघ, सं. पुं. (सं.) समूहः, राशिः २. घनत्वं, सान्द्रता ३. प्रवाहः, धारा।
ओछा, वि. (सं. तुच्छ) क्षुद्र, अधम, लघुचेतस्, कापुरुष २. गाध, अल्पजल ३. लघु, सुसह्य ४. अपर्याप्तलंब।
—पन, सं. पुं., तुच्छता, क्षुद्रता, नीचता।
ओज, सं. पुं. (सं. ओजस् न.) तेजस्, प्रतापः, मुखकान्तिः (स्त्री.) २. प्रकाशः ३. गुणभेदः (सा.) ४. देहस्थरसानां सारांशः।
ओजस्विता, सं. स्त्री. (सं.) कान्तिः (स्त्री.), तेजस् (न.)।
ओजस्वी, वि. (सं.–विन्) तेजस्विन्, कान्तिमत्, प्रभावशालिन्, शक्तिमत्।
ओजोन, सं. पुं. (अं.) प्रजारकं, दाहनम्, वातिभेदः।
ओझरी, सं. स्त्री. (सं. उदरम्) कुक्षिः, तुंदं, फंडः २. आमाशयः, अन्नाशयः, जठरम्।
ओझल, सं. पुं. (सं. अवरुन्धनम् >) आवरणं, आच्छादनम्। वि., अदृश्य, अन्तरित,।
ओझा, सं. पुं. (सं. उपाध्यायः >) ब्राह्मण-जातिभेदः २. भूतबाधाहरः, कुहकः।
ओट, सं. स्त्री. (सं. उटम्=घास फूस >) व्यवधानं, तिरस्करिणी, प्रतिसीरा, जवनिका २. संश्रयः, आश्रयः।
ओटना, क्रि. स. (सं. आवर्तनम् >) यंत्रेण कार्पासबीजानि पृथक् कृ २. पुनः पुनः वद् (भ्वा. प. से.)।
ओटनी, सं. स्त्री. (हिं. ओटना) कार्पास-बीजपृथक्करणयंत्रम्, *वेलनी।
ओठ, सं. पुं., दे 'ओंठ'।
ओड़ा, सं. पुं. (?) करंडः, कंडोलः २. दुर्भिक्षं, आहाराभावः।
ओढ़ना, क्रि. स. (सं. आ+ऊढ़ >) परिधा (जु. उ. अ.), प्रा–आ,–वृ (स्वा. उ. से.)। सं. पुं., आवरणं, प्रावारः, वेष्टनं, पुटम्, २. उत्तरच्छदः, प्रच्छदः।
ओढ़नी, सं. स्त्री. (हिं. ओढ़ना) नारीणां उत्तर,–वेष्टनं–प्रावारकः।
—बदलना, मु., सखीत्वं भगिनीत्वं वा स्था (प्रे.)।
ओढ़ाना, क्रि. स. (हिं. ओढ़ना) 'ओढ़ना' के धातुओं के प्रे. रूप।
ओत, वि. (सं.) गुम्फित, ग्रथित।
—प्रोत, वि. (सं.) सुमिश्रित, सुसंपृक्त, संसृष्ट, परस्परं सुग्रथित। सं. पुं., तंत्रवाणी (द्वि.), तंत्रप्रतितंत्रे (द्वि.)।
ओदन, सं. पुं. (सं. पुं. न.) भक्तं, अन्नं, पक्व-व्रीहिः।
ओदा, वि. (सं. उदन् >) उन्न, उत्त, आर्द्र।
ओप, सं. स्त्री. (हिं. ओपना) कान्तिः–द्युतिः–दीप्तिः (स्त्री.), सुषमा, सौन्दर्यम्।
ओफ, अव्य. (अनु.) पीडाशोकाश्चर्यखेदसूचक-मव्ययम्, आः, हा, अहह, अहो।
ओम्, सं. पुं. (सं. अव्य.) प्रणवः, ओंकारः, ईशसंज्ञा २. ईश्वरः।
ओर, सं. स्त्री. (सं. अवारं >) दिशा, दिश् (स्त्री.), काष्ठा, आशा २. पक्षः, पार्श्वः। सं. पुं., अंतः, प्रांतः, तटम् २. आरंभः, आदिः।
इस—,क्रि. वि., इतः, अस्यां दिशि, अत्र।
उस—,क्रि. वि., ततः, तत्र, तस्यां दिशायाम्।
चारों—,क्रि. वि. सर्वतः, समंतात्, समंततः, अभितः, परितः।
ओल, सं. पुं. (सं.) शूरणः, दे. 'जिमींकन्द'।
ओला, सं. पुं. (सं. उपलः) इन्द्रोपलः, पयोघनः, करका, घनकफः, वर्षशिला २. शर्करोपलः। वि., उपलशीतल।
सिर मुँड़ाते ही ओले पड़े, मु., प्रथमे ग्रासे मक्षिकापातः।
ओवरकोट, सं. पुं. (अं.) लंबकंचुकः।

ओवरसियर, सं. पुं. (अं.) अधिदर्शकः।

ओषधि-धी, सं. स्त्री. (सं.) हरितक्रं, शाकः-कं, शिग्रुः २. अगदः, औषधं, भेषजम्, भैषज्यम्।

ओष्ठ, सं. पुं. (सं.) दे. 'ओंठ'।

ओष्ठ्य, वि. (सं.) ओष्ठसम्बन्धिन् २. ओष्ठोच्चार्य (प, फ आदि वर्ण)।

ओस, सं. स्त्री. (सं. अवश्यायः) तुषारः, प्रालेयं, हिम-रात्रि—ख,-जलम्, नीहारः, तुहिनम्।

—पड़ जाना, मु., म्लै-ग्लै-सद् (भ्वा. प. अ.) २. लज्ज् (तु. आ. से.)।

ओह, अव्य. (अनु.) (आश्चर्य) अहो, ही। (दुःख) अहह, हा, आः।

ओहदा, सं. पुं. (अ.) पदं, पदवी, अधिकारः।

ओहदेदार, सं. पुं. (अ.+फा.) पदाधिकारिन्, अधिकृतः।

ओहो, अव्य. (अनु.) अहो, ही, हंहो।

औ

औ, हिन्दीवर्णमालाया एकादशः स्वरवर्णः औकारः।

औंधा, वि. (सं. अधोमुख) अवाङ्मुख, अधोमुख, विपर्यस्त, विलोम।

औंधी खोपड़ी का, मु., मूर्ख, जड़।

औ, अव्य. (हिं. और) च। दे. 'और'।

औकात, सं. स्त्री. एक. (अ. वक्त का वहु.) शक्तिः (स्त्री.), सामर्थ्यम्। सं. पुं., कालः, समयाः।

औगुन, सं. पुं., दे. 'अवगुण'।

औघड़, सं. पुं. (सं. अघोरः) अघोरमतानुयायी पुरुषः २. असमीक्ष्यकारी मनुष्यः ३. अपशकुनः। वि., (सं. अव+हिं. घड़ना) विवेकहीन २. असंबद्ध।

औचक, क्रि. वि., दे. 'अचानक'।

औचित्य, सं. पुं. (सं. न.) औचिती, उपयुक्तता, नैयमिकत्वम्, सामंजस्यम्।

औज़ार, सं. पुं. (अ. वज्र का वहु.) यंत्राणि, उपकरणानि, साधनानि (सब न. वहु.)।

औटना, क्रि. अ., दे. 'उबलना'।

औटाना, क्रि. स., 'उबलना' के धातुओं के प्रे. रूप।

औत्सुक्य, सं. पुं. (सं. न.) उत्सुकता, दे०।

औदरिक, वि. (सं.) उदर-जठर,-विषयक २. अत्याहारिन्, वहुभुज्, घस्मर।

औदार्य, सं. पुं. (सं. न.) उदारता, दे.।

औद्धत्य, सं. पुं. (सं. न.) उद्धतता, अशिष्टता, भ्रान्यता २. अनार्यता, धृष्टता।

औद्योगिक, वि. (सं.) उद्योग-व्यवसाय,-संबंधिन्।

औद्वाहिक, वि. (सं.) वैवाहिक, उद्वाह-उपयम-परिणय,-विषयक।

औना-पौना, वि. (सं. ऊन-पादोन) न्यूनाधिक, ईषद्वहु। क्रि. वि., न्यूनाधिकतया।

औने-पौने करना, मु., हान्या लाभेन वा यथा कथंचिद् विक्रयणम्।

औपचारिक, वि. (सं.) लाक्षणिक, गौण, उपचारविषयक।

औपनिवेशिक, वि. (सं.) आधिनिवेशिक, उपनिवेश-अधिनिवेश,-संबंधिन्।

—स्वराज्य, सं. पुं. (सं. न.) आधिनिवेशिकं स्वातंत्र्यम्।

औपन्यासिक, वि. (सं.) उपन्यास-कल्पित-कथा,-संबंधिन् २. उपन्यासे वर्णनीय ३. अद्भुत, विलक्षण। सं. पुं., उपन्यास,-कारः-लेखकः।

औपपत्तिक, वि. (सं.) तर्क-युक्ति,-साध्य।

और, अव्य. (सं अपर >) च, अपि च, अन्यच्च, किंच, अपरं च। वि., अन्य, अपर, भिन्न २. अधिक, भूयस्।

—का और, मु., विपरीत, विरुद्ध, असंगत।

औरत, सं. स्त्री. (अ.) नारी, रामा २. पत्नी, भार्या।

—की ज़ात, सं. स्त्री., स्त्री-नारी,-जातिः (स्त्री.)।

औरस, सं. पुं. (सं.) धर्मपत्नीजः पुत्रः।

औरेब, सं. पुं. (सं. अव+रेव >) वक्र-तिर्यग्,-गतिः (स्त्री.) २. वस्त्रस्य तिर्यक्कर्तनम् २. जटिलत्वं, संश्लिष्टता ३. छलं, कपटम्।

—दार, वि., कितव, वंचक ।

औलाद, सं. स्त्री. (अ.) प्रजा, संततिः–प्रसूतिः (स्त्री.), संतानः, तोकं, अपत्यम् ।

औलिया, सं. पुं. (अ. 'वली' का बहु.) सिद्धाः, पुण्यजनाः ।

औवल, वि. (अ.) प्रथम, आदिम २. प्रमुख, प्रधान ३. सर्वोत्तम । सं. पुं. आरंभः, उपक्रमः ।

औषध, सं. पुं. (सं. न.) भेषजं, भैषज्यं, अगदः २. हरितकं, शाकः, ओषधिः (स्त्री.) ।

औषधालय, सं. पुं. (सं.) भेषजालयः, औषधशाला ।

औसत, सं. पुं. (अ.) *मध्यमा, मध्यप्रमाणम् । वि. मध्यम, सामान्य ।

औसान, सं. पुं. (फ़ा.) चेतना, चैतन्यं, संज्ञा, बोधः ।

—खता होना, मु., मतिभ्रमः, धैर्यनाशः, संभ्रमः ।

क

क, देवनागरीवर्णमालायाः प्रथमव्यंजनवर्णः, ककारः ।

कंक, सं. पुं (सं.) आमिषप्रियः, क्रूरः, दीर्घपादः, खगभेदः ।

कंकड़, सं. पुं., दे. 'कंकर' ।

कंकण, सं. पुं. (सं. पुं. न.) कटकः–कं, वलयः–यं, आवापकः–कं, पारिहार्यः–र्यम् ।

कंकर, सं. पुं. (सं. कर्करम्) उपलखंडः, शर्करा, अश्मगुटिका, अष्ठीलाः (बहु.) ।

कंकरीट, सं. स्त्री. (अं. कांक्रीट) लोष्ठलेपः ।

कंकरीला, वि. (हिं. कंकर) शर्करावृत, कर्करमय ।

कंकाल, सं. पुं. (सं. पुं. न.) अस्थिपंजरः, करंकः ।

कंगन, सं. पुं., दे. 'कंकण' ।

कंगनी, सं. स्त्री. (सं. कंगुनी) प्रियंगुः, पीततंडुलः, कंगुः–गूः (स्त्री.) ।

कँगला, वि. (सं. कंकालः >) दरिद्र, अकिंचन, निर्धन, दीन ।

कंगाल, वि., दे. 'कँगला' ।

कंगाली, सं. स्त्री. (हिं. कंगाल) दरिद्रता, निर्धनता, दारिद्र्यम् ।

कँगूरा, सं. पुं. (फ़ा. कुँगरा) शिखरं, शृङ्गम् ।

कंघा, सं. पुं. (सं. कंकतः) कंकतम् ।

कंघी, सं. स्त्री. (सं. कंकती) कंकतिका, केशमार्जनी, प्रसाधनी ।

कंचन, सं. पुं. (सं. कांचनम्) सुवर्णम् २. संपत्तिः (स्त्री.) ।

कंचनी, सं. स्त्री. (हिं. कंचन) वेश्या, नर्तकी ।

कंचुक, सं. पुं. (सं.) लंब,–निचोल–प्रावारकः २. अंगिका, कंचुलिका ३. कवचः–चम् ४. वस्त्रम् ५. दे. 'केंचली' ।

कंचुकी, सं. पुं. (सं.–किन्) अन्तःपुरचारी वृद्धब्राह्मणः, सौविदल्लः, सौविदः २. द्वारपालः ३. सर्पः ४. दे. 'केंचली' । सं. स्त्री., अंगिका, कंचुलिका ।

कँचेरा, सं. पुं. (हिं. काँच) काच,–कारः–धमकः ।

कंज, सं. पुं. (सं.) ब्रह्मन् (पुं.) २. केशः । (सं. न.) कमलम् २. अमृतम् ।

कंजई, वि. (हिं. कंजा) धूम्र, धूमल ।

कंजड़ (र), सं. पुं. (देश. या कालिंजर) जातिविशेषः ।

कंजा, सं. पुं. (सं. करंजः) कंटकिनीवृक्षः २. तस्य बीजम् । वि., करंजवर्ण, धूमल २. धूम्रनयन ।

कंजूस, वि. (सं. कणः + हिं. चूसना) कृपण, कदर्य, अमुक्तहस्त, किंपचान ।

कंजूसी, सं. स्त्री. (हिं. कंजूस) कार्पण्यं, कदर्यता, अमुक्तहस्तत्वम् ।

कंटक, सं. पुं. (सं. पुं. न.) शल्यम् २. विघ्नः ३. विघ्नकरः ४. सूच्यग्रम् ५. शत्रुः ६. रोमाञ्चः ७. कवचः-चम् ।

कंटकित, वि. (सं.) सकंटक, कंटकपूर्ण २. सविघ्न ३. रोमाञ्चित ।

कँटिया, सं. स्त्री. (हिं. काँटी) कीलः, शंकुः २. ग्रहणी, धरणी ३. भूषणभेदः ।

कँटीला, वि. (हिं. काँटा) कंटकित २. सविघ्न

कंठ, सं. पुं. (सं.) गलः, गरः, निगरणः २. स्वरः ३. शुकादीनां कंठरेखा ४. दे. 'कंठा'।

—गत, वि. (सं.) निर्गमनोन्मुख (प्राण)।

—माला, सं. स्त्री. (सं.) गण्डमाला, कंठरोग-भेदः।

कंठस्थ, वि. (सं.) कंठाग्र, कंठगत, मुखाग्र, मुखस्थ।

कंठा, सं. पुं. (सं. कंठः >) कंठी, सुवर्णगुटिकानिर्मित कंठालंकारः २. शुकादीनां गल-रेखा।

कंठ्य, वि. (सं.) कंठोच्चार्य २. कंठजात ३. कंठोपकारक।

कंडा, सं. पुं. (सं. स्कंदनं >) दे. 'उपला'।

कंडी, सं. स्त्री. (हिं. कंडा) लघुगोमयम् २. मलगुटिका।

कंडील, सं. स्त्री. (अ. कंदील) कर्गलादि-निर्मितो दीपकोषः।

कंडु, कंडू, सं. स्त्री. (सं.) कंडूतिः (स्त्री.), दे. 'खुजली'।

कंत, सं. पुं. (सं. कान्तः) प्रियः, वल्लभः, रमणः २. पतिः, धवः ३. ईश्वरः।

कंथा, सं. स्त्री. (सं.) भिक्षुकर्पटः, दे. 'गुदड़ी'।

कंथी, सं. पुं. (सं. कंथा >) भिक्षुकः. कंथा-धारिन्।

कंद[1], सं. पुं. (सं. पुं. न.) गोलमूलं, खाद्य-मूलम् २. लशुनम् ३. मेघः ४. शूरणः।

कंद[2], सं. पुं. (फ़ा) सिताखंडः, खंडमोदकः।

कंदर, सं. पुं. (सं. पुं. न.) गह्वरं, गुहा, दरी।

कंदरा, सं. स्त्री. (सं.) दे. 'कंदर'।

कंदर्प, सं. पुं. (सं.) मदनः, कामदेवः।

कंदा, वि. (फ़ा.) उत्कीर्ण, तप्त।

कंदुक, सं. पुं. (सं.) गेन्दुः, गेण्डुः २. उपधानं, गण्डुः ३. पूगफलम्।

कंधा, सं. पुं. (सं. स्कन्धः) अंसः, भुजमूलं, दोःशिखरं, कत्तवरम्।

कंधार, सं. पुं. (सं. गांधारः) नगर-प्रदेश,-विशेषः।

कंप, सं. पुं. (सं.)दे. 'कँपकँपी'।

कँपकँपी, सं. स्त्री. (हिं. काँपना) प्र-, कंपः, वेपनं, वेपथुः, एजनं, कायकंपः।

कंपनी, सं. स्त्री. (अ.) समवायः, समन्यवसायि-संघः २. सैन्यगुल्मः ३. गणः ४. साहचर्य्यम्।

कँपाना, क्रि. स. (हिं. कांपना) कंप्, वेप्, वेल्ल्, स्पंद्, एज् के प्रे. रूप।

कंपायमान, वि. (सं. कंपमान) एजमान, कंपन, कंप्र, स्पंदमान।

कंपास, सं. पुं. (अं.) दिग्दर्शकयंत्रम्।

कंपित, वि. (सं.) कंपमान, चंचल २. भीत, त्रस्त।

कंबख्त, वि. (फ़ा. कमबख़्त) भाग्यहीन, दुर्दैव।

कंबल, सं. पुं. (सं.) रल्लकः, आविकः, ऊर्णायुः, और्भ्रः, नीशारः।

कंबु, सं. पुं. (सं.) दे. 'शंख'।

कंस, सं. पुं. (सं.) कृष्णमातुलः। (सं. न.) कांस्यं, ताम्रार्द्धम् २. पानभाजनं, कंशम्।

—ताल, सं. पुं. दे. 'झाँझ'।

क, सं. पुं. (सं.) ब्रह्मन् (पुं.) २. सूर्यः ३. अग्निः ४. विष्णुः ५. यमः ६. वायुः ७. मदनः।

कई, वि. (सं. कति) कतिपय, एकाधिक, अनेक, बहु, प्रभूत।

—बार, क्रि. वि., बहुधा, पुनः पुनः, मुहुर्मुहुः, भूयोभूयः, बहुवारम्।

ककड़ी-री, सं. स्त्री. (सं. कर्कटी) लोमशा, स्थूला, तोयफला, गजदंतफला, चिर्भटी, मूत्रला।

ककहरा, सं. पुं. [क+क—ह+रा (प्रत्य.)] प्राथमिकज्ञानम् २. वर्णमाला ३. पूर्वकार्य-समूहः।

ककुद, सं. पुं. (सं. ककुद् स्त्री.) ककुदः-दं, अंसकूटः, गडुः, स्थगुः २. राजचिह्नम् (छत्रादि)।

ककुभ, सं. पुं. (सं.) अर्जुनवृक्षः २. दे. 'दिशा'।

कक्ष, सं. पुं. (सं.) बाहुमूलम्, दे. 'बगल' २. दे. 'लाँग' ३. कच्छः, दे. 'कछार' ४. तृणम् ५. शुष्क-, वनम् ५. भूमिः (स्त्री.), ६. भित्तिः (स्त्री.) ७. कोष्ठः ८. दोषः ९. दे. 'कछरारी' १०. श्रेणी, कक्षा ११ दे. 'आँचल'।

कक्षा, सं. स्त्री. (सं.) परिधिः, परिवेशः-षः २. ग्रहमार्गः ३. साम्यम् ४. वर्गः, श्रेणी ५. दे. 'ड्योढ़ी' ६. बाहुमूलम् ७. दे. 'कछरारी'

८. गृह,-भित्तिः (स्त्री.)-पक्षः ९. दे. 'लाँग' १०. हस्तिरज्जुः (स्त्री.)।

कगर, सं. पुं. [सं. कं (=जल)+अग्र >] उच्छ्रित,-तीरं-तटम् २. सीमा ३. प्राकार-शृंगम्।

कगार, सं. पुं. (हिं. कगर) उन्नताग्रम् २. उच्छ्रित,-कूलं-तीरम्।

कच, सं. पुं. (सं.) केशाः, कुंतलाः, कचाः, शिरसिजाः, शिरोरुहाः (सब बहु.) २. समूहः।

कचकच, सं. स्त्री. (अनु.) प्रलापः २. वाग्युद्धम्।

कचनार, सं. पुं. (सं. कांचनालः) कोविदारः, पाकारिः, स्वल्पकेसरः।

कचपच, सं. पुं. (अनु.) संबाधः, संमर्दः २. दे. 'कचकच'।

कचर कचर, सं. स्त्री. (अनु.) आमफलचर्वण-ध्वनिः २. दे० 'कचकच'।

कचरा, सं. पुं. (हिं. कच्चा) अपक्व,-खर्बूजं-दशांगुलम् २. अपक्वचित्रवल्ली ३. चर्भटः। दे. 'कूड़ाकरकट'।

कचहरी, सं. स्त्री. (हिं. कचकच) धर्म-न्याय,-सभा, व्यवहारमंडपः, न्यायालयः, धर्म-, अधिकरणम् २. राजसभा।

कचाई, सं. स्त्री. (हिं. कच्चा) आमता, अपक्वता, २. पाटव-दाक्ष्य-अनुभव,-हीनता।

कचाँयँध, सं. स्त्री. (हिं. कच्चा+गंध) आम-अपक्व,-गन्धः।

कचालू, सं. पुं. (हिं. कच्चा+आलू) आलुकी, कचुः (स्त्री.) कच्ची, तीक्ष्णकन्दः, गजकर्णः।

कचीची, सं. स्त्री. (अनु. कच) हनुः (पुं. स्त्री.), हनूः (स्त्री.)।

कचूमर, सं. पुं. (हिं. कुचलना) निष्पिष्ट-पदार्थः, चूर्णितवस्तु २. मृदुसारः, मज्जा।

कचूर, सं. पुं. (सं. कर्चूरः) दुर्लभः, गंधमूलकः, गंधसारः, जटालः।

कचौरी, सं. स्त्री. (हिं. कचरी) माषगर्भा, सुपिष्टिका।

कच्चा, वि. (सं. कषण) अपक्व, हरितनीरस (फलादि) २. अश्रृत, अश्राण, असिद्ध (भोजनादि) ३. अपरिणत, अपूर्णकाल, अप्राप्तकाल, अपरि-पुष्ट (आयु आदि) ४. विकारिन्, अस्थिर ५. निस्सार, अप्रामाणिक (वात इ०) ५. प्रच-लितमानात् न्यून ६. संस्कार-संशोधन,-अपे-क्षिन् (वही इ.) ७. नियम-विधि,-विरुद्ध (दस्तावेज इ.) ८. पंकनिर्मित (घर आदि) ९. अव्युत्पन्न (व्यक्ति) १०. कुलिखित, असंस्कृत (अक्षर इ.)।

—चिट्ठा, सं. पुं. संशोधनापेक्षिगणना २. सत्य-यथार्थ,-वृत्तान्तः ३. गुप्त-गोप्य,-वार्ता ४. गर्ह्य-पक्षः ५. पापसंकल्पाः।

—पक्का, वि., अर्द्ध-सामि,-पक्व-श्रृत-श्राण।

—बच्चा, सं. पुं., शिशवः (बहु.) २. गर्भः।

—माल, सं. पुं., सामग्री।

कच्ची, वि. स्त्री. (हिं. कच्चा) 'कच्चा' के शब्दों के स्त्रीलिंग के रूप, जैसे-अपक्वा, अश्रृता इ.।

—ईंट, सं. स्त्री., अपक्व-, इष्टका।

—उमर, सं. स्त्री., अवयस्कता, अप्राप्तव्यवहारता २. बाल्यम् ३. शैशवम्।

—रसोई, सं. स्त्री., जलपक्वमन्नम्।

—सड़क, सं. स्त्री., मृण्मयो मार्गः।

—सिलाई, सं. स्त्री., स्थूलस्यूतिः (स्त्री.)।

कच्छ, सं. पुं. (सं. पुं. न.) अनूपः-पं, जल-प्रायदेशः २. नद्याः सरसो वा प्रांतभागः ३. प्रदेशविशेषः।

कच्छप, सं. पुं. (सं.) कूर्मः, दे. 'कछुआ' २. अवतारविशेषः।

कच्छा, सं. पुं. (सं. कच्छः>) नौकाभेदः २. दे. 'कछनी'।

कच्छू, सं. पुं., दे. 'कछुआ'।

कछनी, सं. स्त्री. (हिं. काछना) जानुलंबि-कटिवसनम्।

कछरा(ड़ा) ली, सं. स्त्री. (सं. कक्षः>) कक्षा।

कछार, सं. पुं. (सं. कच्छः) दे. 'कच्छ' (१,२)।

कछुआ, सं. पुं. (सं. कच्छपः) कमठः, कूर्मः, चतुर्गतिः (पुं.), पंचगूढः, स्तूपपृष्ठः। (स्त्री. कमठी, दुली, कूर्मी, द्रुणी)।

कछौटा, सं. पुं. (हिं. काछ) लघुशाटिका २. दे. 'कछनी'।

कजरारा, वि. (हिं. कजरा) सांजन, अंजन-युत, सकज्जल २. काल, श्याम।

कजली, सं. स्त्री. (सं. कज्जलं>) कालिमन्, कालुष्यं, कलंकः २. पर्वविशेषः ३. कृष्णाक्षी गौः (स्त्री.) ४. वर्षासु गेयो गीतभेदः।

कज़ा, सं. स्त्री. (अ.) मृत्युः, निधनम् ।
कजाक, सं. पुं. (तु. कज्ज़ाक) दस्युः, लुंटाकः ।
कजाकी, सं. स्त्री. (तु. कज्ज़ाकी) लुंठनं, अपहरणम् ।
कजावा, पुं. (फा.) उष्ट्रपर्याणम् ।
कजिया, सं. पुं. (अ.) कलहः, विग्रहः ।
कज्जल, सं. पुं. (सं. न.) अंजनं, नेत्ररंजनं, लोचकः २. यामुनं, सौवीरं, दे. 'सुरमा' ३. कालिमन् ।
कट, सं. पुं. (सं.) गजगंडः २. कपोलः ३. देवस्थूल,-नालः, घासभेदः ४. देवनालनिर्मित-, कटः, कलिंजं, आस्तरणम् ५. उशीरकाशादिघासाः ६. शवः ७. शवयानं, खाटः-टी ८. श्मशानं ९. अक्षगतिभेदः १०. काष्ठफलकः-कम् ११. समयः, अवसरः १२. दे. 'टट्टी' । वि. बहु, भूयस् २. उत्कट, उग्र ।
कटक, सं. पुं. (सं. पुं. न.) शिवि (वि) रं, निवेशः, सैन्यनिवासः २. सेना ३. कंकणः-णम् ४. पर्वतमध्यभागः ५. पादकटकः ६. चक्रम् ७. नगरविशेषः ८. समूहः ।
कटकट, सं. स्त्री. (अनु.) दंतघर्षणशब्दः, कटकटायितम् २. कलहः ।
कटकटाना, क्रि. स. (हिं. कटकट) दंतान् घृप् (भ्वा. प. से) ।
कटना, क्रि. अ. (सं. कर्तनं) अवछिद्-कृत्-लू-व्रश्च् (कर्म.) २. व्ययं या (अ. प. अ.) ३. क्षम्-मृप् (कर्म.) ४. लज्ज् (तु. आ. से.) ह्री (जु. प. अ.) ५. उपरुध् (कर्म.) ६. युद्धे हन् (कर्म.) ७. ईर्ष्यु (भ्वा. प. से.) ८. मुह् (दि. प. वे.) ९. घृष् (कर्म.) ।
कटनाँस, सं. पुं. (देश.) दे. 'नीलकंठ' (पक्षी) ।
कटनी, सं. स्त्री. (हिं. कटना) विक्रयः २. शस्यकर्तनम् ।
कटपीस, सं. पुं. (अं.)*कृत्तपटः ।
कटरा, सं. पुं (हिं. कटहरा) चतुष्कोणः लघुहट्टः २. महिष्याः वत्सः ।
कटवाना, क्रि. प्रे., 'काटना' के धातुओं के प्रे. रूप ।
कटसरैया, सं. स्त्री. (सं. कटसारिका) सैरेयः, सैरेयकः, श्वेतपुष्पः । (पीली) कुरंटकः, पीतपुष्पकः । (नीली) नीलपुष्पी, आर्त्तगलः । (लाल) कुरवकः ।
कटहरा, सं. पुं. (हिं. काठ+घर) काष्ठगृहम् । २. बृहत्पंजरम् ।
कटहल, सं. पुं. [सं. कंटक (कि) फलः] (वृक्ष) पनसः, फणसः, चंपालुः । २. (फल) पनसं, फणसं इ. ।
कटाई, सं. स्त्री. (हिं. काटना) कर्तनं, छेदनं, लवनम् २. शस्य,-लवनं-संग्रहः ३. लवन-छेदन,-भृतिः (स्त्री.) ।
कटाकट, सं. स्त्री. (हिं. अनु.) कलहः २. कटकटायितम् ।
कटाकटी, सं. स्त्री. (हिं. काटना) हत्या, वधः, युद्धम् २. वैरम् ३. कटकटशब्दः ।
कटाक्ष, सं. पुं. (सं.) नयनविलासः, हावपूर्णा दृष्टिः (स्त्री.) २. आक्षेपः, दोषप्रकाशनम् ।
कटार-री, सं. स्त्री. (सं. कट्टारः) असि-पुत्रिका, कृपाणिका ।
कटाव, सं. पुं. (हिं. काटना) कर्तनं, छेदनम् २. नदीतटं ३. कर्तित्वा निर्मितं पुष्पपत्रम् ।
कटि, सं. स्त्री. (सं.) कटी ।
—बंध, सं. पुं. (सं.) भूवलयः, भूमेः पंचभागेषु अन्यतमः २. दे. 'कमरबंद' ।
—बद्ध, वि. (सं.) सज्ज, सन्नद्ध, उद्यत, बद्धपरिकरं, सिद्ध ।
कटीला, वि. (हिं. काटना) निशित, तीक्ष्णाग्र २. मोहक, प्रभावशालिन् ।
कटु, वि. (सं.) कटुक २. तिक्त, तीक्ष्ण ३. अप्रिय, अनिष्ट ।
कटुता, सं. स्त्री. (सं.) कटुत्वं, कटुकता, काटवम् २. तिक्तता ३. अप्रियत्वम् ।
कटोरा, सं. पुं. (सं. स्त्री.) कटोरम् ।
कटोरी, सं. स्त्री. (हिं. कटोरा) कटोरिका, कचोलः ।
कटौती, सं. स्त्री. (हिं. कटना) उद्धारः, उद्धृतभागः ।
कट्टर, वि. (हि. काटना) धर्मान्ध, मतान्ध, अन्धविश्वासिन् ।
कट्टा, वि. (हिं. काठ) वज्रदेह, दृढांग, मांसल, वीर्यवत् । सं. पुं., हनुः ।
कठघरा, सं. पुं. (सं. काष्ठगृहम्) काष्ठावेष्टनं, काष्ठशलाकावृतिः (स्त्री.), शंकुवलयः २. बृहत्काष्ठपंजरः-रम् ।

कठपुतली, सं. स्त्री. (सं. काष्ठपुत्तलिका) पुत्रिका, पुत्तली, पांचालिका ३. मृद्वंगी बाला ।

कठफोड़वा, सं. पुं. (हिं. काठ+फोड़ना) काष्ठकूटः, दार्वाघाटः, शतच्छदः, शतपत्रकः ।

कठबाप, सं. पुं. (हिं. काठ+बाप) मातृद्वितीयः पतिः ।

कठला, सं. पुं. (सं. कंठः>) कंठभूषा ।

कठिन, वि. (सं.) दुष्कर, दुस्साध्य, कष्टसाध्य, गहन २. घन, कीकस, कक्खट ३. दुर्बोध, दुर्ज्ञेय, दुरवगम ।

कठिनता, सं. स्त्री. (सं.) दुष्करता, दुस्साध्यता २. घनता, कीकसता ३. दुर्बोधता, दुर्ज्ञेयत्वम् ।

कठोर, वि. (सं.) निर्दय, क्रूर, नृशंस, निर्घृण, परुष २. घन, कीकस ३. कर्कर, कक्खट ।

कठोरता, सं. स्त्री. (सं.) निर्दयता, क्रूरता, पारुष्यं, निर्घृणता, नृशंसत्वम् २. घनता, कीकसता ।

कठौता, सं. पुं. (सं. काष्ठवत्>) बृहत्काष्ठभाजनं, बृहद्दारुपात्रम् ।

कठौती, सं. स्त्री. (हिं. कठौता) लघुदारुभाजनं, दारुभाजनकम् ।

कड़क, सं. स्त्री. (अनु.) महा,-शब्दः-रवः-निनादः २. मेघगर्जनम्, घनध्वनिः, गर्जितम् ३. वज्र,-निर्घोषः-निर्घातस्वनः ४. विरावः, ध्वनिः ५. उद्वेगजनको निनादः ।

कड़कड़, सं. पुं. (अनु.) कड़कड़शब्दः, कड़कड़ायितं २. भंग-स्फुटन,-शब्दः ।

कड़कड़ाना, क्रि. अ. (हिं. कड़कड़) सशब्दं भंज्-भिद्-दृ (कर्म.), स्फुट् (तु. प. से.) २. उच्चैः ध्वन् (भ्वा. प. से.) ३. त्रुट् (भ्वा.), चूर्ण् (चु.) ।

कड़कड़ाहट, सं. स्त्री. (हिं. कड़कड़) कड़कडात्कारः, गर्जितं, दे. 'कड़क' ।

कड़कना, क्रि. अ. (हिं. कड़क) कड़कड़ाशब्दं कृ, गर्ज् (भ्वा. प से.) २. महारवेण भंज् (कर्म.) ३. स्फुट् (तु. प. से.) ४. उच्चैः वद् (भ्वा. प. से.) ।

कड़का, स. पुं. (हिं. कड़क) विजय-युद्ध,-गीतम् २. सौदामिनी ३. गर्जितम् ।

कड़खा, सं. पुं. (हिं. कड़क) युद्धगीतम् ।

कड़खैत, सं. पुं. (हिं. कड़खा) युद्धगीतगायकः, चारणः, वैतालिकः ।

कड़वा, वि., दे. 'कटु' ।

कड़ा[1], वि. (सं. कड्>) घन, सान्द्र, कक्खट, कीकस, दृढ, कर्कर, अनम्य २. निष्ठुर, निर्दय ३. दुर्बोध, दुर्ज्ञेय, कठिन ।

कड़ा[2], सं. पुं, (सं. कटकः) कटकं, कंकणः-णं, २. केयूरः-रं, अंगदः-दम् ।

कड़ाई, सं. स्त्री. (हिं. कड़ा) दृढता, कीकसता २. निर्दयता ३. क्लिष्टता ।

कड़ाका, सं. पुं. (अनु. कड़ाक) भंग-भंजन-भेदन-त्रोटन,-शब्दः-नादः २. अनशनं, अनाहारः ।

कड़ाके का-, नु., भीषण, घोर, तीव्र, चंड ।

कड़ाहा, सं. पुं. (सं. कटाहः) तैलादिपाकपात्रम् ।

कड़ाही, सं. स्त्री. (हिं. कड़ाह) कटाही ।

कड़ी, सं. स्त्री. (हिं. कड़ा) शृंखला,-संधिः-ग्रन्थिः २. गीतचरणम् ३. दीर्घ-स्थूणा,-काष्ठं-दारु (न.) । वि. स्त्री., कठिना, कीकसा ।

कड़ुआ, वि., दे. 'कटु' ।

—तेल, सं. पुं., सर्षपतैलम् ।

कढ़ाई, सं. स्त्री. (हिं. काढ़ना) सूचीशिल्पम् २. सूचीशिल्पस्य भृतिः (स्त्री.) ३. दे. 'कड़ाहा' ।

कढ़ी, सं. स्त्री. (हिं. कढ़ना) क्वथिता, चणकचूर्णनिर्मितव्यंजनभेदः ।

कण, सं. पुं. (सं.) लवः, लेशः, अणुः ।

कणाद, सं. पुं. (सं.) वैशेषिकदर्शनकारः ऋषिः ।

कतरन, सं. स्त्रां. (हिं. कतरना) शकलानि, कृत्तखंडानि (दोनों बहु.) ।

कतरना, क्रि. स. (सं. कर्तनम्) कर्तरिकया कृत् (तु. प. से.) ।

कतरनी, सं. स्त्री. (हिं. कतरना) कर्तनी, कर्त्रिका, कर्तरिका, कर्तरी ।

कतर ब्योंत, सं. स्त्री. (हिं. कतरना+ब्योंत) अवच्छेदः, अल्पीकरणम् २. परिवर्तः, विनिमयः ३. चिंता, विमर्शः ४. अपहरणं, मोषः ५. युक्तिः (स्त्री.), उपायः ।

कतरा[1], सं. पुं. (हिं. कतरना) खंडः, अंशः, शकलः ।

कतरा[२], सं. पुं. (अ.) कणः, विंदुः, लवः, द्रप्सः।

कतराना, क्रि. प्रे., 'कतरना' के धातुओं के प्रे. रूप २. निभृतं-सलज्जं-सभयं अपया (अ. प. अ.), नैपुण्येन परिहृ (भ्वा. उ. अ.)।

कतल, सं. पुं. (अ. कत्ल) हत्या, वधः।

कताई, सं. स्त्री. (हिं. कातना) कर्तनम् २. कर्तनभृतिः (स्त्री.)।

कताना, क्रि. प्रे., 'कातना' के धातुओं के प्रे. रूप।

कतार, सं. स्त्री. (अ.) पंक्तिः-श्रेणिः (स्त्री.) २. निकरः, समूहः।

कतिपय, वि. (सं.) दे. 'कुछ'।

कतीरा, सं. पुं. (देश.) गुलूवृक्षनिर्यासः।

कत्तल, सं. पुं. (हिं. कतरना) इष्टकाखंडः, पाषाणशकलः।

कत्थक, सं. पुं. (सं. कथकः) संगीतव्यवसायिनी जातिः (स्त्री.)।

कत्था, सं. पुं. (सं. काथः>) खदिरः, खदिरसारः, रंगः, रंगदः।

कथक, सं. पुं. (सं.) कथावाचकः, कथोपजीविन्।

कथन, सं. पुं. (सं. न.) वचनं, उक्तिः (स्त्री.), निवेदनं, निर्देशः, उपन्यासः।

कथनीय, वि. (सं.) वचनीय, वर्णनीय, वक्तव्य, उच्चार्य, लपनीय।

कथा, सं. स्त्री. (सं.) उप-, आख्यानं, आख्यायिका, आख्यानकम् २. वृत्तान्तः, उदन्तः ३. धर्मोपदेशः।

—वार्ता, सं. स्त्री. (सं.) धर्मोपदेशः, व्याख्यानं।

—वस्तु, सं. स्त्री. (सं. न.) कथासारः, आख्यानस्य रूपरेखा।

कथानक, सं. पुं. (सं. न.) कथा २. उपाख्यानम्, लघुकथा।

कथित, वि. (सं.) उक्त, भाषित, भणित, उदीरित।

कथोपकथन, सं. पुं. (सं. न.) संभाषणं, संवादः, संलापः, वार्तालापः।

कदंब, सं. पुं. (सं.) भृङ्गवल्लभः, विपन्नः, व्रणहारकः, नीपः, नदिरागंधः २. समूहः।

कद, सं. पुं. (अ.) आकारः, प्रांशुता, देहोच्चता।

कदन, सं. पुं. (सं. न.) वधः, हत्या २. छुरिका।

कदन्न, सं. पुं. (सं. न.) तुच्छान्नम्।

कदम, सं. पुं. (अ.) पादः, पदं, चरणः-णं, क्रमणं, अंघ्रिः (पुं.) २. अल्पान्तरं, पदम्।

कदर, सं. स्त्री. (अ.) आदरः, संमानः २. मात्रा, परिमाणम्।

—दान, वि. (अ.+फ़ा.) गुणग्राहक।

कदर्य, वि. (सं.) कृपण, मितंपच।

कदली, सं. स्त्री. (सं.) दे. 'केला'।

कदा, अव्य. (सं.) कस्मिन् काले।

कदाचित्, अव्य. (सं.) स्यात्, संभवेत् २. कदापि।

कदापि, अव्य. (सं.) कदाचित् २. एकदा, पुरा, प्राक्।

कद्दू, सं. पुं. (फ़ा. कदू) लाबुः, अलाबुः (पुं. स्त्री.), लाबुका, तुम्बः, तुंबी, तुंबिका, पिंड-महा,-फला।

—कश, सं. पुं., लाबुकषः।

—दाना, सं. पुं., उदरकृमिभेदः।

कन, सं. पुं. (सं. कणः) अणुः, क्षुद्रांशः, कणिका, कणी, लेशः २. अन्नकणिका ३. जुष्टं, उच्छिष्टम् ४. भिक्षान्नम् ५. अन्नकणखण्डः।

कनक[१], सं. पुं. (सं. न.) स्वर्णं, सुवर्णं, कांचनं, हाटकम् २. दे. 'धतूरा' ३. दे. 'टेसू'।

कनक[२], सं. स्त्री. (सं. कणिकः>) गोधूमः, प्रवटः, सुमनः, म्लेच्छभोज्यः २. गोधूमचूर्णम्।

कनकटा, वि. (सं. कर्णः+हिं. कटना) छिन्नकर्ण २. कर्णच्छेदक।

कनखजूरा, सं. पुं. (सं. कर्णखर्जूः>) कर्णकीटी, शतपदी, कर्णजलूका, चित्रांगी।

कनखी, स्त्री. (हिं. कोना+आँख) कटाक्षः अपांगदर्शनं, साचिवीक्षणम् २. नेत्रसंकेतः।

कनछेदन, सं. पुं. (सं. कर्णच्छेदनम्) कर्णवेधसंस्कारः।

कनटोप, सं. पुं. (सं. कर्णः+हिं. टोपी) कर्णशिरस्त्रम्।

कनपटी, सं. स्त्री. (सं. कर्णपट्टः>) गंडः, गंड,-स्थलं-ली।

कनपेड़ा, सं. पुं. (सं. कर्णः+हिं. पेड़ा) पाषाणगर्दभः।

कनफटा, सं. पुं. (सं. कर्णः+हिं. फटना) गोरक्षनाथानुयायी साधुः २ विदकर्णः।

कनफुँका, वि. (सं. कर्णः+हिं. फूंकना) दीक्षादायक २. दीक्षित । सं. पुं., आचार्यः २. शिष्यः ।

कनरसिया, सं. पुं. (सं. कर्णरसिकः) संगीत,-अनुरागिन्-शुश्रूषुः ।

कनवोकेशन, सं. स्त्री. (अं.) दीक्षान्तमहोत्सवः, उपाधिवितरणोत्सवः २. सभा ।

कनस्तर, सं. पुं. (अं. कैनिस्टर) धातुमयः समुद्गकः ।

कनागत, सं. पुं. (सं. कन्यागत >) पितृपक्षः, आश्विनमासस्य कृष्णपक्षः २. श्राद्धम् ।

कनात, सं. स्त्री. (तु.) पटमंडपभित्तिः (स्त्री.) ।

कनियारी, सं. स्त्री. (सं. कर्णिकारः) परिव्याधः, द्रुमोत्पलः २. कर्णिकारपुष्पम् ।

कनिष्ठ, वि. (सं.) अल्पिष्ठ, लघिष्ठ, यविष्ठ २. निकृष्ट, तुच्छ, क्षुद्र ।

कनिष्ठा, सं. स्त्री. (सं.) कनिष्ठिका, कनीनी, दुर्बलांगुलिः (स्त्री.) २. यविष्ठा पत्नी ।

कनी, सं. स्त्री. (सं. कणी) हीरकतंडुलादीनां सूक्ष्मखंडः-डम् २. विंदुः, द्रप्सः ।

कनीनिका, सं. स्त्री. (सं.) तारा, तारका २. कनिष्ठा ।

कनेठी, सं. स्त्री. (हिं. कान+ऐंठना) कर्ण,-कर्षणं-मोटनम् ।

कनेर, सं. पुं. (सं. कणेरः) करवीरः, अश्वमारकः, वीरः, कुंदः, प्रचंडः ।

कनौज, सं. पुं. (सं. कान्यकुब्जम्) कन्याकुब्जं, गाधिपुरं, कौशम् ।

कनौड़ा, वि. (हिं. काना) काण, एकाक्ष २. हीनांग ३. अपमानित ४. क्षुद्र ५. उपकृत ।

कन्ना, सं. पुं. (सं. कर्णः >) उड्डीनक्रीडनकस्य वेधकसूत्रम् २. अग्रं, कोटिः (स्त्री.) ।

कन्नी, सं. स्त्री. (हिं. कन्ना) उड्डीनक्रीडनकपार्श्वाग्रे (द्वि. व.) २. अग्रं, कोटिः (स्त्री.) ३. शाटिकादीनामंचलः ।

—काटना, मु., दर्शनं परिहृ (भ्वा. प. अ.) ।

कन्या, सं. स्त्री. (सं.) कन्यका, कुमारी, बाला, बालिका, दारिका २. दुहितृ, पुत्री, सुता, तनया, तनुजा, आत्मजा ३. राशिविशेषः ।

—रासी, वि. (सं.-राशिः >) कन्याराशिज २. निर्बल ३. दुष्ट ।

कन्हाई, कन्हैया, सं. पुं. (सं. कृष्णः) श्रीकृष्णः २. सुंदरबालकः ३. प्रियपुरुषः ।

कपट, सं. पुं. (सं. न.) छलं, कैतवं, वंचना, प्रतारणा, छद्मन् (न.), दंभः, पाषंडः, व्याजः, शाठ्यम् ।

कपटी, वि. (सं.-टिन्) छलिन्, पाषंडिन्, शठ, कितव, दंभिन्, प्रतारक, वंचक ।

कपड़छन, सं. पुं. (हिं. कपड़ा+छानना) पटपवनम् २. वसनपूतम् ।

कपड़ा, सं. पुं. (सं. कर्पटः) वसनं, वस्त्रं, अंबरं, अंशुकं, पटः, वासस् (न.) २. परिधानं, वेशः-षः, नेपथ्यम् ।

—पहिनना, क्रि. स., वस्त्राणि परिधा (जु. उ. अ.) -धृ (चु.)-वस् (अ. आ. से.) ।

—ऊनी, लोमज-ऊर्णामय,-वस्त्रम् ।

—पुराना, कर्पटः, चीरं, जीर्णवस्त्रम् ।

—महीन बढ़िया, दुकूलम् ।

—रेशमी, कौशेयं, कौशावरं, क्षौमं, कौशम् ।

—सूती, तूलांवरं, फालं, कार्पासं, वादरम् ।

कपर्द, सं. पुं. (सं.) शिवजटाजूटः २. वराटकः ।

कपर्दिका, सं. स्त्री. (सं.) दे. 'कौड़ी' ।

कपाट, सं. पुं. (सं. पुं. न.) दे. 'किवाड़' ।

कपाल, सं. पुं (सं. पुं. न.) दे. 'खोपड़ी' ।

—क्रिया, सं. स्त्री. (सं.) ज्वलच्छवस्य वेणुना कपालभेदनम् ।

कपाली, सं. पुं. (सं. कपालिन्) भैरवः, उमापतिः ।

कपास, सं. स्त्री. (सं. कार्पासः) तूलः-लं, धरः, पिचुः, पिचुलः । (पौदा) कर्पासवृक्षः, कार्पासी, सूत्रपुष्पा, वदरी-रा, पटदः, छादनः ।

कपि, सं. पुं. (सं.) वानरः, मर्कटः २. गजः ३. सूर्यः ।

—ध्वजः, सं. पुं. (सं.) अर्जुनः ।

कपिल, सं. पुं. (सं.) मुनिविशेषः २. अग्निः । वि., कपिश, पिंगल ३. श्वेत ।

कपिला, सं. स्त्री. (सं.) शुक्ला-विनेया,-गौः(स्त्री)

कपिश, वि. (सं.) पाण्डुवर्ण, पिशंग, पिंगल, कपिल ।

कपीश, सं. पुं (सं.) सुग्रीवः (२) हनुमत् ।

कपूत, सं. पुं. (सं. कुपुत्रः) कुतनयः, कुसूनुः ।

कपूर, सं. पुं. (सं. कर्पूरः-रम्) घनसारः, सितांगः, हिमवालुका, चंद्रः, सोमः, सिताभ्रः ।

कपोत, सं. पुं. (सं.) दे. 'कबूतर' ।

कपोल, सं. पुं. (सं.) दे. 'गाल' ।

—कल्पना, सं. स्त्री. (सं.) मिथ्या कथा, कल्पित-वृत्तान्तः ।

कफ, सं. पुं. (सं.) श्लेष्मन् (पुं.), खेटकः, बलासः २. शिं (सिं) घाणं, सिहाणं-नं । ३. हृदयकंठादिस्थो धातुभेदः (वैद्यक) ।

कफ़न, सं. पुं. (अ.) शववसनं, मृतकवस्त्रं, प्रेतपरिधानम् २. शव,-भाजनं-पेटकः ।

कफनी, सं. स्त्री. (अ. कफ़न >) शवग्रीवा-वस्त्रम् २. साधूनां ग्रीवावसनम् ।

कबंध, सं. पुं. (सं.) अमुण्डं शरीरं, रुण्डः-ण्डं, छिन्नमस्तको देहः । २. राहुः ३. मेघः ४. राक्षस-विशेषः ।

कब, क्रि. वि. (सं. कदा) कस्मिन् काले ।

—तक, क्रि. वि., कियत्,-काले-चिरं, कदा-पर्यन्तम् ।

—से, क्रि. वि. कदारभ्य, कदाप्रभृति ।

कबड्डी, सं. स्त्री. (देश.) बालक्रीडाभेदः ।

कबर, सं. स्त्री. (अ. कब्र) प्रेतावटः, शवगर्तः, समाधिः ।

कबर (रि) स्तान, सं. पुं. (फ़ा. कब्रिस्तान) प्रेतभूमिः (स्त्री.), समाधिक्षेत्रम् ।

कबरा, वि. (सं. कर्बुर) चित्र, कल्माष, शार ।

कबाड़, सं. पुं. (सं. कर्पटः >) अवस्करः, तुच्छ-वस्तुसमूहः २. व्यर्थकार्यम् ।

कबाड़िया, कबाड़ी, सं. पुं. (हिं. कबाड़) अवस्करविक्रयिन्, व्यर्थवस्तुवणिज् (पुं.) ।

कबाब, सं. पुं. (अ.) भृष्टमांसं, शूलिकं, शूल्य-मांसम् ।

कबाबी, वि. (अ. कबाब >) मांसभक्षक २. मांस-विक्रेतृ ।

कबाहत, सं. स्त्री. (अ.) अशुभं, कष्टं, विघ्नः, अनिष्टम् ।

कबित-त्त, सं. पुं. (सं. कविता >) हिन्दी-काव्यस्य छन्दोभेदः २. काव्यं, कविता ।

कबीला, सं. पुं. (अ.) पत्नी २. परिवारः ३. वंशः, गोत्रम् ।

कबूतर, सं. पुं. (फ़ा.) कपोतः, कलरवः, पारावतः, छेद्यः, रक्तलोचनः ।

—खाना, सं. पुं., कपोतबिलम् २. (छत्री) कपोतपालिका, विटंकः ।

कब्ज, सं. स्त्री. (अ.) मलावरोधः, विड्ग्रहः, बद्धकोष्ठः ।

—कुशा, वि., वि-,रेचक, सारक । सं. पुं., रेचकं, सारकम् ।

कब्ज़ा, सं. पुं. (अ.) स्वामित्वं, अधिकारः २. मुष्टिः (स्त्री.), वारंगः ३. द्वारसंधिः ।

कभी, क्रि. वि. (हिं. कब + ही) कदाचित्, कदापि, कस्मिंश्चित् काले, कर्हिचित् २. पुरा, प्राक्, एकदा ।

—का, क्रि. वि., चिरात्, चिरम् ।

—न कभी, क्रि. वि., कदाचित्तु, अद्य श्वो वा ।

कमंडल, सं. पुं. (सं. कमंडलुः) करंकः, करकः-कं, कुंडी ।

कमंद, सं. स्त्री. (फ़ा.) गुण-रज्जु,-पाशः-बंधनम् २. गुण-रज्जु,-अधिरोहणी-निश्रयणी ।

कम, वि. (फ़ा.) अल्प, दहर, दभ्र, स्तोक, लघु, ह्रस्व २. ऊन, न्यून, अल्पतर, अल्पीयस्, लघीयस्, क्षोदीयस् । क्रि. वि. अल्पं, स्तोकं, ईषत्, किंचित्, मनाक् ।

—उम्र, वि., अल्पवयस्क, बाल ।

—कीमत, वि. अल्पमूल्य, सुखक्रेय ।

—खर्च, वि., अल्प-मित,-व्ययिन् २. कृपण ।

—ज़ोर, वि., अल्प,-बल-शक्ति, दुर्बल ।

—बख़्त, वि., हत-मन्द,-भाग्य, दुर्दैव ।

—खर्च बाला नशीन, मु., अल्पव्ययेन गौरव-लाभः ।

—सुनना, मु., उच्चैः श्रु (भ्वा. प. अ.) ।

कमची, सं. स्त्री. (तु.) कंचिका, [illegible] कुंचिका २. नम्यतनुयष्टिः (स्त्री.) ।

कमठ, सं. पुं. (सं.) कूर्मः, [illegible]

कमनीय, वि. (स.) सुन्दर, [illegible] ।

कमनैत, सं. पुं. (फ़ा. [illegible]), धनुर्धारिन् ।

कमनैती, सं. स्त्री. (फ़ा. [illegible]), धनुर्विद्या ।

कमर, सं. स्त्री. ([illegible]), कटि-टिः (स्त्री.) कांचीप्रदेशः, [illegible]

—कस, सं. पुं. [illegible] ।

—बंद, सं. पुं. [illegible] ।

—कसना वा बाँधना, मु., परिकरं बंध् (क्र्. प. अ.)।
—टूटना, मु., हतोत्साह (वि.) भू।
—सीधी करना, मु., विश्राम् (दि. प. से.), संविश् (तु. प. अ.)।
कमरख, सं. पुं. (सं. कर्मरंगः) (वृक्ष) कर्म्मारः, कर्म्मरः, मुद्गरः। (फल) कर्मरंगं इ.।
कमरा, सं. पुं. (लै. कैमेरा) प्र-, कोष्ठः, शाला, कक्षा २. छायाचित्रारोपकयंत्रं, आलोकलेख्ययंत्रम्।
अंदर का—, गर्भागारं, अन्तःकोष्ठः।
ऊपर का—, शिरोगृहं, चन्द्रशाला।
कमरी-ली, सं. स्त्री. (सं. कंबलं>) लघु,-कंबलं-रल्लकः-आविकः, कंबलकम्।
कमल, सं. पुं. (सं. न.) अब्जं, अंबुजं, अंभोजं, अरविंदं, कंजं, नलं, नलिनं, पंकजं, पंकेरुहं, पद्मं, शत-सहस्र,-पत्रम्, सरसिजं, सरोजं, सरोरुहं, सारसम्।
—का पौदा, सं. पुं., मृणालिनी, पद्मिनी, कमलिनी, नलिनी।
—गट्टा, सं. पुं., कमलाक्षः, पद्मबीजम्।
—दंड, सं. पुं., कमलनालः।
—नयन, वि., पद्माक्ष, कंजाक्ष (-क्षी स्त्री)। सं. पुं., विष्णुः २. रामः ३. कृष्णः।
—नाभ, सं. पुं. विष्णुः।
—नाल, सं. पुं., दे. 'कमलदंड'।
—नैनी, वि. स्त्री., कमलाक्षी, कंजनयनी।
—योनि, सं. पुं., ब्रह्मन् (पुं.)।
कमला, सं. स्त्री. (सं.) पद्मा, लक्ष्मीः-श्रीः (स्त्री.), इन्दिरा, मा, रमा, हरिप्रिया २. धनम् ३. नारंगः ४. वरनारी।
—पति, सं. पुं., विष्णुः।
कमलासन, सं. पुं. (सं. न.) पद्मासनम् २. (सं. पुं.) ब्रह्मन् (पुं.)।
कमलाकर, सं. पुं. (सं.) तटाकः, दे. 'सरोवर'।
कमलिनी, सं. स्त्री. (सं.) पद्माकरः, पद्मिनी, सकमलो जलाशयः २. लघुकमलम्।
कमाई, सं. स्त्री. (हिं. कमाना) उपजीविका, वृत्तिः (स्त्री.) २. उपार्जितं, अर्जितधनम्।
कमाऊ, वि. (हिं. कमाना) उप-,अर्जक, धनसंग्राहक २. उद्योगिन्, उद्यमिन्।
कमान, सं. स्त्री. (फ़ा.) धनुस् (न.), शरासनम्, चापः।
कमाना, क्रि. स. (हिं. काम) उप-,अर्ज् (चु.; भ्वा. प. से.), परिश्रमेण प्राप् (स्वा. उ. अ.) २. (चमड़ा इ.) उपयोगार्हं विधा (जु. उ. अ.)।
कमानी, सं. स्त्री. (फ़ा. कमान>) स्थिति-स्थापकत्वविशिष्टो यंत्रावयवः।
कमाल, सं. पुं. (अ.) नैपुण्यं, दक्षता २. विलक्षणकृत्यम्। वि., श्रेष्ठ।
कमिश्नर, सं. पुं. (अं.) आयुक्त।
कमिश्नरी, सं. स्त्री. (अं. कमिश्नर>) मंडलगणः।
कमी, सं. स्त्री. (फ़ा. कम>) ऊनता, न्यूनता, अल्पता, अपूर्णता, अपर्याप्तता।
कमीज़, सं. स्त्री. (अ. कमीज़) चोलः, चोलकः, उरोवस्त्रम्।
कमीना, वि. (फ़ा.-नः) अधम, अवम, क्षुद्र, तुच्छ २. दुष्कुलीन, हीन,-वर्ण-जाति।
कमीशन, सं. पुं. (अं.) परार्थं विक्रयः २. आयोगः ३. उद्धृतभागः।
कम्युनिज़्म, सं पुं. (अं.) साम्यवादः, समष्टिवादः।
कम्युनिस्ट, सं. पुं. (अं.) साम्यवादिन्, समष्टिवादिन्।
कयाम, सं. पुं. (अ.) निवेशः, अवस्थितिः (स्त्री.), विश्रामः २. निवेशस्थानम्।
कयामत, सं. स्त्री. (अ.) प्रलयः २. विपत्तिः (स्त्री.)
करंज, सं. पुं. (सं.) षड्ग्रंथः, रोचनः।
करंड, सं. पुं. (सं.) मधुकोषः २. खड्गः ३. कारंडवः (पक्षी)।
कर, सं. पुं. (सं.) हस्तः, शयः, पंचशाखः, पाणिः २. शुंडः-डा, शुंडारः ३. किरणः, अंशुः ४. राजस्वं, शुल्कः-कं।
करक, सं. स्त्री. (हिं. कड़क) पीडा, वेदना २. मूत्रकृच्छ्रम् ३. क्षतांकः, क्षतचिह्नम्।
करकट, सं. पुं. (हिं. खर+सं. कटः>) अवस्करः, अवकरः, अपस्करः, मलं, उच्छिष्टम्।
करकरा, सं. पुं. (सं. कर्करेटुः) सारसभेदः। २. दे. 'खुरदरा'।
करका, सं. पुं. (सं. स्त्री.) दे. 'ओला'।
करघा, सं. पुं., दे. 'कर्घा'।

करछा, सं. पुं. (सं. कररक्षकः >) 'करछी' के वाचक शब्दों के पूर्व 'वृहत्' लगाएँ।

करछी, सं. स्त्री. (हिं. करछा) कंबी-बिः (स्त्री.), खजि (जा) का, खजाजिका, दर्वी, दर्विका, तर्दुः-र्दूः (स्त्री.), पाणिका, दारुहस्तकः।

करज, सं. पुं. (सं.) १. नखः २. अंगुली ३. करंजः।

करण, सं. पुं. (सं. न.) यंत्रं, उपस्करः, साधनम् २. कारकभेदः (व्या.) ३. अस्त्रं, शस्त्रं ४. इन्द्रियम् ५. देहः ६. क्रिया, कार्यम् ७. स्थानम्।

करणीय, वि. (सं.) कर्तव्य, अनुष्ठेय, निष्पाद्य, विधेय, संपादनीय।

करतब, सं. पुं. (सं. कर्तव्यम्) कर्मन् (न.), कार्यं, कृत्यम् २. कला, कौशलं, शिल्पम्।

करतबी, वि. (हिं. करतब) कुशल, दक्ष, युक्तिमत् २. कर्मठ ३. ऐन्द्रजालिक।

करतल, सं. पुं. (सं. पुं. न.) दे. 'हथेली'।

करताल, सं. पुं. (सं. न.) वाद्यभेदः, करताली २. करतलध्वनिः (पुं.) ३. दे. 'झाँझ'।

करती, सं. स्त्री. (सं. कृत्तिः >) तृणपूर्णकृत्रिमवत्सः, तृणतर्णकः।

करतूत, सं. स्त्री. (सं. कर्तृत्वम्) कृत्यं, कर्मन् (न.) २. गुणः, कला ३. कुकर्मन्।

करद, वि. (सं.) कर-बलि-राजस्व-शुल्क,-द-प्रद-दायक-दातृ २. अधीन, परवश ३. शरणदायक।

करधनी, सं. स्त्री. (सं. कटिधानी >) मेखला, रशना, कांची, सारसनम्।

करनफूल, सं. पुं. (सं. कर्णफुल्लम् >) कर्णिका, तालपत्रं, उत्तंसः, कर्णावतंसः।

करना[1], सं. पुं. (सं. कर्णः) सुदर्शनः, श्वेतपुष्पो वृक्षभेदः।

करना[2], सं. पुं. (सं. करुणः) वृहज्जंबीरभेदः, पर्वतजंबीरः। (फल) पर्वतजंबीरम्।

करना[3], क्रि. स. (सं. करणम्) कृ (त. उ. अ.), निष्पद्-निर्वह्-निर्वृत्-साध् (प्रे.), विधा (जु. उ. अ.), अनुष्ठा-प्रणी (भ्वा. प. अ.), आचर् (भ्वा. प. से.)।
सं. पुं. तथा भाव, करणं, निष्पादनं, संपादनं, निर्वर्तनं, साधनं, विधानं, अनुष्ठानं, आचरणम्।

—योग्य, वि. निष्पाद्य, विधेय, संपाद्य, कार्य, कर्तव्य, आचरणीय।

—वाला, सं. पुं. कर्तृ, कारक, विधातृ, संपादक, निष्पादक, अनुष्ठातृ।

किया हुआ, वि., कृत, अनुष्ठित, निष्पादित, विहित।

करनाटकी, सं. पुं. (हिं. करनाटक) कर्णाटप्रान्तवास्तव्यः २. ऐन्द्रजालिक।

करनी, सं. स्त्री. (हिं. करना) कृतिः (स्त्री.), कर्मन् (न.), कार्यं, कृत्यम् २. अन्त्येष्टिक्रिया।

करभ, सं. पुं. (सं.) मणिबन्धात् कनिष्ठापर्यन्तं करस्य बहिर्भागः २. गजशावकः ३. उष्ट्रशावकः ४. कटी-टिः (स्त्री.)।

करभोरु, सं. पुं. (सं.) गजशुण्डोरुः। वि., वामोरुः (पुं.), वामोरू (स्त्री.)।

करम, सं. पुं. (सं. कर्मन् न.) कार्यं, चेष्टा २. भाग्यं, दैवम्।

करमकल्ला, सं. पुं. (अ. करम + हिं. कल्ला) दे. 'बंद गोभी'।

करमाली, सं. पुं. (सं.-लिन्) सूर्यः, भानुः।

करवट[1], सं. स्त्री. (सं. करवर्तः) पार्श्वः, पार्श्वं, भागः, पक्षः २. वामपार्श्वतो दक्षिणपार्श्वतो वा शयनम्।

करवट[2], सं. पुं. (सं. करपत्रम्) क्रकचः, पत्रदारकः।

—लेना, मु., मोक्षलाभाय क्रकचेन स्वशीर्षच्छेदनम्।

करवाल, सं. स्त्री. (सं. पुं.) खड्गः, असिः।

करश्मा, सं. पुं. (फ़ा.) चमत्कारः, कौतुकं, आश्चर्यं।

करहाट-टक, सं. पुं. (सं.) कमलमूलम् २. कमलांतःस्थं छत्रम् ३. मदनवृक्षः।

कराना, क्रि. प्रे. (हिं. करना) 'करना' के धातुओं के प्रे. रूप।

करामात, सं. स्त्री. (अ. 'करामत' का बहु.) दे. करश्मा।

करामाती, वि. (अ. करामात >) लोकोत्तर, चमत्कारिन्, अद्भुत।

करार[1], सं. पुं. (अ.) शान्तिः (स्त्री.), शमः २. धैर्यं, स्थैर्यम्।

करार[२], सं. पुं., (अ. इकरार) दे. 'प्रतिज्ञा'।

करारा[१], सं. पुं. (सं. कराल>) नद्याः उच्चं पातुकं वा तटम् २. उच्छ्रिततीरम् ३. क्षुद्र-पर्वतः।

करारा[२], वि. (सं. कराल) दृढ़, घन, संहत २. क्रूर, दारुण ३. सुपक्व, सुभृष्ट ४. तीक्ष्ण, उग्र ५. दृढांग, वज्रदेह ६, भंगुर, भिदुर।

कराल, वि. (सं.) भीषण, भयंकर, घोर, दारुण।

कराहना, क्रि. अ. (हिं. करना + आह) आर्त-रवं कृ, दुःखेन स्वन् (भ्वा. प. से.)।

करिणी, सं. स्त्री. (सं.) हस्तिनी।

करी, सं. पुं. (सं. करिन्) गजः, हस्तिन्।

करीना, सं. पुं. (अ.) सुव्यवस्था, पद्धतिः (स्त्री.), सौष्ठवम्।

करीब, क्रि. वि. (अ.) समीपे, निकटे २. प्रायः, प्रायेण।

करीर, सं. पुं. (सं.-रः) तीक्ष्णकंटकः, क्रकरः, गूढपत्रः, क्रकचः।

करुण, वि. (सं.) दयार्द्र, कृपालु २. दुःखजनक। सं. पुं. रसविशेषः (सा.) २. परमेश्वरः ३. करुणा, अनुकंपा।

करुणा, सं. स्त्री. (सं.) अनुकंपा, दया, कृपा, २. प्रियवियोगजं दुःखम्।

—निधान, वि. (सं.) करुणामय, दयामय, कृपा-करुणा-दया,-निधिः-सागरः।

करेणु, सं. पुं. स्त्री. (सं. पुं. स्त्री.) हस्तिन् २. हस्तिनी।

करेला, सं. पुं. (सं. कारवेल्लः) कंडुरः, कांड-कट्टकः, कठिल्लकः।

करेत, सं. पुं. (हिं. काला) मालुधानः, मातुलाहिः, कृष्णसर्पभेदः।

करोड़, वि. (सं. कोटी-टिः स्त्री.) शतलक्ष। सं. पुं., उक्ता संख्या तदंकाश्च (१००००००)

करौली, सं. स्त्री. (सं. करवाली) छुरी, छुरिका, असिपुत्रिका।

कर्क, सं. पुं. (सं.) कर्कटः, कुलीरः २. राशि-विशेषः ३. अग्निः ४. मुकुरः।

कर्कश, वि. (सं.) कठोर, रूक्ष। २. तीव्र, प्रचंड ३. सकंटक।

कर्कशा, वि. स्त्री. (सं.) कलह-विवाद,-प्रिया (नारी)।

कर्घा, सं. पुं. (फ़ा. कारगाह = कार्यस्थान>) तन्तुवायानां गर्तः २. पटकाराणां वेमः-वाप-दंडः-तंत्रवापः ३. पटनिर्माणगृहम्।

कर्ज़, सं. पुं. (अ.) दे. 'ऋण'।

कर्ण, सं. पुं. (सं.) श्रवणः-णं, श्रवः, श्रोत्रं, श्रवस् (न.), श्रुतिः (स्त्री.), शब्दग्रहः। २. अंगराजः, वासुसेनः, कानीनः ३. दे. 'पतवार'।

—कटु, वि. (सं.) विस्वर, कर्कश, दुःश्राव्य।

—धार, सं. पुं. (सं.) नाविकः, पोतवाहः २. कर्णिन्, मुख्यनाविकः।

—परंपरा, सं. स्त्री. (सं.) श्रुतिपरंपरा।

—पुट, सं. पुं. (सं. न.) श्रुतिमंडलम्।

—पुर, सं. पुं. (सं. न.) चम्पानगरी (= भागलपुर)

—पूर, सं. पुं. (सं.) अवतंसः २. नीलोत्पलम्।

—फूल, सं. पुं. (सं.-फुल्लम् >) कर्णिका, उत्तंसः, तालपत्रं, कर्णभूषणम्।

—वेध, सं. पुं. (सं.) संस्कारभेदः।

कर्णाटी, सं. स्त्री. (सं.) रागिणीभेदः २. कर्णाट-देशस्य भाषा नारी वा।

कर्णिका, सं. स्त्री. (सं.) ताटंकः, दंतपत्रं, कर्णा-भूषणभेदः २. करमध्यांगुली ३. लेखनी।

कर्त्तन, सं. पुं. (सं. न.) (कर्तन्या) छेदनं, लवनं, कृन्तनम् २. तन्तुसर्जनम्।

कर्त्तनी, सं. स्त्री. (सं.) दे. 'कतरनी'।

कर्त्तरी, सं. स्त्री. (सं.) दे. 'कतरनी' २. दे. 'छुरी'।

कर्त्तव्य, सं. पुं. (सं. न.) धर्मः, विधेयं, अनुष्ठे-यम् २. दे. 'करणीय'।

—विमूढ़, वि. (सं.) कर्तव्यसंभ्रान्त।

कर्त्ता, सं. पुं. (सं. कर्तृ) विधातृ, स्रष्टृ, अनुष्ठातृ २. प्रभुः, ईश्वरः।

कर्त्तार, सं. पुं. (सं. कर्त्तारः >) परमेश्वरः, विधातृ, विश्वसृज्।

कर्त्तृत्व, सं. पुं. (सं. न.) कारकत्वम् २. कर्तृधर्मः।

कर्दम, सं. पुं. (सं.) चिकिलः, पंकः २. पापं ३. छाया।

कर्पट, सं. पुं. (सं. पुं. न.) चीरं, पटखण्डः, पटचरं जीर्णवस्त्रम्।

कर्पूर, सं. पुं. (सं.) दे. 'कपूर'।

कर्बुर, सं. पुं. (सं. न.) स्वर्णम् २. धुस्तूरवृक्षः ३. जलम्। (सं. पुं.) राक्षसः २. पापं ३. कर्चूरः। वि. नानावर्ण, चित्र, कल्माष, शबल।

कर्म, सं. पुं. (सं. कर्मन् न.) कार्यं, कर्तव्यं, क्रिया, कृतिः (स्त्री.), प्रवृत्तिः (स्त्री.) २. दैवं, भाग्यम् ३. द्वितीयं कारकम् (व्या.)।

—कांड, सं. पुं. (सं. न.) धर्मकृत्यं, यज्ञादि कार्यम् २. कर्मविधायकं शास्त्रम्।

—कार, सं. पुं. (सं.) लोहकारः २. स्वर्णकारः ३. सेवकः।

—चारी, सं. पुं. (सं.-रिन्) राज,-भृत्यः-पुरुषः, अधिकारिन् २. कार्यकर्तृ।

—भोग, सं. पुं. (सं.) कर्मफलम् २. पूर्वकर्मणां परिणामः।

—योग, सं. पुं. (सं.) चित्तशुद्धिकरं वैदिक-कर्मन् (न.) २. निष्कामकर्मणाऽऽत्मज्ञानम्।

—रेख, सं. स्त्री. (सं.-रेखा) भाग्यांकाः २. भाग्यं, दैवम्।

—विपाक, सं. पुं. (सं.) पूर्वकर्मणां फलं, कर्म-परिणामः।

—शील, वि. (सं.) कर्मवत् २. उद्योगिन्, उद्यमिन्।

—संन्यास, सं. पुं. (सं.) कर्मत्यागः २. कर्म-फलत्यागः।

—हीन, वि. (सं.) मंद-हत,-भाग्य, दुर्दैव २. शास्त्रोक्तकर्मणाम् अकर्तृ।

—जागना, मु., भाग्य-पुण्य,-उदयः।

—फूटना, मु. कर्मदुर्विपाकः, भाग्यविपर्ययः।

कर्मठ, वि. (सं.) कर्मण्य, कर्मशील, उद्यमिन्।

कर्मण्य, वि. (सं.) दे. 'कर्मठ'।

कर्मधारय, सं. पुं. (सं.) समानाधिकरणः तत्पुरुषसमासः।

कर्मिष्ठ, वि. (सं.) कार्यकुशल २. क्रियावत्।

कर्मी, वि. (सं. कर्मिन्) कार्यकर्तृ २. फलेच्छया कर्मसंपादक।

कर्मेन्द्रिय, सं. स्त्री. (सं. न.) क्रियासाधकं करणम्। (हाथ, पाँव आदि)।

कर्षक, सं. पुं. (सं.) कर्षणकरः २. क्षेत्रिन्, क्षेत्राजीवः।

कर्षण, सं. पुं. (सं. न.) आकर्षः, आकर्षणम् २. भूमिदारणम् ३. कृषिः (स्त्री.)।

कलंक, सं. पुं. (सं.) दोषः, दूषणं, छिद्रम् २. लांछनं, अपवादः ३. लक्षणं, चिह्नम्।

कलंकित, वि. (सं.) दूषित, निंदित, आक्षिप्त, लांछित।

कलंकी[१], वि. (सं.-किन्) दे. 'कलंकित'।

कलंकी[२], सं.पुं. (सं.कल्किः) विष्णोर्दशमावतारः।

कलंडर, सं. पुं. (अं. केलेंडर) पत्रांगं, तिथिपत्रम्

कलंदर, सं. पुं. (अ.) यवनभिक्षुभेदः २. वानरादिनर्तयितृ।

कल[१], सं. पुं. (सं.) मधुरास्फुटध्वनिः। वि., मनोज्ञ, अभिराम २. मधुर, कोमल।

कल[२], सं. स्त्री. (सं. कल्य >) स्वास्थ्यम् २. सुखम् ३. संतोषः।

कल[३], सं. स्त्री. (सं. कला) उपायः, युक्तिः(स्त्री.) २. यंत्रं, उपकरणम् ३. यंत्रावयवः।

कल[४], क्रि. वि. (सं. कल्यम्) श्वः (अव्य.), आगामिदिनम्। २. आगामिकाले ३. ह्यः (अव्य.), गतदिनम्।

—का, वि., श्वस्तन (-नी स्त्री.), श्वस्त्य (-त्या स्त्री.) २. ह्यस्तन, ह्यस्त्य।

कलई, सं. स्त्री. (अ.) रंगं, वंगं, कस्तीरम् २. रंग-वंग,-लेपः ३. स्वर्णादिधातुभिर्लेपः ४. कान्तिकरो लेपः ५. सुधालेपः ६. आडंबरः

—गर, सं. पुं. (फ़ा.) धातु-सुधा,-लेपकः।

—खुलना, मु., गोप्यं रहस्यं वा आविर्भू।

कलकंठ, वि. (सं.) प्रियंवद, सुस्वर, मधुरभाषिन् सं. पुं. कोकिलः २ कपोतः ३. हंसः।

क़लक़, सं. पुं. (अ.) दुःखं, शोकः।

कलकल, सं. पुं. (सं.) निर्झरादीनां शब्दः २. कोलाहलः ३. विवादः।

कलगी, सं. स्त्री. (तु.) पक्षः, पिच्छम् २.चूडालंकारभेदः ३ मुकुटस्थाःसुपत्त्राः ४.भवनशृंगम्।

कलत्र, सं. पुं. (सं. न.) पत्नी, भार्या।

कलदार, सं. पुं. (हिं. कल) यंत्ररचितं रूप्यकम् २. यंत्रयुक्त।

कलधौत, सं. पुं. (सं. न.) सुवर्णम् २. रजतम्।

कलन, सं. पुं. (सं. न.) उत्पादनं, रचनं, जननम् २. ग्रहणम् ३. धारणं, परिधानम्

४. आचरणम् ५. संबंधः ६. ग्रासः, कवलः ७. गणितक्रिया ८. वेतसः, वेत्रः।

कलप, सं. पुं. (सं. कल्पः>) मंडः, मंडम् २. केश,-रागः-रंगः ३. दे. 'कल्प'।

कलपना, क्रि. अ. (स. कल्पनम्>) शुच् (भ्वा. प. से.), पीड्-खिद्-तप्-दु-क्लिश् (कर्म.) व्यथ्-उत्कंठ् (भ्वा. आ. से.), दुर्मनायते (ना. धा.) उत्सुक (वि.)+भू।

कलपाना, क्रि. प्रे., 'कलपना' के धातुओं के प्रे. रूप।

कलफ, सं. पुं. (सं. कल्पः>) मंडः, मंडम्।

—लगाना, क्रि. स., मंडेन लिप् (तु. प. अ.)।

कलबल[1] सं. पुं. (सं. कलाबलम्) उपायः, युक्तिः (स्त्री.)।

कलबल,[2] सं. पुं. (अनु.) कोलाहलः, कलकलः।

कलभ, सं. पुं. (सं.) गजशावकः, उष्ट्रशावकः।

कलम, सं. पुं. स्त्री. (सं. पुं.) लेखनी, अक्षरतूलिका, वर्णिका, वर्णमातृ (स्त्री.) २. अन्यत्रारोपणाय कृत्ता शाखा ३. अन्यवृक्षे निवेशिता शाखा ४. गंडरोमाणि (न. बहु.) ५. तूलिका, वर्तिका ६. तक्षणसाधनम्।

—दान, सं. पुं., कलम-लेखनी,-धानम्।

—लगाना, मु., वृक्षान्तरे देहान्तरे वा निविश्(प्रे.)

कलमा, सं. पुं. (अ.) यवनधर्ममूलमंत्रः २. वाक्यम् ३. शब्दः।

—पढ़ना, मु., यवनी भू।

कलमी, वि. (फ़ा.) हस्त-,लिखित २. वृक्षान्तरे आरोपित ३. स्फटिकरूपेण घनीभूत।

—आम, सं. पुं. (पेड़) राजाम्रः, नृपवल्लभः। (फल) राजाम्रम्।

—शोरा, सं. पुं., घनीकृतो यवक्षारः।

कलमुहाँ, वि. (सं. कालमुख>) कृष्ण,-वदन-आस्य २. लांछित, कलुषित।

कलरव, सं. पुं. (सं.) मधुरमंदध्वनिः, कल,-स्वनः-रुतम्। २. कपोतः ३. कोकिलः।

कलवार, सं. पुं. (स. कल्यपालः) शौंडिकः, सुराजीविन्, सुराकारः २. सुराविक्रयी उपजातिः (स्त्री.)।

कलश, सं. पुं. (सं.) कलशं-शी, कलसः-सी-सम्, घटः, कुटः, निपः २. शिखा, शृंगम्।

कलसा, सं. पुं., दे. 'कलश'।

कलहंस, सं. पुं. (सं.) राजहंसः, कादंवः, कलनादः, मरालः २. नृपोत्तमः ३. परमेश्वरः।

कलह, सं. पुं. (सं.) कलिः, विवादः, द्वन्द्वं, वाग्युद्धम्, विसंवादः।

—प्रिय, वि. (सं.) विवादप्रिय, कलहकारिन्, कलहिन्।

कला, सं. स्त्री. (सं.) अंशः, भागः २. चन्द्रस्य षोडशांशः ३. सूर्यस्य द्वादशांशः ३. अग्नि-मंडलस्य दशमांशः ४. त्रिंशत्काष्ठात्मकः समयविभागः ५. शिल्पं, शिल्पविद्या ७. कौशलं, निपुणता ८. शरीरस्य षोडशाध्यात्मविभागाः (=५ज्ञानेन्द्रिया, ५ कर्मेन्द्रिय, ५ प्राण, मन) ९. नृत्यभेदः १०. मात्रा (छन्द.) ११. विभूतिः (स्त्री.) १२. शोभा, प्रभा १३. कौतुकं, लीला १४ छलं, कपटम् १५. मिषं, व्याजः १६. युक्तिः (स्त्री.), उपायः १७. नटलीलाभेदः १८. यंत्रम् १९. प्रकृतिः (स्त्री., जन.), २०. वर्णवृत्तभेदः।

—कंद, सं. पुं. (फ़ा.) मिष्टान्नभेदः।

—कौशल, सं. पुं. (सं. न.) कला, शिल्पम् २. कलापाटवम्।

—निधि, सं. पुं. (सं.) कलाधरः, चन्द्रः।

—बाजी, सं. स्त्री. (सं.+फ़ा.) विपर्यस्तप्लुतिः (स्त्री.)।

—वंत, सं. पुं. (सं. कलावत्) संगीतकुशलः, गायकः २. रज्जुनर्तकः। वि., कलाकुशल।

कलाई, सं. स्त्री. (सं. कलाची) कलाचिका, प्रकोष्ठः, मणिबंधः।

कलाप, सं. पुं. (सं.) समूहः, गणः, निकरः २. जनसंघः, लोकनिवहः ३. इषुधिः ४. चन्द्रः ५. कटिबंधः, मेखला ६. गुच्छः ७. मयूरपिच्छम् ८. आभूषणम्।

कलापिनी, सं. स्त्री. (सं.) मयूरी २. रात्रिः (स्त्री.)।

कलापी, सं. पुं. (सं.-पिन्) मयूरः, बर्हिन् २. कोकिलः। वि., तूणपृष्ठ।

कलावत्तू, सं. पुं. (तु. कलावतून) कौशेयतंतौ व्यावर्तितः सुवर्ण-रजत,-तारः।

कलाम, सं. पुं. (अ.) वचनं, उक्तिः (स्त्री.) २. वार्तालापः ३. प्रतिज्ञा ४. आक्षेपः।

कलार-ल, सं. पुं., दे. 'कलवार'।

कलारिन, सं. स्त्री. (हिं. कलार) शौण्डिकी, मद्यविक्रेत्री।

कलिंग, सं. पुं. (सं.-गाः) प्रान्तविशेषः (=उड़ीसा) २. इन्द्रयव-कुटज,-वृक्षः ३. दे. 'तरबूज'।

कलिंद, सं. पुं. (सं.) पर्वतविशेषः २. सूर्यः।

कलिंदजा, सं. स्त्री. (सं.) यमुना, कालिंदी।

कलि, सं. पुं. (सं.) चतुर्थ-तुरीय-अन्त्य,-युगम् (यह ४३२००० वर्षों का होता है) २. कलहः, विवादः ३. युद्धम् ४. शूरः ५. क्लेशः ६. पापम् ७. शिवः ८. इषुधिः।

—कर्म, सं. पुं. (सं.-र्मन् न.) संग्रामः।

—काल, सं. पुं. (सं.) कलियुगम्।

कलिका, सं. स्त्री. (सं.) दे. 'कली'।

कलित, वि. (सं.) ज्ञात, विदित २. प्रसिद्ध ३. प्राप्त ४. शोभित ५. सुंदर।

कली[१], सं. स्त्री. (सं.) कलिका, कोरकः-कं, मुकुलः-लं, कुड्मलः, कोशः-षः २. त्रिकोणो वस्त्रखंडः ३. धूमपानयंत्राधोभागः।

दिल की कली खिलना, मु., मुद् (भ्वा. आ. से.)

कली[२], सं. स्त्री. (अ. कलई) चूर्णजलम् २. तप्तचूर्णम्।

कलुष, सं. पुं. (सं. न.) मलं, मालिन्यम् २. पापं, दोषः ३. क्रोधः ४. महिषः।

वि., मलिन, पंकिल २. निंदित ३. पापिन्।

कलुषित, वि. (सं.) पंकिल, मलीमस २. अपवित्र, अमेध्य ३. आतुर ४. कृष्ण, काल।

कलूटा, वि. (हिं. काला) काल, कृष्ण, श्याम।

काला—, वि., अति,-कृष्ण-काल।

कलेजा, सं. पुं. (सं. कालेयम्) यकृत् (न.), कालखण्डं, कालकम् २. हृदयं, हृद् (न.) ३. उरस्, वक्षस्, क्रोडं (सब न.) ४. साहसं, उत्साहः, वीर्यम्।

—काँपना, मु., भी (जु. प. अ.), उद्विज् (तु. आ. से.) सं-वि,-त्रस् (दि. प. से)।

—चलनी होना, मु., हृदयं व्यध् (कर्म.)।

—टूक टूक होना, मु., हृदय स्फुट् (तु. प. से.)।

—थाम कर रह जाना, मु., संतापं सं-नि,-यम् (भ्वा. प. अ.)।

—धड़कना, मु., (भयादिभिः) हृदयं कंप् (भ्वा. आ. से.)।

—फटना, मु., (शोकमात्सर्यादिभिः) हृदयं विद् (कर्म.)।

—से लगाना, मु., आलिंग् (भ्वा. प. से.)।

कलेवर, सं. पुं. (सं. न.) शरीरं, देहः।

—बदलना, क्रि. अ., पुनः जन् (दि. आ. से.) २. नववस्त्राणि परिधा (जु. उ. अ.)।

कलेवा, सं. पुं. (सं. कल्यवर्तः) प्रातराशः, प्रातर्भोजनं, कल्यजग्धिः (स्त्री.), जलपानम्।

कलोल, सं. स्त्री. (सं. कल्लोलः>) क्रीडा, खेला, केलिः (पुं. स्त्री.), लीला, विलासः।

कलौंजी, सं. स्त्री. (सं. कालाजाजी) पृथुका, दिव्या, काला।

कल्क, सं. पुं. (सं. पुं. न.) घृततैलादिशेषः २. दंभः ३. विष्ठा ४. किट्टम् ५. पापम् ६. वस्तुनः चूर्णम् ७. अवलेहः।

कल्कि, सं. पुं. (सं.) विष्णोर्दशमावतारः।

कल्प, सं. पुं. (सं.) धर्मकृत्यविधायको वेदांग-भेदः २. ब्रह्मदिनम्, दैवसहस्रयुगम् (=४३२०००००० वर्ष) ३. महाप्रलयः, सृष्टि-संहारः ४. विधानं, कृत्यम् ५. प्रातःकालः ६. रोगनिवृत्तियुक्तिः (स्त्री.) ७. प्रकरणं, विभागः ८. विकल्पः, पक्षः ९. संदेशः १०. निश्चयः ११. उद्देशः। वि., तुल्य, सदृश।

—तरु, सं. पुं. (सं.) कल्प,-वृक्षः-पादपः-द्रुमः।

कल्पना, सं. स्त्री. (सं.) उद्भावना-नं, कल्पनं, मनः कल्पना २. रचना, विधानम् ३. प्रसाधनं, मंडनम् ४. तर्कः, ऊहा ५. अध्यारोपः ६. गज-सज्जीकरणं।

—करना, क्रि. अ., उत्प्रेक्ष्-ऊह् (भ्वा. आ. से.), तर्क् (चु.), मनसा कल्प् (प्रे.), संभू (प्रे.)।

कल्पित, वि. (सं.) रचित, विहित २. सुव्यवस्थित ३. वि-सं,-भावित ४. उद्भावित, वासना,-भावना,-सृष्ट, मानस, काल्पनिक ५. असत्य, निर्मूल ६. कृत्रिम, कृतक।

कल्मष, सं. पुं. (सं. न.) अघं, पापम् २. मलं मालिन्यम्।

कल्य, सं. पुं. (सं. न.) प्रत्यूषः, प्रभातम् २. मधु (न.) ३. सुरा ४. श्वः (अव्य.), आगामिदिनम्। वि., स्वस्थ, निरामय २. मूक-बधिर।

कल्याण, सं. पुं. (सं. न.) सुखं, मंगलं, हितं, शिवं, कुशलं, क्षेमं, भद्रं, सुस्थितिः (स्त्री.) २. सुवर्णम् ३. रागभेदः। वि. शिव, मंगल, शंकर।

—कारी, वि. (सं.-रिन्) सुख-मंगल-हित-, कारक।

कल्याणी, वि. स्त्री. (सं.) मंगलकारिणी, सुंदरी। सं. स्त्री. (सं.) गौः (स्त्री.) २. माषपर्णी।

कल्लर, सं. पुं. (देश.) ऊषरः-रं, वंध्या भूमिः (स्त्री.)।

कल्ला, सं. पुं. (सं. करीरः-रं >) प्ररोहः, किसलयः, उद्भिद्।

कल्लोल, सं. पुं. (सं.) महातरंगः, उल्लोलः, महोर्मिः २. दे. 'कलोल'।

कल्लोलिनी, सं. स्त्री. (सं.) नदी, तटिनी।

कवच, सं. पुं. (सं. पुं. न.) सन्नाहः, कंचुकः, वर्मन् (न.), तनु,-वारं-त्राणं-त्रम् २. भेरी, दुंदुभिः ३. रक्षाकरंडः।

—पत्र, सं. पुं. (सं. न.) भूर्जपत्रम्।

कवर, सं. पुं. (सं. पुं. स्त्री. न.) केश,-बंधः-पाशः २. ग्रासः, कवलः, पिण्डः।

कवरी, सं. स्त्री. (सं.) केशविन्यासः, वेणी-णिः (स्त्री.), धम्मिल्लः २. वनतुलसी।

कवर्ग, सं. पुं. (सं.) ककारादिवर्णपंचकम्।

कवल, सं. पुं. (सं.) ग्रासः, पिंडः-डम्।

कवलगट्टा, सं. पुं. (सं. कमलग्रंथिः >) कमलाक्षः, पद्मबीजम्।

कवलित, वि. (सं.) भक्षित, निगीर्ण, भुक्त २. गृहीत, आदत्त।

कवायद, सं. पुं. (अ. 'क़ायदा' का बहु.) नियमाः-विधयः (बहु.) २. व्यायामः ३. सेनाव्यायामः ४. व्याकरणनियमाः।

कवि, सं. पुं (सं.) काव्यकरः, सूरिः, सत्सारः २. ऋषिः ३.सूर्यः ४. ब्रह्मन् (पुं.)।

—राज, सं. पुं. (सं.) कवीन्द्रः, महाकविः २. वैतालिकः ३. वैद्योपाधिः।

कविता, सं. स्त्री. (सं.) काव्यं, काव्यप्रबन्धः, काव्यबंधः २. काव्यरचना, कवित्वं, कविताकला।

कवित्त, सं. पुं. (सं. कवित्वम् >) काव्यं, कविता २. हिन्दीछन्दोभेदः।

कवित्व, सं. पुं. (सं. न.) काव्यरचनाशक्तिः (स्त्री.) २. काव्यगुणः।

कश, सं. पुं., दे. 'कशा'।

कशमकश, सं. स्त्री. (फ़ा) संघर्षः, प्रतिस्पर्द्धा २. जनौघः ३. संशयः।

कशा, सं. स्त्री. (सं.) कषा, प्रतोदः, प्रतिष्कशः-षः।

कशिश, सं. स्त्री. (फ़ा) दे. 'आकर्षण'।

कशीदा, सं. पुं. (फा.) सूची,-शिल्पं-कर्मन् (न.)।

—काढ़ना, क्रि. स., सूच्या पुष्पादिकं चित्र् (चु.)।

कश्ती, सं. स्त्री. (फ़ा.) दे. 'नौका'।

कश्मल, सं. पुं. (सं. न.) मोहः, मूर्च्छा २. पापं, अघम्। वि. मलिन, आविल।

कश्मीर, सं. पुं. (सं.) काश्मीरदेशः, शास्त्रशिल्पिन्।

कष, सं. पुं. (सं.) कषपट्टिका, निकषः, निकष,-उपलः-पाषाणः। २. शाणः-णी ३. परीक्षणं, परीक्षा।

कषण, सं. पुं. (सं. न.) निकषेण स्वर्णादिकस्य परीक्षणम्।

कषाय, वि. (सं.) तुवर, कुवर, २. सुवास, सुगंधि ३. रंजित, रंगवत् ४. गैरिकवर्ण, रक्तश्याम। सं. पुं. क्रोधः २. काथः ३. कुवरः, रसभेदः।

कष्ट, सं. पुं. (सं. न.) दुःखं, क्लेशः, पीडा, व्यथा २. आपद्, विपद्, आपत्तिः, विपत्तिः (सब स्त्री.)।

—साध्य, वि. (सं.) दुस्साध्य, दुष्कर, कष्ट।

कस[1], सं. पुं. (सं. कषः) निकषः, कषपट्टिका २. परीक्षणम् २. खड्गकुंचनीयता।

कस[2], सं. पुं. (हिं. कसना) बलं, शक्तिः (स्त्री.) २. निग्रहः, निरोधः ३. विघ्नः।

कस[3], सं. पुं. (फ़ा.) नरः, जनः, व्यक्तिः (स्त्री.)।

फ़ी—, क्रि. वि., प्रतिपुरुषं, प्रतिजनम्।

बे—, वि., असहाय, अनाथ।

कसक, सं. स्त्री. (सं. कष् = हिंसा >) वेदना, पीडा, व्यथा २. चिर,-वैरं-विरोधः ३. अभिलाषः ४. सहानुभूतिः (स्त्री.)।

—निकालना, क्रि. स., चिरवैरं शुध् (प्रे.)।
कसकना, क्रि. अ. (हिं. कसक) व्यथ् (भ्वा. आ. से.), पीड् (कर्म.)।
कसकुट, सं. पुं. दे. 'काँसा'।
कसना, क्रि. स. (सं. कर्षणम्) दृढीकृ, नियम् (भ्वा. प. अ.), द्रढयति (ना. धा.), २. बंध् (क्र. प. अ.) ३. पीड् (चु.) ४. परीक्ष् (भ्वा. आ. से.) ५. सज्जीकृ ६. मूल्यं वृध् (प्रे.)।
क्रि. अ. दृढीभू, नियम् (कर्म) २. बंध्, नियंत्र् (कर्म.) ३. पिंडीभू।
सं. पुं., दृढीकरणं, नियमनम् २. बंधनम् ३. पीडनम् ४. परीक्षणम् ५. सज्जीकरणम्।
कसब, सं. पुं. (अ.) व्यवसायः, वृत्तिः (स्त्री.) २. गणिकावृत्तिः (स्त्री.)।
कसबी, सं. स्त्री. (अ. कसब >) वेश्या, गणिका २. कुलटा, पुंश्चली।
कसम, सं. स्त्री. (अ.) शपथः, प्रतिज्ञा, समयः
—खाना, क्रि. अ., शप् (भ्वा. दि. उ. अ.)।
कसर, सं. स्त्री. (अ.) न्यूनता, अल्पता २. अभावः, हीनता ३. दोषः ४. वैरम् ५. हानिः (स्त्री.)।
—निकालना, मु., क्षतिं पूर् (चु.), प्रतिफलं दा (जु. उ. अ.)।
कसरत[1], सं. स्त्री. (अ.) बाहुल्यं, प्रचुरता, आधिक्यम् २. बहुतरभागः, अधिकसंख्या।
—राय, सं. स्त्री., बहुमतं, मताधिक्यम्।
कसरत[2], सं. स्त्री. (अ.) व्यायामः, परिश्रमः २. अभ्यासः, आवृत्तिः (स्त्री.)।
कसरती, वि. (अ. कसरत >) व्यायामिन्, दृढांग।
कसा, वि. (हिं. कसना) गाढ, दृढ, सुसंहत २. दृढबद्ध।
क़साई, सं. पुं. (अ. क़स्साब) सौ (शौ)निकः २. मांसिकः, घातकः, विशसितृ। वि., क्रूर, निर्दय।
कसाना, क्रि. अ. (हिं. काँसा) कषाय-विकृत-स्वाद (वि.) भू।
कसाला, सं. पुं. (सं. कषः = पीड़ा >) दुःखं, कष्टम् २. आयासः, परि-, श्रमः।
कसाव, सं. पुं. (सं. कषायः >) कषायता, रूक्षता।
कसी, सं. स्त्री. (सं. कषणम् >) खनित्रं, टंगः-गम्।
कसीदा, सं. पुं., दे. 'कशीदा'।
कसीस, सं. पुं. (सं. कासीसम्) शोधनं, शुभ्रं, धातुशेखरम्, खेचरम्।
क़सूर, सं. पुं. (अ.) अपराधः, दोषः, स्खलितम्।
—वार, वि., अपराधिन्, दोषिन्।
कसेरा, सं. पुं. (हिं. काँसा) कांस्यकारः, पीतलोहकारः।
कसैला, वि. (हिं. कसाव) कषाय, तुवर, कुवर।
कसैली, सं. स्त्री. (हिं. कसैला) दे. 'सुपारी'। वि. स्त्री. कषाया, रूक्षा।
कसोरा, सं. पुं. (हिं. काँसा) (कांस्य-) चषकः-शरावः-भाजनं-पात्रम्। २. मृण्मय-मार्त्तिक,-चषकः।
कसौटी, सं. स्त्री. (सं. कषपट्टी) नि-, कषः, कषपट्टिका, निकषोपलः २. परीक्षा, प्रमाणम्।
—पर कसना, मु., परीक्ष् (भ्वा. आ. से.)।
कस्तूरी, सं. स्त्री. (सं.) कस्तूरिका, मृग,-नाभिः-मदः, अंडजा, वातामोदा, गंधधूलिः (स्त्री.)।
—मृग, सं. पुं. (सं.) गंधमृगः।
क़स्बा, सं. पुं. (अ.-बः) बृहत्-महा,-ग्रामः, लघु,-नगरं-पुरम्।
क़हक़हा, सं. पुं. (अ. अनु.) अट्टहासः, उच्चै-र्हासः, अति-प्र-,हासः।
क़हत, सं. पुं. (अ.) दुर्भिक्षं, नीवाकः, आहाराभावः, अकालः।
कहना, क्रि. स. (सं. कथनम्) गद्-वद्-भण् (भ्वा. प. से.), ब्रू (अ. उ.), वच् (अ. प. अ.), उच्चर्-उदीर् (प्रे.), उदा-व्या,-ह (भ्वा. प. अ.) २. कथ् (चु.), शंस् (भ्वा. प. से.), आचक्ष् (अ. आ.), नि-आ,-विद् (प्रे.), आ-, ख्या (अ. प. अ.), वर्ण् निरूप (चु.), अभिधा (जु. उ. अ.) ३. आज्ञा (प्रे. आज्ञापयति) ४. श्लाघ् (भ्वा. आ. से.) ५. प्रकाश् (प्रे.) ६ उपदिश् (तु. प. अ.)। सं. पुं., वचनं, भाषणं, कथनं, व्याहरणं, उदीरणम् २. आज्ञा, आदेशः ३. उपदेशः, अनुशासनम् ४. दे. 'कहावत'।
—योग्य, वि. गदनीय, वदनीय, कथनीय, भणितव्य, वक्तव्य।

—वाला, सं.पुं., वाचकः, वक्तृ, वादिन्, व्याहर्तृ, अभिधातृ।
—हुआ, वि., गदित, उदित, भणित, उक्त, कथित, उच्चारित, उदीरित।
कहने को, मु., नाममात्रम्।
कहर, सं. पुं. (अ.) विपत्तिः (स्त्री.)।
कहरवा, सं. पु. (हिं. कहार) (१-३) ताल-गीत-नृत्य,-भेदः।
कहलाना, क्रि. प्रे., 'कहना' के धातुओं के प्रे. रूप।
कहवा, सं. पुं. (अ.) वृक्षभेदः २. तस्य वीजानि (बहु.) ३. तेषां पेयम्।
कहाँ, क्रि. वि. (सं. कुह) क, कुत्र, कस्मिन् स्थाने।
—का, वि., कुत्य, कुत्रत्य, किंदेशीय।
—तक, क्रि. वि., कियद्दूरं-रे, कियतांऽशेन, किंपर्यन्तम्।
कहा, सं. पुं. (हिं. कहना) कथनं, वचनं, उक्तिः (स्त्री.), आज्ञा, उपदेशः।
कहानी, सं. स्त्री. (सं. कथानिका) कथा, आ-उपा,-ख्यानम्, आख्यायिका, वृत्तान्तः।
कहार, सं. पुं. [सं. कं (=जल)+हारः] कहारः, जल-उद,-वाहः, वृतिहारः। २. शिविका-नरयान,-वाहः ३. पात्र,-क्षालकः-मार्जकः।
कहावत, सं. स्त्री. (हिं. कहना) आभाणकः, लोकवादः, जनप्रवादः, जनोक्तिः-लोकोक्तिः (स्त्री.)
कहासुनी, सं. स्त्री. (हिं. कहना+सुनना) कलहः, विवादः, वाग्युद्धम्।
कहीं, क्रि. वि. (हिं. कहाँ) क्वापि, क्वचित्, कुत्रापि, कुत्रचित्, यत्रकुत्रचित्। २. न, न कदापि ३. यदि, चेत् ४. अत्यन्तम्।
—कहीं, क्रि. वि., क्वचित् क्वचित्, यत्र कुत्रचिदेव।
—न कहीं, क्रि. वि., अत्र अन्यत्र वा।
काँइयाँ, वि. (अनु. काँव) धूर्त्त, कितव।
काँ काँ, सं. स्त्री. (अनु.) काका,-शब्दः-ध्वनिः, २. काकरुतम्।
काँक्षा, सं. स्त्री. (सं.) अभिलाषः, कामना।
काँख, सं. स्त्री. (सं. कक्षः) कक्षा, बाहुमूलं, भुजकोटरः-रं, दोर्मूलम्।
कांग्रेस, सं. स्त्री. (अं.) महासभा, प्रतिनिधि सभा, समाजः।
काँच[1], सं. स्त्री. (सं. कक्षः) कच्छः-च्छं, कच्छा-टी-टिका २. गुदावर्तः, गुदचक्रम्।
काँच[2], सं. पुं. (सं. काचः) स्फटिकः।
कांचन, सं. पुं. (सं. न.) स्वर्णम्, सुवर्ण, कनकम् २. धनं, संपत्तिः (स्त्री.)। (सं. पुं.) धुस्तूरः २. चंपकः ३. कोविदारः ४. कांचनालः।
—मय, वि. सुवर्णमय, हैम (-मी स्त्री.)।
काँजी, सं. स्त्री. (सं.) गृहाम्लं, रक्षोघ्नं, सुवीराम्लं, काञ्जि(जी)कम्।
काँजी हौद, सं. पुं. (अं. काइन हाउस) पशु,-शाला गुप्तिः (स्त्री.), गोगृहं, अवरोधः।
काँटा, सं. पुं. (सं. कंटकः-कम्) तरु-द्रुम-, नखः, शिताग्रः, शल्यम् २. पृष्ठवंशः, कशेरुका ३. नखः-खं, नखरः-रम् ४. लघु,-तुला-घटः ५. शूलः-लम् ६. मयूरकुक्कुटादीनां नखः। ७. तुला,- जिह्वा-सूची ८. वडिशं, मत्स्यवेध-नम् ९. मत्स्यास्थि (न.) १०. जिह्वोद्भेदः ११. शलं, शललम् १२. घटीसूची १३. कूप-कंटकः १४. रोमांचः।
—खटकना, मु, (हृदयं) कंटकमिव व्यध् (दि. प. अ.)
—होना, मु., अतिकृश (वि.) भू।
काँटे बोना, मु, पीड् (चु.)।
काँटों में घसीटना, मु., मिथ्या स्तु (अ.प.अ.)।
रास्ते में काँटे बिखेरना, मु., विघ्नयति (ना. धा.)।
काँटी, सं. स्त्री. (हिं. काँटा) क्षुद्रकंटकः २. लघु-क्षुद्र,-धरणी-आकर्षणी ३. क्षुद्रतुला ४. क्षुद्रकीलः ५. कार्पासमलम्।
कांड, सं. पुं. (सं. पुं. न.) अध्यायः, उच्छ्वासः, प्रकरणं, परिच्छेदः, स्कंधः २. वि-, भागः, खंडः-डम् ३. दण्डः, यष्टिः (स्त्री.) ४. बाणः ५. शरवृक्षः ६. अवसरः ७. तृणादिगुच्छः ८. तरुस्कन्धः ९. समूहः १०. वंशादेः पर्वन् (न.) ११. शाखा १२. व्यापारः, घटना १३. नालम्।
कांडी, सं. स्त्री.(सं. कांडः>) दीर्घ,-स्थूणा-काष्ठम्, गृहस्थूणा, तुला।

कांत, सं. पुं. (सं.) पतिः, भर्तृ २. अयस्-लोह,-कान्त, चुंबकः ३. चन्द्रः ४. वसन्तः ५. श्रीकृष्णः। वि., मनोरम, शोभन।

कांता, सं. स्त्री. (सं.) पत्नी, भार्या २. दयिता, प्रिया ३. सर्वांगसुन्दरी नारी।

कांतार, सं. पुं. (सं. पुं. न.) महावनं, बृहद्-गहनं, अरण्यानी २. वेणुः, वंशः ३. बिलं, छिद्रम्।

कांति, सं. स्त्री. (सं.) द्युतिः-दीप्तिः-छविः (स्त्री.), भा, अभिख्या २. सौन्दर्यं, लावण्यम्।

काँप, सं. स्त्री. (सं. कंपा) (१-२) गज-वराह,-दन्तः २. वंशकाशादीनां शलाका ३. कर्णभूषणभेदः।

काँपना, क्रि. अ. (सं. कम्पनम्) कंप्-स्पंद्-वेप् (भ्वा. आ. से.), स्फुर् (तु. प. से.) २. विचल्-वेल् (भ्वा. प. से.) ३. दे. 'डरना'।

काँव-काँव, सं. स्त्री. (अनु.) दे. 'काँ-काँ' २. प्रजल्पः, विप्रलापः।

काँस, सं. पुं (सं. काशः) अमरपुष्पकः, वन-हासकः, काशा-शी २. कलहः।

काँसा, सं. पुं. (सं. कांस्यम्) कंसं, कंसास्थि (न.), ताम्रार्द्धम्, दीप्ति-पीत,-लोहम्, घोषम्।

कांस्यकार, सं. पुं. (सं.) कंसकारः, दे. 'कसेरा'।

का, प्रत्य. (सं. प्रत्य. 'कः') षष्ठी वा समास द्वारा। (उ० राम की पुस्तक=रामस्य पुस्तकं, रामपुस्तकम्)।

काई, सं. स्त्री. (सं. कावारम्) शैव (वा) लः, शैव (वा) लः-लं, जलनीली २. अयोमलम् ३. मलम्।

काक[1], सं. पुं. (सं.) वायसः, ध्वांक्षः।

—**तालीय,** वि. (सं.) आकस्मिक-यादृच्छिक (-की स्त्री.), अतर्कित।

—**पक्ष,** सं. पुं. (सं.) शिखंडः-डकः, अलकः, चूर्णकुन्तलः, केशकलापः।

—**पद,** सं. पुं. (सं. न.) हस्तलेखेषु उज्झित-वर्णद्योतकचिह्नम् (=^)

—**वन्ध्या,** सं. स्त्री. (सं.) एकापत्यजननी।

काक[2], सं. पुं. (अं. कार्क) पिधानं, कूपी-छिद्रपिधानम् २. रोधनी, स्तम्भनी।

काकली, सं. स्त्री. (सं.) सूक्ष्ममधुरास्फुटध्वनिः।

काका, सं. पुं. (फ़ा. काका=बड़ा भाई>) पितृव्यः, पितुः भ्रातृ २. (पं.) बालः, शिशुः।

काकी, सं. स्त्री. (फ़ा. काका>) पितृव्या, पितृव्यपत्नी २. (पं.) कन्यका, बालिका।

काकु, सं. पुं. (सं.) भिन्नकण्ठध्वनिः २. आक्षेपः, व्यंग्यवचनं, आ-अधि,-क्षेपः ३. अलङ्कारभेदः (सा.) ४. जिह्वा।

काकुत्स्थ, सं. पुं. (सं.) श्रीरामचन्द्रः।

काकुल, सं. पुं. (फ़ा.) काकपक्षः, शिखंडकः।

काग, सं. पुं. दे. 'काक' (दोनों)।

काग़ज़, सं. पुं. (अ.) कागदः-दं, पत्रं, कर्गलम्।

—**पत्र,** सं. पुं. (अ.+सं.) लेख्यपत्राणि, पत्र-काणि, लेख्यानि (सब बहु.)

—**की नाव,** मु, क्षणभंगुर, विनश्वर।

काग़ज़ी, वि. (अ. काग़ज़>) कागद-पत्र,-मय. २. सूक्ष्मत्वच् ३. प्रतनु। सं. पुं., पत्रविक्रयिन् २. श्वेतकपोतः।

—**घोड़े दौड़ाना,** मु., पत्रैः व्यवह (भ्वा. प. अ.)।

काच, सं. पुं. (सं.) स्फटिकः २. नेत्ररोगभेदः (सं. न.) काचलवणम् २. सिक्थकम्।

काछ, सं. स्त्री. (सं. कक्षा>) कटी-जघन,-वस्त्रम्।

काछना[1], क्रि. स. (सं. कक्षा>) धौताग्रान्तं पृष्ठे निविश् (प्रे.)।

काछना[2], क्रि. स. (सं. कषणम्) फेनं अपनी (भ्वा. उ. अ.)।

काछनी, सं. स्त्री. (हिं. काछना) ऊरुवसनं, सक्थिवस्त्रम्।

काछा, सं. पुं., दे. 'काछनी'।

काछी, सं. पुं. (सं. कच्छः>) शाक,-उत्पादक-विक्रेतृ २. जातिभेदः।

काज[1], सं. पुं. (सं. कार्यम्) कृत्यं, कार्यं, कर्मन् (न.), कृतिः (स्त्री.) २. वृत्तिः (स्त्री.), आजीविका ३. उद्देश्यं, प्रयोजनम् ४. विवाहः।

काज[2], सं. पुं. (अ. कायज़ा>) गण्डाधारः, कुडुपाधारः (=बटन का छेद)।

काजल, सं. पुं. (सं. कज्जलम्) लोचकः, दीप-किट्टं, अंजनम्।

—**की कोठरी,** मु., निन्द्यस्थानम्।

काज़ी, सं. पुं. (अ.) न्यायाधीशः, धर्माध्यक्षः (इस्लाम)।

काट, सं. स्त्री. (हिं. काटना) छेदनं, कर्तनं, लवनं, कृन्तनं, व्रश्चनम् २. कर्तनरीतिः (स्त्री.) ३. व्रणः, क्षतम् ४. खण्डः-ण्डं, लवः ५. छलं, कपटम्।

—छाँट, सं. स्त्री., संक्षेपणं २. शोधनम्।

काटना, क्रि. स. (सं. कर्तनम्) कृत् (तु. प. से.), लू (क्र्. उ. से.), छिद् (रु. प. अ.), व्रश्च् (तु. प. वे.) २. तुद् (तु. प. अ.), व्रण् (चु.) ३. ऊन् (चु.), संक्षिप् (तु. प. अ.) ४. हन् (अ. प. अ.), व्यापद् (प्रे.) ५. दे. 'कतरना' ६. संधिं त्रुट् (प्रे.) ७. विफलीकृ ८. दंश् (भ्वा. प. अ.) ९. अल्पांशं उद्धृ (भ्वा. प. अ.) १०. अतिक्रम् (भ्वा. प. से.)।

सं. पुं. तथा भाव, दे. 'काट'।

—योग्य, वि., कर्तनीय, छेदनीय, छेत्तव्य, लवनीय।

—वाला, सं. पुं. छेदकः, लावकः, कर्तनकरः।

काटा हुआ, वि., कृत्त, लून, वृक्ण, छिन्न।

काटने दौड़ना, मु. निर्जन (वि.) दृश् (कर्म.)।

काटो तो खून नहीं, मु., सं-, स्तब्ध।

काठ, सं. पुं. (सं. काष्ठम्) दारु (न.) २. इध्मं, इंधनं ३. काष्ठनिगडः-डम् ४. दे. 'शहतीर'। वि. क्रूर २. मूर्ख।

—का उल्लू, सं. पुं. जड़धीः, मूढः, अज्ञः।

—की हाँडी, सं., आपातरमणीयं वस्तु।

—मारना, मु., काष्ठनिगडेन बंध् (क्र्. प. अ.)।

काठिन्य, सं. पुं. (सं. न.) दे. 'कठिनता'।

काठी, सं. स्त्री. (हिं. काठ) पर्याणं, पर्ययणं, पल्ययनम् २. शरीर,-रचना-संस्थानम् ३. असिकोषः।

काढ़ना, क्रि. स. (सं. कर्षणम्) निष्-आ,-कृष् (भ्वा. प. अ.), निष्-सं,-पीड् (चु.), निर्-उद्,-हृ (भ्वा. प. अ.) २. सूच्यां पुष्पादिकं सिव् (दि. प. से.) ३. काष्ठपाषाणादिषु पुष्पादिकं उल्लिख्-उत्कृ (तु. प. से.) ४. पृथक् कृ, वियुज-विश्लिष् (प्रे.) ५. कथ् (भ्वा. आ. से.)।

काढ़ा, सं. पुं. (हिं. काढ़ना) क्वाथः, कषायः, निर्यासः।

कातना, क्रि. स. (सं. कर्तनम्) तन्तून् सृज् (तु. प. अ.), कृत् (रु. प. से.)।

सं. पुं. तथा भाव, कर्तनं, तन्तुनिर्माणम्।

—योग्य, वि., कर्तनीय, कर्तनार्ह।

—वाला, सं. पुं., कर्तकः, तन्तुकारः।

काता हुआ, वि., कृत्त।

कातर, वि. (सं.) व्याकुल, विह्वल २. भीत, त्रस्त ३. भीरु ४. आर्त्त।

कातरता, सं. स्त्री. (सं.) व्याकुलता, धैर्याभावः २. भयं, त्रासः ३. भीरुता, कातर्यम् ४. अवसादः विषादः।

क़ातिब, सं. पुं. (अ.) लेखकः २. अक्षरचंचुः।

क़ातिल, सं. पुं. (अ.) घातकः, हन्तृ।

कादम्ब, सं. पुं. (सं.) (१-३) कदंब,-वृक्षः-पुष्पं-फलम् ४. कलहंसः ५. इक्षुः ६. बाणः ७. कदंबसुरा।

कादंबरी, सं. स्त्री. (सं.) कोकिला २. मदिरा ३. सरस्वती ४. बाणरचितो गद्यकाव्यविशेषः।

कादंबिनी, सं. स्त्री. (सं.) मेघमाला, जलदावली।

कान, सं. पुं. (सं. कर्णः) श्रोत्रं, श्रवणं, श्रुतिः (स्त्री.), श्रावः, शब्दग्रहः।

—में कहना, क्रि. स., कर्णे जप् (भ्वा. प. से.)।

—का परदा, सं. पुं., कर्ण,-पटहः-दुन्दुभिः।

—का बहना, सं. पुं., कर्णस्रावः।

—का मैल, सं. पुं., कर्ण,-मलं-गूथं, पिंजूषः।

—की शांय-शांय, सं. स्त्री., कर्णप्रणादः।

—उमेठना, मु., दंडरूपेण कर्णौ मुट् (चु.)।

—का कच्चा, मु., विश्वासिन्।

—काटना, मु., अतिशी (अ. आ. से.), अतिरिच् (कर्म.)।

—खड़े होना, मु., विस्मि (भ्वा. आ. अ.)।

—खा जाना, मु., कोलाहलं कृ।

—पकड़ना, मु., पश्चात्तापेन कर्णौ स्पृश् (तु. प. अ)।

—पर जूँ न रेंगना, मु., नितान्तं अनवहित (वि.) स्था (भ्वा. प. अ.)।

—फूकना, मु., कलहं उद्दीप् (प्रे.)।

—भरना, मु., पृष्ठतो द्वेषं जन् (प्रे.)।

—में उँगली दिये रहना, मु., दे. 'कान पर जूँ न रेंगना'।
कानन, सं. पुं. (सं. न.) वनम् २. गृहम्।
कानफरेंस, सं. स्त्री. (अं.) सम्मेलनम्।
काना, वि. पुं. (सं. काणः) एकाक्षः, चन्द्रचक्षुः।
कानाकानी, सं. स्त्री., (सं. कर्णः>)कर्णेजपनं, उपांशुवादः २. वार्ता, जनप्रवादः।
कानाफूसी, सं. स्त्री., (सं.+अनु.) दे. 'कानाकानी'।
कानि, सं. स्त्री. (देश.) लोकलज्जा, मर्यादा।
कानीन, सं. पुं. (सं.) कन्यापुत्रः, कुमारीतनयः।
क़ानून, सं. पुं. (अ.) अधिनियमः २. राज-, नियमः, विधिः ३. आचारः, व्यवहारः।
—गो, सं. पुं. ग्रामगणकाध्यक्षः।
—दाँ, सं. पुं., व्यवहारनिपुणः, विधिज्ञः।
क़ानूनी, वि. (अ. क़ानून>) वैध, राजनियम-विषयक २. विधिज्ञ ३. धर्म्य, शास्त्रविहित ४. कुतर्किन्।
कान्ह, सं. पुं.(सं. कृष्णः) श्रीकृष्णचन्द्रः २. पतिः।
कापालिक, सं. पुं. (सं.) शैवतांत्रिकसाधुः २. वर्णसंकरजातिभेदः।
कापुरुष, सं. पुं. (सं.) कु-निंद्य-कातर,-जनः।
काफ़िया, सं. पुं. (अ.) अन्त्यानुप्रासः।
—तंग करना, मु., अतीव संतप्-उद्विज्-अर्द् (प्रे.)।
काफ़िर, सं. पुं. (अ.) अयवनः (इस्लाम.) २. नास्तिकः, अनीश्वरवादिन् ३. क्रूर ४. दुष्ट।
काफ़िला, सं. पुं. (अ.-लः) सार्थः, यात्रिक-समूहः।
काफ़ी, वि. (अ.) पर्याप्त, अन्यूनाधिक, समर्थ, उचित, अलम् (अव्य. चतुर्थी के साथ)।
काफ़ी, सं. स्त्री. (अं.) दे. 'कहवा'।
काफ़ूर, सं. पुं. (फ़ा.) कर्पूरः-रं, घनसारः।
—होना, मु., तिरो भू।
काबिज़, वि. (अ.) अधिकारिन्, प्रभु। २. प्रतिबन्धक, गरिष्ठ।
काबिल, वि. (अ.) योग्य, समर्थ।
क़ाबू, सं. पुं. (तु.) अधिकारः, प्रभुत्वं, वशः।
—करना, क्रि. स., वशं नी (भ्वा. उ. अ.)।
काम[1], सं. पुं. (सं.) इच्छा, अभिलाषः, मनोरथः, आकांक्षा २. शिवः ३. मदनः, कामदेवः ४. मैथुनेच्छा ५. इन्द्रियाणां विषयप्रवृत्तिः (स्त्री.) ६. चतुर्वर्गेऽन्यतमः।
—आतुर, वि. (सं.) कामार्त्त, अनंगतप्त, विधुर।
—केलि, सं. स्त्री. (सं. पुं. स्त्री.) कामक्रीडा, विहारः, विलासः।
—तरु, सं. पुं. (सं.) कल्पवृक्षः।
—देव सं. पुं. (सं.) कामः, मदनः, स्मरः, कंदर्पः, अनंगः, मन्मथः, मनसिजः, मनोजः, कुसुमबाणः, पंचशरः, मारः, मीनकेतनः, मकरध्वजः, पुष्पधन्वन्, आत्मभूः।
—धेनु, सं. स्त्री. (सं.) कामदुघा, कामदा।
—रिपु, सं. पुं. (सं.) कामारिः, शिवः।
—रूप, सं. पुं. (सं) प्रान्तविशेषः, असमप्रान्तः। वि., स्वेच्छारूप २. सुरूप।
—शास्त्र, सं. पुं. (सं. न.) वात्स्यायनप्रणीतो ग्रंथविशेषः २. कामविज्ञानम्।
काम[2], सं. पुं. (सं. कर्म्मन् न.) कार्यं, कृत्यं, क्रिया २. व्यापारः, व्यवसायः ३. उद्यमः, उद्योगः ४. प्रयोजनम्, उद्देश्यम् ५. उपयोगः, व्यवहारः।
—आना, क्रि. अ., प्र-उप,-युज् (कर्म.), व्यवह्-व्याप् (कर्म.)। मु., वीरगतिं प्राप् (स्वा. उ. अ.)।
—काज, सं. पुं., कार्यं, अर्थः, व्यवसायः।
—काजी, वि., उद्यमिन्, उद्योगिन्।
—चलाऊ, वि., उपयुक्त, उपयोगिन्।
—चोर, वि., अलस, कर्तव्यविमुख।
—तमाम करना, मु., मृ-निषूद्-नश्-व्यापद् (प्रे.), हन् (अ. प. अ.)।
कामना, सं. स्त्री. (सं.) इच्छा, आकांक्षा।
कामयाब, वि. (फ़ा.) सफल, कृतकार्य।
कामयाबी, सं. स्त्री. (फ़ा.) सफलता, कृत-कार्यता।
कामरी, सं. स्त्री., दे. 'कंबल'।
कामला, सं. पुं. (सं. कामलः) पाण्डुः, पाण्डु-रोगः।
कामिनी, सं. स्त्री. (सं.) सुंदरी, नारी २. सुरा ३. कामबहुला नारी।
कामिल, वि. (फ़ा.) सं.-पूर्ण २. दक्ष, योग्य।

कामी, वि. (सं. कामिन्) लंपट, कामासक्त, कामांध, कामन, अभीक, कामातुर, कामुक २. अनुरक्त, आसक्त, सस्नेह,-सेविन् (समासान्त में) ४. इच्छुक, ईप्सु, सस्पृह ।

सं. पुं., अभि (भी) कः, क (का) मनः, कन्नः, कामुकः २. चन्द्रः ३. कपोतः ४. चक्रवाकः ५. चटकः ।

कामुक, वि. (सं.) दे. 'कामी' वि., 'कामी' सं. पुं. (१) ।

काम्य, वि. (सं.) स्पृहणीय, वांछनीय २. सुंदर, मनोज्ञ ।

काय, सं. स्त्री. (सं. पुं.) शरीरं, देहः २. समुदायः ।

क़ायदा, सं. पुं. (अ.) नियमः, व्यवस्था, रीतिः (स्त्री.), शिष्टाचारः ।

कायम, वि. (अ.) निश्चल, स्थिर, नेश्चेष्ट २. स्थापित ३. निर्धारित ।

—मुक़ाम, सं. पुं. (अ.) प्रतिनिधिः, प्रतिपुरुषः २. उत्तराधिकारिन् । वि., स्थानापन्न ।

कायर, वि., दे. 'कातर' ।

कायल, वि. (अ.) छिन्नसंशय, जातप्रत्यय ।

कायस्थ, सं. पुं. (सं.) परमेश्वरः २. जीवः ३. जातिभेदः । वि., शरीरस्थ ।

काया, सं. स्त्री. (सं. कायः पुं.) शरीरं, देहः, विग्रहः, कलेवरम् ।

—कल्प, सं. पुं. (सं.) पुनर्यौवनोत्पादनम् २. पुनर्यौवनोत्पादनचिकित्सा ।

—पलट, सं. पुं., बृहत्परिवर्तनं, महापरिवर्तः २. शरीररूपरेखापरिवर्तनम् ।

कायिक, वि. (सं.) शारीर (-री स्त्री.), शारीरिक-दैहिक (-की स्त्री.) ।

कार[१], सं. पुं. (सं.) कार्यं, क्रिया २. कर्तृ, अनुष्ठातृ ३. अक्षरवाचकप्रत्ययः (उ. च = चकारः) ४. ध्वनिवाचकप्रत्ययः (उ. फूत्कारः) ।

कार[२], सं. पुं. (फ़ा.) कार्यं, व्यवसायः ।

—करना, क्रि. स., नियोगं अनुस्था (भ्वा.प.अ.)।

—ख़ाना, सं. पुं., शिल्प,-शाला-गृहम्, पण्य-निर्माणस्थानम् ।

—बार, सं. पुं., व्यवसायः, व्यापारः ।

—रवाई, सं. स्त्री., क्रिया, कार्यम् २. गुप्त,-चेष्टा-क्रिया ।

—साज़, वि., कुशल, दक्ष ।

कारक, वि. (सं.) कर्तृ, अनुष्ठातृ, विधातृ २. क्रियया संबंधसूचकः शब्दरूपभेदः (उ. कर्तृ-कारक इ. व्या.) ।

कारचोब, सं. पुं. (फ़ा.) सूचीकर्मोपजीविन् २. सूचीकर्माधारः ।

कारचोबी, वि (फ़ा.) सूचीकर्म युक्त । (सं. पुं.) सूचीकर्मन् (न.), शिल्पम् ।

कारटून, सं. पुं. (अं.) हासकरमालेख्यम्, हास्यजनकं चित्रं, उपहासचित्रम् ।

कारण, सं. पुं. (सं. न.) हेतुः, निमित्तं, मूलं, बीजं, योनिः (स्त्री.), निदानम् २. साधनम् ३. कर्मन् (न.) ४. प्रमाणम् ५. विष्णुः ६. शिवः ७. पूजान्ते मद्यपानम् (तांत्रिक) ।

कारतूस, सं. पुं. (पुर्त. कारटूस) गुलिः (स्त्री.), गुलिका, आग्नेयचूर्णनाडी-डिः (स्त्री.) ।

कारनिस, सं. स्त्री. (अं.) भित्तिदन्तकः, कुड्य-शृंगम् ।

कारा, सं. स्त्री. (सं.) निरोधः, निरोधनम्, बन्धनं, आसेधः, ग्रग्रहः २. क्लेशः, पीडा ।

कारागार, सं. पुं. (सं पुं. न.) कारा, बंधनालयः, बंदि,-शाला-गृहम्, कारागृहं, चारः, चारकः, गुप्तिस्थानम् ।

कारावास, सं. पुं. (सं.) दे. 'कारागार' ।

कारिंदा, सं. पुं. (फ़ा.) कारकरः, परकार्य-साधकः, प्रति,-हस्तः-निधिः २. कर्मचारिन्, राजपुरुषः, अधिकारिन् ।

कारी[१], सं. पुं. (सं.-रिन्) कारकः, कर्तृ ।

कारी[२], वि. (फ़ा.) घातक, प्राणहर ।

कारीगर, सं. पुं. (फ़ा.) शिल्पिन्, कारुः, शिल्पकारः । वि., शिल्पकुशल ।

कारीगरी, सं. स्त्री. (फ़ा.) कारुता, शिल्प-कौशलं, दक्षता २. मनोहररचना ।

कारुणिक, वि. (सं.) दे. 'करुणामय' ।

कारूँ, सं. पुं. (अ.) मूसानामकस्य सिद्धस्य धनाढ्यकृपणः पितृव्यपुत्रः । वि., कृपणः, कदर्यः ।

—का ख़ज़ाना, सं. पुं., असीमधनं, अमित-संपद् (स्त्री.) ।

कारूरा, सं. पुं. (अ.) मूत्रम् २. मूत्रपात्रम् ।

कारोबार, सं. पुं., दे. 'कारबार'।
कार्ड, सं. पुं. (अं.) पत्रम् २. स्थूलकर्गलम्।
कार्तिक, सं. पुं. (सं.) वाहुलः, ऊर्जः, कौमुदः।
कार्बन, सं. पुं. (अं.) प्रांगारः, कार्बनम्।
कार्बोनिक, वि. (अं.) प्रांगारिक, कार्बनिक।
—एसिड गैस, सं. स्त्री., कार्बनिकाम्लवातिः (स्त्री.)।
कार्मुक, सं. पुं. (सं. न.) चापः, दे. 'धनुष'।
कार्य, सं. पुं. (सं. न.) कर्मन् (न.), कृत्यं, क्रिया २. व्यवसायः ३. परिणामः ४. प्रयोजनम्।
—अध्यक्ष, सं. पुं. (सं.) अधिकारिन् २. कर्माविक्षकः।
—कर्ता, सं. पुं. (सं.-र्तृ) कर्मकारिन् २. राजभृत्यः।
कार्रवाई, सं. स्त्री., दे. 'काररवाई'।
काल, सं. पुं. (सं.) समयः, वेला, दिष्टः, अनेहस् (पुं.) २. मृत्युः ३. यमः, यमदूतः ४. अवसरः, प्रसंगः ५. दुर्भिक्षं, दुष्कालः ६. कृष्णसर्पः ७. शनैश्चरः ८. शिवः ९. लोहः १०. ऋतुः।
—कूट, सं. पुं. (सं. पुं. न.) घोरविषं, प्राणहरगरलम्।
—कोठरी, सं. स्त्री., कालकोष्ठः।
—क्षेप, सं. पुं. (सं.) समयातिपातः, व्याक्षेपः २. निर्वाहः।
—चक्र, सं. पुं. (सं. न.) समयपरिवर्तः २. भाग्यचक्रम् ३. अस्त्रभेदः।
—ज्ञ, सं. पुं., (सं.) कालविद्, २. दैवज्ञः ३. कुक्कुटः।
—यापन, सं. पुं. (सं. न.) दे. 'कालक्षेप'।
—रात्रि, सं. स्त्री. (सं.) भीमा कृष्णा च निशा २. प्रलयरात्रिः ३. मृत्युनिशा ४. दीपावलीनिशा ५. मनुष्यजीवने सप्तसप्ततिवर्षसप्तमाससप्तदिनानन्तरभवा रात्रिः।
—सर्प, सं. पुं. (सं.) महाविषः, अलगर्दः, कृष्णसर्पविशेषः।
काला, वि. (सं. काल) कृष्ण, श्याम, असित, नील २. अन्धकारमय, तिमिरावृत ३. दूषित ४. घोर ५. भयंकर।
—आज़ार, सं. पुं., कालज्वरः।
—कलूटा, वि. अतिकृष्ण।
—चोर, सं. पुं., सततत्स्करः २. अतिदुष्टपुरुषः।
—जीरा, सं. पुं., कृष्णजीरकः, काला, कृष्णा।
—नमक, सं. पुं., कृष्णलवणम्, सौवर्चलम्।
—नाग, सं. पुं., कृष्ण,-नागः-सर्पः २. प्राणहरः शत्रुः।
—पानी, सं. पुं., द्वीपान्तरे निर्वासनम् २. अंडेमनादयो द्वीपविशेषाः।
कालेकोसों, क्रि. वि., अतिदूरं-रे।
—मुँह होना, मु., निंद्-अधिक्षिप् (कर्म०)।
कालातीत, वि. (सं.) अनवसर, असमयोचित
कालापन, सं. पुं. (हिं. काला) कृष्णता, श्यामता, मेचकता।
कालिंदी, सं. स्त्री. (सं.) यमुना, कलिन्दतनया।
कालिक, वि. (सं.) सामयिक, कालविषयक २. समयोचित, प्राप्तकाल ३. अनुकाल, नियतकाल।
कालिका, सं. स्त्री. (सं.) दुर्गा, चण्डी २, मसी-षी ३. कनीनिका ४. श्यामघनघटा।
कालिख, सं. स्त्री. (सं. कालिका) कज्जलं, मषिः-सिः (स्त्री.) २. कलंकः, लांछनं, दोषः।
कालिदास, सं. पुं. (सं.) संस्कृतकविशिरोमणिः, रघुकारः, विक्रमसभायाः सप्तमरत्नम्।
कालिमा, सं. स्त्री. (सं. कालिमन् पुं.) कृष्णिमन् (पुं.), कालता, श्यामता २. मसी ३. लांछनं, दोषः ४. अंधकारः।
कालिय, सं. पुं. (सं.) यमुनावर्तिकृष्णसर्पविशेषः।
—मर्दन, सं. पुं. (सं.) श्रीकृष्णः।
काली, सं. स्त्री. (सं.) चण्डी, दुर्गा २. पार्वती, गिरिजा ३. मसी। सं. पुं. दे. 'कालिय'। वि. स्त्री., कृष्णा, श्यामा।
—खाँसी, सं. स्त्री., कालकासः।
—घटा, सं. स्त्री., (सं.) कादंविनी, श्यामघनश्रेणिः (स्त्री.)।
—दह, सं. पुं. (सं.+हिं.) यमुनायां जलावर्त्तविशेषः।
—मिर्च, सं. स्त्री. (सं. कालमरि (री)चम्) कृष्णं, ऊषणं, कालकं, वेल्लजम्।
—कालीन, वि. (सं.) समय-वेला-काल,-संबंधिन् २. सामयिक, प्रास्ताविक। (टि. यह शब्द समासान्त में ही प्रयुक्त होता है)।

कालौंछ, सं. स्त्री. (हिं. काला) कृष्णता, श्यामता २. मसी ३. कज्जलम् ।

काल्पनिक, वि. (सं.) संकल्पज, मनःकल्पित, उद्भावित, कृत्रिम, कृतक ।

काव्य, सं. पुं. (सं. न.) १. कविता, कविकृतिः (स्त्री.), सरसप्रबन्धः २. रसात्मकं वाक्यम् ३. कविताग्रन्थः ।

काश[1], अव्य. (अ.) अपि नाम, प्रार्थये, कामये ।

काश[2], सं. पुं.(सं. पुं. न.)काशः, अमरपुष्पकः, वनहासकः । २. कासः, क्षवथुः ।

—श्वास, सं. पुं., दे. 'दमा' ।

काशिका, वि. (सं.) प्रकाशिका । सं. स्त्री (सं.) काशी २. अष्टाध्यायीवृत्तिः (स्त्री.) ।

काशी, सं. स्त्री. (सं.) शिवपुरी, वाराणसी, तपः-स्थली ।

—फल, सं. पुं. (सं. न.) कूष्मांडः-डकः, पीत,-पुष्पा-फला ।

काश्त, सं. स्त्री. (फ़ा.) कृषिः (स्त्री.), कर्षणं, कृषिकर्मन् (न.) ।

—कार, सं. पुं. (फ़ा.) कर्षकः, कृषाणः ।

काषाय, वि. (सं.) गैरिक-रक्तधातु,-वर्ण । सं. पुं., गैरिकरंजितवस्त्रम् ।

काष्ठ, सं. पुं. (सं. न.) दे. 'काठ' ।

—कीट, सं. पुं. (सं.) घुणः ।

काष्ठा, सं. स्त्री. (सं.) दिशा, दिश् (स्त्री.) २. सीमा ३. शिखरः-रं ४. चन्द्रकला ५. अष्टादशनिमेषात्मकः कालः ।

कास, सं. पुं.(सं.) क्षवथुः २. काशः, वनहासकः।

कासनी, सं. स्त्री. (फ़ा.) गुल्मभेदः २. तस्य बीजम् ३. नील-श्याम,-वर्णः ।

कासार, सं. पुं. (सं.) सरोवरः, महाजलाशयः

कासीस, सं. पुं. (सं. न.)धातुशेखरं, शोधनम् ।

कास्टिक, वि. (अं.) दाहक ।

—सोडा, सं. पुं. (अं.) दाहकक्षारः ।

कास्मिक रे, सं. स्त्री. (अं.) सृष्टिरश्मिः ।

काहिल, वि. (अ.) अलस, मंद ।

किंकर, सं. पुं. (सं.) भृत्यः, सेवकः, प्रेष्यः, चेटः २. क्रीतदासः ।

किंकर्तव्यविमूढ, वि. (सं.) संभ्रान्तमनस्, व्याकुलचित्त ।

किंकिणी, सं. स्त्री. (सं.) क्षुद्र,-घंटी-घंटिका २. कांची-चिः (स्त्री.), रशना ।

किंचित्, वि. (सं.) स्तोक, अल्प ।

किंजल्क, सं. पुं. (सं.) पद्म-कमल,-केसरः २. पद्मपरागः, जलजरजस् (न.) ३. नागकेसरः ।

किंतु, अव्य. (सं.) परन्तु, तु, पुनः २. अपि तु, प्रत्युत, पुनः, परन्तु ।

किंनर, सं. पुं. (सं.) किंपुरुषः, तुरंगवदनः, अश्वमुखः ।

किंपुरुष, सं. पुं. (सं.) किन्नरः २. दुष्कुलीनः ३. वर्णसंकरः ।

किंवदंती, सं. स्त्री. (सं.) जन,-प्रवादः-श्रुतिः (स्त्री.), कर्णोपकर्णिका ।

किंवा, अव्य. (सं.) वा, अथवा, यद्वा, किमुत ।

किंशुक, सं. पुं. (सं.) पलाशः, दे. 'ढाक' ।

किं, क्रि. वि. (सं. किम्) कथं, केन प्रकारेण ।

कि, अव्य, (फ़ा.) यत्, यथा, इति ।

किचकिच, सं. स्त्री. (अनु.) प्रलापः, प्रजल्पनम् २. कलहः ।

किचकिचाना, क्रि. अ. (अनु.) दंतैर्दंतान् निष्पीड् (चु.)-घृष् (भ्वा. प. से.) ।

किट्ट, सं. पुं. (सं. न.) धातुमलम् २. तैलादीनां मलम् ३. कल्कं, मलं, शेषम् ।

कितना, वि. (सं. कियत्) किंपरिमाण, किंमात्र २. अधिक, बहु ।

कितने, वि. पुं. (सं. कति) किंसंख्याकाः ।

कितव, सं. पुं. (सं.) द्यूतकारः, अक्षदेविन् २. वंचकः ३. दुष्टः ।

किताब, सं. स्त्री. (अ.) पुस्तकं. ग्रन्थः २. पत्रिका, पंजिका ।

—का (किताबी) कीड़ा, सं. पुं., ग्रंथ-पुस्तक,-कीटः । २. सदापाठिन् ।

किताबत, सं. स्त्री. (अ.) लेखः, लेखनम् ।

ख़त व—, सं. स्त्री., पत्रव्यवहारः ।

किधर, क्रि. वि, (सं. कुत्र) क, कस्मिन् स्थाने २. कां दिशां प्रति, कस्यां दिशि ।

किन, सर्व. ('किस' का बहु.) के (पुं.), काः (स्त्री.), कानि (न.) ।

किनका, सं. पुं. (सं. कणिका) कणी, कणा, क्षत,-तंडुलः-धान्यम् ।

किनारा, सं. पुं. (फ़ा.) तीरं, तटम् २. उपांतः, प्रांतः ३. वस्त्रप्रान्तः, अंचलः ४. पार्श्वः, पक्षः ५. सीमा ६. अन्तः ।

—करना, मु. दूरे स्था (भ्वा. प. अ.), परित्यज् (भ्वा. प. अ.) ।

किनारी, सं. स्त्री. (फ़ा. किनारा >) स्वर्ण-रजत-, जालाभरणम् ।

किनारे, क्रि. वि. (फ़ा. किनारा) तीरे, तटे २. सीमायाम् ३. पृथक्, दूरे ।

—किनारे, अनु,-कूलं-तटं-तीरम् २. सीमाम् अनु ।

—लगाना, मु., समाप्-संपद् (प्रे.) ।

किफ़ायत, सं. स्त्री. (अ.) मितव्ययः, अमुक्त-हस्तत्वम् ।

किबला, सं. पुं. (अ.) प्रतीची २. मक्कानगरी ३. पूज्यजनः ४. पितृ ।

—नुमा, सं. पुं. (अ+फ़ा.) दिग्दर्शकयंत्रम्, दिग्घटी, दिग्घटिका ।

किरकिरा, वि. (सं. कर्करम् >) शार्करिल, सिकतिल ।

किरकिरी, सं. स्त्री. (सं. कर्करम् >) नेत्रपतितो धूल्यादिकणः २. त्रसरेणुः, अणुरेणुः ।

किरच, सं. स्त्री. (सं. कृतिः >) अजिह्मखड्गः, अग्न्यस्त्रसंसक्ता छुरिका २. काष्ठकाचादीनां तीक्ष्णाग्रं शकलम् ।

किरण, सं. स्त्री. (सं. पुं.) रश्मिः, मरीचिः, दीधितिः, मयूखः, करः, अंशुः, अभीशुः ।

—माली, सं. पुं. (सं.-लिन्) सूर्यः ।

किरांची, सं. स्त्री. (अं. कैरेज >) वहनं, शकटः-टम् ।

किरात, सं. पुं. (सं.) अशिष्ट-असभ्य,-जनः २. वन्यजातिभेदः ।

—पति, सं. पुं. (सं.) शिवः ।

किराना, सं. पुं. (सं. क्रयणम् अथवा कीर्ण >) वाणिज्यं, वणिक्कर्मन् (न.) २. गंधद्रव्याणि ।

किराया, सं. पुं. (अ.) वहनमूल्यं, तार्यं, [illegible]जात (ता) रः २. भाटं, भाटकम् ३. भृतिः (स्त्री.), भृत्या ।

—नामा, सं. पुं., भाटकपत्रम् ।

किराये का टट्टू, सं. पुं., वैतनिकः, सवेतनो दासेरः ।

किरायेदार, सं. पुं. (फ़ा.-यादार) भाटकवासिन् ।

किरीट, सं. पुं. (सं.) दे. 'मुकुट' ।

किलक, सं. स्त्री. (हिं. किलकना) हर्ष,-ध्वनिः-नादः-स्वनः, किलकिला २. कलम,-नडः-नलः ।

किलकना, क्रि. अ. (सं. किलकिला >) किलकिला-रावं कृ, हर्षध्वनिं कृ ।

किलकारना, क्रि. अ., दे. 'किलकना' ।

किलकिलाना, क्रि. अ. (सं. किलकिला >) १. दे. 'किलकना' २. कोलाहलं कृ ३. वाक्-कलहं कृ ।

किलनी, सं. स्त्री. (हिं. कीड़ा) कुक्कुर,-यूकः-यूका ।

किला, सं. पुं. (अ.) दुर्गं, कोटः ।

—दार, सं. पुं. दुर्गाध्यक्षः, कोटपालः ।

—बंदी, सं. स्त्री., दुर्गनिर्माणम् २. व्यूहरचना ।

किल्कारी, सं. स्त्री. (हिं. किलकना) किलकिला, हर्षनादः २. कलकलः ३. चीत्कारः ।

किल्लत, सं. स्त्री. (अ.) न्यूनता ।

किल्ला, सं. पुं. (सं. कीलः >) बृहत्-स्थूल,-कीलः-शंकुः २. बृहत्,-शूलः-स्थूणा-शलाका ।

किल्ली, सं. स्त्री. (हिं. किला) अर्गलं, अर्गलाबंधः २. कीलः, कीलम् ३. शूलः, स्थूणा ।

किल्विष, सं. पुं. (सं. न.) पापम् २. अपराधः ३. रोगः ।

किवाड़, सं. पुं. (सं. कपाटः) कपाटं-टी, अरम् २. द्वारं, द्वार् (स्त्री.) ।

—खटखटाना, क्रि. स., कपाटम् अभिहन् (अ. प. अ.) ।

किशमिश, सं. स्त्री. (फ़ा) शुष्क,-द्राक्षा-गोस्तनी ।

किशलय, सं. पुं. (सं. पुं. न.) किसलयः-यं; पल्लवः-वं, अंकुरः, प्ररोहः २. मंजरी ।

किशोर, सं. पुं. (सं.) एकादशावधिपंचदशवर्षपर्यन्तवयस्को बालः २. बालकः ३. पुत्रः ।

किशोरी, सं. स्त्री. (सं.) तरुणी, बाला, बालिका, कन्या, युवती-तिः (स्त्री.) ।

किश्ती, सं. स्त्री. (फ़ा.) नौका २. दीर्घचतुरस्रपात्रम् ३. भस्त्रा, क्षुद्रकोपः ।

किस, सर्व. (सं. कस्य >) 'किम्' के रूपों से ।
—तरह, क्रि.वि., कथं, केन प्रकारेण, कया रीत्या।
किसलय, सं. पुं., दे. 'किशलय' ।
किसान, सं. पुं. (सं. कृषाणः) कर्षक, कृषिक, कृषीवलः, क्षेत्रिकः, क्षेत्राजीवः, क्षेत्रिन् ।
किसानी, सं. स्त्री, (हिं. किसान) कृषिः (स्त्री.), कृषिकर्मन् (न.) ।
किसी, सर्व (हिं. किस) 'किम्' के रूपों के साथ चित्, चन वा अपि लगाकर । [उ० किसी ने = कश्चित्, कोऽपि, कश्चन (पुं.); काचित् (स्त्री.); किंचित् (न.) इ. ।]
—तरह, क्रि. वि. येन केन प्रकारेण, कथंचित् ।
किसे, सर्व. (हिं. किस) कं, कां, किम् (द्वितीया); कस्मै, कस्यै, कस्मै (चतुर्थी) ।
किस्त, सं. स्त्री. (अ.) देयभागः ऋणांशः, खण्डिका ।
—करना, क्रि. स., अंशांशतः ऋणं परिशुध् (प्रे.) ।
—वार, क्रि. वि.. अंशशः, अंशांशतः ।
क़िस्म, सं. स्त्री. (अ.) प्रकारः, भेदः, जातिः (स्त्री.) २. प्रकृतिः (स्त्री.), स्वभावः ।
क़िस्मत, सं. स्त्री. (अ.) भाग्यं, भागधेयं, दिष्टं, दैवम् २. प्रान्त,-भागः-खण्डः ।
खुश—, वि., धन्य, पुण्यवत् ।
बद—, वि., अधन्य, दैवहतक ।
—आज़माना, मु., भाग्यं परीक्ष् (भ्वा. आ.से.) ।
क़िस्सा, सं. पुं. (अ.) कथा २. वृत्तान्तः ३. कलहः ।
की, प्रत्य. ('का' का स्त्री.) दे. 'का' ।
कीकर, सं. पुं. (सं. किंकिरावः) दीर्घ-कण्टकः ।
कीचक, सं. पुं. (सं.) सरंध्रो वंशः, सच्छिद्रो वेणुः । २. विराटराजस्य श्यालः ।
कीचड़, सं. पुं. (सं. चिकिलः) पंकः-कं, जंबालः-लं, अवकीलः, कर्दमः, शादः, निषद्वरः ।
कीट[1], सं. पुं. (सं.) कीटकः, कृमिः, क्रिमिः, नीलंगुः ।
कीट[2], सं. स्त्री. (सं. किट्टम्) घृततैलादीनां मलम् ।
कीड़ा, सं. पुं. (सं. कीटः) दे. 'कीट[1]', २. सर्पणशीलः, सरीसृपः ३. सर्पः, अहिः (पुं.) ४. रक्तपा, जलौका ।
—लगना, क्रि. अ., कीटैः भक्ष् (कर्म.) ।
कीड़ी, सं. स्त्री. (हिं. कीड़ा) क्षुद्रकीटः २. पिपीलिका ३. जलूका ।
कीना, सं. पुं. (फ़ा.) द्वेषः, वैरं, द्रोहः ।
कीप, सं. स्त्री. (अ. क़ीफ़) निवापः ।
क़ीमत, सं. स्त्री. (अ.) मूल्यं, अर्घः ।
कीमती, वि. (अ.) महार्घ, बहुमूल्य ।
क़ीमा, सं. पुं. (अ.) कृत्तमांसम् ।
कीमिया, सं. स्त्री. (फ़ा.) रसायनम्, रस,-विद्या-शास्त्रं-तंत्रम् ।
कीर, सं. पुं. (सं.) शुकः, दे. 'तोता' ।
कीर्तन, सं. पुं. (सं. न.) गुणकथनम् २. ईश-गुणगानम् ।
कीर्ति, सं. स्त्री. (सं.) यशस् (न.), विख्यातिः-विश्रुतिः (स्त्री.), अभिख्या, समाख्या ।
—मान्, वि. (सं.-मत्) यशस्विन्, विश्रुत, विख्यात ।
कील, सं. स्त्री. (सं. पुं.) कीलकः, शंकुः, लोह,-कीलः-शंकुः २. लवंगनामकं नासिका-भूषणम् ३. मुखस्फोटकः ।
कीलक, सं. पुं. (सं.) कीलः, कीला २. नाग-दंतः, भारयष्टिः (स्त्री.) ३. महाकीलः, शूलः ४. स्थाणुः, स्थूणा ५. अन्यमंत्रप्रभावनाशको मंत्रः ।
कीलना, क्रि. स. (सं. कीलनम्) कील् (चु.), कीलैः बंध् (क्र. प. अ.) २. अभिचारप्रभावं नश् (प्रे.) ३. (सर्पादिकं) वशीकृ ।
कीला, सं. पुं. (सं.) दे. 'किल्ला' ।
कीलाल, सं. पुं. (सं. न.) अमृतम् २. जलम् ३. रक्तम् ४. मधु (न.) ।
कीलित, वि. (सं.) (कीलैः) बद्ध, दृढीकृत, निबद्ध ।
कीली, सं. स्त्री. (सं. कीलः >) कर्षणी, व्या-वर्तनकीलः, वलयकीलकः २. कुञ्चिका, उद्-घाटकम् ३. विवर्तनकीलः ४. कीलः ५. अक्ष-रेखा, अक्षः ।
कीश, सं. पुं. (सं.) कपिः २. खगः ३. सूर्यः ।
कुँअर, सं. पुं. (सं. कुमारः) पुत्रः, सूनुः (पुं.) २. बालकः ३. राजकुमारः ४. युवराजः ।
कुँआरा, वि. पुं. (सं. कुमार) अकृतविवाहः । [-री (स्त्री.) = अपरिणीता, अनूढा, कुमारी ।]

कुँइ, सं. स्त्री., दे. 'कुमुदिनी'।

कुंकुम, सं. पुं. (सं. न.) काश्मीरजं, दे. 'केसर' २. दे. 'रोली'।

कुंचित, वि. (सं.) दे. 'आकुंचित'।

कुंज, सं. पुं. (सं. पुं. न.) निकुंजः-जं, लता,-गृहं-मंडपः।

—कुटीर, सं. स्त्री. (सं. पुं.) लतागृहं, पर्णशाला, कुंजगृहम्।

—विहारी, सं. पुं. (सं.-रिन्) श्रीकृष्णः।

कुंजड़ा, सं. पुं. (सं. कुंज >) हरितकविक्रेतृजातिविशेषः २. शाकविक्रयिन।

कुंजर, सं. पुं. (सं.) गजः, द्विपः २. केशः। (टि. समासान्त में 'कुंजर' श्रेष्ठतावाचक है—नरकुंजर = श्रेष्ठपुरुषः)।

कुंजी, सं. स्त्री. (सं. कुंचिका) ताली, उद्घाटकः-कं, अंकुटः, साधारणी। २. टीका, व्याख्या।

कुंठ, वि. (सं.) कंठित, धाराहीन, तीक्ष्णतारहित २. मूर्ख।

कुंठित, वि. (सं.) कुंठीकृत, हृततैक्ष्ण्य २. निष्प्रभीकृत ३. अनुपयोगिन्।

कुंड, सं. पुं. (सं. कुण्डः-ण्डं-डी) पल्वलः-लं, अल्पसरस् (न.), वेशंतः, क्षुद्रजलाशयः २. अग्नि-यज्ञ-हवन,-कुण्डम् ३. स्थाली ४. विशालमुखमतिगंभीरपात्रम् (हिं. मटका) ५. सधवाया जारजपुत्रः ६. लौहशिरस्त्रम् ७. मानभेदः।

कुंडल, सं. पुं. (सं. पुं. न.) कर्ण-श्रवण,-वेष्टनं, कर्णभूषणभेदः २. वलयः ३. परिवेशः-षः, तेजोमंडलम् ४. आवेष्टनम्, व्यावर्तनम्।

—करना वा मारना, क्रि. स., वर्तुली-पुटी,-कृ, व्यावृत्-परिवेष्ट् (प्रे.)।

कुँडलिया, सं. स्त्री. (सं. कुण्डलिका) मात्रिकछन्दोभेदः।

कुंडली, सं. स्त्री. (सं.) मिष्टान्नभेदः (हिं. जलेबी) २. कुरलः, चूर्णकुन्तलः ३. जन्मपत्रं,-पत्रिका ४. सर्पस्य वर्तुलाकारस्थितिः (स्त्री.)।

कुंडा[1], सं. पुं. (सं. कुण्डः) जीवति भर्तरि जारजः।

कुंडा[2], सं. पुं. (सं. कुण्डलम् >) लोह,-ग्रहणी-धरणी २. अर्गलः-लं-ला-ली।

कुंडा[3], सं. पुं. (सं. कुण्डः-डम्) विशालमुखमतिगम्भीरपात्रम् (हिं. मटका)।

कुण्डी[1], सं. स्त्री. (सं.) कुण्डी, खलः।

—डंडा, सं. पुं., कुण्डीदण्डं-डौ।

कुंडी[2], सं. स्त्री. (हिं. कुण्डा) द्वारशृंखला २. अर्गलः-लं-ला-ली ३, शृङ्खला,-संधिः-ग्रंथिः।

कुन्त, सं. पुं. (सं.) प्रासः, तोमरः।

कुन्तल, सं. पुं. (सं.) केशः, शिरोरुहः।

कुन्ती, सं. स्त्री. (सं.) पृथा, पाण्डुपत्नी, युधिष्ठिरजननी।

कुन्द[1], सं. पुं. (सं. पुं. न.) सदापुष्पः, वनहासः २. कमलम्।

कुन्द[2], वि. (फ़ा.) कुण्ठ, तीक्ष्णतारहित २. मन्द, जड।

—ज़हन, वि. (फ़ा.) मन्दमति, मूर्ख।

कुन्दन, सं. पुं. (सं. कुन्दः >) विशुद्धं सुवर्णम् वि. भास्वर २. पवित्र ३. नीरोग।

कुन्दा, सं. पुं. (फ़ा.) बृहत्-स्थूल,-काष्ठम् २. अग्न्यस्त्रस्य काष्ठमयोऽपरभागः ३. काष्ठनिगडः ४. मुष्टिः (स्त्री.), वारंगः।

कुन्दी, सं. स्त्री. (फ़ा. कुन्दा >) मुद्गरैर्वस्त्रताडनम् २. ताडनम्।

कुम्भ, सं. पुं. (सं.) घटः, घटी, कलशः-शी-शम् २. गजकुम्भः, हस्तिशिरसः पिण्डद्वयम् ३. कुम्भकप्राणायामः ४. द्वादशवार्षिकः पर्वविशेषः ५. राशिविशेषः (ज्यो.)।

—कर्ण, सं. पुं. (सं.) रावणानुजः।

—योनि, सं. पुं. (सं.) अगस्त्यो मुनिः।

कुंभक, सं. पुं. (सं.) कुम्भः, प्राणायामे वायुस्तम्भनम्।

कुंभी, सं. स्त्री. (सं.) क्षुद्र-लघु,-कुम्भः-घटः।

—पाक, सं. पुं. (सं.) नरकविशेषः।

कुंभी, सं. पुं. (सं. कुम्भिन्) गजः २. नक्रः ३. विषकीटभेदः।

कुँवर, सं. पुं., दे. 'कुँअर'।

कु, अव्य. (सं.) पापकुत्साऽल्पत्वादिद्योतकमव्ययम् (उ. कुकर्म = पापकर्म इ.)।

कुआँ, सं. पुं. (सं. कूपः) अंधुः, ग्रहिः, अवटः, खातः, अवतः, केवटः।

—खोदना, मु., परान् पीड् (चु.)।

कुआर, सं. पुं. (सं. कुमारः >) आश्विनः, इषः, अश्वयुजः ।

कुकड़ी, सं. स्त्री. (सं. कुक्कुटी) ताम्रचूडी २. शस्यम् ३. सूत्रपंजी, तंतुगुच्छः ।

कुकर्म, सं. पुं. (सं. न.) कु,-कार्यं-कृत्यं-कृतिः (स्त्री.), दुराचारः, पापं, दुष्टता ।

कुकर्मी, वि. (सं.-र्मिन्) दुर्वृत्त, पापिन्, पाप, दुरात्मन् ।

कुकुरमुत्ता, सं.पुं. (सं. कुक्कुरमूत्रम् >) कुछत्रकः ।

कुक्कुट, सं. पुं. (सं.) ताम्रचूडः, चरणायुधः, कालज्ञः, उषाकरः, शिखण्डिकः ।

कुक्कुर, सं. पुं. (सं.) श्वन्, दे. 'कुत्ता' ।

कुक्षि, सं. स्त्री. (सं. पुं.) उदरं, जठरं, तुंदम् २. गर्भाशयः, गर्भस्थानम् ३. पदार्थान्तर्भागः ४. गुहा ।

कुगति, सं. स्त्री. (सं.) दुर्दशा, दुर्गतिः (स्त्री.) ।

कुच, सं. पुं. (सं.) स्तनः, उरोजः २. चूचुकः-कं, स्तनाग्रम् ।

कुचकुचाना, क्रि. स. (अनु. कुचकुच) व्यध् (दि. प. अ.), छिद्रं कृ ।

कुचक्र, सं. पुं. (सं. न.) कूट-कपट, उपायः, उपजापः, कपट,-संकल्पः-प्रयोगः ।

कुचक्री, वि. (सं.-क्रिन्) उपजापकः, कपट-प्रबन्धयोजकः ।

कुचलना, क्रि. स. (अनु.) क्षण् (त. प. से.) २. मृद् (क्र. प. से.), पिष् (रु. प. अ.) ३. भूरि तड् (चु.) ४. पादतलेन आहन् (अ. प. अ.) ।

कुचला, सं. पुं. (सं. कचीरः) किंपाकः, विष-तिंदुः, रम्यफलः, कुपीलुः, कालकूटः ।

कुचाल, सं. पुं. (सं.कु + हिं. चाल) दुराचारः, कुचर्य्या, कदाचरणम् ।

कुचाली, वि. (हिं. कुचाल) दुराचारिन्, दुर्वृत्त ।

कुचेष्टा, सं. स्त्री. (सं.) दुश्चेष्टा, हानिकरो यत्नः ।

कुचैला, वि. (सं. कुचेल) मलिनवेष, कुवसन

कुछ, वि. (सं. किंचित्) (मात्रा) अल्प, स्वल्प, स्तोक, ईषत् २. (संख्या) कतिचित्, कतिपय । ३. किमपि, यत्किंचन ४. 'किम्' के तीनों लिंगों के रूपों के साथ चित्, चन, अपि लगाते हैं, उ. केचित्, काश्चित्, कानिचित् इ. ।

—कर देना, मु., मंत्रैः वशीकृ ।

कुज, सं. पुं. (सं.) मंगलग्रहः २. वृक्षः ।

कुजाति, सं.स्त्री. (सं.) हीन-नीच-निकृष्ट,-जातिः-वर्णः । सं. पुं., दुष्कुलीनः, अन्त्यजः, नीचः ।

कुट[1], सं. पुं. (सं. कुष्ठम्) गदाह्वं, कौवेरम्)

कुट[2], सं. पुं. (सं.) दुर्गं, कोटः २. गृहम् ३ पर्वतः ४. कलशः ।

कुटकी, सं. स्त्री. (सं. कटुकीटः) दंशः, मशकः, प्राचिका, वनमक्षिका ।

कुटनपन, सं. पुं. (सं. कुट्टनी >) दूतीवृत्तिः (स्त्री.) २. उपजापः, भेदवर्द्धनम् ।

कुटना, सं. पुं. (हिं. कुटनी) भगभक्षकः, संचारकः, कुंडाशिन् २. पिशुनः ।

कुटनी, सं. स्त्री. (सं. कुट्टनी) कुट्टिनी, दूती, दूतिका, संचारिका, शंभली, रततालो ।

कुटिया, सं. स्त्री. (सं. कुटी) उटजः-जं, पर्ण-शाला, पर्णकुटी-टिः (स्त्री.) कुटीरः ।

कुटिल, वि. (सं.) वक्र, जिह्म, अराल, भुग्न, न्युब्ज २. वञ्चक, प्रतारक, कपटिन्, छलिन् ।

कुटिलता, सं. स्त्री. (सं.) कौटिल्यं, वक्रता, जिह्मता २. छलं, कपटं, प्रतारणा ।

कुटी, सं. स्त्री. (सं.)
कुटीर, सं. पुं. (सं.) } क्षुद्रगृहम्, दे. 'कुटिया' ।

कुटुम्ब, सं. पुं. (सं. पुं. न.) गृहजनः, पुत्र-कलत्रादयः, ज्ञातिः (स्त्री.), बान्धवाः, संततिः (स्त्री.) २. कुलं, वंशः, जातिः (स्त्री.) ।

कुटुंबी, सं. पुं. (सं.-बिन्) गृहस्थः, गृहपतिः, गेहिन् २. ज्ञातिः (स्त्री.), बन्धुः, बांधवः ।

कुटुम्बिनी, सं. स्त्री. (सं.) गृहिणी, गेहिनी, आर्या, सुतिनी, पुरन्ध्री ।

कुटेव, सं. स्त्री. (सं. कु + हिं. टेव) कुप्रवृत्तिः (स्त्री.), व्यसनं, दुर्गुणः ।

कुट्टनी, सं. स्त्री. (सं.) दे. 'कुटनी' ।

कुट्टी, सं. स्त्री. (हिं. काटना) यवसखण्डाः २. बालकेषु मैत्रीविच्छेदः ।

कुठला, सं. पुं. (सं. कोष्ठः >) क्षुद्रधान्यकोष्ठः, मृण्मयं लघुधान्यागारम् ।

कुठार, सं. पुं. (सं.) परशुः, द्रुघणः, वृक्षादनी, वृक्षभेदिन्, परश्वधः ।

कुठाराघात, सं. पुं. (सं.) परशुप्रहारः २. तीव्र-प्रहारः ।

कुठाली, सं. स्त्री. (सं. कु+स्थाली >) तैजसावर्तनी, मु(मू)षा-षी ।

कुठौर, सं. पुं. (सं. कु+हिं. ठौर) कुस्थानम् २. अनवसरः, असमयः ।

कुड्डुक, सं. स्त्री. (फ़ा. कुरक) कुक्कुटीरुतम् २. अनंडदा कुक्कुटी । वि., व्यर्थ, निरर्थक ।

कुडौल, वि. (सं. कु+हिं. डौल) दुर्दर्शन, कदाकार, कुरूप ।

कुढंगा, वि. पुं. (सं. कु+हिं. ढंग) अशिष्ट, असभ्य, दुःशील ।

कुढ़न, सं. स्त्री. (हिं. कुढ़ना) मनस्तापः, चित्तव्यथा ।

कुढ़ना, क्रि. अ. (सं. क्रुद्ध >) दुर्मनायते (ना. धा.), क्षुभ् (दि. प. से.), अन्तः परितप् (दि. आ. अ.) ।

कुढब, वि. (सं. कु+हिं. ढब) कुरूप, दुर्दर्शन २. अशिष्ट ३. कठिन ।

कुढ़ाना, क्रि. स. (हिं. कुढ़ना) संतप्-उद्विज् (प्रे.) २. प्रकुप्-क्रुध् (प्रे.) ।

कुतरना, क्रि. स. (सं. कर्तनम्) चर्वणेन कृत् (तु. प. से.), दन्तैः खण्ड् (चु.) ।

कुतर्क, सं. पुं. (सं.) हेत्वाभासः, मिथ्याहेतुः, वितंडा, प्रजल्पः, विवादः ।

कुतर्की, वि. (सं.-किन्) वितण्डावादिन्, मिथ्याहेतुवादिन् २. वाचालः, वावदूकः ।

कुतिया, सं. स्त्री. (हिं. कुत्ता) सरमा, कुक्कुरी, शुनी, सारमेयी, भषी ।

कुतुब, सं. पुं. (अ.) ध्रुवः, ध्रुवतारा ।

—नुमा, सं. पुं., दे. 'कितबनुमा' ।

कुतूहल, सं पुं. (सं. न.) उत्कण्ठा, कौतूहलं, कुतुकं, कौतुकं, जिज्ञासा २. अपूर्व-दुर्लभ-अदृष्ट,-वस्तु (न.) ३. विनोदः ४. आश्चर्यम् ।

कुत्ता, सं. पुं. (देश.) कुक्कुरः, श्वन्, शुनकः, कौलेयकः, भषकः, सारमेयः, मृगदंशकः, भषणः, वक्रलांगूलः, वृकारिः, शयालुः ।

कुत्ते की एड़(ल)क, सं. स्त्री., आलर्कं, जलसंत्रासः, अलर्कांभिभवः ।

कुत्ती, सं. स्त्री. (हिं. कुत्ता) दे. 'कुतिया' ।

कुत्सित, वि. (सं.) अधम, अवन, गर्ह्य, निन्दित ।

कुदरत, सं. स्त्री. (अ.) प्रकृतिः (स्त्री.), माया, ईश्वरशक्तिः (स्त्री.) २. अधिकारः, प्रभुत्वम् ३. संसारः, जगत् (न.) ४. रचना ।

कुदरती, वि. (अ.) नैसर्गिक, प्राकृतिक, मायामय २. स्वाभाविक, सहज ३. दिव्य, ऐश्वर (-री स्त्री.) ।

कुदाँव, सं. पुं. (सं. कु+हिं. दाँव) छलं, विश्वासघातः २. कुस्थितिः (स्त्री.) ३. कुस्थानम् ।

कुदान[1], सं. पुं. (सं. न.) गर्ह्यदानम् २. कुपात्राय दानम् ।

कुदान[2], सं. स्त्री. (हिं. कूदना) कूर्दनं, झंपः-पा २. कूर्दनभूमिः (स्त्री.), झंपान्तरालम् ।

कुदाना, क्रि. स., 'कूदना' के धातुओं के प्रे. रूप ।

कुदाल, सं. पुं. (सं. कुद्दालः) कुद्दारः, अवदारणः, स्तम्बघ्नः, खनित्रम् २. टंकः, पाषाणदारणः ।

कुदिन, सं. पुं. (सं. न.) आपत्कालः, विपत्तिसमयः २. दुर्दिनम्, ऋतुविपरीतं दिनम् ।

कुदृष्टि, सं. स्त्री. (सं.) पापदृष्टिः (स्त्री.) २. अमंगलदृष्टिः ।

कुधर, सं. पुं. (सं.) पर्वतः २. शेषनागः ।

कुनकुना, वि. (सं. कदुष्ण) ईषदुष्ण, कोष्ण, कवोष्ण, मन्दोष्ण ।

कुनबा, सं. पुं., दे. 'कुटुम्ब' ।

कुनाम, सं. पुं. (सं.-मन् न.) अप,-ख्यातिः-कीर्तिः (स्त्री.) ।

कुपन्थ, सं. पुं. (सं. कुपथः) कापथः, कुमार्गः २. निषिद्धाचरणम् ३. कुत्सितसंप्रदायः ।

कुपन्थी, वि. (हिं. कुपन्थ) कुपथिन्, कुमार्गिन्, कदाचरिन् ।

कुपथ, सं. पुं. (सं.) दे. 'कुपन्थ' ।

—गामी, वि. (सं.-मिन्) दे. 'कुपन्थी' ।

कुपथ्य, सं. पुं. (सं. न.) रोगजनकौ आहार-विहारौ ।

कुपात्र, वि. (सं. न.) अयोग्य, अनर्ह, निर्गुण, अनधिकारिन् ।

कुपित, वि. (सं.) क्रुद्ध, रुष्ट ।

कुपुत्र, सं. पुं. (सं.) दे. 'कपूत' ।

कुप्पा, सं. पुं. (सं. कुतुपः) कूपकः, कुतूः (स्त्री.) चर्ममयं स्नेहपात्रम् ।

—होना, मु. आप्यै-स्फाय् (भ्वा. आ. से.) पीनीभू ।

कुप्पी, सं. स्त्री. (हिं. कुप्पा) चर्मकूपी, लघु,-कुतुपः-कुतूः (स्त्री.) ।

कुफ़्र, सं. पुं. (अ. कुफ्र) यवनेतरसंप्रदायः २. यवनमतविरोधिवाक्यम् ।

कुब, सं. पुं. (सं. कुब्जः >) ककुदः-दं, कुद् (स्त्री.) ।

कुबड़ा, वि. (सं. कुब्ज) कुब्जक, न्युब्ज, वक्रपृष्ठ, गडुल-र, गडु । स. पुं., कुब्जः इ. ।

कुबड़ी, सं. स्त्री. (हिं. कुबड़ा) नतशीर्षा यष्टिः (स्त्री.) २. दे. 'कुब्जा' ।

कुबानि, सं. स्त्री., दे. 'कुटेव' ।

कुबुद्धि, वि. (सं.) मूर्ख, मन्दमति । सं. स्त्री., मौर्ख्यं, मूढता ।

कुबेर, सं. पुं. (सं. कुबेरः) धनदः, यक्षराजः, वैश्रवणः, राजराजः, इच्छावसुः, नरवाहनः, निधीश्वरः ।

कुबेला, सं. स्त्री. (सं. कुवेला) कु,-समयः-कालः २. अनवसरः, अयोग्यकालः ।

कुब्ज, वि. (सं.) दे. 'कुबड़ा' ।

कुब्जा, सं. स्त्री. (सं.) कंसदासी २. मंथरानाम्नी कैकेयीदासी । वि. वक्रपृष्ठा, कुब्जा ।

कुमक, सं. स्त्री. (तु.) सैन्य-, सहायता ।

कुमाच, सं. पुं. (अ. कुमाश) कौशेयवस्त्रभेदः ।

कुमार, सं. पुं. (सं.) बालः, बालकः २. पुत्रः ३. राजपुत्रः ४. युवराजः ५. कार्त्तिकेयः ६. अप्राप्तयौवनः ८. सनकादयः ऋषयः ७. भारतवर्षः-र्षम् । वि., दे. 'कुआरा' ।

कुमारी, सं. स्त्री. (सं.) बाला, बालिका, कन्या २. पुत्री ३. राजपुत्री ४. द्वादशवर्षा कन्या ५. सहा, घृतकुमारी ६. सीता ७. पार्वती । वि., दे. 'कुँआरी' ।

कुमार्ग, सं. पुं. (सं.) दे. 'कुपंथ' ।

कुमुद, सं. पुं (सं. न.) कैरवं, चन्द्रकान्तं, कल्हारं, शीतलकं, इन्दुकमलं, चन्द्रिकांबुजं, गन्धसोमं, कुवलयम् २. कर्पूरः-रं ३. रूप्यम् ।

—बंधु, सं. पुं. (सं.) चन्द्रः २. कर्पूरः-रम् ।

कुमुदिनी, सं. स्त्री. (सं.) दे. 'कुमुद' २. कुमुदवत् सरस् (न.) ।

—पति, सं. पुं. (सं.) चन्द्रः ।

कुमेरु, सं. पुं. (सं.) दक्षिणध्रुवः ।

कुमोदिनी, सं. स्त्री., दे. 'कुमुदिनी' ।

कुम्मैत, सं. पुं. (तु.) पिंग,-वर्णः-रंगः २. पिंगाश्वः ।

कुम्हड़ा, सं. पुं. (सं. कूष्मांडः) दे. 'काशीफल' ।

कुम्हलाना, क्रि. अ. (सं. कुम्लानं) म्लै-ग्लै (भ्वा. प. अ.), विश् (कर्म.), विवर्णीं भू ।

कुम्हार, सं. पुं. (सं. कुंभकारः) कुलालः, चक्रिन् ।

कुम्हारिन, सं. स्त्री. (हिं. कुम्हार) कुलाली कुंभकारी, चक्रिणी ।

कुरंग[1], सं. पुं. (सं.) हरिणः, मृगः २. कृष्णसारः ।

कुरंग[2], वि. कुवर्ण, निन्चरंग ।

कुरंगी, सं. स्त्री. (सं.) मृगी, हरिणी ।

कुरंड, सं. पुं. (सं. कुरुविंदम्) काचलवणम् २. माणिक्यम् ।

कुरकुरा, वि. (अनु. कुरकुर) भंगुर, भिदुर ।

कुरबान, वि. (अ.) इष्ट, हुत, बलित्वेन दत्त ।

कुरबानी, सं. स्त्री. (अ.) यज्ञः, यागः २. बलिः, उत्सर्गः, आलंभः ३. समर्पणं, परित्यागः ।

कुरसी, सं. स्त्री. (अ.) आसंदी, पीठं, आसनम् २-४. स्तम्भ-प्राकार-भवन,-मूलम् ५. वंशपरंपरा ।

—नामा, सं. पुं. (अ.+फ़ा.) वंश,-वृक्षः-परंपरा ।

आराम—, सं. स्त्री. (फ़ा.+अ.) विश्रामासंदी ।

कुरा, सं. पुं. (अ.) दे. 'पाँसा' ।

कुरान, सं. पुं. (अ.) यवनधर्मपुस्तकम् ।

कुराह, सं. स्त्री. (सं. कु+फ़ा. राह) दे. 'कुपंथ' ।

कुरीति, सं. स्त्री. (सं.) कुप्रथा, कदाचारः, कुव्यवहारः ।

कुरु, सं. पुं. (सं.) नृपविशेषः २. प्रान्तविशेषः ३. कुरुवंशजः ।

—क्षेत्र, सं पुं. (सं. न.) महाभारतसंग्राम-भूमिः (स्त्री.) ।

कुरूप, वि. (सं.) विरूप, कदाकार, दुर्दर्शन । सं. पुं. (सं. न.) वैरूप्यं, कदाकारः ।

कुरूपता, सं. स्त्री. (सं.) दे. 'कुरूप' सं. पुं. ।

कुरेद (ल)ना, क्रि. स. (सं. कर्तनम् ?) उत्-वि,-लिख् (तु. प. से.), तक्ष् (भ्वा. प. से.), खुर् (तु. प. से.), घृष् (भ्वा. प. से.) त्वक्ष् (भ्वा. प. वे.) उत्खन् (भ्वा. प. से) ।

कुर्क़, वि. (तु.) ऋणहेतोः अपहृत ।
—करना, क्रि. स., ऋणहेतोः अपह (भ्वा. उ. अ.)।
—अमीन, सं. पुं. (तु.+फ़ा) ऋणादिहेतोः द्रव्यापहर्ता राजकर्मचारिन् ।
कुर्क़ी, सं. स्त्री. (तु. कुर्क़ >) (राजाज्ञया) सम्पत्तिहरणम् ।
कुर्ता, सं. पुं. (तु.) चोलः, उरोवस्त्रम् ।
कुर्ती, सं. स्त्री. (तु. कुर्ता >) आंगिकः-कं, कूर्पासकः-कम् ।
कुर्री, सं. स्त्री. (देश.) कोमलास्थि (न.)।
कुलंग, सं. पुं. (अ.) रक्तशीर्षो धूसरः खगभेदः। २. कुक्कुटः ३. दीर्घजंघो मनुष्यः ।
कुलंजन, सं. पुं. (सं.) कुलंजः, कुर्णजः, गंधमूलः २. तांबूली-नागलता,-मूलम् ।
कुल, सं. पुं. (सं. न.) वंशः, अन्वयः, वंशावलीलिः (स्त्री.) २. जातिः (स्त्री.) ३. समूहः ४. गृहम् ५. वामभागः ।
—कलंक, सं. पुं. (सं.) कुलांगारः, कुलपांसलः ।
—कानि, सं. स्त्री. (सं.+हिं.) कुल,-गौरवमर्यादा ।
—तारण, सं. पुं. (सं.) वंशोद्धारकः ।
—पति, सं. पुं. (सं.) गृहस्वामिन् २. दशसहस्रछात्राणां पोषकोऽध्यापकश्च ३. विश्वविद्यालयस्य उपप्रधानाधिकारिन् (अं० वाइसचान्सलर)।
—वंती, सं. स्त्री. (सं. कुलवती) कुलीना, सदवंशजा, आर्या ।
कुल, वि. (अ.) सकल, समस्त, निखिल ।
कुलकुलाना, क्रि. अ. (अनु.) कुलकुलध्वनिं कृ ।
आँतें—, मु., अतीव क्षुध् (दि. प. अ.)।
कुलक्षण, सं. पुं. (सं. न.) अपशकुनः, दुश्चिह्नं २. कदाचारः, गर्ह्याचरणम् । वि., दुराचारिन् ।
कुलचा, सं. पुं. (फ़ा. कलीचा) सकिण्वोऽपूपः २. दे. 'पूँजी' ।
कुलटा, सं. स्त्री. (सं.) व्यभिचारिणी, पुंश्चली, पंथकी, भ्रष्टा, स्वैरिणी, निशाचरी, अपरण्डा ।
कुलत्थ, सं. पुं. (सं. कुलत्था) चक्षुष्या, लोचनहिता, दृक्प्रसादा ।
कुलथी, सं. स्त्री. (सं. कुलत्थः) कालवृन्तः (शरपुंखः)।
कुलफ, सं. पुं. (अ. कुफ़्ल) दे. 'ताला' ।
कुलफ़ा, सं. पुं. (फ़ा. खुर्फ़ः) बृहल्लोणी, घोलिका, शाकभेदः । २. दे. 'कुलफ़ी' ।
कुलफ़ी, सं. स्त्री. (हिं. कुलफ) धूमपानयंत्रस्य भुग्ननाली २. हिमसन्तानीनिर्माणपात्रम् ३. हिमसन्तानी, घनमधुरदुग्धम् ।
कुलबुलाना, क्रि. अ. (अनु. कुलबुल) दुःखात् अंगानि आकृप् (भ्वा प. अ.) २. अंत्राणि गंभीरं स्वन् (भ्वा. प. से.) ३. वि-सं-प्र,-सृप् (भ्वा. प. अ.) ४. व्याकुल (वि.) भू ५. दे. 'खुजलाना' ।
कुलबुलाहट, सं. स्त्री. (पूर्व.) शनैः सर्पणं, कृमिसदृशी चेष्टा २. कंडूलता, वल्गुरता ।
कुलहा, सं. पुं. (फ़ा. कुलाह) शंकाकारं शिरस्कम् ।
कुलही, सं. स्त्री. (हिं. कुलहा) शिशुशिरस्कम् , दे. 'कनटोप' ।
कुलाँच, सं. स्त्री. (तु. कुलाच) दे. 'छलाँग' ।
कुलाबा, सं. पुं. (अ.) लोहपुटः २. बडिशं, मत्स्यवेधनम् ३. द्वारसंधिः (पुं.) ४. शृङ्खलांगं, अंदूः-दुः (स्त्री.) ५. अर्गलः-लम् ६. जलमार्गः, नाली ।
कुलाल, सं. पुं. (सं.) कुम्भकारः २. वनकुक्कुटः ३. उलूकः ।
कुलिक, सं. पुं. (सं.) कलाविद् (पुं.) २. शिल्पिन् ३. कुलीनः ४. कुलपतिः ।
कुलिश, सं. पुं. (सं.) वज्रः-जं, पविः २. विद्युत् (स्त्री.) ३. कुठारः ।
कुली, सं. पुं. (तु.) भार,-वाहः-हरः, भारिकः २. कर्मक (का) रः, श्रमजीविन् ।
कुलीन, वि. (सं.) महाकुल, अभिजात, आर्य, सभ्य, सत्कुलज ।
कुलीनता, सं. स्त्री. (सं.) आभिजात्यं, आर्यता ।
कुलेल, सं. स्त्री. (सं. कल्लोलः >) क्रीडा, खेला, विहारः, केलिः (पुं. स्त्री.), विलासः, लीला ।
कुल्या, सं. स्त्री. (सं.) क्षुद्रकृत्रिमनदी २. क्षुद्रनदी ३. पयःप्रणाली ४. कुलस्त्री ।
कुल्ला, सं. पुं. (सं. कवलः >) चलुः, चलुकः, चुलुकः ।
कुल्हड़, सं. पुं. (सं. कुल्हरिका) क्षुद्र मृत्पात्रम् ।

कुल्हाड़ा, सं. पुं. (सं. कुठारः, दे.)।

कुल्हिया, सं. स्त्री. (हिं. कुल्हड़) क्षुद्रकरकः, अतिक्षुद्रमृत्पात्रम्।

कुवलय, सं. पुं. (सं. न.) नील,-कुमुदं-कैरवं-शशिकान्तम् २. नील,-कमलं-उत्पलम् ३. भूमण्डलम्।

कुवाच्य, वि. (सं.) अश्लील, अशिष्ट, अवाच्य। सं. पुं. (सं. न.) गाली, कुवचनं, अपशब्दः।

कुवेर, सं. पुं. (सं.) कुबेरः, दे.।

कुश, सं. पुं. (सं.) कुथः, दर्भः, पवित्रम् २. जलम् ३. रामपुत्रः ४. कालः।

कुशल, वि. (सं.) दक्ष, चतुर, प्रवीण, निपुण, विशारद, विचक्षण २. श्रेष्ठ, भद्र। सं. पुं. (सं. न.) सुखं, क्षेमं, मंगलम्, भद्रं, शिवम् २. कुशग्राहिन् ३. शिवः।

—क्षेम, सं. पुं. (सं. न.) सुखं, क्षेमं, मंगलम्।

कुशलता, सं. स्त्री. (सं.) पाटवं, चातुर्यं, निपुणता।

कुशा, सं. स्त्री. (सं. कुशः-शम्) दर्भः, कुथः, पवित्रं, याज्ञिकः, हस्वगर्भः, बर्हिस् (पुं. न.)।

कुशाग्र, वि. (सं.) तीक्ष्ण, सूक्ष्म, तीव्र, प्रखर।

—बुद्धि, वि. (सं.) तीक्ष्णमति। सं. स्त्री., सूक्ष्म-तीव्र,-मतिः (स्त्री.)।

कुशादा, सं. पुं. (फ़ा.) विस्तृत २. आवरणरहित।

कुशासन[1], सं.पुं. (सं. कुश + आसनम्) कुथविष्टरः, दर्भासनम्।

कुशासन[2], सं.पुं. (सं. कु + शासनम्) दुःशासनम्, कुत्सितराज्यव्यवस्था।

कुशील, वि. (सं.) दुःशील, दुर्वृत्त, दुःस्वभाव।

कुश्ता, सं. पुं. (फ़ा.-तः) धातुभस्मन् (न.)।

कुश्ती, सं. स्त्री. (फ़ा.) नियुद्धं, मल्ल-बाहु-युद्धम्।

कुष्ठ, सं. पुं. (सं. न.) श्वित्रं, श्वेतं-त्रं, मंडलकं, दुश्चर्मन् (न.) २. दे. 'कुट[1]'।

—नाशन, सं. पुं. (सं.) वाराहीकन्दः २. गौरसर्षपः ३. क्षीरीशवृक्षः।

कुष्ठी, वि. (सं. कुष्ठिन्) श्वित्रिन्।

कुष्माण्ड, सं. पुं. (सं.) दे. 'कुम्हड़ा'।

कुसंग, सं. पुं. (सं.) कु-दुस्,-संगतिः (स्त्री.)

कुसमय, सं. पुं. (सं.) कुकालः, अशुभसमयः २. अनवसरः, असमयः ३. विपत्कालः।

कुसाइत, सं. स्त्री. (सं. कु + अ. साअत) अशुभमुहूर्तं, अनवसरः, कुसमयः।

कुसुम्भ, सं. पुं. (सं. न.) वस्त्ररंजनं, महारजनम् २. दे. 'केसर'।

कुसुम्भा, सं. पुं. (सं. कुसुंभम् >) कुसुंभरागः २. अहिफेनभंगानिर्मितं मादकद्रव्यम्।

कुसुम, सं. पुं. (सं. न.) पुष्पं, प्रसूनं, सुमं, सूनं, मणीवकं, सुमनसः (स्त्री., केवल बहु.) २. लघुवाक्यमयं गद्यम् ३. स्त्रीरजस् (न.)।

—पुर, सं. पुं. (सं. न.) पाटलिपुत्रम्।

—बाण, सं. पुं. (सं.) कामदेवः।

कुसुमांजलि, सं. स्त्री. (सं. पुं.) पुष्पांजलिः।

कुसुमित, वि. (सं.) पुष्पित, उत्फुल्ल, फुल्लित।

कुसूर, सं. पुं. (अ.) अपराधः, स्खलितम्।

—वार, वि. अपराधिन्, दोषिन्।

कुहक, सं. पुं. (सं. न.) माया, अभिचारः, इन्द्रजालम् २. ऐन्द्रजालिकः ३. वंचकः।

कुहकना, क्रि. अ. (अनु. कुहू) कुहूरवं कृ, कूज् (भ्वा. प. से.)।

कुहनी, सं. स्त्री. (सं. कफोणिः पुं.) कफणिः (पुं. स्त्री.), कफणी, कु (कू) पंरः।

कुहर, सं. पुं. (सं. न.) छिद्रं, विवरं, बिलं, रन्ध्रम्।

कुहरा, सं. पुं. (सं. कुहेडी) तुषारः, खवाष्पः, धूमिका, कुहेडिका, कुज्झटिका।

कुहराम, सं. पुं. (अ. कहर + आम) विलापः, आक्रन्दनं, परिदेवना २. संकुलं, तुमुलम्।

कुही, सं. स्त्री. (सं. कुधिः) श्येनः, खगान्तकः, शशादनः, कपोतारिः।

कुहुक, पुं., दे. कुहू(२)।

कुहुकना, क्रि. अ., दे. 'कुहकना'।

कुहू, सं. स्त्री. (सं.) अमावस्या २. कोकिल-मयूर,-आलापः।

कूँचा, सं. पुं. (सं. कूर्चम्) शोधनी, संमार्जनी, कूर्चकम्।

कूँची, सं. स्त्री. (हिं. कूँचा) लघु-क्षुद्र,-शोधनी-कूर्चम् २. लोममयी मार्जनी ३. तूलिका, वर्ण,-तूली-तूलिका।

कूँज, सं. पुं. (सं. क्रुंचः-चा) क्रौंचः-चा, कलिकः, कालिकः ।

कूँड, सं. पुं. (सं. कुंडम्) सेचनं-नी २. सीता, हलरेखा ३. दे. 'खोद' ।

कूँड़ा, सं. पुं. (सं. कुंडम्), (जलार्थं) बृहन्मृत्पात्रम् २. द्रोणी-णिः (स्त्री.) ३. कुसुमपात्रम् ।

कूँड़ी, सं. स्त्री. (हिं. कूँड़ा) लघुपाषाणद्रोणी-णिः (स्त्री.) २. पाषाणचषकः-कम् ।

कूक, सं. स्त्री. (अनु.) कोकिलकूजितम् २. केका, मयूरध्वनिः ३. दीर्घमधुरध्वनिः ।

कूकना, क्रि. अ. (हिं. कूक) कूज् (भ्वा. प. से.), कुहूरवं कृ, केकां कृ ।

कूकर, सं. पुं. (सं. कुक्कुरः दे.) ।

कूच, सं. पुं. (तु.) प्रस्थानं, प्रयाणं, अपक्रमः २. कटकत्यागः ३. यात्रा ।

—करना, क्रि. अ., प्रस्था (भ्वा. आ. अ.), प्रया (अ. प. अ.) ।

कूचा, सं. पुं. (फ़ा. चः) वीथी, दे. 'गली' ।

कूजन, सं. पुं. (सं. न.) कूजितं, कलरवः, खगध्वनिः, विरुतं, गुंजनम् ।

कूजना, क्रि. अ. (सं. कूजनम्) कूज् (भ्वा. प. से.), कृ (अ. प. अ.), वि,-रु (अ. प. से.) २. गुंज् (भ्वा. प. से.), हुं कृ ।

कूजा, सं. पुं. (फ़ा.) सनालीकः करकः ।

—मिसरी, सं. स्त्री., अर्द्धगोलाकारा घनीकृता सिता ।

कूजित, वि. (सं.) ध्वनित, स्वनित, गुञ्जित, संकृत, कलरवपूर्ण ।

कूट[1], सं. पुं. (सं. न.) छलं, कपटः-टं, माया, वञ्चना, प्रतारणा २. असत्यं ३. शृंगं, विषाणम् ४. उच्चशिखरम् ५. राशिः ६. गूढार्थवार्ता, सनिंदः उपालम्भः ७. प्रहेलिका, गूढप्रश्नः ८. लोहमुद्गरः ९. हरिणजालम् १०. प्रच्छन्नवैरम् ११. नगरद्वारम् १२. भग्नशृंगो वृषभः ।

वि., असत्यवादिन् २. प्रवञ्चक ३. कृत्रिम ४. श्रेष्ठ ५. निश्चल ।

—नीति, सं. स्त्री. (सं.) दौत्यकर्मन् (न.)

—बुद्धि, सं. पुं. (सं. न.) कपटसंज्ञानः ।

—योजना, सं. स्त्री. (सं.) कुचक्रम् ।

—साक्षी, सं. पुं. (सं.-क्षिन्) मिथ्यासाक्षिन् ।

कूट[2], सं. स्त्री. (हिं. काटना वा कूटना) कर्तनं, कृन्तनम् २. ताडनं, कुट्टनम् ।

कूटना, क्रि. स. (सं. कुट्टनम्) कुट्ट्-चूर्ण्-खंड् (चु.), पिष् (रु. प. अ.) २. प्रबलं तड् (चु.) ।

सं. पुं. तथा भाव, कुट्टनं, चूर्णनं, खण्डनम्, पेषणम् २. ताडनं, प्रहरणम् ।

—योग्य, वि., कुट्टनीय, चूर्णयितव्य ।

—वाला, सं. पुं. कुट्टकः, पेषकः, ताडयितृ ।

कूटा हुआ, वि., कुट्टित, पिष्ट, ताडित ।

कूटस्थ, वि. (सं.) शिखरस्थ २. निश्चल ३. नित्य ४. गूढ ।

कूड़ा, सं. पुं. (सं. कूटः = राशि >) अवस्करः, उच्छिष्टं, मलं, निस्सारवस्तुसमूहः ।

—करकट, सं. पुं., दे. 'कूड़ा' ।

कूद, सं. स्त्री. (हिं. 'कूदना') प्लवः, उत्-प्लुतिः (स्त्री.), प्लवनं, झंपः-पा, वल्गनं, उत्प्लवः ।

—फाँद, सं. स्त्री. कूर्दनप्लवनं, झंपवल्गितम् ।

कूदना, क्रि. अ. (सं. कूर्दनम्) कुर्द् (भ्वा. आ. से.), उत्प्लु (भ्व. आ. अ.), वल्ग् (भ्वा. प. से.) २. प्र-मुद् (भ्वा. आ. से.) ।

सं. पुं., दे. 'कूद' ।

—फाँदना, क्रि. अ., इतस्ततः वल्ग् । २. व्यायामं कृ ।

कूप, सं. पुं. (सं.) दे. 'कुआँ' २. छिद्रं, रंध्रम् ।

—मंडूक, सं. पुं. (सं.) व्यवहारानभिज्ञः, अपक्वबुद्धिः, अल्पदर्शिन् । २. अंधुभेकः ।

कूबड़, सं. पुं. (सं. कूबरः >) ककुदः-दम् ।

कूर, वि. (स. क्रूर) निर्दय, निर्घृण, नृशंस २. भयंकर ३. दुष्ट ४. अलस ५. मूर्ख ६. कुलक्षण ।

कूर्म, सं. पुं. (सं.) कच्छपः, दे. 'कछुआ' २. विष्णोः कच्छपावतारः ३. पृथिवी ४-७. ऋषि-प्राण-नाडी-आसन,-विशेषः ।

कूल, सं. पुं. (सं. न.) तटः-टी-टं, तीरम् २. समीपे, निकटे ३. कुल्या ४. सरस् (न.) ।

कूल्हा, सं. पुं. (सं. क्रोडम् >) नितंबादिः (न.) ।

कूष्मांड, सं. पुं. (सं.) दे. 'कुम्हड़ा' ।

कृच्छ्र, सं. पुं. (सं. न.) दुःखं, कष्टम् २. पापम् ३. मूत्रकृच्छ्ररोगः ४. व्रतभेदः। वि., दुष्कर, दुस्साध्य।

कृत, वि. (सं.) विहित, अनुष्ठित, रचित, संपादित, निर्मित। सं. पुं. सत्ययुगम् २. चतुर् इति संख्या।

—कार्य, वि. (सं.) सफल, सिद्धार्थ।

—कृत्य, आप्तकाम, सफलमनोरथ।

—युग, सं. पुं. (सं. न.) सत्ययुगम्।

—विद्य, वि. (सं.) विद्वस्, पंडित, बहुश्रुत।

कृतघ्न, वि. (सं.) कृतज्ञतारहित, अकृतवेदिन्।

कृतघ्नता, सं. स्त्री. (सं.) अकृतवेदिता, उपकारविस्मरणम्, कृतज्ञताराहित्यम्।

कृतज्ञ, वि. (सं.) उपकारज्ञ, कृतविद्, कृतवेदिन्।

कृतज्ञता, सं. स्त्री. (सं.) उपकारज्ञता, उपकारस्मरणं, कृतवेदित्वम्।

कृताञ्जलि, वि. (सं.) बद्धांजलि, बद्धकर।

कृतांत, सं. पुं. (सं.) मृत्युः २. यमः ३. पापम् ४. देवता ५. पूर्वजन्मकर्मफलम् ६. सिद्धान्तः ७. शनैश्चरवारः।

कृतार्थ, वि. (सं.) पूर्णकाम, दे. 'कृतकार्य' २. संतुष्ट ३. निपुण ४. मुक्त।

कृति, सं. स्त्री. (सं.) चेष्टा, क्रिया २. कर्मन् (न.), कार्यम् ३. इन्द्रजालम्, माया ४. रचना, ग्रंथः ७. प्रहारः ८. क्षतिः (स्त्री.)।

कृती, वि. (सं. कृतिन्) कुशल, दक्ष, पटु २. पुण्यात्मन्, शुचिव्रत।

कृत्ति, सं. स्त्री. (सं.) मृगचर्मन् (न.) २. त्वच् (स्त्री.) ३. भूर्जः ४. दे. 'कृत्तिका'।

—वासा, सं. पुं. (सं.-वासस्) शिवः।

कृत्तिका, सं. स्त्री. (सं.) बहुला, अग्निदेवा, नक्षत्रविशेषः।

कृत्य, सं. पुं. (सं. न.) अनुष्ठेयं, कर्तव्यं, विधेयं, धर्मः, आवश्यकं कार्यम् २. कर्मन् (न.)।

कृत्रिम, वि. (सं.) कृतक, अनैसर्गिक।

कृदन्त, सं. पुं. (सं.) कृत्प्रत्ययान्तशब्दः (उ. पाचक, भोक्तृ इ.) २. कृत्प्रत्ययविषयकं व्याकरणप्रकरणम्।

कृपण, वि. (सं.) कदर्य, दे. 'कंजूस' २. क्षुद्र।

कृपणता, सं. स्त्री. (सं.) कदर्यता, दे. 'कंजूसी'।

कृपया, क्रि. वि. (सं.) सदयं, सकृपं, सानुकंपं, सानुग्रहम्।

कृपा, सं. स्त्री. (सं.) करुणा, दया, अनुग्रहः, प्रसादः, उपकारः, अनुकंपा २. क्षमा, मर्षणम्।

—निधान, सं. पुं. (सं. न.) दयानिधिः। वि. अत्यन्तकृपालु।

—पात्र, सं. पुं. (सं. न.) प्रसादभाजनं, अनुग्राह्यः, दयार्हः।

—सिंधु, सं. पुं. (सं.) दयासागरः, अतिदयालुः।

कृपाण, सं. पुं. (सं.) खड्गः, असिः २. दे. 'कटार' ३. दंडकवृत्तभेदः (छन्द.)।

कृपालु, वि. (सं.) दयालु, कारुणिक, कृपामय।

कृपालुता, सं. स्त्री. (सं.) दयालुता, कारुणिकता।

कृमि, सं. पुं. (सं.) कीटः, नीलांगः, क्रिमिः (पुं.) २. लाक्षा।

—कोश, सं. पुं. (सं.) पट्टकीट,-कोषः-गृहं।

—नाशक, वि. (सं.) कृमिघ्न, कृमिहर।

कृमिज, सं. पुं. (सं. न.) अगुरु (न.), राजार्ह २. कौशेयं ३. दे. 'हिरमिज़ी'।

कृमिजा, सं. स्त्री. (सं.) कीटजा, लाक्षा।

कृमिल, वि. (सं.) कृमिकुल,-चित-पूर्ण, कृमिमय।

कृमिला, सं. स्त्री. (सं.) बहुप्रसूः (स्त्री.), बहुप्रजा।

कृश, वि. (सं.) क्षीण, क्षाम, तन्वंग-कृशांग (-गी स्त्री.), प्र-,तनु, दुर्बल २. अल्प, स्तोक, क्षुद्र, सूक्ष्म, अणु, लघु।

कृशता, सं. स्त्री. (सं.) क्षीणता, क्षामता, दुर्बलता २. अल्पता, सूक्ष्मता।

कृशांगी, सं. स्त्री. (सं.) तन्वंगी, क्षीणांगी, तन्वी।

कृशानु, सं. पुं. (सं.) अनलः, अग्नि (पुं.) २. चित्रकः।

कृशोदरी, वि. स्त्री. (सं.) तनु-क्षीण,-मध्या-मध्यमा।

कृषक, सं. पुं. (सं.) कृषीवलः, कृषिकः, कृषाणः।

कृषि, सं. स्त्री. (सं.) कर्षणं, हलभृतिः (स्त्री.)।

कृष्ण, सं. पुं. (सं.) वासुदेवः, केशवः, चक्रपाणिः (पुं.), चक्रिन् (पुं.), जनार्दनः, पीतां-

वरः, माधवः, मधुसूदनः, हृषीकेशः, गोपालः, गोवर्धनधारिन् (पुं.), गोविंदः, दामोदरः, मुरारिः (पुं.), राधारमणः। २. कोकिलः ३. काकः ४. कृष्णपक्षः। वि., काल, असित, २. नील, मेचक, श्याम ३. तिमिर, निष्प्रभ।

—जटा, सं. स्त्री. (सं.) जटांमांसी, सुगन्धित-मूलभेदः।

—जीरक, सं. पुं. (सं.) कृष्णा, काला, बहुगन्धा।

—द्वैपायन, सं. पुं. (सं) वेदव्यासः, महाभारतकारः।

—पक्ष, सं. पुं. (सं.) असितपक्षः, प्रतिपदाद्यमावस्यान्तानि पंचदश दिनानि।

—लवण, सं. पुं. (सं. न.) रुचकं, अक्षं, सौवर्च्चलं।

—लोह, सं. पुं. (सं. न.) अयस्कांतः, चुंबकः।

—शार, —सारंग, —सार, सं. पुं. (सं.) मृगभेदः।

कृष्णता, सं. स्त्री. (सं.) कृष्णिमन् (पुं.), कालिमन् (पुं.). नीलत्वं, श्यामत्वं।

कृष्णा, सं. स्त्री. (सं.) द्रौपदी, पांचाली २. कालीदेवी ३. दक्षिणदेशे नदीविशेषः ४. कृष्णजीरकः ५. कृष्णद्राक्षा ६. नयनतारा।

कृष्णाष्टमी, सं. स्त्री. (सं.) श्रीकृष्णजन्मदिवसः, जन्माष्टमी, भाद्रमासस्य कृष्णपक्षस्याष्टमी तिथिः।

कृष्य, वि. (सं.) कर्षणीय, कृषियोग्य।

केंचुआ, सं. पुं. (सं. किंचुलुकः) महीलता, गंडूपदः, किञ्चिलिकः।

केंचुल, सं. स्त्री. (सं. कंचुकः) निर्मोकः, अहि-भुजंग-सर्प,-त्वच् (स्त्री.)।

केंचुली, वि. (हिं. केंचुल) कंचुक,-सदृश-तुल्य। सं. स्त्री. दे. 'केंचुल'।

केंद्र, सं. पुं. (सं. न.) मध्यः-ध्यं, मध्यभागः २. उदरं, गर्भः ३. मुख्य-प्रमुख,-स्थानम्।

केंद्री, वि. (सं. केन्द्र>) मध्यन, मध्यस्थ, मध्य,-गत-वर्तिन्, मध्य, केन्द्रीय।

कैंसर, सं. पुं. (अं.) कर्कट-कर्कटिका,-रोगः, कर्कटस्फोटः।

के, प्रत्य. (हिं. का) दे. 'का'।

केकड़ा, सं. पुं. (सं. कर्कटः) कर्कटकः, कुलीरः।

केकय, सं. पुं. (सं.) १. वर्तमानकाश्मीरांतर्गतप्रदेशविशेषः २. दशरथश्वशुरः।

केकयी, सं. स्त्री. (सं. कैकेयी)।

केका, सं. स्त्री. (सं.) मयूरवाणी।

केकी, सं. पुं. (सं.-किन्) मयूरः, शिखिन्।

केत, सं. पुं. (सं.) भवनं, गृहं २. स्थानं ३. ध्वजः, केतनं ४. बुद्धिः (स्त्री.) ५. संकल्पः ६. मंत्रणा ७. अन्नम्।

केतक[1], सं. पुं. (सं.) केतकीवृक्षः २. तत्पुष्पं।

केतक[2], वि. (सं. कति+एक) दे. 'कितने', 'कितना', 'बहुत'।

केतकी, सं. स्त्री. (सं.) सूचीपुष्पः, केतकः, ककचच्छदः, विफला, ककचा, गंधपुष्पा।

केतन, सं. पुं (सं. न.) भवनं, गृहम् २. स्थानं ३. चिन्ह ४. ध्वजः ५. निमंत्रणं, आह्वानम्।

केतली, सं. स्त्री. (अं. केटल) उखा, स्थाली, लौहा, लौहभूः (स्त्री.)।

केतु, सं. पुं. (सं.) ग्रहविशेषः २. उल्का, उत्पातः ३. ज्ञानं ४. दीप्तिः (स्त्री.) ५. ध्वजः ६. चिह्नम् ७. राक्षसविशेषस्य कबंधः।

—तारा, सं. पुं. (सं. स्त्री.) धूमकेतुः (पुं.), उल्का।

—मान्, वि. (सं.-मत्) तेजस्विन् २. ध्वजिन् ३. बुधः।

—माल, सं. पुं. (सं. न.) जंबुद्वीपस्य नवखंडांतर्गतखंडविशेषः।

—रत्न, सं. पुं. (सं. न.) वैदूर्यमणिः (पुं.)।

केथीटर, सं. पुं. (अं.) मूत्रशलाका।

केलसियम, सं. पुं. (अं.) चूर्णातु (न.), खटिकम्।

केदार, सं. पुं. (सं.) व्रीहिक्षेत्रं २. हिमालये तीर्थविशेषः ३. आलवालं ४. मेघरागपुत्रः ५. सपुष्पः क्षेत्रभागः।

केन, सं. पुं. (सं. 'किं' का तृतीया एकवचन) उपनिषद्विशेषः।

केमरा, सं. पुं. (अं.) छायाचित्रपेटिका।

केमिस्ट्री, सं. स्त्री. (अं.) रसायनम्।

केयूर, सं. पुं. (सं. पुं. न.) अंगदः-दं, वलयः-यं।

केराना, सं. पुं. दे. 'किराना'।

केरानी, सं. पुं. (अं. क्रिश्चियन>) भारोपीयः २. लेखकः, कायस्थः, लिपिकारः।

केराया, सं. पुं. दे. 'किराया'।
किराये की गाड़ी, सं. स्त्री., पण्य-साधारण,-वाहनं-रथः।

केला, सं. पुं. (स. कदलः), (वृक्ष) कदली, रंभा, मोचा, काष्ठीला, सकृत्फला, गुच्छफला, निःसारा, ऊरुस्तभा, मो(रो, लो)चकः, वारणवल्लभा। (फल) कदलीफलं, मोचं इ.।

केलि, सं. स्त्रा. (सं.) क्रीडा, खेला २. रतिः (स्त्री.), मैथुनं ३. नर्मन् (न.), परि (रं) हासः ४. पृथिवी।
—**कला,** सं. स्त्री. शारदावीणा २. रतिविज्ञानं।

केलोरी, सं. स्त्री. (अं.) उषम्।

केवट, सं. पुं. (सं. कैवर्तः) नाविकः, पोतवाहः, औडुपिकः २. धीवरः, कैवर्तः, जालिकः, मत्स्याजीवः।

केवटी, सं. स्त्री. (हि. केवट) मिश्रद्विदलं, वैदलसंकरः।

केवड़ा, सं. पुं. (सं. केविका) केवी, कविका, भृङ्गारिः (पुं.), महागंधा, नृपवल्लभा २. केवी-पुष्पं इ. ३. महागंधासवः।

केवल, वि. (सं.) एक, अद्वितीय २. विशुद्ध ३. श्रेष्ठ। क्रि. वि.,-एव, केवलं,-मात्र (समासांत में) २. सामस्त्येन, संपूर्णतया।

केवली, सं. पुं. (सं.-लिन्) मोक्षाधिकारी साधुः २. तीर्थंकरः (जैन.)।

केवाँच, सं. स्त्री. (सं. कच्छुः >), (लता) कपिकच्छूः (स्त्री.) स्व-आत्म,-गुप्ता, कंडूरा, मर्कटी २. (फली) कपिकच्छू,-बीजकोशः-शिंबी।

केवाड़, सं. पुं., दे. 'किवाड़'।

केश, सं. पुं. (सं.) वालः, कचः, कुन्तलः, चिकुरः, शिरोरुहः, शिरसिजः, मूर्द्धजः, वृजिनः २. किरणः ३. वरुणः ४. विष्णुः ५. सूर्यः ६. विश्वं (७-८) अश्व-सिंह,-स्कंधकेशः।
—**कर्म,** सं. पुं., केशकर्मन् (न.), केश,-विन्यासः-प्रसाधनम्।
—**कलाप,-पाश,** सं. पुं (सं.) प्रसाधितकेशाः, अलकाः, कुरलः।
—**प्रसाधनी,** सं. स्त्री. } कंकतिका, दे. 'कंघी'।
—**मार्जक,** सं. पुं. }
—**विन्यास,** सं. पुं (सं.) दे. 'केशकर्म'।

केशरी, सं. पुं. (सं.-रिन्) सिंहः, मृगेन्द्रः २. घोटकः (३-४) पुन्नाग-नागकेशर,-वृक्षः।

केशाकेशी, सं. स्त्री. [सं.-शि(न.)] अन्योऽन्य-केशग्रहणपूर्वकप्रवृत्तं युद्धं।

केशिनी, सं. स्त्री. (सं.) सुकेशी-शा, सुकची-चा।

केशी, सं. पुं. (सं. केशिन्) सिंहः २. घोटकः २. सुकेशः (पुरुषः) ३. राक्षसविशेषः।

केस[१], सं. पुं., दे. 'केश'।

केस[२], सं. पुं. (अं.) व्यवहारपदं, कार्यं २. दुर्घटना ३. कोषः, पुटः।

केसर, सं. पुं. (सं. पुं. न.) काश्मीर्यं, काश्मीरज, कुंकुमं, अग्निशिखं, वरं, वाह्लि (ह्ली)कं, पीतनं, गौरं, रक्तं, लोहितचन्दन, वर्ण्यं, संकोचं, धीरं, घस्रं, घुसृणं, घोरम् २. नागकेशरवृक्षः ३. अश्व-सिंह,-स्कन्धवालाः ४. स्वर्गः।

केसरिया, वि. (सं. केसरं >) घनपीत, कुंकुमवर्ण।
—**बाना,** सं. पुं., कुंकुमवर्ण-घनपीत,-वेशः-वेषः।

केसरी, सं. पुं. (सं.-रिन्) दे. 'केशरी'।

केसू, सं. पुं. (सं. किंशुकः) पलाशः, रक्त-पुष्पकः।

केहा, सं. पुं. (सं. केका >) मयूरः, दे. 'मोर'।

केहरी, सं. पुं. (सं. केशरिन्) सिंहः २. अश्वः।

कैंची, सं. स्त्री. (तु.) दे. 'कतरनी'।
—**करना,** मु., अग्राणि निकृत् (तु. प. से.)-लू (क्र. उ. से.)-अवच्छिद् (रु. प. अ.)
—**सी जबान चलना,** मु., शीघ्रं-सत्वरं-वेगेन वद् (भ्वा. प. से.)-भाष् (भ्वा. आ. से.)

कैंचुली, सं. स्त्री., दे. 'केंचुली'।

कै, वि. (सं. कति) दे. 'कितने', 'कितनी'। अव्य., वा, अथवा, यद्वा २. अन्यतर।
—**दफा,-बार,-बेर,** कतिकृत्वः (अव्य.), कतिवारं।

क़ै, सं. स्त्री. (अ.) वांतं, वमनोद्गारः २. वमनं, वमः, वमिः (स्त्री.), प्रच्छर्दिका, वमथुः (पुं.)।
—**आना,** क्रि. अ., वमनेच्छया पीड् (कर्म.), विवमिषति (सन्नन्त.)।
—**करना,** क्रि. स. उद्,-वम् (भ्वा. प. से.) छर्द् (चु.), उत्क्षिप् (तु. प. अ.), उदग् (तु. प. से.)।

कैतव, सं. पुं. (सं. न.) छलं, कपटं, वंचनं २. द्यूतं ३. वैदूर्यमणिः (पुं.) ४. धुस्तूरः । वि., छलिन् , कापटिक २. शठ, धूर्त्त ३. अक्षदेविन् , कितव, (-वी. स्त्री.) ।

कैथ-था, सं. पुं. (सं. कपित्थः) दधित्थः, मन्मथः, दधि-पुष्प-कुच-गन्ध-दन्त,-फलः ।

क़ैद, सं. स्त्री. (अ.) बन्धनं, निग्रहः, निरोधः २. कारा,-निरोधः-बन्धनं-प्रवेशः-वासः, बंदीकरणं, प्रग्रहः, आसेधः ३. नियमः, समयः, प्रतिज्ञा, संकेतः ।

—करना, क्रि. स., कारागृहे निक्षिप् (तु. प. अ.)-बन्ध्(क्र्. प. अ.)-निरुध्(रु. उ. अ.), बन्दीग्राहं ग्रह् (क्र. प. से.), बंदीकृ ।

—होना, क्रि. अ., कारायां निक्षिप्-बन्ध् निरुध्-बन्दीकृ (सब कर्म.) ।

—खाना, सं. पुं. (फ़ा.) कारा, कारागारः-रं, कारावासः, बन्दि,-शाला-गृहं, बन्धनालयः, चारः, चारकः, गुप्तिस्थानं ।

—तनहाई, स. स्त्री. (अ + फ़ा.) एकांत-विजन-निभृत,-आसेधः ।

—महज़, सं. स्त्री. (अ.) सरल-सुगम,-प्रग्रहः-आसेधः ।

—सख़्त, सं. स्त्री. (अ. + फ़ा.) विषम-दुःसह,-आसेधः, इ. ।

क़ैदी, सं. पुं. (अ.) बंदी-दिः (स्त्री.), बन्दिन् (पुं.), कारागुप्तः, ग्रहकः, प्रग्रहः, रुद्धः ।

कैफ़ियत, सं. स्त्री. (अ.) अवस्था, स्थितिः (स्त्री.), दशा २. विवरणं, वर्णनं ३. आश्चर्योत्पादकघटना ।

करव, सं. पुं. (सं. न.) कुमुदं २. सितोत्पलं, श्वेतकमलं । (सं. पुं.) कितवः २. शत्रुः ।

कैरी, सं. स्त्री. (देश.) दे. 'अँविया' ।

—आंख, सं. स्त्री., कपिल-पिंगल,-नयनं-नेत्रं ।

कैलास, सं. पुं. (सं.) पर्वतविशेषः, शिव-कुबेर,-निवासः ।

—नाथ, पति, सं. पुं. (सं.) शिवः ।

—वास, सं. पुं. (सं.) मृत्युः ।

कैवर्त, सं. पुं. (सं.) दे. 'केवट' ।

कैवल्य, सं. पुं. (सं. न.) एकत्वं, असंसृष्टता २. अपवर्गः, मुक्तिः (स्त्री.) ३. उपनिषद्विशेषः ।

क़ैसर, सं. पुं. (लै० सीज़र) सम्राज् , राजाधिराजः, अधिराजः, अधीश्वरः ।

कैसा, वि. (सं. कीदृश) कीदृक्ष, किंरूप, किंविध, किमाकार ।

कैसी, वि. स्त्री. (सं. कीदृशी) कीदृक्षी, किंरूपा, किमाकारा, किंविधा ।

कैसे, क्रि. वि. (हिं. कैसा) कथं, केन प्रकारेण, कया रीत्या ।

कोंकण, सं. पुं. (सं.) दक्षिणदिशि प्रान्तविशेषः ।

कोंपल, सं. स्त्री. (सं. कोमल >) पल्लवः-वं, अंकुरः, प्ररोहः, किस (श) लयः-यं, उद्भिद् (पुं.), उद्भिज्जः ।

—निकलना या फूटना, क्रि. अ., प्ररुह् (भ्वा. प. अ.), स्फुट् (तु. प. से.), उद्भिद् (कर्म.) फुल्ल्-विकस् (भ्वा. प. से.) ।

को, प्रत्य. (यह कर्म और संप्रदान कारक का प्रत्यय है, इसका अनुवाद प्रायः द्वितीया और चतुर्थी के रूपों से होता है । (राम को कह = उ., रामं ब्रूहि, ब्राह्मण को दे = विप्राय देहि) ।

कोआ, सं. पुं. (सं. कोशः-षः), (पट्टकीट-) कोशः-षः २. दे. 'कोया' । ३. पनसखंडः-डं ४. दे. 'महुआ' (फल) ।

कोई, सर्व (सं. कोऽपि) कश्चन, कश्चित् (पुं.), का,-अपि-चन-चित् (स्त्री.) किं,-अपि-चन-चित् (न.) ।

—कोई, वि. स्तोकाः, कतिपयाः, परिमिताः ।

—चीज़, सं. स्त्री., किमपि (वस्तु) ।

—दम में, क्रि. वि., सपद्येव, तत्काले, झटिति, द्राक् (सब अव्य.) ।

—दम का मेहमान, सं. पुं., मुमूर्षुः, आसन्न,-मरण-मृत्यु, मरणाभिमुख, मरणोन्मुख ।

—न कोई, एष वा परो वा, यः कश्चिदपि, कश्चित्तु ।

—नहीं, न कोऽपि-काऽपि किंचिदपि इ. ।

कोक[1], सं. पुं. (सं.) चक्रवाकः, द्वन्द्वचरः, रथांगः, चक्रः २. मंडूकः ३. विष्णुः (पुं.) ४. वृकः ५. खजरीवृक्षः । [कोकी (स्त्री.), चक्रवाकी, रथांगी इ.] ।

कोक[2], सं. पुं. (अं.) न्यङ्गारः ।

—शास्त्र, सं. पुं. (सं. न.) कोकपंडितरचितं रतिविज्ञानग्रन्थः ।

साफ्ट-, सं. पुं., मृदुन्यङ्गारः ।
हार्ड-, सं. पुं, दृढन्यङ्गारः ।
कोकनद, सं. पुं. (सं. न.) रक्तोत्पलं २. रक्त-कुमुदम् ।
कोकनी, वि. (देश.) क्षुद्र, लघु ।
कोका, सं. पुं. (अं.) वृक्षभेदः ।
कोका, सं. पुं. स्त्री. (तु.) धात्री-उपमातृ,-पुत्रः-पुत्री, धात्रेयः-यी ।
—बेली,-बेरी, सं. स्त्री. (सं. कोकनदं + हिं. बेली) नीलकुमुदं ।
कोकाह, सं. पुं. (सं.) कर्कः, श्वेतघोटकः ।
कोकिल, सं. स्त्री. (सं. पुं.) पिकः, पर, भृतः-पुष्टः, कालः, गन्धर्वः, मधुगायनः, कलकंठः, कुहूरवः, काकलीरवः, वसन्तदूतः, वनप्रियः, ताम्राक्षः । दे. 'कोकिला' ।
—बैनी, वि. स्त्री. (सं. + हिं.) सुकंठी, मधुर-भाषिणी ।
कोकिला, सं. स्त्री. (सं.) मदनशलाका, पर,-भृता-पुष्टा, वनप्रिया, कलकंठी, ताम्राक्षी, वसंत-दूती ।
कोको, सं. स्त्री. (अनु.) काकः, वायसः २. काल्पनिकभयहेतुः (पुं.) ।
कोख, सं. स्त्री. (सं. कुक्षिः) गर्भाशयः, गर्भ-कोशः-षः ।
—जली,-बन्द, वि., वंध्या, सन्तानहीना ।
—की आँच, सं. स्त्री., अपत्यप्रेमन् (पुं.), वात्सल्यं, सन्ततिस्नेहः ।
—मारी जाना, मु., च्युतगर्भा भू, गर्भः पत् (भ्वा. प. से.)-च्यु (भ्वा. आ. अ.) ।
—खुलना, मु. सन्तानः उत्पद् (दि. आ. अ.)
कोचना, क्रि. स., दे. 'चुभाना', 'धँसाना' ।
कोचबकस, सं. पुं. (अं. कोचबॉक्स) सूतासनं।
कोचवान, सं. पुं. (अं. कोच >) सारथिः (पुं.), सूतः, वाहकः ।
कोजागर, सं. पुं. (सं.) आश्विनी-द्यूत,-पूर्णिमा, कौमुदी, शारदी, शरत्पर्वन् (न.) ।
कोट[1], सं. पुं. (सं.) दुर्गं २. प्राचीरं ३. राज-प्रासादः ।
—वाल, सं. पुं., कोटपालः, दुर्गाध्यक्षः ।
कोट[2], सं. पुं. (अं.) प्रावारः-रकः, कंचुकः ।
कोटर, सं. पुं. (सं. पुं. न.) निष्कुहः, तरु-विवरं, प्रान्तरं २. कोटरावणं, रक्षार्थं कृत्रिमवनं।
कोटि, सं. स्त्री. (सं.) शतलक्षसंख्या, दे. 'करोड़' २. धनुरग्रं ३. अस्त्रादेः कोणः ४. वर्गः, श्रेणी ।
कोटिक, वि. (सं. कोटिः स्त्री.) कोटी-टिः (स्त्री.) लक्षशतकं २. असंख्य, अगणित । सं. स्त्री., उक्ता संख्या तदंकाश्च ।
कोटिशः, क्रि. वि. (सं.) बहुधा,-बहुधा २. अनेक-कोटिवारं । वि., बहुसंख्याक, अनेक ।
कोठरी-ड़ी, सं. स्त्री. (हिं. कोठा) लघु-क्षुद्र,-कोष्ठः-शाला, अन्तःकोष्ठः, गर्भागारं ।
कोठा, सं. पुं. (सं. कोष्ठः) गृहं, सदनं, आ-नि,-वासः, वेश्मन्-सद्मन् (न.) २. प्र-,कोष्ठः, शाला ३. पण्यागारं, पण्याधानं ४. धान्यागारं, कुशूलः ५. चन्द्रशाला, अट्टालिका ६. पटलं, छदिस् (स्त्री.) ७. उदरं ८. आमाशयः ९. अंत्राणि (न. बहु.) १०. निभृतागारं ११. पत्रभागः १२. गर्भाशयः ।
—बिगड़ना, मु. अजीर्णरोगेण पीड् (कर्म.)
कोठार, सं. पुं. (हिं. कोठा) दे. 'भंडार' ।
कोठरी, सं. पुं. (हिं. कोठा) दे. 'भंडारी' ।
कोठी, सं. स्त्री. (हिं. कोठा) भवनं, गृहं, हर्म्यं २. एकभूमिकं हर्म्यं ३. पण्य,-आगारं-आधानं ४. धान्यागारं ५. भांडारं, कोषः ६. वणिग्जनसमवायः ७. बृहदापणः, महती विक्रयशाला ८. गर्भाशयः ९. गुलिकाक्षेपण्या-माग्नेयचूर्णाधानं १०. मृण्मयं बृहद्धान्यपात्रं ११. लोहमयं ताम्रमयं वा बृहज्जलपात्रं ।
—वाल, सं. पुं., श्रेष्ठिन् (पुं.), वाणिजश्रेष्ठः ।
कोड़ना, क्रि. स., दे. 'खोदना' ।
कोड़ा, सं. पुं. (सं. कवरं >) प्रतोदः, कपा-शा, प्रतिष्कपः-शः, ताडनरज्जुः (स्त्री.) ।
—मारना, क्रि. स., कशया प्रतोदेन वा प्रह् (भ्वा. प. अ.)-तड् चुद्-दंड् (सब चु.)-आहन् (अ. प. अ.) ।
कोड़ी, सं. स्त्री. (अं. स्कोर) विंशतिः (स्त्री.), विंशतिवस्तुसमुदायः ।
कोढ़, स. पुं., दे. 'कुष्ठ' ।
—में खाज निकलना, मु., रन्ध्रोपनिपातिनोऽनर्थाः, छिद्रेष्वनर्था बहुलीभवन्ति, गण्डे स्फोटकसंजननम् ।

कोढ़ी, वि., दे. 'कुष्ठी'।

कोण, सं. पुं. (सं.) दे. 'कोना'।

कोतल, सं. पुं. (फ़ा.) दर्शनीयघोटकः २. राजाश्वः।

कोतवाल, सं. पुं. (सं. कोटपालः) पुररक्षकः।

कोतवाली, सं. स्त्री. (हिं. कोतवाल) कोट-पाल-पुररक्षक,-कार्यालयः।

कोताही, सं. स्त्री. (फ़ा.) त्रुटिः (स्त्री.), न्यूनता २. प्रमादः।

कोथला, सं. पुं. (हिं. गूथल) बृहत्,-पुटः-कोषः-प्रसेवः २. आमाशयः।

—भरना, मु. उदरं पूर् (चु.)।

कोदंड, सं. पुं. (सं. न.) धनुस् (न.)। (सं. पुं.) भ्रूः (स्त्री.) २. देशविशेषः।

कोदो-दों, सं. पुं. (सं. कोद्रवः) कोरदूषः, कुद्रवः, कुद्दालः।

कोन, सं. पुं., दे. 'कोना'।

कोना, सं. पुं. (सं. कोणः) अस्रः २. कोटिः-अश्रिः-पालिः (स्त्री.) ३. निभृतस्थानं ४. चतुर्थ-भागः।

—दार, वि., अस्रोपेत, कोणविशिष्ट, अस्रिन्।

—कचोना, सं. पुं., प्रत्यस्रं, सर्वे कोणाः।

कोप, सं. पुं. (सं.) क्रोधः, रोषः।

कोपन, वि. (सं.) समन्यु, सरोष, क्रोधिन्।

कोपिनी, वि. स्त्री. (सं.) दे. 'क्रोधिनी'।

कोपी, वि. पुं. (सं.-पिन्) दे. 'क्रोधी'।

कोपीन, सं. पुं., दे. 'कौपीन'।

कोमल, वि. (सं.) मृदु, मृदुक, स्निग्ध, श्लक्ष्ण, मसृण, सुखस्पर्श २. मृदुल, पेलव, सुकुमार, सौम्य ३. अपरिपक्व, अप्रौढ़ ४. मनोहर, अभिराम। (सं. पुं.) स्वरभेदः (संगीत०)।

कोमलता, सं. स्त्री. (सं.) मृदुता, स्निग्धता, सुकुमारता, पेलवता, अपरिपक्वत्वं, मनोहारिता इ.।

कोयल, सं. स्त्री. दे. 'कोकिल' २. लताभेदः।

कोयला, सं. पुं. (सं. कोकिलः) कोकिलः, दग्धकाष्ठं, अङ्गारः।

—लकड़ी का, सं. पुं. काष्ठ,-कोकिलः-अङ्गारः।

—पत्थर का, सं. पुं., प्रस्तर-अश्म,-कोकिलः।

कोया, सं. पुं. (सं. कोणः >) अपांगः-नकः, लघुःकोणः, नयनोत्तान्तः।

कोर, सं. स्त्री. (सं. कोणः) उपांतः, प्रांतः, परिसरः, उपकंठः २. कोणः, अस्रः ३. द्वेषः ४. दोषः, अवगुणः ५. अस्त्रादीनां धारा। ६. पंक्तिः (स्त्री.), श्रेणी-णिः (स्त्री.)।

—कसर, सं. स्त्री. (हिं. + फ़ा. कसर) वैकल्यं, दोषः, छिद्रं, न्यूनता २. न्यूनाधिकता।

कोरक, सं. पुं. (सं.) कलिका, दे. 'कली' २. मृणालं ३. चारनामकगंधद्रव्यम्।

कोरा, वि. (सं. केवल) अभि-, नव, नवीन, नूतन, अव्यवहृत, अप्रयुक्त २. अधौत, अक्षालित ३. अरंजित ४. अचित्रित ४. अलिखित ५. वंचित, रहित, विहीन ६. निष्कलंक ७. मूर्ख ८. निर्धन ९. केवल।

—जवाब, सं. पुं., एकांत-अत्यन्त,-निराकरणं-प्रत्याख्यानं-निषेधः।

—बचना, मु०. अत्यन्तं-नितांतं-मुच्,-विमुच् (कर्म.)।

—रहना, मु. भग्नाश-अकृतार्थ-मनोहत (वि.) स्था (भ्वा. प. अ.)।

—कोरा सुनाना, मु., स्पष्टं वद् (भ्व. प. से.), २. भर्त्स् (चु. आ. से.), आ-अधि,-क्षिप (तु. प. अ.)।

कोरि, वि., दे. 'कोटि'।

कोरी, सं. पुं. (सं. कोलः >) आर्य,-पटकारः-कुविंदः।

कोल[1], सं. पुं. (सं.) शू (सू) करः, किरिः (पुं.) २. उपगूहः, आलिंगनं ३. क्रोडं, अंकः ४. वन्यजातिविशेषः ५. कृष्णमरिचं ६. दे. 'तोला' ७. बदरीफलभेदः ८. दक्षिणदिशि देशविशेषः।

कोल[2], सं. पुं. (अं.) अंगारः, कोकिलः।

—गैस, सं. स्त्री. (सं.) अङ्गारवातिः (स्त्री.)।

—टार, सं. पुं (सं.) कोलतारं, तारकोलम्।

चार—, सं. पुं., काष्ठाङ्गारः।

स्टीम—, सं. पुं., वाष्पाङ्गारः।

कोलाहल, सं. पुं. (सं.) कलकलः, कालकोलः, तुमुलं, उत्क्रोशः, निनादः, विरावः।

—मचाना, क्रि. स., कोलाहलं-कलकलं,-कृ, आ-वि,-क्रुश् (भ्वा. प. अ.)।

कोली, सं. पुं. (सं. कोलः >) तंतुवायः, पटकारः।

कोल्हू, सं. पुं. (हिं. कूल्हा ?) १. चक्रं, तैलपेषणी, तिलपेषणयंत्रं २. इक्षु-रसाल,-पेषणी ।
—का बैल, मु. परम,-उद्यमिन्-उद्योगिन् ।
—में पिरवा देना, मु., अत्यंतं पीड् (चु.)
कोविद, सं. पुं. (सं.) विद्वस् (पुं.), पंडितः ।
कोश, सं. पुं. (सं. कोशः-पः), अभिधानं, शब्दसंग्रहः २. खड्गादेः वेष्टनं-पुटः-कोषः कोशः ३. आवरणं, पुटं, पिधानं, आच्छादनं ४. अंडं, पेशी-शिः (स्त्री.) ५. मंजूषः, संपुटः-टकः ६. कलिका, मुकुलं ७. मद्यपान,-पात्रं-चषकः ८. पुटः-टं, स्यूतः ९. संचितधनं १० समूहः ११. अंडकोषः १२. योनिः (स्त्री.) १३. पट्टकीटगृहम् १४. आत्मनः पंचावेष्टनानि (वेदांत) १५. आकरोत्थं अभिनवं सुवर्णं रजतं वा १६. निधिः (पुं.), निधानं ।
—कार, सं. पुं. (सं.) अभिधान-शब्दसंग्रहः,-कारः-संपादकः २. पट्टकीटः ।
—पाल, सं. पुं. (सं.) कोशा(षा)ध्यक्षः, कोशाधीशः ।
कोशल, सं. पुं. (सं.) देशविशेषः २. अयोध्या ।
कोशागार, सं. पुं. (सं. पुं. न.) कोशगृहं, भांडागारः-रं ।
कोशिश, सं. स्त्री. (फ़ा.) यत्नः, उद्योगः, परिश्रमः ।
कोष, सं. पुं. (सं.) दे. 'कोश' ।
—अध्यक्ष, सं. पुं (सं.) दे. कोष,-पालः-अधीशः ।
कोष्ठ, सं. पुं. (सं.) उदरमध्यं २. गर्भाशयादयः आवरणविशिष्टा अवयवाः ३. गृहमध्यं ४. प्राकारः ५. धान्यागारः-रम् ६. परिवेष्टितस्थानम् ।
—बद्धता, सं. स्त्री. दे. 'कब्ज' ।
कोष्ठक, सं. पुं. (सं.) परिवेष्टकपदार्थः (दीवार, रेखादि) २. सारणी, अनेकगृहयुतं चक्रं, अंक-अक्षर,-जालं ३. अर्द्धचंद्रद्वयं [उ. ( ), [ ], { },] ४. सारणीवर्गः ।
कोस, सं. पुं. (सं. क्रोशः) सहस्रधनुस् (न.), चतुःसहस्र (अष्टसहस्र) हस्तपरिमाणं, द्विसहस्रदंडः, गव्यूतं, मील,-द्वयं-युग्मं ।
कोसों दूर, क्रि. वि., अति,-दूरं-दूरे-दूरतः, सुदूरं ।
कोसों दूर रहना, मु., सुदूरं-पृथ स्था (भ्वा. प. अ.) ।
कोसना, क्रि. स., (सं. क्रोशनं >) आक्रुश् (भ्वा. प. अ.), गर्ह् (भ्वा. आ. से.), अभिशंस् (भ्वा. प. से.), शप् (भ्वा. उ. अ.) ।
पानी पी पी कर कोसना, मु., अत्यंतं आक्रुश् इ. ।
कोह, सं. पुं. (फ़ा.) पर्वतः, गिरिः ।
—नूर, सं. पुं. (फ़ा.+अ.) हीरकविशेषः ।
कोहनी, सं. स्त्री., दे 'कुहनी' ।
कोहरा, सं. पुं., दे. 'कुहरा' ।
कोहान, सं. पुं. (फ़ा.) उष्ट्र-क्रमेलक,-ककुदः-ककुदम् ।
कोहिस्तान, सं. पुं. (फ़ा.) पर्वतीयप्रदेशः, शैली स्थली ।
कोहिस्तानी, वि. (फ़ा.) पर्वतीय, शैल (-ली स्त्री.), पर्वतमय (-यी स्त्री.), नगप्राय, सपर्वत । सं. पुं., पर्वत-गिरि-अद्रि,-वासिन् , शैलाटः ।
कौंच, सं. स्त्री. [सं. कच्छुः (स्त्री.)>] रोमवल्ली, शूकशिंबी, वृष्या, २. तस्याः बीजकोषः ।
कौंची, सं. स्त्री. (सं. कंचिका) वेणुशाखा, कुंचिका ।
कौंध, सं. स्त्री. (हिं. कौंधना >) विद्युद्विलासः, तडिद्द्युतिः, (स्त्री.) चंचलास्फुरणं ।
कौंधना, क्रि. अ. (सं. कननं=चमकना+अंध >)विद्युत् (भ्वा. आ. से.), विद्युत् विलस् (भ्वा. प. से.),-सहसा प्रकाश् (भ्वा.-आ. से.)-स्फुर् (तु. प. से.) ।
कौंधा, सं. पुं., दे. 'कौंध' ।
कौंसिल, सं. स्त्री. (अं.) सभा, संसद्, सदस् (सब स्त्री.) ।
कौआ, सं. पुं. दे. 'कौवा' ।
कौच, सं. पुं. (अं.) खट्टिका, सन्दी, निषद्या, पेचकः ।
कौटिल्य, सं. पुं. (सं.) चाणक्यः, चंद्रगुप्तमौर्यस्य महामंत्रिन् । (सं. न.) वक्रता, कुटिलता २. दुष्टता, छलं, कपटम् ।
कौटुंबिक, वि. (सं.) कुटुंब-गृहजन-परिवार,-बंधिन्-विषयक, कौल, पारिवारिक, गृह्य ।
कौड़ा, सं. पुं. (सं. कपर्दकः) वराटः, बालक्रीडकः ।
कौड़ी, सं. स्त्री. (सं. कपर्दिका) वराटिका, काकिनी-णी । द्रव्यं, धनं २. अक्षि-नयन,-

गोलः-गोलं ४. मांसग्रंथिः (पुं.) ५. कृपाणाग्रं ६. अधीननृपतिभ्यो ग्राह्यः करः ७. उरोऽस्थि (न.)।

(दो)—का,—काम का नहीं, मु. अल्पमूल्य, तृणप्राय, निरर्थक, असार।

—भर, मु., अत्यल्प, किंचिद्, स्वल्प।

——को मुहताज या तंग होना, मु., अकिंचनत्वं, अत्यंतदारिद्र्यं, नितान्तनिर्धनता।

——चुकाना, मु., ऋणं निःशेषं परिशुध् (प्रे.)- अपाकृ।

——जोड़ना, मु., धनं संचि (स्वा. प. अ.)-संग्रह् (क्र. प. से.)।

कानी या फूटी कौड़ी, मु. अत्यल्प,-वित्तंद्रव्यम्।

कौड़ियों के मोल, मु., अत्यल्पमूल्येन।

कौतुक, सं. पुं. (सं. न.) कु(कौ)तूहलं, कुतुकं, जिज्ञासा २. आश्चर्यं ३. विनोदः, नर्मन् (न.) ४. हर्षः ५. खेला, क्रीडा।

कौतुकी, वि. (सं.-किन्) उत्सवी, कौतुकिन्, क्रीडाप्रिय, विनोदप्रिय, नर्मगर्भ।

कौतूहल, सं. पुं., दे. 'कुतूहल'।

कौन, सर्व. (सं. को नु) किं के तीनों लिंगों के रूप (कः, का, किं इ.)।

—कौन, कः कः इ.। दो में से—, कतरः, कतरा, कतरत् (पुं. स्त्री. न.) बहुतों में से—, कतमः, कतमा, कतमत् (पुं. स्त्री. न.)।

कौपीन, सं. पुं. (सं. न.) गलमल्लकः, वटी, वटिका; कच्छा, कच्छटिका, २. गुप्तांगानि ३. पापं ४. अकार्यम्।

क़ौम, सं. स्त्री. (अ.) वर्गः, जातिः (स्त्री.) २. कुलं, वंशः ३. देशः, राष्ट्रं, विषयः।

कौमार, सं. पुं. (सं. न.) कुमारावस्था (५ अथवा १६ वर्षं पर्यंत); बाल्यम्।

क़ौमियत, सं. स्त्री. (अ.) राष्ट्रियता, जातीयता।

क़ौमी, वि. (अ.) राष्ट्रिय, देशीय, जातीय।

—हुकूमत, सं. स्त्री. राष्ट्रियशासनं, स्वराज्यं।

कौमुदी, सं. स्त्री. (सं.) चंद्रिका, दे. चाँदनी।

कौर, सं. पुं. (सं. कवलः) ग्रासः, गुटकः, पिंडः।

कौरव, सं. पुं. (सं.) कुरुवंशजनः।

—पति, सं. पुं. दुर्योधनः।

कौल[1], वि. (सं.) दे. 'कुलीन'।

कौल[2], सं. पुं., दे. 'कौर'।

क़ौल[3], सं. पुं. (अ.) प्रतिज्ञा, समयः २. उक्तिः (स्त्री.)।

कौवा, सं. पुं. (सं. काकः) वायसः, ध्वांक्षः, मौकुलिः (पुं.), एकाक्षः, उलूकारिः (पुं.), करटः, कुणः, द्रोणः २. अलिजिह्वा, शुंडिका, लंबिका ३. धूर्तः ४. वंचकः।

—परी, सं. स्त्री., अतिकुरूपिणी नारी।

—उठाना, मु. बालशुंडिकां उल्लथ (प्रे.)।

कौशल, सं. पुं. (सं. न.) चातुर्यं, दाक्ष्यं, नैपुण्यं २. कुशलं, मंगलम्।

कौशिक, सं. पुं. (सं.) इन्द्रः २. गाधिनृ- ३. विश्वामित्रः ४. कौशाख्यः ५. कौशकारः ६. उलूकः ७. नकुलः ८. कौशेयवस्त्रं ९. मद्या १०. उदुम्बरवृक्षः।

कौशे(शे)य, वि. (सं.) कौशज, कौशिक; सं. पुं. (सं. न.) कौशं, कौशिकं, कुशं-कुशं, कुशलं, कौशवस्त्रं (न.)।

कौशेरु, सं. पुं. (सं.) [illegible] (पुं.)।

क्या, सर्व. (सं. किम्)।

वि. किंवत्, २. अनर्थक ३. कीदृश, किंविध ४. अद्भुतम।

अव्य. किम्।

—कहना है या—बात है, मु., साधु, साधु-साधु, सुष्ठु, उत्तमं (सर्व अव्य.)।

—चीज़, मु., साधु, सुष्ठु इ.।

क्यारी, सं. स्त्री. (सं. केदारः) राजिका।

क्यों, क्रि. वि. (सं. किम्) किं, केन हेतुना-कारणेन, किंनिमित्तं, किमर्थं, कुतः, कस्मात् २. कथं रीत्या, कथम्।

—कर, कथं, केन प्रकारेण २. किमर्थं, किम्।

—कि,—यतः, यद्, यस्मात्।

—नहीं, निःसंदेहं, निःसंशयं, अवश्यं, ध्रुवम्।

क्रंदन, सं. पुं. (सं. न.) रोदनं, रुदितं, अश्रुपातः २. परिदेवनाक्रंदः, आक्रंदितं-क्रोशः।

क्रतु, सं. पुं. (सं.) यज्ञः, याग: २. [illegible] ३. अभिलाषः ४. विवेकः ५. [illegible] ६. विष्णुः ८. आत्मा: ९. [illegible]

क्रम, सं. पुं. (सं.) अनुक्रमः, आनुपूर्वी-र्य्यं, पारंपर्यं, परंपरा, विन्यासः, व्यवस्था, संविधानं, विरचनं २. प्रकारः, विधिः (पुं.) रीतिः (स्त्री.) ३. पादविन्यासः ४. काव्यालंकारभेदः।

——**करके या से,** क्रि. वि., अनुक्रमं, यथाक्रमं, अनुपूर्वशः, आनुपूर्व्येण २. शनैः शनैः, अल्पाल्पशः, उत्तरोत्तरम्।

क्रमशः, क्रि. वि. (सं.) दे. 'क्रम क्रम करके'।

क्रमिक, वि. (सं.) क्रम-परम्परा,-आगत-आयात, अनुपूर्व, क्रमबद्ध, आनुक्रमिक (-की स्त्री.) २. परम्परीय-ण, पैतृक (-की स्त्री.), पित्र्य।

क्रय, सं. पुं. (सं.) दे. 'ख़रीद'।

—विक्रय, सं. पुं., दे. 'ख़रीद-फ़रोख़्त'।

क्रव्य, सं. पुं. (सं. न.) दे. 'मांस'।

क्रव्याद, सं. पुं. (सं.) राक्षसः, पिशाचः २. सिंहः ३. श्येनः ४. मांसाशिन् (पुं.)।

क्रान्ति, सं. स्त्री. (सं.) महत्परिवर्तनं, परिवर्तः, २. चरणन्यसनं ३. सूर्यभ्रमणमार्गः ४. राज,-द्रोहः-विरोधः, राज्यविप्लवः, प्रजाक्षोभः।

क्रिकेट, सं. पुं. (अं.) पट्टगेन्दुकम्।

क्रिया, सं. स्त्री. (सं.) कर्मन् (न.), कार्यं, व्यापारः २. चेष्टा ३. आरम्भः ४. व्यापार-निर्देशकः शब्दः (व्या.) ५. नित्यकर्मन् (न.) ३. श्राद्धादिकर्मन् ७. चिकित्सा।

—कर्म, सं. पुं. (सं. न.) अन्त्येष्टि-मृतक,-क्रिया-कर्मन्।

—विशेषण, सं. पुं. (सं. न.) क्रियाया भाव-कालरीत्यादिद्योतकः शब्दः (व्या.)।

—इन्द्रिय, सं. स्त्री. (सं. न.) दे. 'कर्मेन्द्रिय'

क्रिस्टल, सं. पुं. (अं.) स्फटम्।

क्रिस्ता(स्टा)न, सं. पुं. (अं. क्रिश्चियन्), ख्रिस्तानुयायिन्।

क्रीडा, सं. स्त्री. (सं.) खेला, लीला, कूर्दनं, खेलनं, विहारः २. कौतुकं, विनोदः, विलासः।

क्रीत, वि. (सं.) कृतक्रय, मूल्येन लब्ध।

क्रीतक, सं. पुं. (सं.) क्रीतपुत्रः।

क्रुद्ध, वि. (सं.) कुपित, रुष्ट, कोपिन्, सामर्ष, सकोप, सरोष, समन्यु, क्रोध-कोप,-युक्त।

क्रूर, वि. (सं.) निर्दय, कठोर, नृशंस, पाषाण-कठिन,-हृदय, निर्घृण, क्रूरकर्मन्, निष्करुण २. परपीडक ३. कठिन ४. तीक्ष्ण ५. उष्ण ६. नीच ७. घोर।

—कर्मा, वि. (सं.-र्मन्) घोर, निर्दय, दारुण।

क्रूरता, सं. स्त्री. (सं.) निर्दयता, कठोरता, नृशंसता इ.। २. रौद्रता, तीक्ष्णता ३. दुष्टता।

क्रोड, सं. पुं. (सं. न.) वाह्वोर्मध्यं, भुजांतरं, उपस्थः, उत्संगः, भोगः, अंकः २. उरस्-वक्षस् (न.), उत्सम्।

—पत्र, सं. पुं. (सं. न.) परिशिष्टं, अंकपत्रं, पूरकपत्रम्।

क्रोध, सं. पुं. (सं.) कोपः, रोषः, अमर्षः, मन्युः (पुं.), प्रतिघः, भीमः, क्रुधा, रुषा, रुष्-क्रुध् (स्त्री.) दे. 'गुस्सा'।

क्रोधित, वि. (सं.) दे. 'क्रुद्ध'।

क्रोधी, वि. (सं.-धिन्) कोपिन्, रोषिन्, अमर्षिन्, दे. 'क्रुद्ध'।

क्रोश, सं. पुं (सं.) दे. 'कोस'।

क्रौंच, सं. पुं. (सं.) क्रुंचः-चा, क्रौंचा, क्रुंच् (पुं.), कलिकः, कालि(ली)कः।

क्लब, सं. पुं. (अं.) गोष्ठीगृहम्।

क्लर्क, सं. पुं. (अं.) लिपि-पंजी,-कारः, लेखकः, कायस्थः, वोर(ल)कः।

क्लांत, वि. (सं.) म्लान, खिन्न, परि-,श्रांत, जातखेद, आयस्त।

—मना, वि. (सं.-नस्) दुर्मनस्क, विमनस्क, खिन्न।

क्लांति, सं. स्त्री. (सं.) श्रमः, क्लमः, आयासः, श्रान्तिः (स्त्री.), खेदः, अवसादः।

क्लिष्ट, वि. (सं.) दुःखित, क्लेशित, आर्त, पीडित २. दुष्कर, कठिन, दुरसाध्य।

क्लीव, स. पुं. (सं.) षं (शं) ढः, संढः, शंढः, नपुंसकः, पुरुषत्वहीन २. दे. 'कायर'।

क्लीवता, सं. स्त्री. (सं.) शं(षं)ढता, नपुंसकता २. कातरता।

क्लेद, सं. पुं. (सं.) आर्द्रता, स्तेमः, तेमः। २. प्रस्वेदः।

क्लेश, सं. पुं. (सं.) दुःखं, कष्टं, पीडा, व्यथा, वेदना, चिंता, आस्रवः, आदीनवः।

क्लेशित, वि. (सं.) दे. 'क्लिष्ट' (१)।

क्लैव्य, सं. पुं. (सं. न.) दे. 'क्लीवता'।

क्लोम, सं. पुं. (सं. न.) कोमं, क्लोमन् (न.), तिलकं, फुप्फुसं, दे. 'फेफड़ा'।

क्लोरीन, सं. स्त्री. (अं.) नीरजी, हरिनम्।

क्लोरोफार्म, सं. पुं. (अं.) मूर्च्छकम्, संज्ञालोपकम् (औषधभेदः)।

क्वाथ, सं. पुं. (सं.) दे. 'काढा'।

क्वारंटाइन, सं. पुं. (अं.) निषिद्धसंसर्गगृहं, २. संसर्गप्रतिबन्धः, गमनागमननिषेधः।

क्वारा, वि. (सं. कुमार) दे. कुंवारा।

क्षंतव्य, वि. (सं.) क्षमार्ह, मर्षणीय, सोढव्य।

क्षण, सं. पुं. (सं.) अत्यल्पसमयः, मुहूर्तः, निमेषः, पलं, त्रिंशत्कलापरिमितकालः २. समयः ३. अवसरः ४. उत्सवः।

—प्रभा, सं. स्त्री., विद्युत् (स्त्री.), चंचला।

—भंगुर, वि., विनश्वर, क्षणिक, अस्थिर।

—भर, क्रि. वि., क्षणमात्रं, मुहूर्त-पल,-मात्रम्।

क्षणिक, वि. (सं.) क्षणस्थायिन्, अनित्य, अस्थिर, वि-,नश्वर, निस्सार, अस्थायिन्।

क्षत, वि. (सं.) व्रणित, विद्ध, भिन्नदेह, ताडित, क्षतियुक्त, आहत।
सं. पुं. (सं. न.) व्रणः, क्षतिः (स्त्री.), अरुस् (न.), आघातः, ईर्म २. स्फोटः, पिटकः।

—योनि, वि. स्त्री. (सं.) संभुक्ता, कृतसहवासा।

—विक्षत, वि. (सं.) अतीव व्रणित-विद्ध-आहत।

क्षति, सं स्त्री. (सं.) क्षयः, नाशः २. अपचयः, हानिः (स्त्री.) ३. व्रणः, ईर्मम्।

क्षत्र, सं. पुं. (सं. न.) बलं, शक्तिः (स्त्री.) २. राष्ट्रं ३. धनं ४. शरीरं ५. जलं ६. तगरवृक्षः। (सं. पुं.) क्षत्रियः।

—पति, सं. पुं., नृपः।

क्षत्राणी, सं. स्त्री. (सं. क्षत्रियाणी) (क्षत्रिय जाति की स्त्री) क्षत्रिया, क्षत्रिय(यि)का, क्षत्रियाणी २. (क्षत्रिय की पत्नी) क्षत्रियाणी, क्षत्रियी।

क्षत्रिय, सं. पुं. (सं.) वर्णविशेषः २. राजन्यः, बाहुजः, मूर्द्धाभिषिक्तः, क्षत्रः ३. योधः, भटः, वीरः।

क्षत्री, सं. पुं. दे. 'क्षत्रिय'।

क्षपणक, सं. पुं. (सं.) दिगम्बरयतिः २. बौद्धभिक्षुः ३. कविविशेषः। वि., निर्लज्ज।

क्षपा, सं. स्त्री. (सं.) रात्रिः (स्त्री.), निशा, यामिनी।

—कर,-नाथ, सं. पुं. (सं.) चन्द्रः, सोमः।

क्षम, वि. (सं.) शक्त, समर्थ, उपयुक्त, योग्य।

क्षमता, सं. स्त्री. (सं.) योग्यता, सामर्थ्यं, शक्तिः (स्त्री.)।

क्षमा, सं. स्त्री. (सं.) क्षांतिः (स्त्री.), तितिक्षा, सहिष्णुता, मर्षणं, सहनशीलता २. पृथिवी ३. खदिरवृक्षः ४. दक्षकन्या ५. दुर्गा ६. वेत्रवती नदी ७. राधिकासखी ८. वर्णवृत्तभेदः।

—करना, क्रि. स., क्षम् (भ्वा. आ. वे; दि. प. वे.), सह् (भ्वा. आ. से.), मृष् (दि. उ. से.)।

—शील, वि. (सं.) क्षमिन्, क्षमावत, क्षमित्, सहिष्णु, सहन, क्षन्तृ, तितिक्षु, क्षमायुक्त।

क्षमावान, वि. (सं.-वत्) दे. 'क्षमाशील'।

क्षम्य, वि. (सं.) क्षन्तव्य, क्षमार्ह, क्षमोचित, मर्षणीय, सोढव्य।

क्षय, सं. पुं. (सं.) अपचयः, ह्रासः २. कल्पांतः, प्रलयः ३. नाशः, प्रध्वंसः ४. गृहं ५. यक्ष्मः, यक्ष्मन् (पुं.), राजयक्ष्मन् (पुं.) ६. रोगः ७. अंतः, अवसानं, क्षयरोगः, शोषः, रोगराजः, गदाग्रणीः (पुं.), अतिरोगः, रोगाधीशः, नृपामयः।

—कास, सं. पुं.(सं.) क्षयथुः, यक्ष्मकासः(पुं.)।

—मास, सं पु. (सं.) मलिम्लुचः, मल-अधिक,-मासः।

—रोग, सं. पुं., दे. 'क्षय' (५)।

—रोगी, सं. पुं. (सं.-गिन्) क्षयिन्, यक्ष्मिन्, रोगराज-शोष,-ग्रस्तः।

क्षयी, वि. (सं.-यिन्) अपचयिन्, ह्रासिन् २. शोषिन्, यक्ष्मिन्, रोगराजपीडित।

—रोग, सं. पुं., दे, 'क्षय' (५)।

क्षर, वि. (सं.) नश्वर, अनित्य।

क्षरण, सं. पुं. (सं. न.) शनैः शनैः-विंदुशः-विप्रुट्क्रमेण गलनं-स्यंदनं-स्रवणम्।

क्षांत, वि. (सं.) क्षमाशील, क्षमावत्, क्षमिन् २. सहिष्णु, सहनशील।

क्षांति, सं. स्त्री. (सं.) दे. 'क्षमा' (१)।

क्षार, सं. पुं. (सं.) सर्जिका, विडलवणं २. लवणं ३. दे. 'शोरा' ४. दे. 'सुहागा' ५. भस्मन्(न.)।

क्षिति, सं. स्त्री. (सं.) भूमिः (स्त्री.), पृथिवी २. क्षयः, ह्रासः, नाशः।

—पाल, सं. पुं. (सं.) नृपः।

क्षितिज, सं. पुं. (सं. न.) दिक्,-चक्रं-तटं, दिगंतः, दिङ्मंडलं, अंबरांतः, आकाशकक्षा । २. मंगलग्रहः, कुजः ३. वृक्षः ४. दे. 'केंचुआ'।

क्षिप्त, वि. (सं.) त्यक्त, विसृष्ट, प्रास्त २. विकीर्ण ३. अवज्ञात ४. पतित ५. वातरोगग्रस्त ।

क्षिप्र, क्रि. वि. (सं. न.) द्रुतं, सपदि, द्राक्, दे. 'शीघ्र'।

वि., त्वरित, सत्वर, जवन, वेगवत्, शीघ्र ।

—हस्त, वि. (सं.) शीघ्रकारिन्, आशुकर्तृ ।

क्षीण, वि. (सं.) सूक्ष्म, अ-,तनु, श्लक्ष्ण २. कृशांग, कृश, क्षाम, क्षीण-शुष्क,-मांस ३. नष्ट, ध्वस्त, क्षयंगत ।

क्षीणता, सं. स्त्री. (सं.) दुर्बलता, निःशक्तता २. सूक्ष्मता, तनुता ३. कृशता, क्षामता ४. ह्रासः, अपचयः, नाशः ।

क्षीर, सं. पुं. (सं. न.) दुग्धं, पयस् (न.) २ जलं ३. पायसं-सः ।

—निधि, सं. पुं. (सं.) सागरः ।

—नीर, सं. पुं., आलिंगनं २. मिश्रणम् ।

—सागर, सं. पुं. (सं) क्षीराब्धिः (पुं.), दुग्ध,-सागरः-समुद्रः, क्षीरोदः ।

—सार, सं. पुं., दे. 'मक्खन' ।

क्षीरज, सं. पुं. (सं.) चंद्रः २. शंखः ३. कमलं ४. दधि (न.) ।

क्षीरजा, सं स्त्री. (सं.) दे. 'लक्ष्मी' ।

क्षीरधि, सं. पुं. (सं.) सागरः, समुद्रः ।

क्षीरोद, सं. पुं. (सं.) दे. 'क्षीरसागर' ।

क्षुण्ण, वि. (सं.) प्रहत, चूर्णीकृत, खंडशो भिन्न ।

क्षुद्र, वि. (सं.) अधम, निकृष्ट, नीच २. अल्प, स्तोक ३. कृपण ४. कुटिल ५. दरिद्र ।

क्षुद्रता, सं. स्त्री. (सं.) तुच्छता, निकृष्टता २. कुटिलता ३. दरिद्रता ।

क्षुधा, सं. स्त्री. (सं.) दे. 'भूख' ।

क्षुधातुर,
क्षुधार्त,
क्षुधित, } वि. (सं.) दे. 'भूखा' ।

क्षुप, सं. पुं. (सं.) क्षुपकः, क्षुद्रवृक्षः, गुल्मः-मं ।

क्षुब्ध, वि. (सं.) व्याकुल, विह्वल, आतुर, उद्विग्न २. चंचल ३. भीत, त्रस्त ४. क्रुद्ध ।

क्षुर, सं. पुं. (सं.) नापितस्य लोमछेदकशस्त्रं, क्षौरी, छुरी, खुरः २. शफं-फः, गवादीनां पादाग्रम् ।

क्षेत्र, सं. पुं. (सं. न.) केद (दा) रः, भूमिः (स्त्री.), वप्रः-प्रं । २. समभूमिः ३. उत्पत्तिस्थानं, उद्भवः, उद्गमः ४. प्रदेशः ५. तीर्थस्थानं ६. राशिः (पुं., मेषादि) ७. पत्नी ८. शरीरं ९. अंतःकरणं १० रेखावेष्टितं स्थानम् ।

—गणित, सं. पुं. (सं.) गणितशास्त्राभेदः ।

—फल, सं. पुं. (सं. न.) वर्गपरिमाणम् ।

क्षेत्रज, सं. पुं. (सं.) नियोगजपुत्रः (धर्मशास्त्र) ।

क्षेत्रज्ञ, सं. पुं. (सं.) जीवः २. ईश्वरः ३. कृषाणः । वि., ज्ञातृ, दक्ष, निपुण ।

क्षेप, सं. पुं. (सं.) क्षेपणं, प्रेरणं, प्रासनं, विसर्जनं २. निन्दा ३. यापनं ४. दूरता ।

क्षेपक, वि. (सं.) क्षेप्तृ, प्रासक, प्रेरक २. मिश्रित ३. निन्दनीय । सं. पुं., नाविकः २. प्रक्षिप्त-निवेशित,-लेखः ।

क्षेपण, सं. पुं. (सं. न.) दे. 'क्षेप' (१-३) ।

क्षेपणी, सं. स्त्री. (सं.) अस्त्रविशेषः २. नौकादंडः, क्षेपणिः (स्त्री.) ।

क्षेम, सं. पुं. (सं. पुं. न.) लब्धरक्षणं, प्राप्तरक्षा २. मंगलं, कुशलं ३. अभ्युदयः ४. आनंदः ५. मुक्तिः (स्त्री.) ।

क्षोणि, सं. स्त्री. (सं.) क्षोणी, पृथिवी ।

—पति,—पाल, सं. पुं. (सं.) नृपः, भूपः ।

क्षोद, सं. पुं. (सं) चूर्णं, पिष्टं २. पेषणं ३. जलं ।

क्षोभ, सं. पुं. (सं.) अशांतिः-अनिर्वृतिः (स्त्री.), चित्तचांचल्यं, व्यग्रता, उद्वेगः, व्याकुलता २. भयं ३. शोकः ४. क्रोधः ।

क्षोभित, वि. (सं.) दे. 'क्षुब्ध' ।

क्षोणी, सं. स्त्री. (सं.) क्षोणिः (स्त्री.), पृथिवी ।

क्षौद्र, सं. पुं. (सं. न.) मधु (न.) २. जलं ३. क्षुद्रता । (सं. पुं.) चंपकवृक्षः २. वर्णसंकरविशेषः ।

क्षौम, सं. पुं. (सं. पुं. न.) अट्टः, अट्टालिका (२-४) पट्ट-अतसी-शणज,-वस्त्रं ।

क्षौर, सं. पुं. (सं. न.)
—कर्म, सं. पुं. (सं-र्मन् न.) } दे. 'हजामत' ।

क्षौरिक, सं. पुं. (सं.) दे. 'नाई' ।

क्ष्मा, सं. पुं. (सं.) पृथिवी, अवनी ।

क्ष्वेड, सं. पुं. (सं.) ध्वनिः, शब्दः २. विषं ३. कर्णरोगभेदः ।

ख

ख, देवनागरीवर्णमालाया द्वितीयव्यंजनवर्णः, खकारः।

खं, सं. पुं. (सं. न.) शून्यस्थानं २. छिद्रं ३. आकाशं ४. इंद्रियं ५. बिंदुः (पुं.), शून्यं ६ स्वर्गः ७. सुखं ८. ब्रह्मन् (न.)।

खंख, वि. (सं.) रिक्त, शून्य २. निर्जन, वन्य।

खंखरा, वि., दे. 'खाँखर'।

खँखार, सं. पुं, दे. 'खखार'।

खंगर, सं. पुं. (देश.) एकीभूतोऽतिपक्वेष्टकाचयः। वि., अतिशुष्क।

खँगालना, क्रि. स., (सं. क्षालनं) ईषत् धाव् (भ्वा., चु. उ. से.)-प्रक्षल् (चु.)।

खंज, सं. पुं. (सं.) खोरः, खोलः, खोटः, खोडः, विकलगतिः २. पादरोगभेदः।

खंजन, सं. पुं. (सं.) खंजरीटः, खंजखेलः, मुनिपुत्रकः, रत्ननिधिः (पुं.), गूढनीडः।

खंजर, सं. पुं (फा.) दे. 'कटार'।

खंजरी, सं. स्त्री. (सं. खंजरीट=एक ताल>) लघु,-डमरुः-डिंडिमः।

खंजरीट, सं. पुं (सं.) दे. 'खंजन'।

खंड, सं. पुं. (सं. पुं न.) लवः, शकलः-लं, अंशः, विभागः, वि-,दलं, भिन्नं २. देशः ३. नवसंख्या ४. रत्नदोषभेदः ५. अध्यायः ६. पाक्यः, कृष्णलवणं ७. दिशा। वि., अल्प, लघु, अपूर्ण।

—करना, क्रि. स., खंडशः-लवशः छिद् (रु. प. अ.)-लू (क्र. उ. से.)-कृत् (तु. प. से.)।

—काव्य, सं. पुं. (सं. न.) लघुप्रबन्धकाव्यम्।

—प्रलय, सं. पुं. (सं.) ब्रह्मांडस्य एकदेशीय-आंशिक,-नाशः-विध्वंसः-क्षयः।

खंडन, सं. पुं. (सं. न.) भंजनं, भेदनं, छेदनं, कर्तनं, त्रोटनम् २. प्रत्याख्यानं, निराकरणं, निरसनम्।

खंडनीय, वि. (सं.) भेत्तव्य, छेत्तव्य २. प्रत्याख्येय, निरसनीय।

खंडर, सं. पुं. (सं. खंडः+हिं. घर) ध्वंसावशेषः, जर्जर-जीर्ण-शीर्ण,-गृहं-नगरम्।

खंडरिच, सं. पुं., दे. 'खंजन'।

खंडहर, सं. पुं., दे. 'खंडर'।

खंडित, वि. (सं.) भग्न, त्रुटित, लून, छिन्न २. असमग्र, अपूर्ण।

खंदक़, सं. स्त्री. (अ.) परिखा, खेयं, राजधान्यादिवेष्टनखातं, २. बृहत्,-श्वभ्रं-गर्तः-अवटः।

खंबा, खंभ, खंभा, सं. पुं. (सं. स्कंभः) उप-, स्तंभः, अवष्टंभः, स्थाणुः (पुं.), स्थूणा।

ख, सं. पुं (सं. न.) गर्तः-र्ता, अवटः २. रिक्तस्थानं ३. निर्गमः ४. बिलं, विवरं ५. इन्द्रियं ६. कूपः ७. इषुव्रणः ८. शकटचक्रनाभिच्छिद्रं ९. आकाशं १०. स्वर्गः ११. बिंदुः (पुं.), शून्यं १२. ब्रह्मन् (न.) १३ शब्दः १४ कंण्ठस्थ प्राणनाडी १५ सुखं १६ क्षेत्रं १७ पुरं। (सं. पुं) सूर्यः।

खक्खा[1], सं. पुं. (अनु.) अट्टहासः, उच्चैर्हासः, प्र-अति,-हासः।

खक्खा[2], सं. पुं. (हिं. खत्री का 'ख') पांचनदः क्षत्रियः २. अनुभवी पुरुषः ३. महागजः।

खखार, सं. पुं. (अनु.) कफः, श्लेष्मन् (पुं.), संघातः, सौम्यधातुः (पुं.), घनः।

खखारना, क्रि. अ. (अनु.) कफं निःसृ (प्रे.)-उद्गृ (तु. प. से.), निष्ठिव् (भ्वा. दि. प. से.)।

खखोंडर, सं. पुं. (सं. खं+कोटरः>) तरुकोटर-स्थः-स्थं खगनीडः-डं २. उलूक,-निलयः-कुलायः।

खग, सं. पुं. (सं.) पक्षिन् (पुं.), अंडजः, नीडजः २. गंधर्वः ३. देवः ४. बाणः ५. ग्रहः ६. मेघः ७. सूर्यः ८. चंद्रः ९ वायुः (पुं.)।

—पति, सं. पुं. (सं.) खगेशः, वैनतेयः, गरुडः, खगकेतुः (पुं.), खगराजः।

खगोल, सं. पुं. (सं.) आकाश-गगन,-मंडलं, गगनाभोगः।

—विद्या, सं. स्त्री. (सं.) ज्योतिःशास्त्रं, ज्योतिषं।

खचखच, सं. स्त्री. (अनु.) पंके चलनध्वनिः (पुं.)।

खचना, क्रि. अ. (सं. खचनं) खच्-निवेश्-प्रतिवप् (कर्म.) २ अंकित-चित्रित (वि.)+भू।

खचर, सं. पुं. (सं.) सूर्यः २. मेघः ३. ग्रहः ४. नक्षत्रं ५. वायुः ६. पक्षिन् (पुं.) ७. बाणः ८. राक्षसः। वि. नभश्चर, गगनचारिन्।

खचरा, वि. (हिं. खच्चर) वर्णसंकर, मिश्रज २. दुष्ट, खल ।

खचाखच, क्रि. वि. (अनु.) निबिडं, गाढं, अविरलं, निरंतरं । वि., जनाकीर्ण, जनसंकुल ।

—भरना, क्रि. अ., सं-आ-कृ (कर्म.), परिपू (कर्म.), संकुल-समाकुल (वि.)+भू ।

खचित, वि. (सं.) निवेशित, प्रत्युप्त २. लिखित, चित्रित ।

ख़च्चर, सं. पुं. (देश.) वेगसरः, वेस (श) रः, अश्वतरः (स्त्री. अश्वतरी) ।

ख़ज़ानची, सं. पुं. (फ़ा.) कोष-धन,-अध्यक्षः-अधीशः, अर्थाधिकारिन् ।

ख़ज़ाना, सं. पुं. (अ.) कोशः-षः, निधानं, निधिः (पुं.), द्रव्य,-राशिः (पुं.)-संग्रहः २. वित्तं, द्रविणं ३. कोशागारं, भांडागारं, कोश (ष)गृहम् ।

खजुली, सं. स्त्री. (सं. खर्ज्जूः स्त्री.) दे. 'खुजला' ।

खजूर, सं. पुं. स्त्री. (सं. खर्जूरः) (वृक्ष) खर्जूरी, दुष्प्रधर्षा, दुरारोहा, यवनेष्टा, हरिप्रिया २, (फल) खर्जूरं, खर्जूरीफलम् । ३. मिष्टान्न भेदः, खर्जूरिका ।

खजूरी, वि. (हिं. खजूर) खर्जूर,-विषयक-संबंधिन्, खार्जूर २. वेणीरूपेण ग्रथित,-व्यावर्तित ।

खटक, सं. स्त्री. (अनु.) भयं, त्रासः २. चिंता ।

खट[१], वि. (सं. षट्) दे. 'छः' ।

खट[२], सं. पुं. (अनु.) संघट्टजो ध्वनिः (पुं), खटितिशब्दः, खटखटाशब्दः ।

—से, क्रि. वि., सपदि, झटिति, क्षणेन ।

खटकना, क्रि. अ. (अनु.) खटखटायते (ना. धा.), खटखटा-शब्दं कृ २. मुहुः मुहुः पीड् (कर्म.)-उद्दीप् (दि. आ. से.) ३. अयुक्त-असमीचीन-अनुचित (वि.)+प्रति-इ (कर्म.) ४. भी (जु. प. अ.), त्रस् (दि. प. से.) ५. वैरायते-कलहायते (ना. धा.), विवद् (भ्वा. आ. से.) ६. अनिष्ट-अपकारं आशंक् (भ्वा. आ. से.) ।

खटका, सं. पुं. (हिं. खटकना) खटखटा,-शब्दः-नादः-ध्वनिः २. भयं, त्रासः, आशंका ३. चिंता ४. कीलः-लं ५. अर्गलं, तीलकं ६. पादशब्दः ।

—लगाना, क्रि. अ., त्रस् (दि. प. से.), चिंतित-व्यग्र (वि.)+भू ।

खटकाना, क्रि. स., दे. 'खटखटाना' ।

खटकीड़ा, सं.पुं.(सं. खट्वाकीटः) दे. 'खटमल' ।

खटखट, सं. स्त्री. (अनु.) खटखटा,-शब्दः-ध्वनिः (पुं.)-नादः २. कलहः, विवादः ३. दे. 'झंझट' ।

खटखटाना, क्रि. स. (अनु.) तीव्रं अभिहन् (अ. प. अ.)-तड् (चु.) प्रह (भ्वा. प. अ.), खटखटाशब्दं कृ २. स्मृ (प्रे.) ।

खटगीर, सं. पुं., दे. 'खटमल' ।

खटखटपर, सं. पुं., दे. 'मसहरी' ।

खटना, क्रि. स., दे. 'कमाना' ।

खटपट, सं. स्त्री. (अनु.) कलहः, विवादः २. खटखटाशब्दः, शस्त्र,-घोषः-शिंजितम् ।

खटबुना, सं. पुं. (हिं. खाट+बुनना) खट्वा, वायः-वापः, मंच-पर्यंक,-वायः-वापः ।

खटमल, सं. पुं. (सं. खट्वामलं>) उद्दंशः, मत्कुणः, ओकणः, ओकोदनी ।

खटमीठा, वि. (हिं. खट्टा+मीठा) अम्ल-मधुर, शुक्तमिष्ट ।

खटराग, सं.पुं. (सं. षड्रागाः) मेघदीपकादयः षड्रागाः २. कलहः ३. विस्वरता, विसंवादः ३. व्यर्थवस्तुजातम् ।

खटाई, सं. स्त्री. (हिं. खट्टा) अम्लता, शुक्तता २. अम्लः, द्रावकं ३. अम्ल-शुक्त,-पदार्थः ।

—बढ़ना, सं. पुं., अम्लरोगः (अजीर्णभेदः) ।

—में पड़ना, मु., चिरायते-मन्दायते (ना. धा.), व्याक्षिप् (कर्म.), अनिर्णीत (वि.) स्था (भ्वा. प. अ.) ।

खटाका, सं. पुं. (अनु.) खट्कारः, खटिति शब्दः, महा,-शब्दः-रवः ।

खटाखट, सं. पुं. (अनु.) दे. 'खटखट' १. शिंजितं, क्वणितं । क्रि. वि., सखटखटाशब्दं २. अनवरतं, सपदि ।

खटापटी, सं. स्त्री., दे. 'खटपट'[१] ।

खटाव[१], सं. पुं. (देश.) नौकाबन्धनकीलः-लम् ।

खटाव[२], सं. पुं., दे. 'निर्वाह' ।

खटास[१], सं. पुं. (सं. खट्टासः-शः) गंधमार्जारः, वनेवासनः ।

खटास[२], सं. स्त्री. (हिं. खट्टा) अम्लता, शुक्तता ।

खटिया, सं. स्त्री. (हिं. खाट) लघु,-खट्वा-पर्यंकः-मंचः, खट्विका, खट्वाका ।

खटोलना, सं. पुं., दे. 'खटिया' ।

खटोला, सं. पुं. (हिं. खाट) दे. 'खटिया' ।

खट्टा, वि. (सं. कटु >) अम्ल, शुक्त ।

सं. पुं., बीज-फल,-पूरः, दंतशठः, जम्भकः, जम्भलः, छोलंगः ।

—चूक, वि., अति-अत्यन्त,-अम्ल-शुक्त ।

—मीठा, वि., दे, 'खटमीठा' ।

—सा, वि., ईषदम्ल, आशुक्त ।

जी—होना, मु., गतस्पृह-निर्विण्ण-वितृष्ण (वि.)+भू ।

खट्टास, सं स्त्री. (हिं. खट्टा) दे. 'खटास' (२) ।

खट्टू, सं. पुं. (पं. खटना) धनार्जकः, वित्तोपार्जकः २. कर्म,-करः-कारः ।

खट्वा, सं. स्त्री. (सं.) दे. 'खाट' ।

खड, सं. (सं. खातं) गर्तः-र्ता, अवटः, बिलं, विवरं २. दरी, उपत्यका ।

खड़कना, क्रि. अ. (अनु.) खड़खड़ा शब्दं कृ । दे. 'खटकना' ।

खड़का, सं. पुं., दे. 'खटका' ।

खड़काना, क्रि. स. }
खड़खड़ाना, क्रि. स. } दे. 'खटखटाना' ।

खड़खड़ाहट, सं. स्त्री. (हिं. खड़खड़) खड़खड़ा,-शब्दः-रवः-ध्वानः २. तुमुलरवः ३ कटु-कर्कश-परुष,-ध्वनिः (पुं.) ।

खड़खड़िया, सं. स्त्री. (हिं. खड़खड़) दे. 'पालकी' ।

खड़ग, सं. पुं. (सं. खड्गः) असिः, दे. 'तलवार' ।

खड़गी, वि. (सं. खड्गिन्) आसिकः, खड्ग-धरः २. खड्गमृगः, दे. 'गैंडा' ।

खड़बड़ाहट, सं. स्त्री. दे. 'गड़बड़ाहट' ।

खड़बड़ी, सं. स्त्री. दे. 'गड़बड़ी' ।

खड़मंडल, सं. पुं., दे. 'गड़बड़ी' ।

खड़सान, सं. पुं. दे. 'खरसान' ।

खड़ा, वि. (सं. खटक = खम्भा >) (दंडवत्) स्थित, उत्थित २. उच्छ्रित, उन्नत, उत्तान, ऊर्ध्व, लम्बरूप, खमध्य,-वर्तिन्-वेधिन् ३. स्थिर, अचल, स्तब्ध, निश्चल, निश्चेष्ट ४. उपस्थित, प्रस्तुत ५. सज्ज, संनद्ध, उद्यत ६. निर्मित रचित ७. अपक्व, असिद्ध ८. अनुत्खात, अलून ९. समस्त, समग्र [खड़ी (स्त्री.) = स्थिता इ.] ।

—करना, क्रि. स., 'खड़ा होना' के प्रे. रूप ।

—रहना, क्रि. अ., अचल-रुद्धगति (वि.)+स्था इ.) ।

—होना, क्रि. अ. (पद्धत्यां) स्था (भ्वा. प. अ.), उत्-स्था, २. विरम् (भ्वा. प. अ.), निवृत् (भ्वा. आ. से.), स्तंभ् (कर्म.), स्थिरी-निश्चली,-भू ३. उपकृ, साहाय्यं कृ ४. उच्छ्रित-उन्नत-उत्तान (वि.)+भू ५. निर्मा-विरच् (कर्म.) ६. निधा-निवेश् (कर्म.) ।

खड़े-खड़े, क्रि. वि., स्थित एव २. झटिति, सपदि, सद्यः (सव अव्य.) ।

खड़ाऊँ, खड़ाँव, सं. स्त्री. (अनु. खड़+हिं.+पाँव) कोशी-षी, (काष्ठ-) पादुका ।

खड़ाका, सं. पुं. (अनु.) खडखडा,-शब्दः-ध्वानः ।

खड़िया, सं. स्त्री. (सं. खडिका) खडी, कठिनी दे. 'चाक' ।

खड़ी, सं. स्त्री. (सं. खडी) दे. 'खड़िया' ।

खड्ग, सं. पुं. (सं.) दे. 'खड़ग' ।

खड्गी, सं. पुं. तथा वि., (सं. खड्गिन्) दे. 'खड़गी' ।

खड्ड, खड्ढा, सं. पुं. (सं. खातं) दे. 'खड'[१]

खड्डी, सं. स्त्री. (सं. खात >) तन्त्रवापः-पं, वाय(प) दण्डः, वेमः, वेमन् (पुं. न.), वान-दण्डकः, वाणिः (स्त्री.) ।

खत, सं. पुं. (अ.) संदेश,-पत्रं,-लेख्यं,-लेखः २. हस्तलेखः, स्वहस्ताक्षरं ३. अक्षरसंस्थानं, लिखितं, लिपिः-विः (स्त्री.) ४. रेखा, लेखा, रेपा ५. मुखरोमन् (न.), श्मश्रु (न.), कूर्च ६. क्षौरं मुण्डनम् ।

—आना, क्रि. अ., प्रथमतः मुखरोमाणि उद्भू ।

—खींचना, क्रि. स., रेखां आ-अभि-लिख् (तु. प. से.) ।

—बनाना, क्रि. स., मुंड् (भ्वा. प. से., चु.) क्षुरेण कृत् (तु. प. से.)-छिद् (रु. प. अ.)-लू (क्र्. उ. से.) ।

—किताबत, सं. स्त्री., (अ.) पत्र,-व्यवहारः-विनिमयः ।
—शिकस्ता, सं. पुं. (अ.+फ़ा.) वक्रलेखः ।
ख़तना, सं. पुं. (अ.) शिश्नत्वक्छेदः (इस्लाम) ।
ख़तम, वि. (अ. ख़त्म) समाप्त, पूर्ण ।
—करना, मु., मृ (प्रे.), हन् (अ. प. अ.) ।
—होना, मु., मृ (तु. आ. अ.) ।
ख़तर, सं. पुं. (अ.) दे. भयं, त्रासः ।
—नाक, वि. भयानक, भयङ्कर ।
ख़तरा, सं. पुं. (अ.) भयं, भीतिः (स्त्री.), दे. 'भय' २. संशयः, संदेहः ।
ख़तरानी, सं. स्त्री., दे. 'क्षत्राणी' ।
ख़ता, सं. स्त्री. (अ.) अपराधः, दोषः २. छलं वञ्चना ३. प्रमादः, स्खलितम् ।
—वार, वि. (अ.+फ़ा.) अपराधिन्, दोषिन् ।
ख़तियाना, क्रि. स. (हिं. खाता) आयव्यय-पञ्जिकायां यथास्थानं लिख् (तु. प. से.)
ख़तियौनी, सं. स्त्री. (हिं. खतियाना) (बृहत्) आयव्ययपञ्जिका २. तत्र यथास्थानं लेखः ३. क्षेत्रपतिसूचीपत्रम् ।
ख़त्ता, सं. पुं. (सं. खातं) अवटः, गर्तः २. धान्यागारं-रः ३. निधिः (पुं.) ४. राशिः (पुं.) ।
ख़त्म, वि., दे. 'ख़तम' ।
ख़त्री, सं. पुं. (सं. क्षत्रियः) पंचनदप्रांते आर्याणामुपजातिविशेषः २. दे. 'क्षत्रिय' ।
ख़दबदाना, क्रि. अ. (अनु.) बुद्बुदायते (ना. धा.[1]) मन्दं कथ् (कर्म.), दे. 'उबलना' ।
ख़दशा, सं. पुं. (अ.) भयं, आशंका ।
ख़दान, सं. स्त्री., दे. 'खान' ।
ख़दिर, सं. पुं. (सं.) सारद्रुमः, कुष्ठारिः (पुं.), गायत्री, दंतधावनं, बाल,-तनयः-पत्रः, यज्ञांगः, सुशल्यः, वक्रकंटः । २. दे. 'कत्था' ३. चन्द्रः ४. इन्द्रः ।
ख़देड़, सं. स्त्री. (हिं. खेदना) अनुधावनं, खेटनं, आच्छोदनम् ।
ख़देड़(र)ना, क्रि. स. (हिं. खेदना) नि-अप-सृ (प्रे.), वहिष्कृ, निष्कस्-निर्वस् (प्रे.) २. अनुगम्, अनुधाव् (भ्वा. प. से.), मृग् (चु. आ. से.) ।
ख़द्योत, सं. पुं. (सं.) प्रभाकीटः, दे. 'जुगनूँ' २. सूर्यः ।
ख़नक, सं. पुं. (सं.) उंदुरुः (पुं.), मूष(षि)कः २. संधितस्करः ३. अवदारकः, खातकः ४. आकरः, ख(खा)निः-नी (स्त्री.) ५. भूत-त्ववेत्तृ (पुं.) । सं. स्त्री. (अनु.), क्वणितं, शिंजितम् ।
ख़नकना, क्रि. अ. (अनु.) शिंज् (अ. आ. से., चु.), क्वण् (भ्वा. प. से.), झणझणायते-खणखणायते (ना. धा.) ।
ख़नकाना, क्रि. स., 'खनकना' के प्रे. रूप ।
ख़नखनाना, क्रि. अ. तथा क्रि. स., दे. 'खनकना' तथा 'खनकाना' ।
ख़निज, वि. (सं.) धातुः (पुं.), आकरजः पदार्थः ।
ख़नित्र, सं. पुं. (सं. न.) अवदारणम् ।
ख़पची, सं. स्त्री., दे. 'खपाच' ।
ख़पत, ख़पती, सं. स्त्री. (हिं. खपना) समावेशः, व्याप्तिः (स्त्री.) २. विक्रयः, पणनं ३. व्ययः, विनियोगः ।
ख़पना, क्रि. अ. (सं. क्षपणं >) प्र-उप,-युज् (कर्म.), व्यवह्-व्याप्ट (कर्म.) २. क्षि-परिहा (कर्म.), नश् (दि. प. से.) ३. क्लिश्-संतप्-पीड् (कर्म.) ।
ख़पड़ा(रा), सं. पुं. (सं. खर्परः) १. कर्परः २. मृत्पट्टिका ३. भिक्षापात्रम् ।
ख़पड़ी(री), सं. स्त्री.(सं. खर्परः) धान्यभर्जनार्थं मृत्पात्रम् ।
ख़परै(ड़ै)ल, सं. स्त्री. (हिं. खपड़ा) मृत्पट्टिकाभिः खर्परैः वा आच्छादितं पटलं २. तादृशपटलयुक्तं गृहम् ।
ख़पाच, सं. स्त्री. (तु. कमची) (काष्ठ-) खंडः-डं, वंशस्य शकलः-लं, २. अतिकृशः पुरुषः ।
ख़पाना, क्रि. स. (हिं. खपना) प्र-उप,-युज् (रु. आ. अ., चु.), उपयुज्य-उपभुज्य निरवशेषीकृ, व्यवह्-व्याप्ट (प्रे.) २. व्यय्-विनियुज् (चु.) ३. वि,नश् (प्रे.) ४. संतप्-पीड् (प्रे.) ।
ख़पुर, सं. पुं. (सं. न.) गगनस्थो दैत्यनगर-विशेषः २. गगनस्था हरिश्चन्द्रनगरी ।

ख़पुष्प, सं. पुं. (सं. न.) गगनकुसुमं, असंभवं-असाध्यं वस्तु (न.), शश,-विषाणं-शृंगम् ।

ख़प्पर(ड़), सं. पुं. (सं. खर्परः) मृत्पात्रभेदः २. काल्याः रुधिरपानपात्रं ३. भिक्षाभाजनं ४. कपालः-लम् ।

ख़फ़क़ान, सं. पुं. (अ.) हृत्कम्पनं २. (हिस्टीरिया) गर्भाशयोन्मादः, वातोन्मादः, हर्षमोहः ।

ख़फ़गी, सं. स्त्री. (अ.) प्रसाद-प्रीति,-अभावः २. कोपः, क्रोधः ।

ख़फ़ा, वि. (अ.) रुष्ट, कुपित, क्रुद्ध २. विषण्ण ।

ख़फ़ीफ़, वि. (अ.) अल्प, न्यून २. लघु ३. क्षुद्र ४. लज्जित ।

ख़बर, सं. स्त्री. (अ.) समाचारः, उदंतः, वृत्तांतः वृत्तं, वार्ता, प्रवृत्तिः (स्त्री.) २. ज्ञानं, बोधः ३. संदेशः ४. संज्ञा, चैतन्यं ५. जनप्रवादः ।

—करना, देना या पहुँचाना, क्रि. स., विज्ञा (प्रे.), नि-आ-विद् (प्रे.), संदिश् (तु. प. अ.), बुध्-अवगम् (प्रे.) ।

—लगाना, क्रि. स., दे. 'ढूंढ़ना' ।

—देने वाला, सं. पुं., विज्ञापकः, आवेदकः, सूचकः ।

—ले जाने वाला, सं. पुं. दूतः, वार्ता-संदेश,-हरः ।

ख़बरगीरी, सं. स्त्री. (अ.+फ़ा) अवेक्षा, रक्षणं, चिंता २. सहानुभूतिः (स्त्री.), सहायता ।

ख़बरदार, वि. (अ.+फ़ा.) दे. 'सावधान' ।

ख़बरदारी, सं. स्त्री. (अ.+फ़ा.) दे. 'सावधानता' ।

ख़बीस, सं. पुं. (अ.) भयंकरः खलः ।

ख़ब्त, सं. पुं. (अ.) उन्मादः, चित्त,-विप्लवः-भ्रमः २. उत्सूत्रता, सामान्यविरोधः ।

ख़ब्ती, वि. (अ.) उन्मादिन् २. उत्सूत्र, लोकबाह्य ।

ख़ब्बा, वि. (पं., सं. खर्व >) वाम, सव्य, दक्षिणेतर २. वामहस्त, सव्यसाचिन् ।

ख़म, सं. पुं. (फ़ा.) वक्रता, नमिता, आभुग्नता २. कुटिलता ।

—दम, सं. पुं., शौर्यं, विक्रमः ।

—दार, वि., आनमित, आभुग्न, कुञ्चित ।

ख़मीर, सं. पुं. (अ.) किण्वः, जगलः, मासरः, मेदकः, कारोत्तरः, नग्नहूः (पुं.) ।

—उठाना, क्रि. स. किण्वेन संमिश्र् (चु.) । सं. पुं. किण्वनं, किण्वीकरणं ।

ख़मीरा, वि. (अ.) किण्व-जगल,-मिश्रित २. घनमधुकाथः ३. तमाखुभेदः ।

ख़यानत, सं. स्त्री. (अ.) सकपटापहरणं, दुर्विनियोगः २. चौर्यं, वंचना ।

—करना, क्रि. स. कपटेन आत्मसात् कृ अथवा विनियुज् (रु. आ. अ.) ।

ख़याल, सं. पुं. दे. 'ख्याल' ।

ख़याली, वि., दे. 'ख्याली' ।

ख़र, सं. पुं. (सं.) गर्दभः, रासभः २. अश्वतरः, वेसरः ३. वकः ४. काकः ५. रावणभ्रातृ (पुं.) ६. तृणं, घासः ।

वि., कठोर, कर्कश, कीकस २. तीक्ष्ण ३. स्थूल ४. अमंगल, अमांगलिक ५. निशित ६. प्रवण, तिर्यच् ।

ख़र, सं. पुं. (फ़ा.) गर्दभः, रासभः ।

—दिमाग़, वि., जड, अज्ञ, खरमति ।

ख़रख़र, सं. स्त्री. (अनु.) घर्घरः, घर्घर,-रवः-शब्दः ।

—करना, क्रि. स., घर्घरायते (ना. धा.), घर्घरध्वनिं कृ ।

ख़रख़रा, वि., दे. 'खुरखुरा' ।

ख़रगोश, सं. पुं. (फ़ा.) शशः, शशकः, शूलिकः मृदुरोमन् (पुं.), रोमकर्णः ।

ख़रच, सं. पुं., दे. 'ख़र्च' ।

ख़रचना, क्रि. स. (फ़ा. ख़र्च) व्यय् (चु.), उत्-वि,-सृज् (तु. प. अ.), विनियुज् (रु. आ. अ., चु.), क्षयं-व्ययं,-कृ ।

ख़रचा, सं. पुं. दे. 'ख़र्चा' ।

ख़रज, सं. पुं. दे. 'षड्ज' ।

ख़रब, वि. (सं. खर्वन्) सं. पुं., अर्बशतकम् (१००००००००००) २. अर्बदशकम् (१००००००००००) ।

ख़रबूज़ा, सं. पुं. (सं. खर्बूज) दशांगुल, षट्,-भुजा-भुज-रेखा-मुखा, वृत्तफलटी ।

ख़रमस्ती, सं. स्त्री. (फ़ा.) दुष्टता, कुचेष्टा ।
खरमास, सं. पुं., दे. 'खरवाँस' ।
खरल, सं. पुं. (सं. खल्लः) उदू(लू) खलं, औषधमर्दनभाजनम् ।
—करना, क्रि. स. चूर्ण् (चु.), चूर्णीकृ, पिष् (रु. प. अ.), क्षुद् (रु. उ. अ.) ।
खरवाँस, सं. पुं. (सं. खरमासः >) पौषचैत्रौ । (इनमें मांगलिक कार्य वर्जित हैं) ।
खरसान, सं. स्त्री. (सं. खरशाणः) शाण-शार्णी,-भेदः ।
खरहरा, सं. पुं. (हिं. खर = तिनका + हरना) अश्वमार्जनी ।
—करना, क्रि. स., अश्वं मृज् (अ. प. वे.)
खरहा, सं. पुं., दे. 'खरगोश' ।
खरही, सं. स्त्री. (हिं. खर = घास) (घासादेः) राशिः (पुं.) २. घासभेदः ।
खरा, वि. (सं. खर = तीक्ष्ण) तिग्म, तीक्ष्ण २. अमिश्रित, अविकृत, स्वच्छ, विशुद्ध, पवित्र, उत्तम ३. भंगुर, भिदुर ४. निष्कपट, निश्छल ५. स्पष्ट-यथार्थ,-वादिन्-वक्तृ ६. भूरि, बहु ६. कठिन, कीकस । खरी (स्त्री.), विशुद्धा इ. ।
—खेल, सं. पुं. निष्कपटव्यवहारः, सरलाचरणं ।
—पन, सं. पुं. विशुद्धता, पवित्रता, उत्तमता, ऋजुता, निष्कपटता इ. ।
खराई, सं. स्त्री. दे. 'खरापन' ।
ख़राद, सं. पुं. (अ. खर्रात से फ़ा. खर्राद) भ्रमयंत्रं, कुंदः-दं, भ्रमः, भ्रमिः (स्त्री.), चक्रं, यंत्रकम् ।
ख़रादना, क्रि. स. कुन्देन संस्कृ. ।
ख़रादी, सं. पुं. (फ़ा. ख़र्राद) कुंदिन्, चक्रिन् ।
ख़राब, वि. (अ.) निकृष्ट, गर्ह्य, निंद्य, हीन २. दीन, दुर्गत ३. पतित, च्युत ४. दुष्ट, पापिन् ।
—करना, क्रि. स. मलिनी-कलुषी-आविली,-कृ २. सत्पथात् भ्रंश् (प्रे.), कुमार्गे प्रवृत् (प्रे.) ।
ख़राबी, सं. स्त्री. (अ.) दोषः, अवगुणः २. दुष्टता, नीचता ३. दुर्दशा, दुर्गतिः (स्त्री). ।
खरारि(री), सं. पुं. (सं.-रिः पुं.) रामचंद्रः २. श्रीकृष्णः ३. विष्णुः ।
ख़राश, सं. स्त्री. (फ़ा.) दे. 'खरोंच' ।
खरिया, सं. स्त्री., दे. 'खड़िया' ।
खरिहान, सं. पुं., दे. 'खलियान' ।
ख़रीद, सं. स्त्री. (फ़ा.) क्रयः, मूल्येन ग्रहणं २. क्रीतपदार्थः ।
—व फ़रोख़्त, सं. स्त्री. (फ़ा.) क्रय-विक्रयौ (द्वि.) ।
ख़रीदना, क्रि. स. (फ़ा. ख़रीदन) क्री (क्र्. उ. अ.), मूल्येन अधिगम् अथवा लभ् (भ्वा. आ. अ.) ।
ख़रीदार, सं. पुं. (फ़ा.) क्रयिकः, क्रेतृ (पुं.), ग्राहकः २. इच्छुकः, अभिलाषिन् (पुं.) ।
ख़रीदारी, सं. स्त्री. (फ़ा.) क्रयः, मूल्येनादानं ।
ख़रीफ़, सं. स्त्री. (अ.) शारदं-शारदीयं-शरत्कालीनं शस्यं ।
खरोंच, सं. स्त्री. (सं. क्षुर् = खुरचना >) ईषत्क्षतं, त्वग्व्रणः ।
खरोंचना, क्रि. स. (पूर्व.) खुर-क्षुर् (तु. प. से.) वि-अव-दृ (प्रे.), (नखेन) क्षण् (त. उ. से.)-अंक् (चु.)-लिख् (तु. प. से) ।
खरोट, सं. स्त्री., दे. 'खरोंच' ।
खरोटना, क्रि. स. दे. 'खरोंचना' ।
ख़र्च, सं. पुं. (अ. ख़र्ज) व्ययः, धन,-त्यागः-व्ययः-उत्सर्गः, विनियोगः २. मूल्यं, अर्घः, अर्हा ।
—करना, क्रि. स. दे. 'ख़रचना' ।
—होना, क्रि. अ., व्यय्-विसृज्-विनियुज् (सव कर्म.) क्षयं-व्ययं या (अ. प. अ.) ।
ख़र्चना, क्रि. स. दे. 'ख़रचना' ।
ख़र्चा, सं. पुं. (अ. ख़र्ज) दे. 'ख़र्च' २. अभियोग-कार्य-व्यवहारपद,-व्ययः ।
ख़र्चीला, वि. (हिं ख़र्च) व्ययशील, अतिव्ययिन्, अमितव्यय ।
खर्जूर, सं. पुं. (सं.) दे. 'खजूर' २. वृश्चिकः, द्रोणः । (सं. न.) रजतं २. दे. 'हरताल' ।
खर्पर, सं. पुं. (सं.) दे. 'खप्पर' ।
खर्ब, सं. पुं., दे. 'खरव' २. दे. 'खर्व' ।
खर्बूज़ा, सं. पुं., दे. 'ख़रबूज़ा' ।
खर्राटा, सं. पुं. (अनु.) घर्घरः ।
—भरना, मारना या **लेना,** क्रि. अ., घर्घरायते, घर्घरशब्दं कृ, प्रगाढं स्वप् (अ. प. अ.) ।

खल, वि. (सं.) क्रूर, नृशंस २. अधम, नीच ३. दुष्ट, दुर्वृत्त ४. पिशुन ५. निर्लज्ज ६. छलिन्।
सं. पुं., दुर्जनः २. सूर्यः ३. तमालवृक्षः ४. पृथिवी ५. स्थानं ६. उलू (दू) खलं ७.-८. दे. 'खलियान' तथा 'तलछट'।

ख़ल्क़, सं. पुं. (अ.) जीवाः-प्राणिनः (बहु.) २. जगत् (न.), संसारः।

ख़ल्क़त, सं. स्त्री. (अ.) सृष्टिः (स्त्री.), संसारः २. जनौघः, जनसंमर्दः।

खलड़ी, सं. स्त्री. (हिं. खाल) त्वच् (स्त्री.), त्वचा, त्वचं, त्वचस् (न.), छदिस् (स्त्री.), संछादनी, असृग्धरा २. (पशुओं की) चर्मन् (न.) ३. (मरे पशुओं की) अजिनं, दृतिः, कृत्तिः (स्त्री.) ४. शिश्नाग्रचर्मन् (न.)।

खलता, सं. स्त्री. (सं.) कुचेष्टा, दुष्टता, दुर्वृत्तता, खलत्वम्।

खलना, क्रि. अ. (सं. खर = तीक्ष्ण >) अनुचित-अयुक्त-अयोग्य-अनुपपन्न (वि.) प्रतिभा (अ. प. अ.)-दृश् (कर्म.)।

खलबल, सं. स्त्री. (अनु.) क्षोभः, विप्लवः, अशांतिः-अनिर्वृतिः (स्त्री.), प्रकोपः, कलहः, २. कोलाहलः, उत्क्रोशः ३. दे. 'कुलबुलाहट'।

खलबलाना, क्रि. अ. (हिं. खलबल) बुद्बुदायते (ना. धा.), दे. 'उबलना' २. क्षुभ् (दि. प. से., क्र. प. से.), क्षुब्ध-विह्वल (वि.)+भू ३. दे. 'कुलबुलाना'।

खलबली, सं. स्त्री., दे. 'खलबल'।

ख़लल, सं. पुं (अ.) विघ्नः, अंतरायः, बाधा।

ख़लास, सं. पुं. (अ.) मोक्षः, मुक्तिः (स्त्री.), उद्धारः। वि., मुक्त, उद्धृत, निस्तीर्ण २. अवसित, समाप्त।

ख़लासी, सं. स्त्री. (अ.) उद्धारः, निस्तारः, मोक्षः। सं. पुं., पटमंडपरोपकः २. भारवाहः ३. पोतभृत्यः।

खलियान, सं. पुं. (सं. खल+स्थान) खलाधानं, खलः-लं २. धान्यागारं, कुशूलः ३. राशिः (पुं.), चयः।

खलियाना[1], क्रि. स. (हिं. खाल) निस्त्वचयति (ना. धा.), निस्त्वचीकृ, चर्मन् (न.) अपनी-निर्हृ (दोनों भ्वा. उ. अ.)।

खलियाना[2], क्रि. स. (हिं. खाली) शून्यी-रिक्तीं,-कृ, रिच् (रु. उ. अ.)।

खलिहान, सं. पुं., दे. 'खलियान'।

खली-ल्ली, सं. स्त्री. (सं. खली) तैलकिट्टं, तिलकल्कं, पिण्याकः, खलिः (पुं.)।

ख़लीज, सं. स्त्री. (अ.) दे. 'खाड़ी'।

ख़लीफ़ा, सं. पुं. (अ.) अध्यक्षः, अधिकारिन् २. यवननृपवंशविशेषः ३. वृद्धजनः ४. सूदः, पाचकः ५. सौचिकः, सूचिकः ६. नापितः।

खलेल, सं. पुं. (सं. खलितैलं) सुगन्धतैल-किट्टम्।

ख़ल्क़, सं. स्त्री., दे. 'ख़लक'।

खल्ल, सं. पुं. (सं.) दे. 'खरल' २. चर्मन् (न.) ३. गर्तः ४. चातकः ५. दृतिः (स्त्री.)।

खल्ला, सं. पुं. (सं. खल्लः = चमड़ा >) जीर्णोपानह् (स्त्री.), पुराणपादत्रम्।

खल्लि(ल्ली)ट, खल्वाट, वि. (सं.) दे. 'गंजा'। सं. पुं. दे. 'गंजापन'।

खवा, सं. पुं., दे. 'कंधा'।

खवैया, सं. पुं. (हिं. खाना) भक्षकः, खादकः, भोक्तृ (पुं.)।

ख़श, सं. पुं., दे., 'ख़स'।

ख़शख़श(ख़ा)श, सं. पुं., दे. 'खसखस'।

खस, सं. स्त्री. (फ़ा. ख़स) उशीरः-रं, नलदं, जलवासं, वीरणमूलं, सेव्यं, शीत-सुगन्धि,-मूलकं, वीरं, वीरभद्रं, हरिप्रियम्।

खसकना, क्रि. अ. (अनु.) दे. 'खिसकना'।

खसकाना, क्रि. स., दे. 'खिसकाना'।

खसखस, सं. स्त्री. (सं. खस्खसः) खसतिलः, सूक्ष्म,-तंडुलः-बीजः, सुबीजः।

—रस, सं. पुं. (सं.) दे. 'अफ़ीम'।

खसखसा, वि. (अनु.) शुष्कचूर्णरूप, सिकतिल, शर्करिल।

खसखास, सं. स्त्री., दे. 'खसखस'।

ख़सम, सं. पुं. (अ.) पतिः (पुं.), भर्तृ (पुं.) २. स्वामिन् (पुं.), सेव्यः, नाथः।

ख़सरा[1], सं. पुं. (अ.) क्षेत्रसूची, केदार-लेख्यम्।

ख़सरा[2], सं. पुं. (फ़ा. ख़ारिश) रोमान्तिका, त्वग्रोगभेदः २. खर्जू-कंडूति,-भेदः।

खसलत, सं. स्त्री. (अ.) प्रकृतिः (स्त्री.), स्वभावः, २. दे. 'आदत'।

खसिया, वि. (अ. ख़स्सी) लुप्तवृषण, छिन्न-मुष्क। सं. पुं., छीवः, पंढः २. अजः।

खसोट, सं. स्त्री. (हिं. खसोटना) बलात्-अकस्मात्-सहसा ग्रहणं-अपहरणं-आच्छेदनं २. बलात् उत्पाटनं-उन्मूलनम्।

खसोटना, क्रि. स. (सं. कृष्ट>) असम्यक् उन्मूल्-उत्पट् (चु.)-कृप् (भ्वा. प. अ.) २. बलात्-सहसा अपहृ (भ्वा. उ. अ.)-आच्छिद् (रु. प. अ.)-ग्रह् (क्र्. उ. से.)।

खसोटी, सं. स्त्री., दे. 'खसोट'।

ख़स्ता, वि. (फ़ा. ख़स्तः) भिदुर, भंगुर, भिदेलिम २. क्षत, त्रुटित।

—कचौड़ी, सं. स्त्री., भिदुर-स्निग्ध,-सुपिष्टिका-शष्कुली।

—दिल, वि. भग्न,-चित्त-हृदय।

—हाल, वि., दुर्गत, दरिद्र, दुःखित।

खस्सी, सं. पुं. (अ.) छिन्नमुष्कः अजः-छागः २. षंढः, छीवः। वि., लुप्तवृषण, छिन्नमुष्क।

—करना, क्रि. स., वृषणौ छिद् (रु. प. अ.)-उत्पट् (चु.)।

खाँ, सं. पुं. (तातारी, काङ=सरदार) स्वामिन् (पुं.), अधीशः २. पठानजातेः उपाधिः (पुं.)।

—साहब,-बहादुर, सं. पुं., उपाधिभेदौ।

खांखर, वि. (सं. खं=छिद्र>) सच्छिद्र, सरंध्र २. रिक्त-शून्य,-गर्भ, अंतःशून्य।

खांगड़-ड़ा, वि. (सं. खड्गः>) शृंगिन्, विषाणिन् २. सशस्त्र ३. सबल १. उद्दण्ड।

खाँचा, सं. पुं. (सं. कर्षणम्>) महा-,पेटकः-करंडः-कंडोलः २. बृहत्,-पंजरः-पंजरम्।

खांड़, सं. स्त्री. (सं. खण्डम्) अशोधित-असंस्कृत,-सिता-शर्करा।

खाँड़ा[1], सं. पुं (सं. खड्गः>) द्विधार-, खड्गः-असिः-निस्त्रिंशः-कृपाणः।

खांडा[2], सं. पुं. (सं. खंडः-डं) भागः, अंशः।

खाँसना, क्रि. अ. (सं. कासनं) कास् (भ्वा. प. से.), क्षु (अ. प. से.)।

खाँसी, सं. स्त्री. (सं. कासः) कासः, उत्कासः, क्षवथुः (पुं.)।

खाई, सं. स्त्री. (सं. खानिः>) परिखा, खातं, खातकम्।

खाऊ, वि. (हिं. खाना) अत्याहारिन्, बहु-भोजिन्, अघर, घस्मर।

—उड़ाऊ, वि., मुक्तहस्त, अर्थनाशिन्।

खाक, सं. स्त्री. (फ़ा.) धूलिः (पुं. स्त्री.), धूली, पांशुः-सुः, रजस् (न.), रेणुः २. भस्मन् (न.), भसितं, भूतिः (स्त्री.)।

—रोब, सं. पुं., खलपूः (पुं.), संमार्जकः।

—सार, वि., नम्र, विनीत।

—सारी, सं. स्त्री., नम्रता, विनयः।

ख़ाका, सं. पु. (फ़ा.) बाह्यरे(ले)खा, बाह्याकारः २. अपरिष्कृतालेख्यं, पांडुलेख्यं ३. प्रतिरूपं, प्रतिमानं ४. संकलनं, संख्यानम्।

—उड़ाना, मु., उप-अव,-हस् (भ्वा. प. से.)।

ख़ाकी, वि. (फ़ा.) मार्तिक, मृण्मय २. धूलि-रजो,-वर्ण-रंग ३. सं. स्त्री., जलहीन-अनासिक्त,-भूमिः (स्त्री.)।

खाज, सं. स्त्री. [सं. खर्जुः (पुं.)] खर्जूः (स्त्री.), कंडूः-कंडूतिः (स्त्री.), खसः, पामा, विचर्चिका।

—होना, क्रि. अ., कंडूतिं-खसं अनुभू।

कोढ़ की खाज, मु., क्षते क्षारं, गंडे स्फोटकः।

खाजा, सं. पुं. (सं. खाद्यं) भक्ष्य-भोज्य-खाद्य,-वस्तु (न.)-पदार्थः २. भोजनं ३. मिष्टान्नभेदः।

खाट, सं. स्त्री. (खाटः>) खट्वा, शयनम्।

—खटोला, सं. पुं. गृह,-उपस्करः-परिच्छदः, पारिणाह्यम्।

ख़ाड़ी, सं. स्त्री. (सं. खातं>) समुद्र, वंकः, अखातः-तम्।

खात, सं. पुं. (सं. न.) खननं, अवदारणं २. परिखा, खातं, खातकं ३. गर्तः ४. कूपः ५. कासारः ६. पुरीषादिगर्तः।

खातमा, सं. पुं. (फ़ा.) समाप्तिः (स्त्री.) २. मृत्युः।

खाता[1], सं. पुं. (अ. ख़त>) गणना-संख्यान,-पञ्जिका २. विषयः, विभागः।

खाता[2], सं. पुं. (सं. खातं>) कुशू (सू.) लः, धान्यकोषः, कंडोलः।

ख़ातिर, सं. स्त्री. (अ.) संमानः, आदरः। क्रि. वि., कृते, अर्थे, हेतोः।

—ख़्वाह, क्रि. वि. (अ.+फ़ा.) यथोचित, यथेच्छं, यथेष्टम्।
—जमा, सं. स्त्री. (अ.) संतोषः, सांत्वनम्।
—दारी, सं. स्त्री. (अ.+फ़ा.) आदरः, अतिथिसेवा।
खाती, सं. पुं. (सं. खातं>) तक्षकः, त्वष्टृ (पुं.), २. रथकारः, वर्धकिः।
खाद, सं. स्त्री. (सं. खाद्यं>) भूमिलेपः, सारः, पुरीषादि (न.)।
खादर, सं. स्त्री. (सं. खातं>) आर्द्र-उन्न-उत्त,-भूमिः, दे. 'कछार'। २. गोप्रचारः, शाद्वलः।
खादित, वि. (सं.) भुक्त, भक्षित, जग्ध।
ख़ादिम, सं. पुं. (अ.) सेवकः, अनुचरः।
खादी, सं. स्त्री. (देश.) स्वदेशीयं घनवस्त्रं, हस्तनिर्मितवाससं (न.)।
खाद्य, वि. (सं) भक्ष्य, भोज्य, अदनीय। सं. पुं. (सं. न.) भोजनं, भक्ष्यपदार्थः।
खान[1], सं. पुं. (हिं. खाना) भक्षणं, भोजनं २. खाद्यं ३. भोजनविधिः (पुं.)।
खान[2], सं. स्त्री. [सं. खानिः (स्त्री.)] आकरः, ख (खा) नी-निः (स्त्री.) २. उत्पत्तिस्थानं, ३. कोषः।
ख़ान, सं. पुं., दे. 'ख़ाँ'।
खानक, सं. पुं. (सं.) खातकः, खनकः, खनितृ (पुं.), आखनिकः २. सुरंगाकारः ३. गृह,-कारकः-संवेशकः, पलगंडः, लेपकारः।
ख़ानक़ाह, सं. स्त्री. (अ.) यवनभिक्षुविहारः।
ख़ानगी, वि. (फ़ा.) गृह्य, कौटुम्बिक।
ख़ानदान, सं. पुं. (फ़ा.) वंशः, अन्वयः, कुलम्।
ख़ानदानी, वि. (फ़ा.) सत्कुल-उच्चवंश,-संबंधिन् २. पित्र्य, पैतृक।
खानपान, सं. पुं. (सं. न.) अन्नजलं, भक्ष्य-पेयं २. खादनपानं, भुक्तिपीति (न.) ३. भुक्ति-पीतिविधिः (पुं.) ४. परस्परभोजनं, सन्धिः (स्त्री.)।
ख़ानसामाँ, सं. पुं. (फ़ा.) (यवनादीनां) पाचकः-सूदः-महानसः।
खाना, क्रि. स. (सं. खादनं) खाद् (भ्वा.प. से.), घस् (भ्वा. प. अ.), भक्ष् (चु.), अद् (अ. प. अ.), अश् (क्र. प. से.), जक्ष् (अ. प. से.), भुज् (रु. जु. अ.), आस्वाद्-आस्वाद् (भ्वा. आ. से.), अभ्यवहृ (भ्वा. प. अ.), गृ (तु. प. से.) २. व्यथ्-अर्द्-संतप् (प्रे.) ३. चर्व् (भ्वा. प. से.) ४. नश् (प्रे.) ५. छलेन आत्मसात्कृ ६. उत्कोचं-उपायनं ग्रह् (क्र. उ. से) ७. सह् (भ्वा. आ. से.)।
सं. पुं., खादनं, आस्वादनं, भक्षणं, अशनं इ.।
खाने योग्य, वि., खाद्य, भक्ष्य, आस्वादनीय इ.।
खाने वाला, सं. पुं., भक्षकः, खादकः, भोक्तृ (पुं.),-अशन,-भुज्,-अद्,-अद (सब समासांत में, उ. शाकाशनः इ.)।
खाया हुआ, वि., भक्षित, खादित, भुक्त, जग्ध इ.।
खाता-पीता, मु., सुखिन्, समृद्ध, संपन्न।
खाना-पीना, मु., खादनपानं, भुक्तिपीति (न.), खादताचामता।
खाना पीना मजे उड़ाना, मु., खादतमोदता, अश्नीतपिवता।
खाया पिया निकालना, मु., तीव्रं-परुषं तड् (चु.)-प्रह् (भ्वा. प. अ.)-अभिहन् (अ.प.अ.)।
मुँह की खाना, मु., पूर्णतया पराजि-परिभू (कर्म.)।
ख़ाना, सं. पुं. (फ़ा.) गृहं, सद्मन् (न.), आलयः २. (मेज़ आदि का) संपुटः, निष्कर्षणी, चलसमुद्गकः ३. कोषः, पुटः-टं ४. कोष्ठकं, सारणी-चक्र,-विभागः।
—ख़राब, वि. (फ़ा.) विनाशक, अनिष्टोत्पादक, क्षयकर (-री स्त्री.)।
—जंगी, सं. स्त्री. (फ़ा.) पारस्परिकविग्रहः, गृहयुद्धम्।
—तलाशी, सं. स्त्री. (फ़ा.) गृहान्वेषणम्।
—दारी, सं. स्त्री. (फ़ा.) गार्हस्थ्यम्।
—पुरी, सं. स्त्री. (फ़ा.+हिं. पूरना) कोष्ठकपूरणम्।
—बदोश, वि. (फ़ा.) अस्थिर-अनियत-वास, य(या)यावर। सं. पुं., अस्थानिन्, नित्यविहारिन्।
—शुमारी, सं. स्त्री. (फ़ा) जनसंख्यानम्।
खानि, सं. स्त्री. (सं.) दे. 'खान[2]' २. प्राचुर्य ३. राशिः (पुं.) ४. कोषः ५. प्रकारः ६. दिशा।

खानिक, सं. स्त्री., दे. 'खान[२]'।

खाबड़-खूबड़, वि. (अनु०) विषम, नतोन्नत।

ख़ाम, वि. (फ़ा.) अपक्व, आम २. अपुष्ट, अदृढ ३. अनुभूवशून्य।

ख़ामख़ाह, क्रि. वि. (फ़ा. ख़्वाह-म-ख़्वाह) बलात्, हठात् २. अवश्यं, ध्रुवम्।

ख़ामी, सं. स्त्री. (फ़ा.) आमता, अपक्वता २. अनुभवहीनता ३. न्यूनता।

ख़ामोश, वि. (फ़ा.) निःशब्द, नीरव।

ख़ामोशी, सं. स्त्री. (फ़ा.) नीरवता, मौनम्।

खार, सं. पुं. (सं. क्षारः) १. दे. 'क्षार' २. दे. 'सज्जी' ३. दे. 'कल्लर' ४. धूलिः (स्त्री.) ५. गुल्मभेदः।

खार, सं. पुं. (फ़ा.) दे. 'काँटा' २. ईर्ष्या, असूया, द्वेषः।

—दार, वि., कंटकिन्, सकंटक।

—खाना, मु., ईर्ष्य्-ईर्ष्य् (भ्वा. प. से.), असूय् (ना. धा.), स्पर्ध् (भ्वा. आ. से.)।

खारा[१], वि. पुं. (सं. क्षार) क्षार,-विशिष्ट-युक्त २. ईषल्लवण, ३. लवण, लवणगुणविशिष्ट ४. कटु, अरुचिकर (-री स्त्री.)।

खारा[२], सं. पुं. (सं. क्षारकः) करंडः, कंडोलः, पेटकः २. घासादिबंधनजालं ३. विवाह-संस्कारोपयुक्तासनभेदः।

ख़ारिज, वि. (अ.) बहिष्कृत, अपास्त २. निराकृत, प्रत्याख्यात।

—करना, क्रि. स., बहिष्कृ, अपास् (दि. प. से.) २. निराकृ, प्रत्याख्या (अ. प. अ.)।

—होना, क्रि. अ., बहिष्कृ-अपास् (कर्म.) प्रतिक्षिप्-प्रत्याख्या (कर्म.)।

ख़ारिश, ख़ारिश्त, सं. स्त्री. (फ़ा.) दे. 'खुजली'।

खारी[१], सं. स्त्री. (सं.) षोडश-चतुर्-द्रोण-परिमाणम्।

खारी[२], सं. स्त्री. (हिं. खारा) ऊषरजं, ऊषरलवणं, क्षारलवणं। वि. स्त्री., दे. 'खारा[२]' के स्त्री. रूप।

—पानी, सं. पुं., क्षार,-पानीयं-जलम्।

खाल[१], सं. स्त्री. (सं. क्षालः >) दे. 'खलड़ी' (१-३) २. आवरणं ३. शवः ४. भस्त्रा-स्त्री.।

—उड़ाना, मु०, निर्दयं-परुषं-चंडं-निष्ठुरं तड् (चु.)-प्रह् (भ्वा. प. अ.)।

—उधेड़ना या खींचना, मु. त्वचं अपनी (भ्वा. प. अ.)-निर्ह्-निष्कृष् (भ्वा. प. अ.), निस्त्वचयति (ना. धा.)।

खाल[१], सं. स्त्री. (सं. खातं) निम्नभूः (स्त्री.) २. रिक्तस्थानं, अवकाशः ३. दे. 'खाड़ी' ४. गाम्भीर्यम्।

ख़ालसा, वि. (अ. ख़ालिस) एकाधिकृत, एकाधिष्ठित २. राज़कीय। सं. पुं., शिष्य-(सिक्ख) जातिविशेषः।

खाला, वि. (हिं. खाली) निम्न, अवनत, अवच।

—ऊँचा, वि. उच्चावच, नतोन्नत, विषम।

ख़ाला, सं. स्त्री. (अ.) मातृस्व(स्त्र)सृ (स्त्री.), मातृभगिनी।

—जी का घर, मु., सुकरं कर्मन् (न.)।

ख़ालिक, सं. पुं. (अ.) स्रष्टृ-विधातृ-सृष्टि-कर्तृ (पुं.)।

ख़ालिस, वि. (अ.) दे. 'खरा' (२)।

ख़ाली, वि. (अ.) रिक्त, शून्य २. अनधिष्ठित ३. रहित, हीन ४. अव्यापृत, निष्क्रिय ५. अधिक, उद्वृत्त ६. निष्फल, व्यर्थ। क्रि. वि., केवलम्।

—करना, क्रि. स., रिच् (रु. प. अ.), परित्यज् (भ्वा. प. अ.), उत्सृज् (तु. प. अ.)।

—होना, क्रि. अ., रिच्-परित्यज्-उत्सृज् (कर्म.)।

—हाथ, मु., अकिंचन, दरिद्र २. निःशस्त्र।

ख़ालू, सं. पुं. (अ.) मातृष्वसृपतिः।

ख़ाविंद, सं. पुं. (फ़ा.) पतिः, भर्तृ २. स्वामिन्-प्रभुः (पुं.)।

—करना, मु., अपरं पतिं विद् (तु. प. वे.) वृ (स्वा. उ. से.), द्वितीयं विवाहं कृ।

ख़ास, वि. (अ.) स-, विशेष, विशिष्ट, विलक्षण, असाधारण २. रहस्य, संवरणीय, गोप्य ३. स्वकीय, आत्मीय ४. पवित्र ५. प्रधान, मुख्य।

—कर, क्रि. वि., विशेषतः, विशेषेण।

—व आम, सं. पुं., जनता, लोकः।

ख़ासा[१], वि. (अ. ख़ास) उत्तम, उत्कृष्ट २. स्वस्थ ३. मध्यवर्गीय ४. सुंदर ५. परिपूर्ण।

ख़ासा[२], सं. पुं. (अ.) नृपभोजनं, भूपाहारः २. राज्ञो गजोऽश्वो वा। ३. श्वेतवस्त्रभेदः ४. पूरिकाभेदः।

ख़ासियत, सं. स्त्री. (अ.) प्रकृतिः (स्त्री.), स्वभावः २. गुणः, धर्मः।

ख़ास्सा, सं. पुं. (अ.) दे. 'ख़ासियत'।

खिंचना, क्रि. अ. (सं. कर्षणं>) आ-सं, कृष् (कर्म.), २. दृढीकृ-नियम् (कर्म.) ३. वह् नी (कर्म.) ४. (चित्रादि) वर्ण्-आलिख् (कर्म.) ५. उत्-शुष् (दि. प. अ.), नि-आ-पा (कर्म.) ६. स्रु (भ्वा. प. अ.), क्षर् (भ्वा. प. से.)।

खिंचवाना, क्रि. प्रे. } व. 'खींचना' के प्रे.
खिंचाना, क्रि. प्रे. } रूप।

खिंचाई, सं. स्त्री., **खिंचाव,** सं. पुं., **खिंचावट, खिंचाहट,** सं. स्त्री. } १. आकर्षणं, २. आकर्षः ३. दृढीकरणं, नियमनं ५. घनता, सुसंसक्तिः (स्त्री.) आ-, ततिः (स्त्री.) इ.।

खिंडना, क्रि. अ., दे. 'बिखरना'।

खिचड़ी, सं. स्त्री. (सं. कृसरः) कृशरः, मिश्रौदनः-नं, कृसरा, वैदलोदनः-नं, खेचरान्नं। २. मिश्रितद्रव्यं, प्रकीर्णकं, विविधवस्तुमिश्रणम्।

—करना, मु., एकीकृ, सं., मिश्र (चु.)।

—होना, मु., संसृज्-संपृच् (कर्म.), एकीभू।

खिजना, क्रि. अ. (सं. खिद्) दे. 'चिढ़ना'।

खिजलाना, क्रि. स. तथा क्रि. अ., दे. 'चिढ़ाना' तथा 'चिढ़ना'।

खिज़ाँ, सं. स्त्री. (फ़ा.) शिशिरः, दे. 'पतझड़' २. अवनतिकालः।

खिज़ाब, सं. पुं. (अ.) केश-बाल-मूर्धज,-लेपः रंगः-रागः-वर्णः।

—करना या लगाना, क्रि. स., केशान् रंज्-वर्ण् (चु.)।

खिझना, क्रि. अ. (सं. खिद्) दे. 'चिढ़ना'।

खिझाना, क्रि. स., दे. 'चिढ़ाना'।

खिड़की, सं. स्त्री. (सं. खट(ट)किका)। वातायनं, वातद्वारं, गवाक्षः। २. अररी, कपाटः-टम्।

खिताब, सं. पुं. (अ.) उपाधिः (पुं.), मानपदम्।

ख़िदमत, सं. स्त्री. (अ.) सेवा, परिचर्या।

—गार, सं. पुं. (अ.+फा.) सेवकः, परिचारकः।

—गारी,-गुजारी, सं. स्त्री. (अ.+फा.) सेवा, परिचर्य्या।

खिन, सं. पुं., दे. 'क्षण'।

खिन्न, वि. (सं.) दुःखित, पीडित २. सचिंत, चिंतित ३. विषण्ण, शोकमग्न, ३. दीन, निराश्रय। ४. श्रांत, क्लांत।

खियानत, सं. स्त्री., दे. 'ख़यानत'।

खिरनी, सं. स्त्री. (सं. क्षीरिणी) हैमी, हिमजा, हिमदुग्धा (वृक्षभेदः) २. तत्फलम्।

खिराज, सं. पुं. (अ.) दे. 'कर' (टैक्स)।

ख़िलअत, सं. स्त्री. (अ.) संमानवेशः-षः।

ख़िलक़त, सं. स्त्री., दे. 'ख़लक़त'।

खिलखिल, सं. स्त्री. (अनु०) हासः, हसितं, हसनम्।

खिलखिलाना, क्रि. अ. (अनु.) उच्चैः-सशब्दं हस् (भ्वा. प. से.), अट्टहासं कृ।

खिलना, क्रि. अ. (सं. स्खलनं अथवा किरणं ?) विकस्-प्रफुल्ल (भ्वा. प. से.), स्फुट् (तु. प. से.), भिद् (कर्म.) २. प्रसद् (भ्वा. प. अ.) ३. शुभ् (भ्वा. आ. से.) ४. पृथक् भू। सं. पुं., विकसनं, फुल्लनं, प्रस्फुटनं-इ०।

खिला हुआ, वि., विकसित, उन्निद्र, प्रस्फुटित।

खिलवत, सं. स्त्री. (अ.) निर्जन-विजन,-स्थानम्।

खिलवाड़, सं. पुं. (हिं. खेलना) खेला, लीला, क्रीडा, मनोविनोदः, विहारः।

खिलवाड़ी, वि., दे. 'खिलाड़ी'।

खिलवाना, क्रि. प्रे., अन्येन+'खाना' धातुओं के प्रे. रूप।

खिला, सं. स्त्री. (अ.) शून्यकम्।

खिलाई[1], सं. स्त्री. (हिं. खिलाना) अन्नदानं, पोषणं २. भक्षणं, खादनम्।

—पिलाई, सं. स्त्री., भुक्तपीतं, खादनपानं, खानपानं २. अन्नपानदानं, पोषणं २. पोषणार्घः।

खिलाई[2], सं. स्त्री. (हिं. खेलाना) अंकपाली, शिशुपालिका।

खिलाड़, खिलाड़ी, वि. (हिं. खेलना) क्रीडा-खेला-लीला,-पर-शील। सं. पुं., क्रीडकः, खेलकः २. ऐन्द्रजालिकः, मायाविन् (पुं.) ३. धूर्तः।

खिलाना[1], क्रि. प्रे., 'खेलना' के प्रे. रूप।

खिलाना[2], क्रि. प्रे., 'खाना' के प्रे. रूप।

खिलाना[१], क्रि. प्रे., 'खिलना' के प्रे. रूप।
खिलाफ़, वि. (अ.) विरुद्ध, विपरीत।
खिलौना, सं. पुं. (हिं. खेलना) क्रीडाद्रव्यं, क्रीडनकं, क्रीडनीयकं २. क्षुद्रालंकारः।
खिल्ली, सं. स्त्री. (हिं. खिलना) क्ष्वेला, नर्मन् (न.), विनोदः।
—बाज़, वि., विनोदशील, नर्मप्रिय।
—बाज़ी, सं. स्त्री., विनोदशीलता, नर्मप्रियता।
खिसकना, क्रि. अ. (अनु.) शनैः सृप् (भ्वा. प. अ.)-चल् (भ्वा. प. से.) २. प्र-,स्खल् (भ्वा. प. से.) ३. सत्वरं-अलक्षितं-निभृतं अपया (अ. प. अ.)-अपसृ (भ्वा. प. अ.)-गम्। सं. पुं., शनैः-मृदु,-सर्पणं, स्खलनं, अलक्षितं गमनं-अपसरणं इ०।
खिसकाना, क्रि. स., 'खिसकना' के प्रे० रूप।
खिसलना, क्रि. अ., दे. 'फिसलना'।
खिसलाव, सं. पुं. / **खिसलाहट**, सं. स्त्री. } दे. 'फिसलाव' तथा 'फिसलाहट'।
खिसारा, सं. पुं. (अ.) हानिः-क्षतिः (स्त्री.)।
खिसिआ(या)ना, क्रि. अ. (हिं. खीस = दाँत) लज्ज् (तु. आ. से.), त्रप् (भ्वा. आ. वे.), व्रीड् (दि. प. से.) २. क्रुध् (दि. प. अ.), कुप् (दि. प. से.)। वि., लज्जित, ह्रीण, ह्रीत।
खींच, सं. स्त्री. (हिं. खींचना) कर्षः, कर्षणम्।
—तान, सं. स्त्री., प्रतिस्पर्द्धा, विजिगीषा २. अर्थातरकल्पना।
खींचना, क्रि. स. (सं. कर्षणं) आ-सं-, कृष् (भ्वा. प. अ.), बलात् दिशाविशेषे प्रेर् (प्रे.)-नी (भ्वा. उ. अ.)-प्रवृत् (प्रे.) २. ह (भ्वा. उ. अ.) दे. 'घसीटना' ३. निष्कस् (प्रे.), बहिर्-अप,-नी। ४. उद्-अंच् (भ्वा. उ. से.), पर्युदंच्। ५. शुष् (प्रे.) ६. स्रु-स्यंद् (प्रे.) ७. वर्ण् (चु.), आ-अभि-लिख् (तु. प. से.) ८. रुध् (रु. उ. अ.)। सं. पुं., आकर्षः, आकर्षणं, नयनं, हरणं, निष्कासनं, उदंचनं, शोषणं, स्रावणं, आलेखनं, रोधः।
खींचने योग्य, वि., आ-, कर्षणीय, नेय, हर्तव्य इ।
खींचाखींची, / **खींचातान**, / **खींचातानी**, } सं. स्त्री., दे. 'खींचतान'।
खीज, खीझ, सं. स्त्री.(हिं. खीजना) दे. 'चिढ़'।
खीज(झ)ना, क्रि. अ. (सं. खिद्) दे. 'चिढ़ना'।
खीमा, सं. पुं. (अ.) दे. 'ख़ेमा'।
खीर, सं. स्त्री. (सं. क्षीरं-रा>) पायसं, परमान्नं, क्षीरिका २. दुग्धं, पयस् (न.), क्षीरं, स्तन्यम्।
—चटाई, सं. स्त्री., अन्नप्राशनसंस्कारः (धर्म.)।
खीरा, सं. पुं. (सं. क्षीरकः) (लता) पीतपुष्पा, त्रपुकर्कटी, बहु-कोप-तुंदिल,-फला, कंटकिलता। (फल) त्रपुषं, कंटकिफलं, सुशीतलं, सुधावासम्।
—ककड़ी, मु., तुच्छवस्तु (न.)।
खीरी, सं. स्त्री. (सं. क्षीरः-रं>) उधस्-ऊधस्-ओधस् (न.), आपीनम्।
खील, सं. स्त्री. (हिं. खिलना) धानाः (स्त्री., बहु.), लाजाः (पुं., स्त्री., बहु.)।
खीली, सं. स्त्री. (हिं. खील) वीटी-टिः (स्त्री.), वीटिका, तांबूलम्।
खीस, सं. स्त्री. (हि. खीज़) प्रति-प्रसाद,-अभावः २. क्रोधः, रोषः ३. लज्जा, त्रपा। ४. कुस्मितं, कुहासः।
खीसा, सं. पुं. (फ़ा. कीसा) पुटः-टं, प्रसेवः, लघुसंपुटः २. गुप्ति-, कोषः-शः।
खुक्ख, खुख, वि. (सं. शुष्क>) रिक्तहस्त, अकिंचन।
खुखडी, सं. स्त्री. (देश.) सूत्र-ऊर्णा,-पिंडः-पिंडं (२) असि-खड्ग,-धेनुका-पुत्रिका।
खुगीर, सं. पुं. (फ़ा.) दे. 'ज़ीन'।
खुच (चु)र, सं. स्त्री. (सं. कुचर>) दोषः, न्यूनता २. छिद्रान्वेषिता, पुरोभागि(ग)ता।
खुजलाना, क्रि. स. (सं. खर्जनं>) नखैः त्वचं घृष् (भ्वा. प. से.)। क्रि. अ., कण्डूं-खसं-खर्जूं अनुभू। कण्डूयति-ते (ना. धा.)।
खुजलाहट, सं. स्त्री. (हिं. खुजलाना) दे. 'खुजली'।
खुजली, सं. स्त्री. (हिं. खुजलाना) (सुरसुरी) कंडुः (पुं., स्त्री.), कंडूः-कंडूतिः (स्त्री.), कंडूयनं, कंडूया, खर्जुः-र्जूः (स्त्री.) २. (रोग) कच्छुः-च्छू (स्त्री.), पामा, पामन् (पुं.), विचर्चिका।
—उठना या चलना, क्रि. अ., दे. 'खुजलाना' (क्रि. अ.)।

खुजाना, क्रि. स., क्रि. अ., दे. 'खुजलाना'।

खुटका, सं. पुं., दे. 'खटका'।

खुटपन-ना, सं. पुं. (हिं. खोटा) दोषः, अवगुणः, क्षुद्रता, दुष्टता।

खुटाई, सं. स्त्री., दे. 'खुटपन'।

खुट्टी, सं. स्त्री. (अनु.) दे. 'रेवड़ी' २. (पं. = बटन का सूराख़) गंड-कुडुप,-आधारः।

खुट्टी, सं. स्त्री., दे. 'खुरण्ड'।

खुड़ला, सं. पुं. (देश.) कुकुटालयः २. चटकालयः।

खुड्डी, खुड्ढी, सं. स्त्री. (सं. खुड् >) शौचकूपगर्तः २. शौचकूपे पादाधानम्।

ख़ुतबा, सं. पुं. (अ.) प्रशंसा, स्तुतिः (स्त्री.), प्रशस्तिः (स्त्री.)।

ख़ुद, अव्य. (फ़ा.) स्वयं, स्वतः, स्वेच्छया (समास के आदि में 'स्व' तथा 'आत्मन्' भी प्रयुक्त होते हैं। उ. स्वार्थः, आत्महत्या)।

—कुशी, सं. स्त्री. (फ़ा.) आत्म-स्व-निज,-घातः-हत्या-वधः।

—ग़र्ज़, वि. (फ़ा.) स्वार्थ,-पर-परायण।

—ग़र्ज़ी, सं. स्त्री. (फ़ा.) स्वार्थ,-परता-परायणता।

—मुख़्तार, वि. (फ़ा.) स्वतंत्र, स्वच्छन्द।

—मुख़्तारी, सं. स्त्री. (फ़ा.) स्वातंत्र्यं, स्वाधीनता।

खुदना, क्रि. अ. (हिं. खोदना) खन्-उत्कृ-तक्ष् (कर्म.), अवदृ-भिद् (कर्म.)।

खुदरा, सं. पुं. (सं. क्षुद्र >) क्षुद्र-साधारण,-वस्तु (न.)। वि., दे. 'खुरदरा'।

खुदवाई, सं. स्त्री. (हिं. खुदवाना) अन्यकृत,-खननं-खातिः (स्त्री.) २. खनन,-भृत्या-भृतिः (स्त्री.)।

खुदवाना, खुदाना, क्रि. प्रे., 'खोदना' के प्रे. रूप।

ख़ुदा, सं. पुं. (फ़ा.) स्वयंभूः (पुं.), दे. 'ईश्वर'।

—न ख़्वास्ता, मु., ईशो न कुर्यात्।

—परस्त, वि., ईश्वरपूजक, आस्तिक।

—ख़ुदा कर के, मु., येन केन प्रकारेण, अति,-कष्टेन कृच्छ्रेण, यथाकथञ्चित्।

—की मार, मु., ईश्वर-दैव,-प्रकोपः।

ख़ुदाई, सं. स्त्री. (फ़ा.) ईश्वरत्वं २. सृष्टिः(स्त्री.)

खुदाई, सं. स्त्री. (हिं. खोदना) खातिः (स्त्री.) २. खननक्रिया ३. खननभृतिः (स्त्री.)।

ख़ुदातालां, सं. पुं. (अ.) परमेश्वरः, परमेशः।

ख़ुदावंद, सं. पुं. (फ़ा.) ईश्वरः २. स्वामिन् (पुं.) ३. भगवत्-श्रीमत् (पुं.), आर्यः, मिश्रः (सब सम्मानसूचक शब्द)।

ख़ुदी, सं. स्त्री. (फ़ा.) अहम्भावः, अहङ्कारः २. अभिमानः, दर्पः।

खुद्दी, सं. स्त्री. (सं. क्षुद्र >) वैदलतण्डुलादीनां कणः।

ख़ुनकी, सं. स्त्री. (फ़ा.) शैत्यम्।

खुनखुना, सं. पुं. (अनु.) झणझणः, खणखणः, क्रीडनकभेदः।

ख़ुनस, सं. स्त्री. (सं. खिन्नमनस् >) कोपः,क्रोधः।

ख़ुनाक, सं. पुं. दे. 'डिफथीरिया'।

ख़ुफ़िया, वि. (फ़ा.) गूढ, गुप्त, निभृत।

—पुलिस, सं. स्त्री. (फ़ा+अं.) प्रच्छन्न-गुप्त-गूढ,-रक्षिणः (बहु.), अपसर्पाः, चराः, स्पशाः।

खुब(भ)ना, क्रि. अ. (अनु.) आ-प्र-विश् (तु. प. अ.), व्यध् (दि. प. अ.), छिद् (रु. प. अ.), छिद्रं-प्रवेशं कृ।

ख़ुमार, सं. पुं. (अ.) म(मा)दः, क्षीवता, शौंडता २. तन्द्रा, निद्रालुत्वं ३. निशाजागरजं शैथिल्यम्।

खुमारी, सं. स्त्री., दे. 'खुमार'।

खुरंड, सं. पुं. (सं. खुर् = खुरचना >) शुष्कव्रणत्वच् (स्त्री.), ईर्मझिल्ली २. किलासं, सिध्मम्।

खुर, सं. पुं. (सं.) शफः-फं, विंखः, निघृष्वः, क्षुरः २. खट्वादीनां पादुकम्।

—दार, वि., खुरिन्, शफिन्।

खुरखुर, सं. स्त्री. (अनु.) खुरखुर-घरघर,-शब्दः-नादः।

खुरखुरा, वि. (सं. खुर्=खुरचना >), दुःस्पर्श, असम, विषम, श्लक्ष्णताशून्य।

खुरचन, सं. स्त्री. (हिं. खुरचना) खुरितं, पयःपात्रखुरितं २. खुरितं, मिष्टान्न-खांडव,-भेदः।

खुरचना, क्रि. स. (सं. खुरणं) खुर्-क्षुर् (तु. प. से.), उद्-दि,-लिख् (तु. प. से.) २. अप-व्या,-हृ (अ. प. वे.), विदृ (प्रे.)।

खुरचनी, सं. स्त्री. (हिं. खुरचना) उल्लेखनी, निर्घर्षणी २. काष्ठकुद्दालः, खनित्रं ३. दुग्धपात्र-खुरितम् ।

खुरजी, सं. स्त्री. (फ़ा.) दे. 'थैला' ।

खुरदरा, वि. नतोन्नत २. असम, विषम, पिण्ड-कावृत, श्लक्ष्णता-स्निग्धता-परिष्कार,-शून्य ।

खुरपा, सं. पुं. (सं. क्षुरप्रः) घासछेदनशस्त्रं, लघु-,टंगः-टंगं-खनित्रं २. चर्मकारोपकरणभेदः ।

खुराँट, वि., दे. 'खुर्राट' ।

खुराक, सं. स्त्री. (फ़ा.) भोज्यं, भक्ष्यं, खाद्यं, आहारः, भोजनं २. (औषध-) मात्रा, भागः ।

खुराफ़ात, सं. स्त्री. (अ.) अश्लील-ग्राम्य-अशिष्ट,-वचनानि (बहु.) २. गाल्यः-दुर्वचनानि (बहु.) ३. कलहः ।

खुरी, सं. स्त्री. (सं. खुरः >) शफ-विंख,-चिह्नं २. दे. 'रड़ी' ।

—करना, मु., अतिक्षिप्रं चल् (भ्वा. प. से.) ।

खुर्द, वि. (फ़ा.) लघु, अल्प, सूक्ष्म ।

—बीन, सं. स्त्री. (फ़ा.) सूक्ष्मदर्शकयंत्रं, अण्वीक्षणयंत्रम् ।

—बुर्द, वि., (फ़ा.) नष्टभ्रष्ट २. समाप्त ।

खुर्राट, वि. (देश.) धूर्त, कुटिल, शठ २. वृद्ध ३. अनुभविन् ।

खुलना, क्रि. अ. (सं. खुड्=तोड़ना >) (द्वारादि) वि-अपा-वृ (कर्म.), निरर्गली भू, असंवृत-उद्घाटित (वि.) + भू २. (कली आदि) विकस्-दल्-फुल् (भ्वा. प. से.), भिद् (कर्म.) ३. (आँख) उन्मिष् (तु. प. से.), उन्मील् (भ्वा. प. से.) ४. (हाथ) प्रस्र (भ्वा. प. अ.), वितन् (कर्म.) ५. (मुख) व्यादा (कर्म.), विजृम्भ् (भ्वा. आ. से.) ६. (रह-स्यादि) प्रकटी-व्यक्ती-आविर् + भू, प्रकाश् (भ्वा. आ. से.) ७. प्रारभ्-प्रस्तु (कर्म.) ८. उद्ग्रंथ् (कर्म.), शिथिलीभू, उन्मुच् (कर्म.) ९. (भूमि आदि) विदृ-भिद् (कर्म.) ।

खुल खेलना, मु., व्यक्तं प्रकाशं-अनिभृतं-निर्भयं (किंचित् कार्यं) कृ अथवा विषयासक्त (वि.) + भू ।

खुलवाना, क्रि. पे., 'खोलना' के प्रे. रूप ।

खुला, वि. (हिं. खुलना) उद्दाम, उद्ग्रथित, उत्सूत्र, मुक्त, बन्धनहीन २. शिथिल, प्रश्लथ, विगलित ३. शिथिलसन्धि, विरल ४. स्पष्ट, प्रकट, व्यक्त ५. अपावृत, व्यावृत, असंवृत ६. विस्तृत, विस्तीर्ण, विशाल । 'खुलना' के धातुओं के क्तांत रूप ।

खुले आम, **खुले खज़ाने**, **खुले मैदान**, **खुल्लम खुल्ला** क्रि. वि., प्रत्यक्षं, प्रकटं प्रकाशं, व्यक्तं, निर्भयं, निःशङ्कम् ।

खुलाना, क्रि. प्रे., 'खोलना' के प्रे. रूप ।

खुलासा, सं. पुं. (फ़ा.) सारांशः, संक्षेपः ।

खुश, वि. (फ़ा.) प्रसन्न, प्रमुदित, प्रहृष्ट ।

—होना, क्रि.अ., आनन्द् (भ्वा. प. से.), मुद् (भ्वा. आ. से.), हृष् (दि. प. से.), परि-सं-तुष् (दि. प. अ.), दे. 'प्रसन्न होना' ।

—क़िस्मत, वि. (फ़ा.) सौभाग्यशालिन् ।

—क़िस्मती, सं. स्त्री. (फ़ा.) सौभाग्यम् ।

—ख़त, वि. (फ़ा.) लिपिज्ञ, सुलेखक ।

—ख़ती, सं. स्त्री. (फ़ा.) सुलेखन,-कौशलं-नैपुण्यं-विद्या ।

—ख़बरी, सं. स्त्री. (फ़ा.) शुभ-सु,-समाचारः-वार्ता-वृत्तं-उदन्तः ।

—गवार, वि. (फ़ा.) रुचिर, सुखद, आ-, नंदक ।

—दिल, वि. (फ़ा.) प्रसन्नमनस्, संतोषिन् ।

—नसीब, वि. (फ़ा.) सौभग्यवत्, धन्य ।

—नसीबी, सं. स्त्री. (फ़ा.) सौभाग्यवत्ता ।

—नुमा, वि. (फ़ा.) सुदर्शन, मनोहर, सुन्दर ।

—बू, सं. स्त्री. (फ़ा.) दे. 'सुगंध', सुवासः ।

—बूदार, वि. (फ़ा.) सुगन्धित, सुगन्धि ।

—रंग, वि. (फ़ा.) सुरंग, सुवर्ण ।

—हाल, वि. (फ़ा.) समृद्ध, संपन्न ।

—हाली, सं. स्त्री. (फ़ा.) अभ्युदयः, समृद्धिः (स्त्री.) ।

ख़ुशामद, सं. स्त्री. (फ़ा.) चाटु (पुं. न.), चाटूक्तिः (स्त्री.), अति-मिथ्या,-स्तुतिः (स्त्री.)-प्रशंसा, चाटुवादः ।

—करना, क्रि. स., मिथ्या-अतिमात्रं-अतीव प्रशंस् (भ्वा. प. से.)-स्तु (अ. प. अ.)-नु (अ. प. से.), अभि-परि-सं-स्तु, चाटूक्तिभिः सांत्व-उपलल्-उपछंद् (चु.), चाटूनि वद् (भ्वा. प. से.) ।

खुशामदी, वि. (फा. खुशामद) मिथ्या-प्रशंसक, चाटुकार, प्रियंवद, चाटुवादिन् (पुं.)।
—टट्टू, सं.पुं., अत्यनुरोधिन्, चाटुपटुः।
खुशी, सं. स्त्री. (फा.) हर्षः, प्रसन्नता, मोदः, आनन्दः, प्रमोदः, आह्लादः, सन्तोषः, उल्लासः, चित्तप्रसादः, प्रीतिः-तुष्टिः (स्त्री.)।
—मनाना, क्रि. अ., दे. 'खुश होना'।
खुश्क, वि. (फा.; सं. शुष्क) शुष्क, अजल, निर्जल, वान, नीरस २. रूक्ष, स्नेहशून्य, अशिष्ट ३. म्लान, म्लान, विशीर्ण।
—साली, सं. स्त्री. (फा.) अनावृष्टिः (स्त्री.), २. दुर्भिक्षम्।
खुश्की, सं. स्त्री. (फा.) शुष्कता, निर्जलता २. रूक्षता ३. स्थलं ४. दे. 'पलेथन'।
खुसरफुसर, सं. स्त्री. (अनु.) दे. 'कानाफूसी'।
खूँखार, वि. (फा.) रक्त-रुधिर,-प्रिय, जिघांसु, हिंस्र। २. भीषण ३. निर्दय।
खूँट, सं. पुं. (सं. खंडः-डं) अंशः, भागः। २. अस्रः, कोणः ३. अन्तः ४. पार्श्वः-र्श्वं ५. कर्णमलम्।
खूँटा, सं. पुं. (सं.क्षोडः) शंकुः, कीलः, कीलकः पुष्पलः २. नागदन्तः, भारयष्टिः (स्त्री.) ३. काष्ठस्थूणा।
खूँटी, सं. स्त्री. (हिं. खूँटा) लघु,-कीलः-कीलकः, २. नागदन्तः-तकः ३. तनुरुह-लोम,-मूलं ४. शस्यलवनानंतरं क्षेत्रस्थं कांडमूलम्।
खूँद, सं. स्त्री. (हिं. खूँदना) अश्वादीनां खुरेण भूमिलेखनम्।
खूँदना, क्रि. स. (खुण्ड् = तोड़ना >) (अश्वादयः) खुरेण पृथिवीं आहन् (अ. प. अ.)-घृष् (भ्वा. प. से.)-लिख् (तु. प. से.)।
खूद, खूदड़, खूदर, सं. स्त्री. (सं. क्षुद्र >) दे. 'कूड़ा'।
खून, सं. पुं. (फा.) रुधिरं, रक्तं, लोहितं शोणितं, असृज् (न.), अस्रं २. वधः, हत्या।
—करना, क्रि. स., वधं-घातं-हत्यां कृ, हन् (अ. प. अ.), सू-व्यापद् (प्रे.) २. प्रमादेन नश्-अवसद् (प्रे.)।
—होना, क्रि. अ., वैपाद् हन्-मार्-व्यापद् (कर्म.)।
—खराबा, सं. पुं., (फा.) नृ-नर,-वधः-हत्या, रक्त,-पातः-स्रावः।
—ख़्वार, वि. दे. 'खूँख़ार'।
—थूकना, सं. पुं., रक्तष्ठीवनम्।
—आँखों में उतर आना, मु., कोपारुणनयन (वि.)+भू।
—उबलना या खौलना, मु., अतीव कुप् (दि. प. से.)।
—का प्यासा, मु., जिघांसु, वधोद्यत।
—सवार होना या चढ़ना, मु., वधाय-हत्यायै सज्ज-उद्यत (वि.)+भू।
खूनी, सं. पुं (फा.) घातकः, हंतृ (पुं.)। वि., हंतुकाम, वधैषिन्, जिघांसु।
खूब, वि. (फा.) अच्छ, भद्र, उत्तम, श्रेष्ठ। क्रि. वि., सम्यक्, साधु, शोभनम्।
—रू, वि. (फा.) सुमुख (सुमुखी स्त्री.)।
—सूरत, वि. (फा.) सुंदर, सुरूप।
—सूरती, सं. स्त्री. (फा) सुंदरता, सुरूपता।
खूबी, सं. स्त्री. (फा.) अच्छता, उत्तमता २. गुणः, विशेषः, विलक्षणता।
खूसट, सं. पुं. (सं. कौशिक) दे. 'उल्लू' २. जरठः, स्थविरः। वि., रसिकताशून्य, शुष्क-हृदय २. जड ३. कुदर्शन।
खेचर, सं. पुं. (सं.) गगनविहारिन्, व्योमगः २. ग्रहः, नक्षत्रं। वायुः (पुं.) ४. देवः ५. विमानः-नं ६. खगः ७ मेघः ८. भूतप्रेताः ९. राक्षसः १०. विद्याधरः ११. शिवः १२-१३ दे. 'पारा' तथा 'कसीस'।
खेचरान्न, सं. पुं. (सं. न.) दे. 'खिचड़ी'।
खेटक, सं. पुं. (सं.) मृगया, आखेटः २. कर्षक-ग्रामः ३. नक्षत्रं ४. बलदेवगदा ५. यष्टिः (स्त्री.) ६. ढालं, फलकम्।
खेटकी, सं. पुं., दे. 'शिकारी'।
खेड़ा[1], सं. पुं. (सं. खेटः) लघुग्रामः, ग्रामटिका।
—पति, सं. पुं. ग्रामणीः (पुं.)।
खेड़ा[2], सं पुं. (देश.) विविधान्नयोगः।
खेत, सं. पुं. (सं. क्षेत्रं) केदारः, भूमिः (स्त्री.), वप्रः-प्रं, वलजं, निष्कुटः, राजिका, पाटीरः २. शस्यं, कृषिफलं ३ रण-युद्ध-समर,-भूमिः ४. खड्ग,-फलं-पत्रं। ५. उत्पत्तिस्थानं ६. (पशूनां) जातिः (स्त्री.)।

—आना या रहना, मु., वीरगतिं आप् (स्वा. उ. अ.), युद्धे हन् (कर्म.)।
—छोड़ना, मु., युद्धात् पलाय् (भ्वा. आ. से.)
खेतिहर, सं. पुं., दे. 'किसान'।
खेती, सं. स्त्री. (हिं. खेत) दे. 'कृषि' २. शस्यं, कृषिफलम्।
—बारी, सं. स्त्री., दे. 'कृषि'।
खेद, सं. पुं. (सं.) अनुशोकः, अनुतापः, २. दुःखं, शोकः, आधिः (पुं.), आ(अ)तिः (स्त्री.), क्लेशः ३. ग्लानिः-क्लांतिः-श्रांतिः (स्त्री.)।
—जनक, वि. (सं.) अनुशोकप्रद, दुःखदायक, क्लेशकर, श्रांतिजनक।
खेदना, क्रि. स. सं. (खेटः>) दे. 'खदेरना'।
खेदा, सं. पुं. (हिं. खेदना) गजादिबंधनपंजरम्। २. दे. 'शिकार'।
खेदित, वि. (सं.) खिन्न, अनुतप्त २. श्रांत, क्लांत।
खेना, क्रि. स., (सं. क्षेपणं>) नौदंडेन संचल्-प्रेर्-प्रचुद्-प्रणुद् (प्रे.)। २. नौकां वह्-प्रेर् (प्रे.) इ. ३. दे. 'बिताना'।
खेप, सं. स्त्री. (सं. क्षेपः>) सकृद्वाह्यो भारः २. पोतस्थं द्रव्यं ३. नौकादीनां सकृत् यात्रा।
खेपना, क्रि. स. (सं. क्षेपणं) दे. 'बिताना'।
खेम, सं. पुं., दे. 'क्षेम'।
खेमा, सं. पुं. (अ.) पट-वस्त्र,-मंडपः-गृहं-वेश्मन् (न.), दूष्यं-श्यम्।
—गाड़ना, क्रि. स., दूष्यं रच् (चु.)-उप-क्लृप् (प्रे.)।
खेल, सं. पुं. (सं. खेला) क्रीडा, केलिः (स्त्री.), खेलनं, लीला २. वृत्तं, उदंतः ३. सुकर-क्षुद्र,-कार्यं ४. कामक्रीडा, संभोगः ५. अभिनयः, नाटकं ६. कौतुकं, विचित्रकार्यं ७. (पशुओं के लिए) जलद्रोणिः (स्त्री.)-णी।
—समझना, मु., सुकरं मन् (दि. आ. अ.)
खेलना, क्रि. अ. (सं. खेलनं) खेल्-विलस् क्रीड् (भ्वा. प. से.), विह (भ्वा. प. अ.) २. संभोग-रतिक्रियां कृ ३. विचर्-चल् (भ्वा. प. से.) ४. भूताविष्टः अंगानि चल् (प्रे.)। क्रि. स., नट्-रूप् (चु.), अभिनी (भ्वा. प. अ.)। (जूआ आदि) दिव् (दि. प. से.), ग्लह् (चु. उ. से.)।
खेलवाड़, सं. पुं., दे. 'खिलवाड़'।
खेलवाड़ी, वि., दे. 'खिलाड़ी'।
खेलवाना, क्रि. प्रे., 'खेलना' के प्रे. रूप।
खेलाड़ी, वि., दे. 'खिलाड़ी'।
खेलाना, क्रि. प्रे., 'खेलना' के प्रे. रूप।
खेवक, सं. पुं. / खेवट, सं. पुं. } (हिं. खेना) दे. 'केवट'।
खेवट, सं. पुं. (हिं. खेत+वट प्रत्य.) क्षेत्र-पतिलेखः।
खेवना, क्रि. स., दे. 'खेना'।
खेवा, सं. पुं. (हिं. खेना) तार्यं, तरपण्यं, आतरः, तारिकं २. नौकया नदीलंघनं ३. वारः, अवसरः, पर्यायः ४. भाराक्रांता नौः (स्त्री.)।
खेवैया, सं. पुं. (हिं. खेवना) दे. 'केवट'।
खेस, सं. पुं. (देश.) अवस्तरः, आस्तरपटः।
खेसारी, सं. स्त्री. (सं. कृशरः>) कलायभेदः।
खेह(र), सं. स्त्री. (सं. क्षारः) रजस् (न.), धूलिः (स्त्री.) २. भस्मन् (न.), भसितम्।
खैंचना, क्रि. स., दे. 'खींचना'।
खैंचवाना, क्रि. प्रे., 'खींचना' के प्रे. रूप।
खैंचाखैंच-ची / खैंचातान-नी } सं. स्त्री., दे. 'खींचतान'।
खैर, सं. पुं. (सं. खदिरः) सारद्रुमः, यज्ञांगः कुष्ठारिः (पुं.), दंतधावनः २. (हिं. कत्था) खादिरः, खदिरसारः ३. खगभेदः।
खैर, क्रि. वि. (अ.) अस्तु, एवं, साधु, भद्रं, सुष्ठु (सब अव्य.) २. का चिंता।
सं. स्त्री., कुशलं, मंगलम्।
—आफ़ियत, सं. स्त्री. (अ.) कुशलक्षेमम्।
—ख़्वाह, वि. (अ.+फ़ा.) शुभचिंतक, हितैषिन्।
—ख़्वाही, सं. स्त्री. (अ+फ़ा.) शुभचिंतकता, हितैषिता।
खैरा, वि. (हिं. खैर) खदिरवर्ण। सं. पुं., खादिरवर्णः कपोतो अश्वो वको वा २. नल-तल,-मीनः।
खैरात, सं. स्त्री. (अ.) दानं, त्यागः।
खैराती, वि (अ.) धर्मार्थं, पुण्यार्थं २. वदान्य, उदार।
खैरियत, सं. स्त्री. (अ.) मंगलं, कुशलम्।
खों (खुं) गाह, सं. पुं. (सं. खांगाहः तथा खोंकाहः) श्वेतपिंगलाश्वः।

खों खों, सं. स्त्री. (अनु.) कास-क्षवथु,-शब्दः।

खोंच, सं. स्त्री. (सं. कुच् = लकीर डालना >) कीलादिभिः वस्त्र,-विदरः-विदलः-रंध्रम् २. दे. 'खरोंच'।

—आना या लगना, क्रि. अ., कीलादिभिः दृ (कर्म., दीर्यते)।

खोंचना, क्रि. स., दे. 'खरोंचना'।

खोंचा, सं. पुं. (सं. कुच् = जोड़ना >) खग-बंधनवंशः २. दे. 'खोंच' ३. दे. 'खरोंच' ४. आघातः, प्रहारः ५. पूरणम्।

—खोंची, सं. स्त्री., परस्परकलहः, मिथः-प्रहारः।

खोंची, सं. स्त्री. (सं. कुच् >) पूरणं २. पदार्थान्तरनिवेशितवस्तु (न.) ३. क्षुद्रवस्तुक्रयः।

खोंटना, क्रि. स. (सं. खुंड् = तोड़ना >) अंगुलीभिः पत्रपुष्पं त्रुट् (प्रे.), उद्धृ-उत्कृष् (भ्वा. प. अ.)।

खोंटा, वि., दे. 'खोटा'।

खोंडर, सं. पुं. (सं. कोटरः-रं) निष्कुहः।

खोड़ा, वि. (सं. खोड) विकलांग, विकल, खंज, पंगु २. दंतहीन।

खोंता, खोंथा, सं. पुं. दे. 'घोंसला'।

खोंपा, सं. पुं. दे. 'खोपा'।

खोंसना, क्रि. स. (सं. कोशः >) पूरणं, निआ,-वेशनं, निधानम्।

खोआ, सं. पुं., दे. 'खोया[1]'।

खोखला, वि. (हिं. खुक्ख) शून्य-रिक्त,-गर्भ-उदर-मध्य।

खोखा, सं. पुं. (हिं. खुक्ख) धनार्पणादेशपत्रं। (वं.) बालः [खोखी (स्त्री.) = बालिका]।

खोज, सं. स्त्री. (हिं. खोजना) अन्वेषण-णा, गवेषणं-णा, मार्गणं-णा, अनुसंधानं, शोधः २. चिह्नं, लक्षणं ३. चक्र-याद,-चिह्नम्।

—करना, क्रि. स., दे. 'खोजना'।

—खाज, सं. स्त्री., पृच्छा, अनुयोगः २. अनुसंधान, विचारः-रणं-रणा ३. अन्वेषणम्।

खोजना, क्रि. स. (सं. खुज् = चुराना >) अन्विष् (दि. प. से.), निरूप्-मार्ग् (चु०), गवे (चु०. आ. से.), अनुसंधा (जु. उ. अ.), विधि (स्वा. उ. अ.), अव्-निर्-ईक्ष् (भ्वा. आ. से.)।

खोजवाना, खोजाना, क्रि. प्रे., 'खोजना' के प्रे. रूप।

खोजा, सं. पुं. (फा. ख्वाजः) सौविदः, सौविदल्लः, कंचुकिन्, २. सेवकः ३. आर्यः, महाशयः, मिश्रः, नायकः।

खो जाना, क्रि. अ., दे. 'खोना' (क्रि. अ.)।

खोजी, खोजिया, सं. पुं. (हिं. खोजना) अन्वेषकः, निरूपकः, निरीक्षकः, अनुसंधायकः, २. चरः, चारः, अपसर्पः।

खोट, सं. स्त्री. (सं. क्षोट् >) दोषः, वैकल्यं, वैगुण्यं, दूषणं २. मिश्रणं, ३. मिश्रधातुः (पुं.), कुप्यं, अपद्रव्यम्।

—मिलाना, क्रि. स., अपद्रव्येण मिश्र् (चु.)।

खोटा, वि. (सं. क्षोट् >) दूषित, सदोषः, दोषिन्, विकल २. (अपद्रव्येण) मिश्रित, कूट, कृत्रिम ३. दुष्ट, खल ४. छलिन्, अधार्मिक।

खोटी खरी सुनाना, मु., निर्भर्त्स्-तर्ज् (चु.), अधिक्षिप् (तु. प. अ.), निंद् (भ्वा. प. से.)।

खोटाई, सं. स्त्री., दे. 'खोटापन'।

खोटापन, सं. पुं. (हिं. खोटा) दुष्टता, क्षुद्रत्वं २. छलं, कपटं ३. दोषः, वैगुण्यं ४. अपद्रव्यमिश्रणम्।

खोड़, सं. स्त्री. (हिं. खोट) देव-भूत-प्रेत,-कोपः २. रोगः ३. कुमुहूर्तः-र्त्तं ४. दोषः, विकलता ५. चंदनकाष्ठखंडः-डम्।

खोड़रा, सं. पुं., दे. 'कोटर'।

खोड़ा, सं. पुं., दे. 'हथकड़ी'।

खोद,[1] सं. पुं. (फा. ख़ोद) खोलकः, लौह-धातुमय,-शिरस्त्राणं-शीर्षण्यं शिरस्कम्।

खोद,[2] सं. पुं. (हिं. खोदना) पृच्छा २. निरीक्षणम्

—विनोद, सं. पुं., अतीव अनुयोगः-अवेक्षणं-विचारणम्।

— —कर पूछना, मु., निभृतं-रहस्यं-गूढं प्रच्छ् (तु. प. अ.)-अनुयुज् (रु. आ. अ.)।

खोदना, क्रि. स. (सं. खुद् = तोड़ना >) खन् (भ्वा. उ. से.), (भूमिं) अवदृ (प्रे.), भिद् (रु. प. अ.)। २. उद्पट्-उन्मूल् (चु.) ३. उत्कृ (तु. प. से.), तक्ष्-चक्ष् (भ्वा. प. से.), मुद्र (चु.) ४. उत्खन्, निर्भिद्

(रु. प. अ.) ५. यष्ट्यादिभिः सं-आ-पीड् (चु.) ६. उद्धाप्-उत्तिज् (प्रे.)। सं. पुं., खननं, खातिः (स्त्री.), अवदारणं, भेदनं, उत्पाटनं, उन्मूलनं, उत्किरणं, तक्षणं इ.।

—योग्य, वि., खननीय, खेय, अवदारयितव्य; उत्पाटनीय, उन्मूलयितव्य।

—वाला, सं. पु. खनकः(-की स्त्री.),अवदारकः, उन्मूलकः, उत्पाटकः।

खोदा हुआ, वि., खात, अवदीर्ण, उन्मूलित, उत्पाटित इ.।

खोदनी, सं. स्त्री., (हिं. खोदना) लघु,-खनित्रं-टंगः।

कन—, सं. स्त्री., श्रवणशोधनी, कर्णकंडूयनी।

दंत—, सं. स्त्री., रदनशोधनी, दंतोल्लेखनी।

खोदवाना, क्रि. प्रे., 'खोदना' के प्रे. रूप।

खोदाई, सं. स्त्री., दे. 'खुदाई'।

खोन्चा, सं. पुं. (फ़ा. ख्वान्चः) भांडवाह-भाजनं, क्षुद्रवस्तुविक्रेतुः पात्रम्।

खोना, क्रि. स. (सं. क्षेपणं >) हा (जु. प. अ.), त्यज् (भ्वा. प. अ.) २. अपव्यय् (चु.) वृथा क्षै-ह्रस् (प्रे.)। ३. विप्रकृ, नश् (प्रे.)। क्रि. अ., मार्गात् भ्रंश्-भ्रंस् (भ्वा. आ. से.), संभ्रम् (दि. प. से.) २. नश् (दि. प. से.), च्यु (भ्वा. आ. अ.)।

खोपड़ा, खोपरा, सं. पुं. (सं. खर्परः) कपालः-लं, कर्परः २. शीर्ष,-शिरस् (न.) ३. अप्फलं, नारिकेरः-लः, कौशिकफलं ४. अप्फल-नारिकेर,-बीजं-गर्भः ५. भिक्षापात्रम्।

खोपड़ी, सं. स्त्री. (हिं. खोपड़ा) दे. 'खोपड़ा' (१, २)।

अंधी या औंधी—का, मु. जड, अज्ञ, मंदमति।

—खाना या चाट जाना, मु., वाचालतया उद्विज्-संतप्-अद् (प्रे.)।

—गंजी करना, मु., अत्यधिकं तड् (प्रे.)।

खोपा, सं. पुं. (सं. खर्परः) नारिकेल,-बीजं-गर्भः २. तृणपटलकोणः ३. मार्गाभिमुखो गृहकोणः ४. ब्रह्मरंध्रस्थः त्रिकोणः केशविन्यासः। ४. वेणी-कवरी-कच,-बंधः, जूटः-टकम्।

खोया[1], सं. पुं. (सं. क्षोदः >) घनी-श्यानी-सांद्री,-कृतं दुग्धं, किलाटः २. इक्षु,-शेषः-शेषं, हृतरसः इक्षुः ३. इष्टकालेपः।

खोया[2], वि. (हिं. खोना) नष्ट., भ्रष्ट, संभ्रांत।

खोरा, सं. पुं. (सं. खोलकः या फ़ा. आबखोरः) चषकः-कं, पात्रम्। दे. 'कटोरा'।

खोरी, सं. स्त्री., दे. 'कूचा'।

खोल, सं. पुं. (सं. खोलं >) कोषः-शः, वेष्टनं, आवरणं २. कीटत्वच् (स्त्री.) ३. पुटः-टं ४. उत्तरीयं, चेलम्।

खोलना, क्रि. स., (सं. खुड्=भेदन >) (द्वारादि) उद्घट् (प्रे.), वि-अपा-वृ (स्वा. उ. से.), निरर्गलीकृ। (आँखें) उन्मील्, उन्मिष्-उत्फल् (प्रे.)। (मुख) व्यादा (जु. प. अ.), उत्-वि-जृंभ् (प्रे.), (रहस्यादि) आविष्-व्यक्ती-प्रकटी,-कृ। २. शिथिलयति (ना. धा.), मोक्ष् (चु.), उन्मुच् (प्र.) ३. विस्तृ-विस्तृ (प्रे.) ४. अपा-वि-वृ, उच्छिद् (प्रे.) ५. विवस्त्रं कृ ६. व्याकृ, व्याख्या (अ. प. अ.)। सं. पुं, उद्घाटनं, विवरणं, उन्मीलनं, विकासः, स्फुटनं, विजृंभणं, आविष्करणं, उन्मोचनं इ.।

खोलने योग्य, वि., उद्घाटनीय, उन्मीलितव्य, उज्जृंभणीय इ०।

खोवा, सं. पुं., दे. 'खोया'।

खोसना, क्रि. स., दे. 'छीनना'।

खोह, सं. स्त्री. (सं. गोहः) कंदरः-रा, गुहा, गह्वरं, दरी २. विवरः-रं, बिलं, कुहरम्।

खौं, सं. स्त्री, (सं. खन् >) गर्तः, अवटः, बिलम् २. कुशूलः, धान्यकोष्ठः।

खौंचा, सं. पुं. (सं. षट्+च) सार्द्धषड्भिः गुणनतालिका।

खौंसड़ा, सं. पुं. (पं० खुसना >) जीर्ण,-उपानह् (स्त्री.)-पादत्रम्।

खौफ़, सं. पुं. (अ.) भयं, भीतिः (स्त्री.), त्रासः।

—नाक, वि. (अ.+फ़ा.) भयंकर, भीतिजनक।

खौर, सं. स्त्री. (सं. क्षुर्=लकीर डालना >) अर्द्धचंद्राकारं चंदनादेस्तिलकं २. स्त्रीमस्तकं-भूषणभेदः।

खौरहा, वि. (हिं. खौरा) (पशु) पामा-सिध्म,-पीडित, पामन।

खौरा (पशुओं का खुजली-रोग) सं. पुं. (सं. क्षौरं या फ़ा. वालख़ोरः >) पामन्-सिध्मन् (पुं.), पामा। वि., दे. 'खौरहा'।

खौरु, सं. पुं. (देश.) वृषभ,-गर्जना-निनादः २. कलहः ।

खौलना, क्रि. अ., दे. 'उबलना' २. बुद्बुदायते-फेनायते (ना. धा.) ३. प्रकुप् (दि. प. से.), सं-वि-क्षुभ् (भ्वा. आ. से.) ।

खौलाना, क्रि. प्रे., 'खौलना' के प्रे. रूप ।

ख्यात, वि. (सं.) प्रसिद्ध, विश्रुत ।

ख्याति, सं. स्त्री. (सं.) प्रसिद्धिः-कीर्तिः (स्त्री.) ।

ख़्याल, सं. पुं. (अ.) विचारः-रणा, मतं, सं-, मतिः (स्त्री.) २. सं.-स्मृतिः (स्त्री.), स्मरणं, धारणा ३. अनुमानं, वि-, तर्कः, अभ्यूहः-हनं ४. आदरः, संमानः ५. गीतिभेदः ।

—से उतरना, मु., विस्मृ (कर्म.), स्मृतिपथात् भ्रंश् (भ्वा. आ से.) ।

ख़्याली, वि. (अ. ख़्याल) काल्पनिक, कल्पित, कल्पनात्मक, अवास्तविक, वितथ ।

—पुलाव पकाना, मु., गगनकुसुमानि-खपुष्पाणि वा चि (स्वा. उ. अ.) ।

ख़िष्टान, सं. पुं. (हिं. ख़ीष्ट) दे. 'ईसाई' ।

ख़ीष्ट, सं. पुं. (अं. क्राइस्ट) दे. 'ईसामसीह' ।

ख़्वाजा, सं. पुं. (फ़ा.) स्वामिन्, प्रभुः २. अध्यक्षः, नायकः ३. सौविदः-दल्लः ४. श्रेष्ठ-यवनभिक्षुः (पुं.) ५. आर्यः, मिश्रः ।

ख़्वाब, सं. पुं. (फ़ा.) निद्रा २. स्वप्नः ।

ख़्वार, वि. (फ़ा.) नष्ट, ध्वस्त, क्षीण २. अनादृत, अपमानित ।

ख़्वारी, सं. स्त्री. (फ़ा.) विध्वंसः, विनाशः २. अनादरः, तिरस्कारः ।

ख़्वाह, अव्य. (फ़ा.) वा, अथवा, आहोस्वित् (सब अव्य.) ।

—म-ख़्वाह, क्रि. वि., मताग्रहेण, मताभिमानेन २. अवश्यं, निर्विकल्पम् ।

ख़्वाहिश, सं. स्त्री. (फ़ा.) अभिलाषः, आकांक्षा, इच्छा ।

—मंद, वि. (फ़ा.) आकांक्षिन्, इच्छुक ।

—करना या रखना, क्रि. स., इष् (तु. प. से.), वांछ्-आकांक्ष्-अभिलष् (भ्वा. प. से.) ।

ग

ग, देवनागरीवर्णमालायाः तृतीयव्यंजनवर्णः, गकारः ।

गंग, गंगा, सं. स्त्री. (सं. गंगा) जाह्नवी, त्रिपथगा, भागीरथी, मंदाकिनी, सुरसरित् (स्त्री.), विष्णुपदी, खापगा, हरशेखरा ।

—जमनी, वि. (सं. गंगा+हिं. जमुना >) मिश्रित, संकर, द्विवर्ण २. स्वर्णरजतमय ३. शुक्ल-कृष्ण, सितासित ।

—जल, सं. पुं. (सं. न.) भागीरथीतोयं २. श्वेत-सूक्ष्मवस्त्रभेदः ।

—जली, सं. स्त्री. (सं. गंगाजल >) गंगाजलपात्रम् ।

—जली उठाना, मु., गंगोदकेन शप् (भ्वा. उ. अ.) ।

—पुत्र, सं. पुं. (सं.) भीष्मः, गांगेयः २. प्रेत-वाही जातिविशेषः ३. तीर्थवासी विप्रभेदः ।

—सागर, सं. पुं. (सं.) गंगामुखं २. कलशः, उदकपात्रभेदः ३. वंगपु तीर्थविशेषः ।

गंगाल, सं. पुं. (सं. गंगालयः >) बृहज्जलपात्रं ।

गंगोदक, सं. पुं. (सं. न.) गंगा-भागीरथी,-जलं-तोयम् ।

गंज[1], सं. पुं. (फ़ा., सं.) कोशः-षः २. राशिः (पुं.) ३. निपद्या, वाणिज्यस्थानं ४. समूहः ।

गंज[2], सं. पुं. (सं. कंजः=केश >) खालत्यं, खल्वाटता, विकेशता ।

गंजन, सं. पुं. (सं. न.) अवज्ञा, तिरस्कारः २. नाशः, ध्वंसः ३. पीडा, व्यथा ।

गंजा, वि. (सं. कंजः = केश >) खल्वाट, विकेश (-शी, स्त्री.), खलति, खल्लोट ।

गंजी, सं. स्त्री. (सं. गंजः), राशिः (पुं.), निकरः, समूहः २. दे. 'शकरकंद' ३. दे. 'बनियायन' ।

गंजीफ़ा, सं. पुं. (फ़ा.) पत्रखेलाभेदः । २. क्रीडापत्रचयः ।

गंजेड़ी, गंजेल, वि. (हिं. गांजा) गंजापायिन्, गंजापः ।

गँठकटा, सं. पुं. (हिं. गाँठ+काटना) ग्रंथि-भेदकः, चौरः ।

गँठजोड़ा, सं. पुं. (हिं. गाँठ+जोड़ना) दे. 'गँठबंधन' ।

गँठबंधन, सं. पुं. (सं. ग्रंथिबंधनं) ग्रंथि-ग्रंथिका,-बंधनं-योजनं-संश्लेषणं । (वैवाहिकीतिभेदः) ।

गंड, सं. पुं. (सं.) गल्लः, कपोलः २. हस्ति-कपोलः, कटः, करटः ३. दे. 'कनपटी' ४. स्फोटकः, पिटकः ५. रेखा, चिह्नं ६. ग्रंथिः (पुं.) ७. खड्गिन्, गंडकः ८. रक्षाकरंडः ९. गडुः (पुं.)।

—माला, सं. स्त्री. (सं.) गलगंडः, कंठमाला, गलरोगभेदः।

—स्थल, सं. पुं. (सं. न.) दे. 'कनपटी'।

गंडक, सं. पुं. (सं.) कंठधार्यो रक्षाकरंडः २. ग्रंथिः (पुं.) ३. स्फोटकरोगभेदः ४. खड्गिन् (पुं.) ५. चिह्नं ६. देशविशेषः।

गंडा, सं. पुं. (सं. गंडकः=गांठ) १. कंठधार्यो रक्षाकरंडः २. चतुष्कं, चतुष्टयं ३. कपर्दिका-पण,-चतुष्टयं ४. वलयः, चक्रं ५. हयकंठभूषणं ६. इक्षुः (पुं.)।

—तावीज, सं. पुं., मंत्रयंत्रम्।

—तावीज करना, क्रि. स., रक्षाकरंडैः भूतप्रेतान् निष्कस् (प्रे.)-दूरी कृ।

गँड़ा(डा)सा, सं.पुं. (हिं. गेड़ी+सं. असिः>) यवस-घास,-छेदनी २. लघु,-परशुः (पुं.)-परश्वधः।

गँडेरी, सं. स्त्री. (हिं. गंडा) इक्षु,-खण्डकः-कम्।

गंदगी, सं. स्त्री. (फ़ा.) मलः-लं, अव (प) स्करः, कल्क-ल्कः, किट्टं, कर्दमः २. मालिन्यं, कालुष्यं ३. अपवित्रता, अशुचिता।

गँदला, वि., दे. 'गंदा'।

गंदा, वि. (फ़ा.) मलिन, मलीमस, समल, कलुष, आविल २. अशुद्ध, अपवित्र ३. कुत्सित, गर्ह्य, अश्लील।

—करना, क्रि. स., कलुषयति-मलिनयति (ना. धा.), दुष् (प्रे. दूषयति), कलुषी-आविली,-कृ। [गंदी (स्त्री.)=मलिना इ.]

गंदी बातें, अश्लील,-ग्राम्य-अवाच्य-वचनानि।

गंदा बिरोज़ा, सं. पुं. (सं. गंध+दे. बिरोज़ा) कुंदः-दुः, कुंदुरः-रुः, पालंक्री, बहु-तीक्ष्ण,-गंधः, श्रीवत्सः-सकः, सरल,-द्रवः-निर्यासः।

गंदुम, सं. पुं. (फ़ा., सं. गोधूमः), सुमनः, म्लेच्छभोज्यः, प्रवटः।

गंदुमी, वि. (फ़ा. गंदुम) गोधूम (समास में), गोधूम-सुमन,-वर्ण, प्रवटमय।

गंध, सं. स्त्री. (सं. पुं.) आमोदः, वासः २. घ्राणग्राह्यः पृथिवीगुणः (वै.) ३. सुगंधः, सुवासः।

—बिलाव, सं. पुं. (सं. गंधविडालः) गंध-मार्जारः, खट्टासः।

—राज,-सार, सं. पुं. (सं.) चंदनम्।

गंधक, सं. स्त्री. (सं. पुं.) गंधि(ध)कः, गंधाश्मन्, सौगंधिकः।

—का तेज़ाब, सं. पुं., गन्धकाम्लः।

गंधकी, वि. (सं. गंधकः>) गंधकः,-गर्भ-युक्त २. ईषत्पीत।

गंधर्व, सं. पुं. (सं.) स्वर्गगायकः, दिव्यगायनः, गातुः (पुं.), देवभेदः २. गायकः। [-र्वी स्त्री.]

—नगर, सं. पुं. (सं. न.) खे स्थले वा ग्राम-नगरादीनां मिथ्याभासः, गातु-गंधर्व,-पुरं २. माया, प्रपंचः, इंद्रजालम्।

—विद्या, सं. स्त्री. (सं.) संगीतं, संगीत-वाद्य,-विद्या-शास्त्रम्।

—विवाह, सं. पुं. (सं.) विवाहभेदः (धर्म.) पित्रोरनुमतिं विना स्वेच्छातो विवाहः।

गंधार, सं. पुं. (सं. गांधारः) भारतवर्षस्यो-त्तरस्यां दिशि देशविशेषः २. तृतीयस्वरः (संगीत.)।

गंधी, सं. पुं. (सं. गंधिन्>) गांधिकः, गंध,-विक्रयिन्-उपजीविन्-वणिज् २. ३. घास-कीट,-भेदः।

गंधारी, सं. स्त्री., दे. 'गांधारी'।

गंभीर, वि. (सं.) ग (गं) भीर,-रकं, अगाध, निम्न २. गहन, निविड ३. दुर्बोध, निगूढार्थ ४. मंद्र, घन (शब्द) ५. शांत, सौम्य।

गंभीरता, सं. स्त्री. (सं.) गांभीर्यं; गौरवं; धीरता; निम्नता; गहनता; दुर्बोधता; सौम्यता इ.।

गँवाऊ, वि. (हिं. गँवाना) अपव्ययिन्, विक्षेपिन्, दे. 'उजाड़ू'।

गँवाना, क्रि. स. (सं. गमनं>) अपव्यय् (चु.) वृथा क्षै-हस् (प्रे.) २. हा (जु. प. अ.), त्यज् (भ्वा. प. अ.) ३. (समयं) या-अतिवह् (प्रे.)।

गँवार, वि. (हिं. गाँव) ग्रामीण, ग्रामिक, ग्रामिन् (पुं.); ग्राम्य २. मूर्ख, जड ३. अनार्य, असभ्य।

—पन, सं. पुं., ग्रामीणता, मूर्खता, असभ्यता इ.।

गँवारू, वि. (हिं. गँवार) ग्रामीय, असंस्कृत, प्राकृत २. अशिष्ट, असभ्य।

गऊ, सं. स्त्री, दे. 'गौ'।

गगन, सं. पुं. (सं. न.) आकाशः-शम्।

—भेदी, वि. (सं.-दिन्) आकाश-व्योम,-वेधक-वेधिन्-भेदिन् (शब्दादि) २. (भवनादि) गगन-व्योम,-स्पृश्-चुंबिन्, अभ्रंलिह्, नभोलिह्।

गगरा, सं. पुं. (सं. गर्गरः = दधिमंथनपात्र >) धातु,-कुंभः-कलशः-घटः, गर्गरः।

गगरी, सं. स्त्री. (सं. गर्गरी = दधिमंथनपात्र >) धातुमयलघु,-कलशः-घटः-कुंभः, गर्गरी।

गच, सं. पुं. (अनु.) पंके चलनजः शब्दः २. खड्गादिवेधनोत्थः शब्दः ३. लेपः, सुधा ४. गृहभूमिः-भूः (स्त्री.) ५. सुधालिप्ततलं, कुट्टिमः-मम्।

—कारी, सं. स्त्री. (हिं. गच + फ़ा. कारी >) सुधा-लेप,-कार्य-कर्मन् (न.)।

गचपच, वि., दे. 'गिचपिच'।

गज, सं. पुं. (सं.) हस्तिन्, कुंभिन्, करिन्, कुपिन्, दंतिन्, रदिन्, शुंडिन् (सब पुं.), दे. 'हाथी'।

—आनन, सं. पुं. (सं.) गजमुखः, गणेशः, गजवदनः।

—कुंभ, सं. पुं. (सं.) करिकुंभः, गजशिरःपिंडः।

—गति, सं. स्त्री. (सं.) गज-कुंजर,-गमनं-गतिः।

—गामिनी, वि. स्त्री. (सं.) इभ-वारण,-गामिनी-चारिणी (सुंदरी)।

—दंत, सं. पुं. (सं.) हस्ति-करि,-दंतः-रदः-रदनः २. गणेशः।

—दान, सं. पुं. (सं. न.) गजमदः २. करिशिरःस्थम्।

—पति, सं. पुं. (सं.) करींद्रः (यूथनाथः, यूथपः)।

—पाल, सं. पुं. (सं.) हस्तिपः-पकः, आधोरणः, निषादिन् (पुं.), महामात्रः।

—मोती, सं. पुं. (सं. गजमौक्तिकं) गजमुक्ता, गजमणिः (पुं.)।

—मुख, सं. पुं. (सं.) दे. 'गजानन'।

—राज, सं. पुं. (सं.) दे. 'गजपति'।

—वदन, सं. पुं. (सं.) दे. '-आनन'।

—वान, सं. पुं. (सं. गजः >) दे. 'गजपाल'।

—शाला, सं. स्त्री. (सं) द्विप-हस्ति,-शाला-गृहम्।

गज़, सं. पुं. (फ़ा.) गजः (माप) २. आग्नेय-चूर्ण-प्रणोदनी यष्टिः (स्त्री.) ३. सारंगीवादन-यष्टिः, वादन-वाद्य-वादित्र,-दण्डः ४. इषुभेदः।

गज़क, सं. स्त्री. (फ़ा. कज़क) व्यंजनं, उपस्करः, उप-अव,-दंशः २. तिलशर्करा (मिठाई) ३. उपाहारः ४. प्रातराशः।

गजनी, सं. स्त्री. (सं. गंजः >) मृत्तिका-मृद्,-भेदः।

ग़ज़ब, सं. पुं. (अ.) रोषः, क्रोधः २. विपद्-विपत्तिः (स्त्री.) ३. अन्यायः, अत्याचारः ४. विलक्षणवृत्तांतः।

—करना, क्रि. स., अन्यायेन अधिष्ठा (भ्वा. प. अ.)-शास् (अ. प. से.) २. विस्मयं जन् (प्रे.)।

—का, वि. अद्भुत, आश्चर्य।

—नाक, वि., रुष्ट, क्रुद्ध, कुपित।

गजर, सं. पुं. (सं. गर्जः, हिं. गरज) चतुरष्ट-द्वादशवादनसमये घंटानादः २. प्रातः घंटानादः।

सं. स्त्री., श्वेतरक्तगोधूममिश्रणम्।

—दम, क्रि. वि., प्रातः, प्रभाते, महति प्रत्यूषे।

—बजर, सं. पुं. (अनु.) अनुचितमिश्रणम्। २. खाद्याखाद्यं, भक्ष्याभक्ष्यम्।

गजरा, सं. पुं (सं. गंजः = ढेर >) माला, माल्यं, स्रज् (स्त्री.) २. वलयः, कटकः-कं, करभूषणं ३. कौशेयवस्त्रभेदः।

ग़ज़ल, सं. स्त्री. (फ़ा.) शृंगारकविता।

गजी, सं. स्त्री. (फ़ा.) स्थूलसौत्रवस्त्रभेदः।

गजी, सं. स्त्री. (सं.) हस्तिनी, करिणी।

गजेन्द्र, सं. पुं. (सं.) दे. 'गजपति'।

गटकना, क्रि. स. (अनु. गट) खाद् (भ्वा. प. से.) २. निगृ (तु. प. से.), ग्रस् (चु.) ३. अन्यायेन अपहृ (भ्वा.प.अ.)।

गटगट, सं. पुं. (अनु.) गटगटा,-शब्दः-ध्वनिः (पुं.), गटगटायितम्। क्रि. वि., सगटगटा-शब्दम्।

गटपट, सं. स्त्री. (अनु.) रतिः (स्त्री.), मैथुनं सहवासः २. वनमैत्री। (वि.) मैथुनासक्त।

गटरगूं, सं. स्त्री. (अनु.) कपोत,-शब्दः-कूजितं, वृत्कारः।

गट्ट, सं. पुं. (अनु.) निगरणध्वनिः (पुं.)।

गट्टा, सं. पुं. (सं. ग्रंथः>) मणिबंधः-धनं, पाणिमूलं २. गुल्फः, घुंटः ३. जानु (पुं. न.), नलकीलः ४. रोधनी, अवष्टंभः ५. ग्रंथिः (पुं.), ग्रंथिका ६. संधिः (पुं.) पर्वन् (न.), अस्थिसंधिः (पुं.) ७. बीजं ८. मिष्टान्नभेदः।

गट्टी, सं. स्त्री. (हिं. गट्टा) आवापनं, तंतुकीलः।

गट्ठर, सं. पुं. (हिं. गाँठ) पोटलिका, भारः, कूर्चः,-संघातः, गुच्छः।

गट्ठा, सं. पुं. (हिं. गाँठ) काष्ठादीनां भारः २. दे. 'गट्ठर' (३–४) पलांडु-लशुन,-ग्रंथिः(पुं.)।

गट्ठी, सं. स्त्री. (हिं. गट्ठा) दे. 'गठरी'।

गठ, सं. स्त्री. (हिं. गाँठ, दे.)।

—कटा, वि. पुं., दे. 'गँठकटा'।

—जोड़ा, सं. पुं., दे. 'गँठबंधन'।

गठन, सं. स्त्री. (सं. ग्रंथनं) घटना, रचना, विधानं, निर्माणम्।

—राही, सं. स्त्री. (फा.) भ्रान्तिः (स्त्री.), भ्रमः २. कुमार्गः।
गुमटी, सं. स्त्री. (फा. गुंबद) (सोपानादीनां) उच्छ्रदिः (स्त्री.)।
गुमड़ा, सं. पुं. (फा. गुंबद) गंडः, शोथः, शोफः।
गुमरी, सं. स्त्री., दे. 'घुमरी'।
गुमान, सं. पुं. (फा.) अनुमानं २. दर्पः।
गुमाश्ता, सं. पुं. (फा.) प्रतिनिधिः (पुं.), प्रतिहस्तः-स्तकः, नियोगिन् (पुं.), नियुक्तः, प्रतिपुरुषः।
—गीरी, सं. स्त्री. (फा.) नियोगि-प्रतिनिधि,-पदं-कार्यं २. प्रातिनिध्यं, नियुक्तत्वम्।
गुम्मट, सं. पुं. (फा. गुंबद दे.)।
गुर, सं. पुं. (सं. गुरुमन्त्रः >) सूत्रं, मूलमन्त्रः, सारः, संक्षिप्तविधिः (पुं.)।
गुरिया, सं. स्त्री. (सं. गुलिका) गुली, गुटिका।
गुरु, सं. पुं (सं.) बृहस्पतिः, देवगुरुः २. बृहस्पतिग्रहः ३. पुष्यनक्षत्र ४. मंत्रोपदेशकः ५. आचार्यः ६. अध्यापकः, शिक्षकः ७. पुरोहितः ८. द्विमात्रिकवर्णः (छन्द.) ९. बल-विद्यादिषु स्वतोऽधिकः।
वि., बृहत्, महत्, विशाल, विपुल, विस्तीर्ण २. भारवत् ३. दुर्जर, दुष्पच, गरिष्ठ ४. पूज्य, मान्य।
—आई, सं. स्त्री., गुरुता, गुरुधर्मः २. गुरुकृत्यं, मंत्रोपदेशः ३. धूर्तता।
—कुल, सं. पुं. (सं. न.) विद्यालयः, शिक्षालयः।

गूग(गु)ल, सं. पुं., दे. 'गुग्गुल'।

गूजर, सं. पुं. (सं. गुर्जरः) गोपः, गोपालः, आभीरः २. जातिविशेषः।

गूजरी, सं. स्त्री. (सं. गुर्जरी) गोपी, गोपपत्नी २. चरणाभरणभेदः ३. रागिणीविशेषः।

गूढ़, वि. (सं.) दुर्बोध, कठिन २. गुप्त, प्रच्छन्न ३. गम्भीर, सारगर्भित।

—पुरुष, सं. पुं. (सं.) दे. 'गुप्तचर'।

गूढ़ता, सं. स्त्री. (सं.) दुर्बोधता, गम्भीरता, प्रच्छन्नता।

गूथना, क्रि. स., दे. 'गूंथना'।

गूदड़, सं. पुं. (हिं. गूँथना) कर्पटः, जीर्णवसनं २. अवस्करः, मलं ३. तूला, तूलिका।

गूदड़ी, सं. स्त्री. (हिं. गूदड़) (भिक्षुकस्य) तूला २. पोट्टली-लिका।

गूदा, सं. पुं. (सं. गोर्दः) मस्तिष्कं, गोर्द, मस्तकस्नेहः २. फल,-सारः-मज्जा-वसा ३. बीज,-सारः-गर्भ ४. सारभागः।

गूधना, क्रि. स. दे. 'गूँधना'।

गून, सं. स्त्री. (सं. गुणः) नौकर्षणरज्जुः (स्त्री.)।

गूमड़ा, सं. पुं. (सं. गुल्मः-मं >) वि-,स्फोटः, पिटकः २ शोथः, शोफः।

गूमड़ी, सं. स्त्री. (हिं. गूमड़ा) पिटिका, क्षुद्रव्रणः, रक्तवटी।

गूलर, सं. पुं., उदुम्बरः, यज्ञांगः, जंतुफलः, हेमदुग्धकः, पुष्पशून्यः।

—का कीड़ा, मु., कूपमंडूकः, अनुभवहीनः।

—का फूल, मु., दुर्लभवस्तु (न.)।

गूह, सं. पुं. (सं. गूथः-थं) पुरीषं, मलं, उच्चारः, विष्ठा, अप(व)स्करः, विष् (स्त्री.)।

गृध्र, सं. पुं. (सं.) दे. 'गिद्ध'।

गृह, सं. पुं. (सं. न.) गृहाः (पुं. बहु.), गेहं-, हः, वेश्मन्-सद्मन् (न.), निकेतः-तनं, सदनं, भवनं, अ(आ)गारं, मंदिरं, निलयः, आलयः, शाला, सं-आ-नि-अधि-,वासः, आवसथः, उदवसितं, निकाय्यः २. *परिवारः, कुटुम्बं, गृहाः।

—पति, सं. पुं.(सं.) गृहिन् , गेहिन् , कुटुम्बिन् २. कुक्कुरः ३. अग्निः।

—पत्नी, सं. स्त्री. (सं.) शालिनी, गृहिणी, गेहिनी, कुटुम्बिनी।

—युद्ध, सं. पुं. (सं. न.) जनप्रकोपः, प्रकृतिक्षोभः, २. कौटुम्बिककलहः।

गृहस्थ, सं. पुं. (सं.) गृहमेधिन्, ज्येष्ठाश्रमिन्, दे. 'गृहपति'।

—आश्रम, सं. पुं. (सं.) वैवाहिकजीवनं २. द्वितीयाश्रमः।

गृहस्थी, सं. स्त्री. (सं. गृहस्थ >) गृहस्थ,-आश्रमः-कर्तव्यानि (न. बहु.) २. गृहव्यवस्था ३. कुटुंबं, परिवारः ४. गृह,-उपस्कारः-सामग्री ५. गृहकार्यकुशलता।

गृहिणी, सं. स्त्री. (सं.) शालिनी, दे. 'गृहपत्नी'।

गृही, स. पुं. (सं. गृहिन्) गृहस्थः, दे. 'गृहपति'।

गेंडली, सं. स्त्री. (सं. कुंडली >) मंडलं, आवेष्टनं, व्यावर्तनम्।

—मारना, क्रि. स., मंडली-पुटी-वर्तुली, कृ, व्यावृत् (प्रे.)।

गेंडुरी, सं. स्त्री., दे. 'इंडुरी'।

गेंद, सं. पुं. (सं. गेंदुकः) कंदुकः, गेण्डु (डू) कः, गोलकः, गोलः-ला-लं २. मंडलं, वर्तुलं, गोलः-लम्।

—बल्ला, सं. पुं., गेंदुकपट्टं, पट्टगेन्दुकम्, आङ्ग्लीयक्रीडाभेदः।

गेंदुआ, सं. पुं. (सं. गेंडुकः >) (गोल-) उपबर्हः-उपधानम्।

गेंदा, सं. पुं. (सं. गेंडुकः) बृहत् ,-कंदुकः गोलकः २. पुष्पभेदः।

गेरना, क्रि. स., दे. 'गिराना' तथा 'उँडेलना'।

गेरू, सं. स्त्री. (सं. गवेरुकं) गैरिकं, रक्त-गिरि, धातुः (पुं.), रक्तोपलं, गिरिजं, गिरि-लोहित, मृत्तिका, वनालक्तम्।

गेरुआ, वि. (हिं. गेरू) गवेरुकरंजित २. गिरिजवर्ण।

गेह, सं. पुं. (सं. पुं. न.) दे. 'गृह'।

गेहुँअन, सं. पुं. (हिं. गेहूँ) गोधूमकः, फणिभेदः।

गेहूँ, सं. पुं. (सं. गोधूमः) सुमनस् (पुं.), बहुदुग्धः, यवनः, म्लेच्छभोजनः, सितशिविकः, निस्तुषः, क्षीरिन् , अपूपः, रसालः २. नागरंगः।

गेहुँआ, वि. (हिं. गेहूं) गोधूम,-वर्ण रंग, २. गोधूममय, गोधूम-(समास में) २. घासभेदः।

गैंड़ा, सं. पुं. (सं. गंडः) गंडकः, खड्गिन्, वज्रचर्मन् (पुं.), तुंग-क्रोडी,-मुखः, वार्ध्री-(ध्री)णसः, खड्गमृगः ।

गैंत-ती, सं. स्त्री. (देश.) दे. 'कुदाल' ।

ग़ैब, सं. पुं. (अ.) परोक्ष-तिरोहित,-पदार्थः । वि., गुप्त, तिरोहित ।

—दाँ, वि., परोक्षविद्, सर्वज्ञ ।

ग़ैबी, वि. (अ. गैब) गुप्त, प्रच्छन्न, अज्ञात ।

गैया, सं. स्त्री. दे. 'गाय' ।

ग़ैर, वि. (अ.) अन्य, इतर, पर, अपर २. भिन्न, व्यतिरिक्त । सं. पुं., आगंतुकः, अभ्यागतः ।

—आबाद, वि., निर्जन, वसतिशून्य ।

—मनक़ूला, वि., स्थिर, स्थावर, अचर-ल ।

—मामूली, वि., विशिष्ट, असाधारण, विशेष ।

—मुनासिब,-वाजिब, वि., अनुचित, अयोग्य ।

—मुमकिन, वि., असंभव, अशक्य ।

—शख़्स, सं. पुं., परः, अनात्मीयः ।

—हाज़िर, वि., अनुपस्थित, अविद्यमान ।

—हाज़िरी, वि., अनुपस्थितिः (स्त्री.), अविद्यमानता ।

गैरत, सं. स्त्री. (अ.) लज्जा, त्रपा ।

गैरिक, सं. पुं. (सं. न.) दे. 'गेरू' ।

गैल, सं. स्त्री., दे. 'गली' ।

गैस, सं. स्त्री. (अं.) वातिः (स्त्री.), वाष्पः ।

गोंड़ा, सं. पुं. (सं. गोष्ठं) व्रजः, अवरोधः, शाला २. ग्रामः ३. विस्तीर्णमार्गः ४. अजिरम् ।

गोंद, सं. पुं. (सं. कुंदः >, अथवा हिं. गूदा) निर्यासः ।

—दानी, सं. स्त्री. निर्यासधानी ।

गोंदीला, वि. (हिं. गोंद) निर्यास,-मय-तुल्य, सांद्र, श्यान ।

गो[1], सं. स्त्री. (सं.) दे. 'गाय' २. किरणः इंद्रियं ४. वाच् (स्त्री.) ५. सरस्वती ६. नेत्रं ७. विद्युत् (स्त्री.) ८. पृथ्वी ९ दिशा १० जननी ११. जिह्वा । सं. पुं. (सं.) वृषभः २. नंदीगणः ३. घोटकः ४. सूर्यः ५. चंद्रः ६ बाणः ७. गायकः ८. आकाशः-शं ९. स्वर्गः १० जलं ११. लोमन् (न.) १२ शब्दः १३. नवांकः ।

—कर्ण, सं. पुं. (सं.) धेनुश्रवणं २. शैवतीर्थ-विशेषः । ३. अश्वतरः ४. सर्पभेदः ५. किष्कुः-वितस्तिः (पुं. स्त्री.) (हिं. बित्ता) ५. मृग-भेदः । वि., लंबकर्ण ।

—कुल, सं. पुं. (सं. न.) गोसमुदायः २. गोष्ठं ३. ग्रामविशेषः ।

—ग्रास, सं. पुं. (सं.) गो,-कवलः-(-लं)-पिंडः ।

—घात, सं. पुं. (सं.) गो,-हत्या-वधः-मारणम् ।

—घातक, सं. पुं. (सं.) गोघातिन्, गोघ्नः ।

—चर, वि. (सं.) इन्द्रियग्राह्य, इन्द्रियगम्य । सं. पुं., रूपादिविषयाः २. शाद्वलं, तृणावृत-भूमिः (स्त्री.) ३. प्रांतः, देशः ।

—चरी, सं. स्त्री. (सं. गोचर >) भिक्षावृत्तिः (स्त्री.) ।

—तीत, वि., अगोचर, अतींद्रिय, इन्द्रियातीत, इंद्रियागोचर ।

—दान, सं. पुं. (सं. न.) धेनु-गो,-विसर्जनं-त्यागः ।

—धू(ली)लि, सं. स्त्री. (सं.) संध्या-सायं,-कालः-समयः-वेला ।

—धेनु, सं. स्त्री. (सं.) दुग्धवती गौः (स्त्री.) ।

—पाल, सं. पुं. (सं.) गोपः, गोपालकः । २. श्रीकृष्णः ।

—मय, सं. पुं. (सं. न.) गो,-मलं-पुरीषं-विष्ठा ।

—मुख, सं. पुं. (सं. न.) धेनुवदनं २. शंखभेदः । ३. दे. 'नरसिंहा' ४. गोमुखी, जपमालाकोषः । ५. चौरकृतं कुड्यरंध्रम् ।

—मूत्र, सं. पुं. (सं. न.) गो,-जलं- प्रस्रावः-द्रवः-निष्यंदः ।

—मेद,-मेदक, सं. पुं. (सं.) राङ्कवरत्नं, पुष्परागः, पीताश्मन् (पुं.) ।

—मेध, सं. पुं. (सं.) यज्ञभेदः ।

—रस, सं. पुं. (सं.) दुग्धं २. दधि (न.) ३. तक्रं ४. इन्द्रियसुखम् ।

—रोचन, सं. पुं. (सं.-चना) शुभा, शोभा, शोभना, रोचनी, शिवा, मंगला, पीता, रोचना ।

—लोक, सं. पुं. (सं.) श्रीकृष्णस्य नित्यधामन् (न.) ।

—वर्द्धन, सं. पुं. (सं.) व्रजभूमौ पर्वतविशेषः ।

—वर्द्धनधर, सं. पुं. (सं.) गोवर्धनधारिन्, श्रीकृष्णः ।
—विंद, सं. पुं. (सं.) श्रीकृष्णः ।
—शाला, सं. स्त्री. (सं.) गोष्ठं, गोगृहं, व्रजः ।
—साईं, सं. पुं., दे. 'गोस्वामी' ।
—स्वामी, सं. पुं. (सं.-मिन्) गोपतिः २. प्रभुः ।
—हत्या, सं. स्त्री. (सं.) दे. 'गोघात' ।
गो[२], गो कि, अव्य. (फ़ा) अपि, यद्यपि ।
गोखरु, सं. पुं. (सं. गोक्षुरः) त्रिकंटः-टकः, गोकंटः-टंकः (क्षुपविशेषः) २. तस्य कंटकः-कं ३. कटक-वलय,-प्रकारः ।
गोज़, सं. पुं. (फ़ा.) अपानवायुः, पर्दः ।
गोजर, सं. पुं. दे. 'कनखजूरा' ।
गोजरा, सं. पुं. (हिं. गेहूँ+जव) गोधूमयवाः ।
गोझा, सं. पुं. (सं. गुह्यकः) १. पक्वान्नभेदः । २. वंश-काष्ठ,-कीलः ३. दे. 'जेव' ४. घासभेदः ।
गोट[१], सं. स्त्री. (गोष्ठः > ?) वस्तयः-दशाः (स्त्री. बहु.), वसनप्रान्तः ।
गोट[२], सं. स्त्री. (सं. गुटिका) शारः, शारिः (पुं.), खेलनी ।
गोटा, सं. पुं. (हिं. गोट) सुवर्ण-रजत,-जालाभरणं-वस्त्राभरणम् ।
गोटी, सं. स्त्री. (सं. गुटिका) पाषाणखंडः-डं, शर्करा २. दे. 'गोट[२]' । ३. मसूरी-रिका, शीतलारोगः ।
गोठ, सं. स्त्री. (सं. गोष्ठं) गोशाला २. पर्यटनं, भ्रमणं ३. श्राद्धभेदः ।
गोड़ना, क्रि. स. दे. 'खोदना' ।
गोड़ा, सं. पुं. दे. 'घुटना' ।
गोणी, सं. स्त्री. (सं.) शाण,-कोषः-पुटः, स्यू-(स्यो)तः, प्रसेवः २. द्रोणीपरिमाणम् ।
गोत, सं. पुं. (सं. गोत्रं) दे. 'गोत्र' २. गणः, समूहः ।
गोता, सं. पुं. (अ.) निमज्जनं, अवगाहः ।
—देना, क्रि. स., व. 'गोता मारना' के प्रे. रूप ।
—मारना, क्रि. अ. वि-अव-गाह् (भ्वा. आ. वे.) निमज्ज् (तु. प. अ.) ।
—खोर, सं. पुं. (अ.+फ़ा.) अवगाहकः, निमंक्तृ (पुं.) ।
गोत्र, सं. पुं. (सं. न.) कुलं, वंशः, अन्वयः २. समूहः ३. संपत्तिः (स्त्री.) ४. बन्धुः ५. जातिविभागः ।
गोदंत, सं. पुं. (सं. न.) हरितालम् ।
गोद, सं. स्त्री. (सं. क्रोडं) अंकः, उत्संगः ।
—लेना, मु., पुत्रीकृ, (पुत्रत्वेन) परिग्रह् (क्र. प. से.) ।
गोदना, क्रि. स. (हिं. खोदना) सूच्या त्वचं रंज् (प्रे.), त्वचमनुविध्य पत्ररेखां निविश्(प्रे.) २. गोबीजं निविश् (प्रे.) ३. सूच्यग्रेण व्यध् (दि. प. अ.) ४. असकृत् प्रणुद्-प्रवृत् (प्रे.)। सं. पुं., त्वचि सूचीखातम् कृष्णचिह्नम् ।
गोदनी, सं. स्त्री. (हिं. गोदना) वेधनी, सूचिः-ची (स्त्री.) ।
गोदाम, सं. पुं. (अं. गोडाउन) पण्य-अगारं-आधानं, भाण्डागारम् ।
गोदावरी, सं. स्त्री. (सं.) गोदा, गौतमी ।
गोदी, सं. स्त्री., दे. 'गोद' ।
गोधा, सं. स्त्री. (सं.) तला, तलं, ज्याघातवारणा २. गोधिका, निहाका ।
गोधुम, गोधूम, सं. पुं. (सं.) दे. 'गेहूं' २. नागरंगः ।
गोन, सं. स्त्री., दे. 'गोणी' ।
गोनिया, सं. पुं., दे. 'गुनिया' ।
गोप, सं. पुं. (सं.) आभीरः, गोपालः २. नृपः ३. उपकारकः ।
गोपन, सं. पुं. (सं न.) गूहनं, गोहनं, प्रच्छादनं, संवरणम् ।
गोपनीय, वि. (स.) गुह्य, संवरणीय, रहस्य, गोप्य ।
गोपिका, सं. स्त्री. (सं.) दे. गोपी ।
गोपी, सं. स्त्री. (सं.) गोपिका, गोपपत्नी, आभीरी, गोपालिका ।
गोफन-ना, सं. पुं. (सं. गोफणा) स्रगः, भिंदि(द)पालः ।
गोबर, सं. पुं. (सं. गोमयं) दे. 'गोमय' ।
—गणे(ने)श, वि., कुदर्शन, कुरूप । सं. पुं., मूर्खः, जडः ।
गोबरी, सं. स्त्री. (हिं. गोबर) गोमयलेपः ।
—करना, क्रि. स., गोमयेन लिप् (तु. प. अ.)।

गोवरैला, } सं. पुं. (हिं. गोवर) दे.
गोवरौंदा, } 'गुबरैला'।

गोभी, सं. स्त्री. (सं. गोभी=घासविशेष >) गोभी।
गांठ—, ग्रंथिगोभी।
पात—, } मुकुल-पत्र,-गोभी।
वंद—, }
फूल—, मध्यपुष्पा, वृहद्दला, फुल्लगोभी।

गोया, क्रि. वि. (फ़ा.) इव, यथा, मन्ये (दि. आ. अ.)।

गोरखधंधा, सं. पुं. (हिं. गोरख+धंधा) गहन-जटिल,-कार्य २. कूटं, प्रहेलिका ३. अशक्य-निर्गमः प्रदेशः।

गोरखा, सं. पुं. (सं. गोरक्षकः) नयपालदेशे प्रांतविशेषः २. तत्प्रान्तवासिन्।

गोरा, वि. (सं. गौर) शुक्ल, श्वेत, सित, विशुद्ध। सं. पुं., गौरः, शुक्लः, श्वेतः, सितः, २. युरोपादिवासिन्, गौरः।

गोरिल्ला, सं. पुं. (अफ्री.) वानरभेदः, वनमानुषप्रकारः।

गोरी, सं. स्त्री. (सं. गौरी) गौरा, शुक्ला, श्वेता, सुरूपिणी, सुन्दरी।

गोलंदाज, सं. पुं. (फ़ा.) शतघ्नीचालकः, गोलक्षेपकः।

गोल[1], वि. (सं.) वर्तुल, निस्तल, वृत्त, वृत्त-मंडल-चक्र-वलय,-आकार-आकृति-रूप २. अस्पष्ट, संदिग्ध, अनिश्चित। सं. पुं., घटः २. मूर्खः।

—गप्पा, सं. पुं. (-+अनु. गप) *गोलगप्पः।

—मटोल, वि., पीनवामन, खर्वस्थूल।

—मिर्च, सं. स्त्री. [सं. गोलमरि(री)चं] मरिचं, कोलं, कोलकम्।

—माल, मु., अस्तव्यस्तता, क्रमभंगः।

—माल करना, मु., छलेन आत्मसात् कृ २. व्यवस्थां नश् (प्रे.)।

गोल[2], सं. पुं. (अ.) गणः, समुदायः।

गोलक, सं. पुं. (सं.) पिटक-संपुट-मंजूषा,-प्रकारः-भेदः २. निष्कर्षणी (हिं. दराज़) ३. पत्यौ मृते जारजपुत्रः ४. कंदुकः ५. महन्मृत्पात्रं ६. कर्णनिका ७. नेत्रगोलः ८. निधिः, राशिः ९. टंकपेटिका।

गोला, सं. पुं. (सं. गोलः) गोला-लं, वर्तुलः-लं २. चक्रं, मंडलं, वृत्तं ३. अग्न्यस्त्रं, गोलः, बंवः-बं ४. नारिकेलः-रः ५. वायुगोलः, उदर-रोगभेदः ६. धान्य,-हट्टः-विपणी ७. पशुवृंदं ८. सेतुबंधः ९. धान्यकुंभः।

—मारना, क्रि. स., गौलैः-बंधैः ध्वंस् (प्रे.)-चूर्ण् (चु.)।

गोलाई, सं. स्त्री. (सं. गोल >) वृत्तता, वर्तुलता, गोलत्वं, मंडलत्वम्।

गोलाकार, वि. (सं.) दे. 'गोल'[1]।

गोलार्द्ध, सं. पुं. (सं. न.) अर्द्धगोलः।

गोली, सं. स्त्री. (हिं. गोला) लघुगोलः, गोलकः २. सीसकगुलिका ३. गुटिका, वटिका, गुलिका ४. काच-मर्मरोपल,-गुलिका।

—मारना, क्रि. स., गुलिकाक्षेपेण हन् (अ. प. अ.)-क्षण् (त. उ. से.)।

गोविंद, सं. पुं. (सं.) श्रीकृष्णः।

गोशा, सं. पुं. (फ़ा.) कोणः २. दिशा ३. रहः-स्थानं, विविक्तम्।

गोश्त, सं. पुं. (फ़ा.) मांसं, आमिषम्।

—ख़ोर, सं. पुं., मांस-आमिष,-भक्षिन्-आदः-भक्षकः।

गोष्ठ, सं. पुं. (सं. पुं. न.) गो,-स्थानं-शाला-गृहं, व्रजः २. वृंदं, समूहः ३. विमर्शः, मंत्रणा।

गोष्ठी, सं. स्त्री. (सं.) गोष्ठिः-समितिः (स्त्री.), सभा, समाजः, २. वार्तालापः ३. विमर्शः।

गोस्तना-नी, (सं.) द्राक्षा, मृद्वीका।

गोह, स. स्त्री. (सं. गोधा) गोधिका, निहाका २. (गोह का बच्चा) गौधारः, गौधेरः, गौधेयः।

गोहरा, सं. पुं. (सं. गोहल्लं >) दे. 'उपला'।

गोहूँ, सं. पुं., दे. 'गेहूँ'।

गोखुर, सं. पुं., दे. 'गोखरू'।

गौं, सं. स्त्री. (सं. गमः >) प्रयोजनं, अर्थः, कार्यं २. अवसरः, कार्यकालः, अवकाशः।

गौ, सं. स्त्री., दे. 'गाय' तथा 'गो'।

गौग़ा, सं. पुं. (अ.) कोलाहलः २. जनश्रुतिः (स्त्री.)।

गौड़, सं. पुं. (सं.) वंगप्रांतस्य भागविशेषः २.-३. ब्राह्मण-कायस्थ,-भेदः ४. गौडवासिन्।

गौण, वि. (सं.) अप्रधान, द्वितीय, अवर २. सहायक। (गौणी स्त्री.)।

गौतम, सं. पुं. (सं.) ऋषिविशेषः २ बुद्धः।

गौतमी, सं. स्त्री. (सं.) अहल्या २. कृपाचार्य-पत्नी ३. गोदावरी ४. दुर्गा।

गौना, सं. पुं. (सं. गमनं>) द्विरागमनं, वध्याः पतिगृहे गमनम्।

गौर, वि. (सं.) दे. 'गोरा' (वि.)। सं. पुं. १.-२. रक्त-पीत,-रंगः ३. चंद्रः ४. सुवर्णं ५. कुंकुमम्।

ग़ौर, सं. पुं. (अ.) विचारः, चिंतनं, ध्यानम्।

—करना, क्रि. स., विचर् (प्रे.), चिंत् (चु.)।

गौरव, सं. पुं. (सं. न.) महत्त्वं, महिमन् (पुं.) २. गुरुता, भारवत्त्वं ३. आदरः, सम्मानः ४. अभ्युत्थानम्।

गौरी, सं. स्त्री. (सं.) पार्वती, गौरा, गिरिजा २. ३. शुक्ला (नारी अथवा गौ)।

—शंकर, सं. पुं. (सं.) शिवः २. हिमालयस्य उच्चतमं शिखरम्।

गौहर, सं. पुं. (फ़ा.) दे. 'मोती'।

ग्यान, सं. पुं., दे. 'ज्ञान'।

ग्यारह, वि. (सं. एकादशन्)। सं. पुं., उक्ता संख्या तदंकौ (११) च।

ग्यारहवां, वि., एकादशः (पुं.), एकादशं (न.) (-वीं (स्त्री.) = एकादशी)।

ग्रंथ, सं. पुं. (सं.) पुस्तकं, शास्त्रं २. ग्रंथनं ३ धनम्।

—चुंबन, सं. पुं. (सं. न.) क्षिप्र-त्वरित-, पठनं-अध्ययनं, शीघ्रपाठः।

—संधि, सं. स्त्री. (सं. पुं.) अध्यायः, परिच्छेदः।

—साहब, सं. पुं., शिष्यमतधर्मग्रंथः।

—कार, सं. पुं. (सं.) पुस्तक-ग्रंथ,-लेखकः-संपादकः-कर्तृ-प्रणेतृ।

ग्रंथन, सं. पुं. (सं. न.) ग्रथनं, गुंफनं, २. प्रणयनं, निबंधनम्।

ग्रंथि, सं. स्त्री. (सं. पुं.) दे. 'गाँठ'।

—बंधन, सं. पुं. (सं. न.) दे. 'गाँठ जोड़ना'।

ग्रंथित, वि. (सं.) ग्रथित, गु(गुं)फित २. ग्रंथिमत्, ग्रंथिल।

ग्रसन, सं. पुं. (सं. न.) भक्षणं, निगलनं, २. ग्रहणं, धरणं ३. सूर्यादेः ग्रहणं, उपरागः।

ग्रसना, क्रि. स. (सं. ग्रसनं) (हस्तेन) धृ (भ्वा. उ. अ., चु.)-ग्रस्-अवलंब् (भ्वा. आ. से.) ग्रह् (क्र्. प. से.)।

ग्रसित, ग्रस्त, वि. (सं. ग्रस्त) धृत, गृहीत, उपात्त २. पीडित ३. भक्षित, निगीर्ण।

ग्रह, सं. पुं. (सं.) नक्षत्रभेदः।

ग्रहण, सं. पुं. (सं. न.) उपरागः, ग्रहः, ग्रासः, ग्रहपीडनं २. आदानं, अंगीकरणम्।

ग्राफ़, सं. पुं. (अं.) विन्दुरेखाचित्रम्।

ग्राम, सं. पुं. (सं.) दे. 'गांव'।

ग्रामीण, सं. पुं. (सं.) ग्रामिकः, ग्रामिन्, ग्रामवासिन्।

ग्रामोफोन, सं. पुं. (अं.) *ध्वनिलेखनवाद्यम्।

ग्राम्य, वि. (सं.) ग्रामीण, ग्रामिक, ग्रामीय २. असभ्य, अशिष्ट।

ग्रास, सं. पुं. (सं.) कवलः, पिंडः।

ग्राह, सं. पुं. (सं.) अवहारः, जलहस्तिन्।

ग्राहक, सं. पुं. (सं.) क्रेतृ (पुं.), क्रयिन्, क्रथिकः।

ग्राह्य, वि. (सं.) उपादेय, स्वीकार्य, २. ज्ञेय।

ग्रीवा, सं. स्त्री. (सं.) दे. 'गर्दन'।

ग्रीष्म, सं. पुं. (सं.) ग्रीष्म,-समयः-कालः, निदाघः, उष्णः-णकः, तपः, तापनः, उष्ण,-उपगमः-आगमः-कालः।

ग्रीस, सं. पुं. (अं.) यवनदेशः।

ग्रेटब्रिटेन, सं. पुं. (अं.) आंग्लद्वीपसमूहः।

ग्रेविटी, सं. स्त्री. (अं.) भ्वाकृष्टिः (स्त्री.)।

स्पेसिफिक—, आपेक्षिकभारः।

ग्रेविटेशन, सं. पुं. (अं.) गुरुत्वाकर्षणम्।

ग्रैजुएट, सं. पुं. (अं.) स्नातकः।

ग्लाईकोजन, सं. पुं. (अं.) शर्कराजनम्।

ग्लानि, सं. स्त्री. (सं.) विषादः, अवसादः ग्लानिः (स्त्री.) खेदः।

ग्लूकोज़, सं. पुं. (अं.) द्राक्षौजम्।

ग्लोब, सं. पुं. (अं.) गोलम्।

ग्वाल-ग्वाला, सं. पुं. (सं. गोपालः) गोपः, आभीरः।

ग्वालिन, सं. स्त्री. (हिं. ग्वाला) गोपी, गोपिका, आभीरी।

घ

घ, देवनागरीवर्णमालायाश्चतुर्थो व्यंजनवर्णः, घकारः।

घंगोलना, घंघोरना, घंघोलना, क्रि. स., (हिं. घना+घोलना) विली (प्रे. विलापयति-ते), विद्रु (प्रे.) २. आविली-कलुषी,-कृ।

घंट, सं. पुं. (सं. घटः) कुम्भः।

घंट, घंटा, सं. पुं. (सं. घण्टा) कांस्यनिर्मितवाद्यभेदः २. घंटा,-शब्दः-रवः ३. होरा, नाडिका, अहोरात्रस्य चतुर्विंशतितमो भागः ४. महाघटी।

—घर, सं. पुं., घंटालयः, घंटागृहम्।

घंटिका, सं. स्त्री. (सं.) क्षुद्रघंटा २. किंकि(क)णी।

घंटी, सं. स्त्री. (हिं. घंटा) घर्घरा, घर्घरिका, क्षुद्रघंटा, घंटिका, २. घंटिकाशब्दः ३. किंकिणीणीका ४. नूपुरं ५. कृकाश्रं, स्वरयन्त्रम् ६. अलिजिह्वा, लम्बिका।

घघरा, सं. पुं. (अनु.) बृहच्चंडातकः-कम्।

घघरी, सं. स्त्री. (हिं. घघरा) चलनी, क्षुद्रचंडातकः-कं, घर्घरी।

घचाघच, सं. स्त्री. (अनु.) घचघच,-शब्दः-ध्वनिः (पुं.)। वि., स्थूल, पीन।

घट, सं. पुं. (सं.) कुंभः, कलशः-शं (-सः-सं), पुटग्रीवः, घटी, कलशी, कुटः,-टं, निपः २. शरीरं ३. हृदयम्।

घटक, सं. पुं. (सं.) मध्यस्थः, माध्यमिकः, मध्यवर्तिन् २. कुलाचार्यः ३. योजकः ४. घटः ५. परविवाहसाधकः।

घटती, सं. स्त्री. (हिं. घटना) न्यूनता, अवनतिः (स्त्री.), क्षीणता २. अनादरः, मानहानिः (स्त्री.)।

घटन, सं. पुं. (सं. न.) उपस्थितिः (स्त्री.), उपागमः २. रचनं, निर्माणम्।

घटना[1], क्रि. अ. (सं. घटनं) घट्-वृत् (भ्वा. आ. से.), उपस्था (भ्वा. उ. अ.), समापद् (दि. आ. अ.), उपनम् (भ्वा. प. अ.) २. युज् (कर्म.), उपपद् (दि. आ. अ.)। सं. स्त्री. (सं.) प्रसंगः, वृत्तं, वृत्तांतः, व्यतिकरः। ३. दुर्घटना।

घटना[2], क्रि. अ. (हिं. कटना) परिक्षि-अपचि (कर्म.), ह्रस् (भ्वा. प. से.), न्यूनी-अल्पी,-भू।

घटबढ़, सं. स्त्री. (हिं. घटना+बढ़ना) न्यूनताधिकते, अपचयोपचयौ, हानिलाभौ (सब द्वि.)। वि. न्यूनाधिक, हीनातिरिक्त।

घटवार-ल, सं. पुं. (हिं. घाटवाला) तरपण्यतार्यं,-ग्राहिन् २. नाविकः, औडुपिकः, घट्टजीविन्।

घटा, सं. स्त्री. (सं.>) कादंबिनी, मेघमाला, घनपटली २. समूहः, वृंदम्।

घटाटोप, सं. पुं. (सं.>) दे. 'घटा' (१) २. शिविकाच्छादनं ३. शकटावरणम्।

घटाना, क्रि. स., (हिं. घटना) न्यूनी-अल्पी,-कृ, ऊन् (चु.), ह्रस् (प्रे.), लघूकृ, अपचि (स्वा. उ. अ.) २. वियुज्-विवृज्-व्यवकल् (चु.) ३. गर्वं हृ-(भ्वा. प. अ.), अपकृप् (भ्वा. प. अ.)।

घटाव, सं. पुं. (हिं. घटना) न्यूनता, अल्पता, हीनता ३. अवनतिः (स्त्री.), अपचयः।

घटवाना, क्रि. प्रे. (हिं. घटना) ब. 'घटना' के प्रे. रूप।

घटिका, सं. स्त्री. (सं.) क्षुद्र-लघु,-कुंभः-घटः। २. कालमानयंत्रं, यामनाली, घटी ३. चतुर्विंशतिकलात्मकः कालः, मुहूर्तार्द्धम्।

घटित, वि. (सं.) निर्मित, रचित, संपादित।

घटिया, वि. (हिं. घटना) अवर, अधर नि-अप,-कृष्ट, जघन्य २. सुलभ, अल्पमूल्य।

घटी, सं. स्त्री. (सं.) दे. 'घटिका' १-३।

घड़त, सं. स्त्री., दे. 'गठन'।

घड़ना, क्रि. स., दे. 'गढ़ना'।

घड़ा, सं. पुं. (सं. घटः) दे. 'घट'(१)।

घड़ाई, सं. स्त्री., दे. 'गढ़ाई'।

घड़ाना, क्रि. प्रे., दे. 'गढ़ाना'।

घड़िया, (सं. घटिका>) तैजसावर्तनी, मू-(मु)षा-षी २. मधुकोशः, करंडः ३. गर्भाशयः ४. मृच्छावकः।

घड़ियाल, सं. पुं., दे. 'घंटा'(१)।

घड़ियाल, सं. पुं., दे. 'ग्राह'।

घड़ी, सं. स्त्री. (सं. घटी) घटिकायामनाली, कालमानयन्त्रं २. दे. 'घटिका' (३) ३. दे. 'घटिका'(१) ४. समयः।

—घड़ी, क्रि. वि. मुहुर्मुहुः, पुनः पुनः, असकृत् (सब अव्य.)।
—भर, क्रि. वि., मुहूर्तं, क्षणं, क्षण-मुहूर्त,-मात्रम्।
—साज, सं. पुं. (हिं.+फ़ा.) घटी-घटिका,-कारः।

घन, सं. पुं. (सं.) मेघः, जलदः, पयोदः २. लोहमुद्गरः, अयोघनः, ३. दे. 'घंटा'(१) ४. सजातीयांकत्रयस्य पूरणं (गणित, उ. २×२×२=८ घन) ५. समूहः ६. शरीरम्। वि. सान्द्र, निबिड २. कठिन, संहत, स्थूल, ३. अधिक, प्रचुर।

—गरज, सं. स्त्री. (-+हिं.) गर्जितं, स्तनितं २. शतघ्नी-तोप,-भेदः।
—घोर, वि. (सं.) अति,-सान्द्र-निबिड २. भीषण, भयावह। सं. पुं. भीषण,-रवः-ध्वनिः २. स्तनितं, गर्जितम्।
—घोर घटा, सं. स्त्री. (सं.) अविरलजलदावली, नीरन्ध्रकादम्बिनी।
—चक्कर, सं. पुं. (सं. घनचक्रं>) चंचल-अस्थिर,-मतिः-बुद्धिः २. मूर्खः ३. परिभ्रमिन्, यथेच्छविहारिन् ४. कृच्छ्रं, संकटम्।
—नाद, सं. पुं. (सं.) दे. 'घनगरज'।
—फल, सं. पुं. (सं. न.) दे. 'घन'(४)।
—मूल, सं. पुं. (सं. न.) पूरितसजातीयांकत्रयस्याद्याङ्कः, घनपदं (उ. आठ का घन-मूल दो)।
—श्याम, वि. (सं.) जलदनील, मेघमेचक। सं. पुं., श्रीकृष्णः।
—सार, सं. पुं. (सं.) कर्पूरं २. पारदः।

घनता, सं. स्त्री. (सं.) सांद्रता, निबिडता।
घनत्व, सं. पुं. (सं. न.) स्थूलता, संहतिः (स्त्री.) २. पदार्थस्य आयामविस्तारस्थूलत्वानि (बहु.)।
घना, वि. (सं. घन) सांद्र, निबिड, संहत, नीरन्ध्र २. गाढ, निकटवर्तिन् ३. अत्यधिक, अतिशय।
घनाक्षरी, सं. स्त्री. (सं.) दंडकवृत्तं, कवित्ताख्यं छंदः (छंद.)।
घनिष्ठ, वि. (सं. घनिष्ठ) अत्यंत-अति,-सांद्र-निबिड-घन २. प्रगाढ, अतिनिकटस्थ ३. अत्यधिक, अतिशय।
घनेरा, वि. (हिं. घना) अत्यधिक, अतिशय (बहु., घनेरे = असंख्य, अनेक)।
घपला, सं. पुं. (अनु.) छलं, कपटं २. (संख्याने) स्खलितं, भ्रांतिः (स्त्री.) ३. क्रमभंगः ४. संकुलं, प्र-सं,-कीर्णकम्।
घबरा(ड़ा)ना, क्रि. अ. तथा क्रि. स., दे. 'गड़बड़ाना'।
घबराहट, सं. स्त्री. (हिं. घबराना) व्याआ,-कुलता, अशांतिः (स्त्री.), उद्वेगः २. व्यामोहः, किंकर्तव्यमूढता, चित्तविक्षेपः ३. त्वरा, तूर्णिः (स्त्री.), तरस् (न.), संभ्रमः।
घमंड, सं. पुं. (सं. गर्वः?) अहंकारः, गर्वः, दर्पः, आटोपः, मदः, अवलेपः।
—करना, क्रि. अ., गर्व् (भ्वा. प. से), प्रगल्भ् (भ्वा. आ. से.), दृप् (दि. प. वे.)।
घमंडी, वि. (हिं. घमंड) अवलिप्त, दृप्त, गर्वित, अहंमानिन्, अहंकारिन्, उत्सिक्त।
घमघमाना, क्रि. अ. (अनु.) घमघमायते (ना. धा.), गंभीरं स्वन् (भ्वा. प. से)। क्रि. स. (मुष्टिभिः) तड् (चु०)।
घमस, सं. स्त्री. / **घमसा,** सं. पुं. } (सं. घर्मः>) दे. 'उमस'।
घमसान, सं. पुं. (अनु.) घोर-दारुण-क्रूर,-युद्धं-संग्रामः-रणः-समरः।
घमाका, सं. पुं. (अनु. घम) घमिति,-शब्दः-ध्वनिः (पुं.), प्रहारजः शब्दः।
घमाघम, सं. पुं. (अनु.) घमघमध्वनिः (पुं.), घमघमायितं, घमघमाशब्दः २. लोहमुद्गर-घन,-शब्दः ३. आडंबरः, श्रीः (स्त्री.), शोभा।
घमासान, सं. पुं., दे. 'घमसान'।
घर, सं. पुं. (सं. गृहं) दे. 'गृह' २. जन्म,-भूमिः (स्त्री.)-स्थानं ३. कुलं, वंशः ४. कार्यालयः ५. कोष्ठः, आगारं ६. कोषः, आवेष्टनं ७. मूलं, कारणं ८. गृहपरिच्छदः ९. छिद्रं, विलम्।
—आबाद करना, मु., वि-उद्-वह् (भ्वा. उ. अ.), परिणी (भ्वा. प. अ.)।
—करना, मु., वस् (भ्वा. प. अ.) २. स्थिरीभू।
—का आदमी, मु., विश्वसनीयमनुष्यः २. संबंधिन्।

—का न घाट का, मु., निर्गुण, निरर्थक, कुत्सित, अधम २. अस्थिरवास ।
—फूक तमाशा देखना, मु. आमोदप्रमोदेषु स्वधनं अपव्यय् (चु.) ।
—फोड़ना, मु., गृहकलहं जन् (प्रे.) ।
—बसाना, मु., दे. 'आबाद करना' ।
—वारी, मु., गृहस्थः, गृहिन् ।
—में डालना, मु., उपपत्नीत्वेन परिग्रह् क्र्. उ. से.) ।
—में पड़ना, मु., उपपत्नी भू ।
—वाला, मु., पतिः २. गृहिन् ।
—वाली, मु., पत्नी २. गृहिणी ।
—सिर पर उठाना, मु., कोलाहलं कृ ।
ऊँचा—, मु., उच्च-सु,-कुलं, सद्वंशः ।
बड़ा—, मु., समृद्ध-संपन्न-आढ्य,-कुलं २. कारागारम् ।

घरफोरी, सं. स्त्री. (हिं. घर + फोड़ना) गृहभेदिनी, वंशविनाशिनी ।

घराना, सं. पुं. (हिं. घर) वंशः, कुलं, अन्वयः ।

घरेलू, वि. (हिं. घर) गृह्य, गृह,-निर्मित-संबंधिन् २. नैज, आत्मीय ३. दे. 'पालतू' ।

घर्घर, (सं. पुं.) गद्गद-घर्घर,-शब्दः-स्वनः ।

घर्घराना, क्रि. अ. (सं. घर्घरः >) घर्घररवं कृ, गद्गदं नद् (भ्वा. प. से.), घर्घरायते (ना. धा.) ।

घर्घराहट, सं. स्त्री. (हिं. घर्घराना) दे. 'घर्घर' ।

घर्म, सं. पुं. (सं.) सूर्य,-आतपः-आलोकः २. उष्णता, दाहः, तापः ३. ग्रीष्मः ४. प्रस्वेदः । वि., तप्त, उष्ण ।

घर्राटा, सं. पुं. (अनु.) घर्घरः, घर्घररवः ।

घर्षण, सं. पुं. (सं. न.), अभ्यंजनं, संवाहनं २. संघट्टः, समाघातः ।

घसना, क्रि. अ. तथा क्रि. स., दे. 'घिसना' ।

घसियारा, सं. पुं. (सं. घासः >) घास-हारः-रिन्, घासविक्रेतृ (पुं.) २. घास-तृण,-छेदकः-लावकः । (-रिन (स्त्री.) = घासहारी-रिणी इ.) ।

घसीट, सं. स्त्री. (हिं. घसीटना) शीघ्र-द्रुत-त्वरित,-लेखः-लेख्यं ३. (भूमौ) कर्षणम् ।

घसीटना, क्रि. स. (सं. घृष्ट) आ-वि-कृष् (भ्वा. प. अ.), बलात् हृ (भ्वा. उ. अ.) २. शीघ्रं-सत्वरं,-लिख् (तु. प. से.) ३. बलात् समाविश् (प्रे.) ।

घस्सा, सं. पुं., दे. 'घिस्सा' ।

घहर(रा)ना, क्रि. अ. (अनु.) दे. 'गरजना' ।

घाई[1], सं. स्त्री. (सं. गभस्तिः >) अंगुली-संधिः, गभस्तिकोणः २. कांडशाखासंधिः ।

घाई[2], सं. स्त्री. (हिं. घाव) आघातः, प्रहारः २. छलं, कपटम् ।

घाऊघप, वि. (हिं. खाऊ + अनु) औदरिक, घस्मर, गृध्नु २. गूढचित्त, गुप्तभाव ।

घाग, घाघ, वि. (एक प्रसिद्ध अनुभवी पुरुष था) बहुदर्शिन्-अत्यनुभविन् (-नी स्त्री.), बहु-दृश्वन् (-वरी स्त्री.) २. मायाविन्, कापटिक (की स्त्री.) । सं. पुं., जरठः, वृद्धः ।

घाघरा, सं. पुं., (सं. घर्घरः) १. सरयूनदी २. दे. 'घघरा' ।

घाट, सं. पुं. (सं. घाटः) घट्टः, घट्टी, तरः, तर-तरण,-स्थानं २. तीर्थं, अवतारः ४. पर्वतः ५. दिशा ६. विधिः (पुं.), प्रकारः ७. असिधारा ।
—घाट का पानी पीना, मु., आजीविकार्थं इत-स्ततः भ्रम् (भ्वा. प. से.) २. अनुभवाति-शयं प्राप् (स्वा. प. अ.) ।
—मारना, मु., प्रतिषिद्धभांडानि आ,-नी-हृ (भ्वा. उ. अ.) ।

घाटा, सं. पुं. (हिं. घटना) हानिः-क्षतिः (स्त्री.), क्षयः, अपचयः, अत्ययः ।
—उठाना या पड़ना, मु., वियुज्-विहा-परिहा (कर्म.) ।
—भरना, क्षतिं समा-प्रतिसमा,-धा (जु. उ. अ.), हानिं सं-वि-परि-शुध् (प्रे.) ।

घाटिया, सं. पुं. (हिं. घाट) गंगापुत्रः, तीर्थ-पुरोहितः ।

घाटी, सं. स्त्री. (हिं. घाट) संकट-संबाध,-पथः-मार्गः २. दरी, द्रोणी, उपत्यका ।

घात, सं. पुं. (सं.) आ-अभि-निर्,-घातः, प्रहारः । २. वधः, हत्या ३. अहितं, अमंगलं ४. गुणनफलं (गणित) । सं. स्त्री., सुयोगः, सदवसरः, सुवेला २. निभृतावस्थितिः (स्त्री.) ३. छलं, कूटोपायः ।

—में बैठना, क्रि., (वधाय लुंठनाय वा) मार्गे निभृतं प्रतीक्ष् (भ्वा. आ. से.), पथि अवस्कंद् (भ्वा. प. अ.)।

घातक, सं. पुं. (सं.) वधकारिन् , मारकः, मारयित्नु-एंतृ (पुं.) २. शत्रुः, अरिः ३. वधकः, एंटपाशिकः। वि., प्राणहर, अंतकर।

घातिनी, सं. स्त्री. (सं.) एंत्री, घातिका, मारयित्री।

घाती[1], सं. पुं. (सं. घातिन्) दे. 'घातक'।

घाती[2], वि. (हिं. घात) विश्वासघातिन् , असत्यसंध २. मायाविन्।

घातुक, वि. (सं.) नाशक, हिंसक, मारक। (घातुकी स्त्री.)।

घान, सं. पुं. } (सं. घनः)।
घानी, सं. स्त्री. } स्थालीचक्र्यादिषु सकृत्क्षेपणीया मात्रा।

घाम, सं. पुं. (सं. घर्मः) सूर्य,-आतपः-आलोकः २. सूर्य,-तापः-दाहः।

घायल, वि. (सं. घातः >) क्षत, व्रणित, विद्ध, भिन्नदेह, आहत, प्रहृत।

—**करना,** क्रि. स., व्रण् (चु०), आ-अभि-हन् (अ. प. अ.), क्षण् (त. उ. से.), तुद् (तु. उ. अ.)।

—**होना,** क्रि. अ., व. उपर्युक्त धातुओं के कर्म. रूप।

घालक, सं. पुं. (हिं. घालना) घातकः, मारकः २. नाशकः, ध्वंसकः।

घाव, सं. पुं. (सं. घातः) क्षतं-तिः (स्त्री.), व्रणः, आघातः, प्रहारः, ईर्म, अरुस् (न.)।

—**करना,** क्रि. स., दे. 'घायल करना'।

—**खाना,** क्रि. अ., दे. 'घायल होना'।

—**भरना,** क्रि. अ., व्रणः रुह् (भ्वा. प. अ.)।

घास, सं. स्त्री. (सं. पुं.) य(ज)वसः, यव(वा)सं, शादः, तृणम्।

—**पात,** सं. पुं. (सं. घासपत्रं) तृणपत्रं २. दे. 'कूड़ा-करकट'।

—**फूस,** सं. पुं., पलालः-लं २. दे. 'कूड़ाकरकट'।

—**काटना या खोदना,** मु, व्यर्थ-क्षुद्र-तुच्छ,-कार्यं कृ।

घिग्घी, सं. स्त्री. (अनु.) हिक्का, हिध्मा २. गद्गदवाच् (स्त्री.), स्खलद्वाक्यं, स्वरभंगः।

—**बँध जाना,** क्रि. अ., (भयशोकादिभिः) हिक्क् (भ्वा. उ. से.), सगद्गदं वद् (भ्वा. प. से.)।

घिघियाना, क्रि. अ. (हिं. घिग्घी) करुणं प्रार्थ् (चु. आ. से.), सवाष्पं निविद् (प्रे.), दे. 'गिड़गिड़ाना'।

घिचपिच, सं. स्त्री. (सं. घृष्टपिष्ट अथवा अनु०) स्थानसंकीर्णता, अवकाशाल्पत्वम्। वि०, संकुल, वैशद्यशून्य, अस्पष्ट।

घिन, सं. स्त्री., (सं. घृणा दे.)।

घिनाना, क्रि. अ., दे. 'घृणा करना'।

घिनावना, घिनौना, वि. (हिं. घिन) घृणार्ह, गर्हित, गर्हणीय, वीभत्स, अरुचिकर, कुत्सित, उद्वेगकरः (-री स्त्री.)।

घिया, सं. पुं., दे. 'कद्दू'।

—**कश,** सं. पुं. दे. 'कद्दूकश'।

—**तोरी,** सं. स्त्री., महाकोशातकी, हस्तिघोषा महाफला, घोषकः, हस्तिपर्णा।

घिरना, क्रि. अ. (सं. ग्रहणं >) परि,-वृ-क्षिप् गम्-वेष्ट्-सृ (कर्म.) २. एकत्र मिल् (तु. प. से.), संनिपत् (भ्वा. प. से.)।

घिरनी, सं. स्त्री. (सं. घूर्णिः) १. घूर्णिः (स्त्रीः), घूर्णनं, भ्रमः भ्रा)मरं २. परिभ्रमणं, परिवर्तः ३. रज्जुव्यावर्तनचक्रं ४. दे. 'गड़ारी'।

घिसघिस, सं. स्त्री. (हिं. घिसना) मांद्यं, दीर्घसूत्रता, कार्यजडता, कालक्षेपः।

घिसना, क्रि. अ. (सं. घर्षणं) जर्जरीभू , जृ (दि. प. से.), (संघर्षणेन) अपचि-क्षि (कर्म.), संघृष् (भ्वा. प. से.), संघट् (भ्वा. आ. से.)। क्रि. स., धृष् (प्रे.), मृद् (क्र. प. से. या प्रे.) अभि-,अंज् (रु. प. वे.), लिप् (तु. प. अ.)। सं. पुं., घर्षणं, मर्दनं, अभ्यंजनम्।

घिसवाना, घिसाना, क्रि. प्रे., व. 'घिसना' (क्रि. स.) के प्रे. रूप।

घिसाई, सं. स्त्री. (हिं. घिसना) घर्षणं, मर्दनं २. घर्षण-मर्दन,-भृत्या-भृतिः (स्त्री.)।

घिसाव, सं. पुं.
घिसावट, सं. स्त्री. } (हिं. घिसना) संघर्षः, परस्पर,-घर्षणं-मर्दनं, संमर्दः, संघट्टः।

घिस्सा, सं. पुं. (हिं. घिसना) घर्षः, संघट्टः, संमर्दः २. प्रसारणं, प्रचोदना ३. बालक्रीडाभेदः।

घी, सं. पुं. (सं. घृतः-तं) आज्यं, आजं, आयुस्-सर्पिस् (न.), पवित्रं, अमृतं, अभिघारः, होम्यं, तैजसं, नवनीतकम्।

—के चिराग़ या दिये जलना, मु., सफलमनोरथ-पूर्णकाम-कृतकृत्य, (वि.)+भू।

पाँचों उँगलियाँ घी में होना, मु., उत्सवः वृत् (भ्वा. आ. से.), सर्वथा समृद्ध (वि.) अस् (अ. प.)।

घीकुवाँर, सं. पुं. (सं. घृतकुमारी) कुमारी, तरुणी, गृह,-कन्या-कन्यका, अजरा, अमरा।

घुँइयाँ, सं. स्त्री. (देश.) दे. 'कचालू'।

घुँघ(ग)ची, सं. स्त्री., (सं. गुंजा) गुञ्जिका, रक्तिका, रक्ता, कृष्णला, काक,-चिंचिका-जंघातिक्ता। २. गुञ्जा-रक्ता,-बीजं इ.।

घुँघनी, सं. स्त्री. (अनु.) भर्जितार्द्रचणकादि।

घुँघरारे-ले, वि., दे. 'घूँघरवाले'।

घुँघरू, सं. पुं. (अनु. घुन) घर्घरा-रिका, क्षुद्र,-घंटा-घंटिका, क्षुद्रिका, कंकणी,-णीका, किंकिणी २. मंजीरः-रं, नूपुरं-रः। ३. मरणासन्नस्य कंठे घर्घरशब्दः।

घुंडी, सं. स्त्री. (सं. ग्रंथिः पुं.) १. दे. 'गांठ'। २. वस्त्रमय,-गंडः-कुडुपः।

घुग्घी, सं. स्त्री. (देश.), दे. 'पंडुक' २. त्रिकोणरूपेण व्यावर्तितः कंबलः।

घुग्घू, घुघुआ, सं. पुं. (सं. घूकः) दे. 'उल्लू'।

घुटकना[1], क्रि. स. (अनु.) अल्पशः पा (भ्वा. प. अ.) २. दे. 'निगलना'।

घुटना[1], सं. पुं. (सं. घुंटः=टखना>) जानु (न.), ऊरु,-पर्वन् (न.) संधिः (पुं.), अष्ठीवत् (पुं. न.), चक्रिका।

घुटना[2] क्रि. अ. (हिं. घूँटना) कंठः-श्वासः रुध् (कर्म.)।

घुटना[3], क्रि. अ. (हिं. घोटना) चूर्ण्-पिष् (कर्म.) २. सम्यक् पच् (कर्म.) ३. श्लक्ष्णी भू ४. सख्यं जन् (दि. आ. से.) ५. स्निग्धालापे व्याप्ट् (तु. आ. अ.) ६. केशाः मूलतः मुंड्-क्षुर् (कर्म.) ७. अभ्यस् (कर्म.)।

घुटा हुआ, मु., धूर्त्त, दक्ष, विचक्षण।

घुटन्ना, सं. पुं. (सं. घुटः>) घुटानाहः, पादायामः।

घुटाई, सं. स्त्री. (हिं. घोटना) चूर्णनं, पेषणं, मर्दनं २. श्लक्ष्णीकरणं ३. चूर्णन-श्लक्ष्णीकरण,-भृत्या ४. क्षौरं, मुंडनं ५. आवर्तनं, अभ्यासः।

घुट्टी, सं. स्त्री., दे. 'घूँटी'।

घुड़, सं. पुं. (सं. घोटः) घोटकः।

—चढ़ा, सं. पुं., दे. 'घुड़सवार'।

—चढ़ी, सं. स्त्री., अश्वारूढा (नारी) २. अश्वारोहणं, वैवाहिकरीतिभेदः ३. शतघ्नीभेदः।

—दौड़, सं. स्त्री., अश्व-घोटक,-चर्या-धावनं २. जवाश्व-जवन,-धावनं, द्यूतभेदः ३. चर्याभूमिः (स्त्री.)।

—बहल, सं. पुं., घोटक,-रथः-स्यंदनः।

—सवार, सं. पुं., सादिन्, तुरगिन्, हय-तुरग-अश्व,-आरूढः-रथः।

—सवारी, सं. स्त्री., अश्वारोहण,-कौशलं-विद्या।

—साल, सं. स्त्री. (सं. घोटशाला) मंदुरा, वाजि-अश्व,-शाला।

घुड़कना, क्रि. स. (सं. घुर्) भर्त्स् (चु. आ. से.), वाचा दंड् (चु.), अव-अधि-क्षिप् (तु. उ. अ.)।

घुड़की, सं. स्त्री. (हिं. घुड़कना) अवि अव,-क्षेपः, वाग्दण्डः, भर्त्सनं-ना।

घुन, सं. पुं. (सं. घुणः) काष्ठ,-वेधकः-कीटः-लेखकः।

—लगना, क्रि. अ., घुणैः अद् (कर्म.)।

घुनघुना, सं. पुं. (अनु.) दे. 'झुनझुना'।

घुन्ना, वि. (अनु. घुनघुनाना) तूष्णीक, गूढ-संवृत,-भाव (घुन्नी स्त्री.)।

घुप, वि. (सं. कूपः>) निविडः-सूचीभेद्यः (अंधकारः)।

घुमड़ना, क्रि. अ. (हिं. घूम+सं. अटनं>) मेघा आकाशं आच्छद् (चु.)।

घुमरी, सं. स्त्री. (हिं. घूमना) भ्र(भ्रा)मरं, भ्रमिः-घूर्णिः (स्त्री.)।

घुमाना, क्रि. स. (हिं. घूमना) व. 'घूमना' के प्रे. रूप।

घुमाव, सं. पुं. (हिं. घूमना) परि-, भ्रमः, घूर्णिः (स्त्री.), व्या-परि-आ,-वर्तः।

घुरघुराना, क्रि. अ. (अनु.) घुरघुरायते (ना. धा.), घुर् (तु. प. से.)।

घुलना, क्रि. अ. (सं. घूर्णनं >) वि-प्र-, ली (दि. आ. अ.), द्रवीभू, क्षर्-गल् (भ्वा. प. से.), विद्रु (भ्वा. प. अ.) २. पूतीभू, दुर्गंध-(वि.)भू, विगल् ३. कृश-क्षीणमांस-(वि.)भू, अंगैः परिहा (कर्म.) । सं. पुं., विलयनं, द्रवीभावः, पूतीभवनं, क्षयः इ. ।

घुलने योग्य, वि., विलेय, क्षरण-विलयन,-शील, विद्राव्य ।

घुलवाना, क्रि. प्रे. } व. 'घुलना' के प्रे. रूप ।
घुलाना, क्रि. स. }

घुलाव, सं. पुं. } दे. 'घुलना' सं. पुं. ।
घुलावट, सं. स्त्री. }

घुसड़ना, क्रि. अ., दे. 'घुसना' ।

घुसना, क्रि. अ. (सं. कोसनं या घर्षणं > ?) (बलात्) आ-प्र-, विश् (तु. प. अ.), (अंतः) पदं कृ अथवा निधा (जु. उ. अ.), आगम् २. निर्-, भिद् (रु. प. अ.), व्यध् (दि. प. अ.) । सं. पुं., प्रवेशः, आगमनं, निर्भेदनं इ. ।

घुसाना, } क्रि. स., व. 'घुसना' के प्रे. रूप ।
घुसेड़ना, }

घूँघट, सं. पुं. (सं. गुंठनं >) अवगुंठनं-ठिका, मुखावरकः-कम् ।

—काढ़ना या **मारना,** क्रि. स., अवगुंठ् (चु.), मुखमाच्छद् (चु.) ।

—वाली, सं. स्त्री., अवगुंठनवती ।

घूँघर, सं. पुं. (हिं. घुमरना) अलकः, कुरलः, चूर्णकुंतलः ।

—वाले, वि. आकुंचित, जिह्मी-वक्री,-भूत, कुंतलाकीर्ण, कुरलिन् (प्रायः केशों के लिए) ।

घूँट, सं. पुं. (अनु. घुट घुट) गंडूषमात्रं पेयं, चलुः, च(चु)लुकः ।

—लेना या **पीना,** क्रि. स., आचम् (भ्वा. प. से.), उपस्पृश् (तु. प. अ.), अल्पशः-ईषत् पा (भ्वा. प. अ.) ।

घूँटना, क्रि. स., दे. 'घूँट लेना' ।

घूँटी, सं. स्त्री. (हिं. घूँट) शिशुभेषजं, बालौषधम् ।

घूँस, सं. स्त्री., दे. 'घूस' ।

घूँसमघूँसा, सं. पुं. (हिं. घूँसा) मुष्टीमुष्टि (अव्य.), मुष्टियुद्धं, बाहूबाहवि (अव्य.) ।

घूँसा, सं. पुं. (हिं. घिस्सा) मुष्टिः (पुं. स्त्री.), मुष्टी, बद्धमुष्टिः २. मुष्टि,-घातः-प्रहारः ।

—लगाना या **मारना,** क्रि. स., मुष्टिना प्रह् (भ्वा. उ. अ.)-तड् (चु.) ।

घूक, सं. पुं. (सं) दे. 'उल्लू' । (घूकी स्त्री.) ।

घूघू, सं. पुं. (सं. घूकः) दे. 'उल्लू' २. जडः, मंदमतिः ।

घूम, सं. स्त्री., दे. 'घुमाव' ।

घूमना, क्रि. अ. (सं. घूर्णनं) परि-, भ्रम्-अट् (भ्वा. प. से.), सं-वि-चर् (भ्वा. प. से.) २. वि-घा-आ-परि-वृत् (भ्वा. आ. से), चक्रवत् भ्रम्, वि-परि-, घूर्ण् (तु. प. से.) ३. नि-प्रतिनि-प्रत्या-वृत्, पुनर्-, या-इ (अ. प. अ.) । सं. पुं., परि-,भ्रमणं-अटनं, परिवर्तनं, घूर्णनं, प्रतिनिवर्तनं, चक्र,-आवर्तः-गतिः (स्त्री.) ।

घूमने वाला, वि., पर्यटन-भ्रमण,-शील, चक्रावर्तिन्, चक्रगतिः, परिवर्तिन्, परिभ्रमिन् ।

घूमघूमेला, वि. (हिं. घूम घूम) दे. 'घूमनेवाला' ।

घूरना, क्रि. स. (सं. घूर्णनं >) कटाक्षेण-तिर्यक्-साचि,-ईक्ष् (भ्वा. आ. से.)-दृश् (भ्वा. प. अ.) २. सकोपं-निर्निमेषं अवलोक् (भ्वा. आ. से.; चु.) ।

घूस, सं. स्त्री. (हिं. घुसना या घूँसा) उत्कोचः, उपायनम् ।

—खोर, सं. पुं. (हिं + फ़ा.) उत्कोचग्राहिन् ।

घृणा, सं. स्त्री. (सं.) अरुचिः, कुत्सा, गर्हा, जुगुप्सा, वि-, द्वेषः, निर्वेदः ।

घृणित, वि. (सं.) अरुचिकर-उद्वेगकर (—करी स्त्री.) २. कुत्सित, गर्ह्य, बीभत्स ।

घृत, सं. पुं. (सं. न.) दे. 'घी' ।

घेरना, क्रि. स. (सं. ग्रहणं >) परिवेष्ट् (भ्वा. आ. से., प्रे.), परिवृ (स्वा. उ. से.; प्रे.), परि-इ (अ. प. अ.) २. अव-उप,-रुध् (रु. उ. अ.) । सं. पुं., परिवेष्टनं, परिवारणं, उपरोधः इ. ।

घेरने वाला, सं. पुं., परिवेष्टकः, उपरोधकः ।

घेरा, सं. पुं. (हिं. घेरना) परिधिः (पुं.), परि,-वेषः-वेशः-णाहः, मण्डलं २. प्राचीरं, प्राकारः, वेष्टनं, वरणः ३. परिवृतस्थानं ४. मण्डलं ५. अव उप,-रोधः ।

—डालना, मु., परिवेष्ट् (प्रे.), दे. 'घेरना' (२)।

घेवर, सं. पुं. (सं. घृतवरः) घृतपूरः, घार्तिकः।

घोंघा, सं. पुं. (देश.) शंबु(बू)कः, कोप-कवच-स्थः, कीटभेदः २. शुक्तिः (स्त्री.)। वि., जड, स्थूलबुद्धि।

घोंटना, क्रि. स., दे. 'घोटना'।

घोंपना, क्रि. स., (अनु. घुप) प्र-नि-विश् (प्रे.), निर्भिद्-व्यध् (प्रे.)।

घोंसला, सं. पुं. (सं. कुशालयः अथवा हिं. घुसना) कुलायः, नीडः-डं, खगालयः, पक्षिगृहम्।

घोख(क)ना, क्रि. स. (सं. घोषणं>) कंठस्थ-(वि.) कृ, स्मृतिपथं नी (भ्वा. उ. अ.), अभ्यस् (दि. उ. से.)।

घोट, घोटक, सं. पुं. (सं.) दे. 'घोड़ा'।

घोटना, क्रि. स. (सं. घोटनं>) क्षुद्-पिष् (रु. प. अ.), चूर्ण्-खण्ड् (चु.), मृद् (क्र. प. से.) २. मुंड् (चु.), क्षुर् (तु. प. से.) ३. घर्षणेन श्लक्ष्णीकृ ४. गलहस्तयति (ना. धा.), गलं निष्पीड्य व्यापद् (प्रे.), कंठं निष्पीड् (चु.) ५. दे. 'घोखना'।
सं. पुं., पेषणं, मर्दनं, मुण्डनं, श्लक्ष्णीकरणं इ.। २. मुस(श)लः-लं, (पेषण-) दंडः।

घोटनी, सं. स्त्री. (हिं. घोटना) मर्दनी, मुसलकम्।

घोटवाना, क्रि. प्रे., व. 'घोटना' के प्रे. रूप।

घोटा, सं. पुं. (हिं. घोटना) मार्जकः, घर्षकः २. मार्जितवस्त्रं ३. घर्षणं ४. मुसलः, दंडः ५. पेषणं ६. क्षौरं, केशवपनम्।

घोटाला, सं. पुं. (देश.) दे. 'गड़बड़' सं. पुं.।

घोड़साल, सं. पुं. (सं. घोटशाला) दे. 'घुड़' के नीचे 'घुड़साल'।

घोड़ा, सं. पुं. (सं. घोटः) घोटकः, तुरगः, तुरंग-गमः, अश्वः, वाहः, हयः, वाजिन्, अर्वन् (पुं.), सैंधवः, सप्तिः (पुं.), गन्धर्वः, जवनः। २. चतुरंग,-शारः-शारिः (पुं.) ३. अन्यस्त्रपोटः।

—गाड़ी, सं. स्त्री., अश्व-हय,-रथः-शकटः।

घोड़े बेच कर सोना, मु., गाढं निद्रा-स्वप् (अ. प. अ.)-शी (अ. आ. से.)-संविश् (तु. प. अ.)।

घोड़ी, सं. स्त्री. (सं. घोटी) अश्वा, वडवा, तुरगी, वाजिनी, वामिनी, घोटिका २. वडवा-रोहणं, वैवाहिकरीतिभेदः ३. विवाहगीतिका।

—चढ़ना, मु., वरो वडवामारुह्य वधूगृहं गन्।

—टप्पा, सं. पुं., बालखेलाभेदः, घोटीलंघनम्।

घोर, वि. (सं.) भयंकर, भीषण, भीम २. दुर्गम, गहन, निबिड ३. परुष, कर्कश, ४. गाढ़, दृढ ५. निकृष्ट, अधम ६. अत्यन्त, अतिशय।

—निद्रा, सं. स्त्री. (सं.) गाढनिद्रा, सुनिद्रा।

घोलघुमाव, सं. पुं., दे. 'टालमटोल'।

घोलना, क्रि. स. (हिं. घुलना) विद्रु-विली-गल् (प्रे.)।

घोलमेल, सं. पुं. (हिं. घुलना+सं. मेलः>) मिश्रणं, संसर्गः, सम्पर्कः।

घोष, सं. पुं. (सं.) शब्दः, नादः, रवः, स्वनः, ध्वनिः (पुं.) २. गर्जितं, स्तनितं ३. आभीर-वसतिः (स्त्री.) ४. आभीरः, गोपः ५. गोष्ठं, गोशाला ६. तटः-टं-टी ७. वाह्यप्रयत्नभेदः (व्या.)।

घोषणा, सं. स्त्री. (सं.) प्रख्यापनं, ज्ञापनं, प्रकाशनं २. घोषः-षणं, उत्कीर्तनं ३. नादः, ध्वनिः, शब्दः।

—पत्र, सं. पुं. (सं. न.) विज्ञप्तिः (स्त्री.), सूचनापत्रम्।

घोसी, सं. पुं. (सं. घोषः>) यवन,-गोपः-आभीरः।

घ्राण, सं. पुं. (सं. न.) नासिका, नासा, नसा २. आघ्राणं, गन्धग्रहणं ३. आघ्राणशक्तिः (स्त्री.)।

—इन्द्रिय, सं. स्त्री. (सं. न.) दे. 'घ्राण' (१-३)।

ङ

ङ, देवनागरीवर्णमालायाः पञ्चमो व्यञ्जनवर्णः, ङकारः।

च

च, देवनागरीवर्णमालायाः षष्ठो व्यञ्जनवर्णः, चकारः।

चंग[1], सं. स्त्री. (फ़ा.) डिंडिमप्रकारः, *चंगं २. नखः-खं, नखरः-रं ३. गंजीफ़ा-क्रीडायां रंगभेदः।

चंग[2], सं. स्त्री. (सं. चः=चाँद+गम्>) दे. 'गुर्दा'(१)।

—पर चढ़ाना, मु., अनुकूलयति (ना. धा.) २. अभिमानिनं विधा (जु. उ. अ.)।

चंगा, वि. (सं. चंग) सुस्थ, स्वस्थ, नीरोग, निरामय २. शोभन, सुन्दर ३. निर्मल, शुद्ध।

—करना, क्रि. स., व्याधेः मुच् (प्रे.), शम् (प्रे. शमयति)।

भला—, वि., कुशलिन्, नीरुज-ज् २. भद्र, अच्छ।

चंगुल, सं. पुं. (हिं. चौ=चार+अंगुल) नखः-खं, नखरः-रं, २. धरणं, ग्रहणं, हस्तग्राहः।

चंगेर-री, सं. स्त्री. (सं. चंगेरिका) स्थालाकारः करण्डः २. फुल्लकण्डोलः, पुष्पकरंडः ३. भाजनं, आधारः ४. चर्मपुटः, वृतिः (पुं.) ५. हिंदोलः, दोला।

चंगोली, सं. स्त्री., दे. 'चंगेरी'।

चंचरीक, सं. पुं. (सं.) भ्रमरः, षट्पदः।

चंचल, वि. (सं.) चल, चलाचल, चपल, तरल, लोल, प(पा)रिप्लव, चटुल, २. व्या-पर्या-समा,-कुल, अशान्त, अनिर्वृत ३. अधीर, अस्थिर, चलचित्त, लोलबुद्धि ४. विनोदिन्, लीलापर। सं. पुं., वायुः २. कामुकः।

चंचलता, सं. स्त्री. (सं.) चापल्यं, चांचल्यं, लौल्यं, चटुलता, तरलता २. कुचेष्टा-ष्टितं, सलीलत्वं, लीलापरता।

चंचला, सं. स्त्री. (सं.) लक्ष्मीः (स्त्री.), इन्दिरा २. विद्युत् (स्त्री.), सौदामिनी। वि., स्त्री., अशांता, चलचित्ता।

चंचलाहट, सं. स्त्री., दे. 'चंचलता'।

चंचु, सं. स्त्री. (सं.) चञ्चुका, चञ्चूः (स्त्री.), त्रोटी।

चंट, वि. (सं. चण्ड>) चतुर, दक्ष २. धूर्त, मायाविन्।

चंड, वि. (सं.) क्रूर, रौद्र (-द्री स्त्री.), दारुण, भैरव, (-वी स्त्री.), भीषण, उग्र २. कोपिन् क्रोधिन्, संरंभिन्, अमर्षिन् ३. परुष, प्रखर, तीव्र, तीक्ष्ण, घोर ४. बलवत्, दुर्दमनीय ५. कठिन, कठोर।

—कर, सं. पुं. (सं.) सूर्यः, चण्डांशुः।

—कौशिक, सं. पुं. (सं.) (१-३) मुनि-नाटक-सर्प-, विशेषः।

चंडाल, सं. पुं. (सं.) चांडालः, मातंगः, दिवाकीर्तिः (पुं), निषादः, श्वपचः-च् (पुं.), पुक्कसः-शः-षः। वि., क्रूर-पाप,-कर्मन् २. दुष्कुलीन, हीन,-जाति-वर्ण।

—चौकड़ी, सं. स्त्री., चंडालचतुष्कं, दुष्ट-चतुष्टयम्।

चंडालिन, चंडालिनी, चंडाली, सं. स्त्री. (सं. चंडाली) चांडाली, मातंगी, निषादी २. पापिनी, दुष्टा।

चंडिका, सं. स्त्री. (सं.) दुर्गा २. विवादशीला नारी ३. गायत्रीदेवी।

चंडी, चंडा, सं. स्त्री. (सं.) पार्वती २ क्रोधिनी नारी ३ कलहप्रिया कामिनी।

चंडू, सं. पुं. (सं. चंडः तीक्ष्ण>) अहिफेन-निर्मितमादकद्रव्यभेदः, *चंडूः (पुं.)।

—खाना, सं. पुं. (हिं+फ़ा) वं[3],-गृहं-शाला।

—बाज़, सं. पुं. (हिं.+फ़ा.) चंडूपः, चंडू,-पायिन्-सेविन्।

चंडूल, सं. पुं. (देश.) भ(भा)रद्वाजः, भारयः, व्याघाटः।

चंद[1], सं. पुं. (सं. चंद्रः) दे. 'चंद्र'। २. हिंदीकविविशेषः।

—मुखी, सं. स्त्री. (सं. चंद्रमुखी) शशिवदनी, चंद्राननी।

चंद[2], वि. (फ़ा.) दे. 'कुछ'।

चंदन, सं. पुं. (सं. पुं. न.) मलयजः, श्रीखंडं, गंधसारः, सुगंधं, सर्पावासं, शीतलं, गंधाढ्यं, शीतगंधः। २. चंदनकाष्ठं ३. चंदनलेपः।

—लाल, रक्त-कु,-चंदनं, रंजनं, पत्रांगम्।

—सफेद, तैलपर्णिकं, श्वेतचंदनम्।

चंदला, वि. पुं. (हिं. चांद=खोपड़ी) खल्वाटः, विकेशः (-शी स्त्री.)।

चँदवा[1], सं. पुं. (हिं. चंद) उल्लोचः, वितानं, आच्छादनं, पिधानम्।

चंदवा[2], सं. पुं. (सं. चंद्रकः) बर्हनेत्रं, मेचकः २. वर्तुलवस्त्रखंडः-डं ३. मत्स्यभेदः।

चंदा, सं. पुं. (फ़ा. चंद) धनसहायता, आर्थिकसाहाय्यं २. धनभागः, अर्थांशः। ३. स्वांशः, उद्धारः।

—**करना**, क्रि. स., अर्थांशं संग्रह (क्र. प. से.)।

—**देना**, स्वस्वांशं दा (जु. उ. अ.)।

चँदिया, सं. स्त्री. (हिं. चांद) शीर्ष-शिरो-मस्तक,-अग्रं, मुंडं २. कपालः-लं, शिरोऽस्थि (न.) ३. (अंत्य-) रोटिका।

चंद्र, सं. पुं. (सं.) सोमः, शशांकः, शशिन्, विधुः, रजनी-निशा-शर्वरी-क्षपा,-करः-नाथः-पतिः, मृगांकः, कलानिधिः (पुं.), ग्लौः (पुं.), हिम-शीत-शुभ्र-सुधा,-अंशुः-दीधितिः (पुं.), इंदुः (पुं.), चंद्रमस् (पुं.), शशधरः। २. जलं ३. सुवर्णं ४. कर्पूरं ५. 'एक' इति संख्या ६. चंद्रकः, बर्हनेत्रम्।

वि., आह्लादक, आनंदप्रद २. सुंदर।

—**आनन**, वि. (सं.) दे. 'चंद्रमुख'।

—**कला**, सं. स्त्री. (सं.) चंद्र,-रेखा-लेखा।

—**कांत**, सं. पुं. (सं.) चंद्र,-मणिः (पुं.)-रत्नं-उपलः।

—**किरण**, सं. पुं. (सं.) चंद्रपादः, शशिकरः।

—**ग्रहण**, सं. पुं. (सं. न.), विधु-इंदु-चंद्र,-ग्रहणं-ग्रहः-ग्रासः-उपरागः।

—**प्रभा**, सं. स्त्री. (सं.) दे. 'चंद्रिका'।

—**बिंदु**, सं. पुं. (सं.) अनुनासिकचिह्नम् (ँ)।

—**भागा**, सं. स्त्री. (सं.) चंद्रभागी, चंद्रिका, पंचनदप्रांते नदीविशेषः।

—**मुख**, वि. (सं.) चंद्रानन, विधु-शशि,-वदन। (-मुखी (स्त्री.)=चंद्रमुखा, चंद्र-शशि-विधु,-वदना-वदनी-आनना-आननी)।

—**रे(ले)खा**, सं. स्त्री. (सं.) दे. 'चंद्रकला'।

—**वंश**, सं. पुं. (सं.) सोमकुलम्।

—**शाला**, सं. स्त्री., शिरोगृहं, वडभी।

—**शेखर**, सं. पुं. (सं.) चंद्र,-मौलिः (पुं.)-भूषणः-धरः, शिवः।

—**हार**, सं. पुं. (सं.) व ह्न स्वर्णखंडहारः।

चंद्रक, सं. पुं. (सं.) दे. 'चंद्र' २. चंद्रिका, कौमुदी ३. कर्पूरः-रं ४. बर्हनेत्रं, चंद्रिका ५. नखः-खम्।

चंद्रमा, सं. पुं. [सं. चंद्रमस् (पुं.)] दे. 'चंद्र'।

चंद्रहास, सं. पुं. (सं.) असिः, खड्गः २. रावणखड्गः।

चंद्रिका, सं. स्त्री. (सं.) ज्योत्स्ना, शशि-चंद्र,-प्रभा-कांतिः (स्त्री.), कौमुदी, चंद्र,-आलोकः-प्रकाशः २. चंद्रकः, बर्हनेत्रं (३-४) स्थूल-सूक्ष्म,-पत्रा।

चंद्रोदय, सं. पुं. (सं.) चंद्र-सोम,-उदयः-उद्गमः-उद्गमनम्।

चंपई, वि. (हिं. चंपा) चंपक-पीत,-वर्ण-रंग।

चंपक, सं. पुं. (सं.) (पौधा) चंपेयः, दीर्घ-स्वर्ण-स्थिर-पीत,-पुष्पः-पुष्पकः, शीतलः, सुभगः, भृंगमोहिन्, वनदीपः। (फूल) हेमपुष्पं, चंपकं द्र.। (सं. न.) कदलीफलभेदः।

चंपा, सं. पुं. (सं. 'चंपक' दे.)।

—**कली**, सं. स्त्री., सं. चंपककलिका, चंपक-कोरकः २. कंठाभरणभेदः, चंपककली।

चंपत, वि. (सं. चंप्) तिरो-अंतर्-हित, लुप्त, गूढं अपसृत।

चंपू, सं. पुं. (सं. स्त्री.) गद्यपद्यमयं काव्यम्।

चंबेली, सं. स्त्री., दे. 'चमेली'।

चंमच, सं. पुं., दे. 'चमचा'।

चँवर, सं. पुं. (सं. चमरं) चामरम्।

चक, सं. पुं. (सं. चक्र) बृहत्क्षेत्रं, महाभूखंडः-डं २. ग्रामटिका, लघुग्रामः ३. रथांगं, मंडलं, चक्रं ४. पट्टः, पट्टोलिका, भूमिकरग्रहणव्यवस्थापकः पत्रभेदः।

चकई[1], सं. स्त्री., दे. 'चकवी'।

चकई[2], सं. स्त्री. (हिं. चक) *चक्रकी, क्रीडनकभेदः। वि., गोल, वर्तुल।

चकचौंध, सं. स्त्री., दे. 'चकाचौंध'।

चकचौंधना, क्रि. अ., दे. 'चुँधियाना'।

चकछूँदी, सं. स्त्री., दे. 'छछूँदर'।

चकती, सं. स्त्री. (सं. चक्रवती>) वस्त्र-चर्म,-खंडः-खंड-शकलः-शकलम्।

बादल में—लगाना मु., असंभवं साध् (स्वा. प. अ.)।

चकत्ता, सं. पुं. (सं. चक्रवर्तः>) त्वक्किलकः-कं, चर्म,-लांछनं-चिह्नं। २. दंतक्षतम्।
—भरना या मारना, मु., दंश् (भ्वा. प. अ.)।
चकनाचूर, वि., (हिं. चिकना+सं. चूर्णः-र्णं>) सुचूर्णित, शकली-चूर्णी,-कृत-भूत, सूक्ष्मखंडशः कृत २. भूरिश्रांत, अति,-क्लांत-आयस्त।
—करना, क्रि. स., चूर्ण् (चु.), खंडशः भंज् (रु. प. अ.)-त्रुट् (चु. आ. से.)।
—होना, क्रि. अ., अणुशः त्रुट्-चूर्ण्-भंज् (कर्म.)।
चकम(मा)क, सं. पुं. (तु.) अग्निग्रावन् (पुं.), पावकप्रस्तरः।
चकमा, सं. पुं., दे. 'धोखा'।
चकराना, क्रि. अ., (सं. चक्रं>) (शीर्ष) भ्रम् (भ्वा. दि. प. से.), घूर्ण् (भ्वा. आ. से.; तु. प. से.) २. व्यामुह् (दि. प. वे.), आकुली भू ३. चकित (वि.)+भू। क्रि. स., चकित (वि.)+कृ।
चकरानी, सं. स्त्री. (फ़ा. चाकर) सेविका, परिचारिका।
चकरी, सं. स्त्री. (सं. चक्री) पेषणी, पेषण,-यन्त्रं-चक्रं २. चक्री,-पट्टः-पट्टं ३. दे. 'चकई'।
चकला, सं. पुं. (सं. चक्रं>) चक्रकः २. वेश्यावीथी, गणिकाहट्टः ३. दे. 'जिला'। वि., विस्तीर्ण, परिणाहवत्।
चकली, सं. स्त्री. (हिं. चकला) चक्री. दे. 'गराड़ी' २. चक्री, चक्रिका, गोलपट्टिका, घर्षणी।
चकवा, सं. पुं. (सं. चक्रवाकः) कोकः, चक्रः, रथांग,-आह्वयः-नामकः, द्वंद्वचारिन्, कामिन्, कामुकः।
चकवी, सं. स्त्री. (हिं. चकवा) चक्रवाकी, कोकी, चक्री, रथांगनाम्नी इ.।
चकाचक, सं. स्त्री. (अनु.) दे. 'घचाघच' वि., (सं. चक्=तृप्तिः) सम्यक् सिक्त, परिपूर्ण। क्रि. वि., भृशं, भूरि, प्रचुरं (सब अव्य.)।
चकाचौंध, सं. स्त्री. (सं. चक्=चमकना, चौ=चारों तरफ, अंध>) चाकचक्येन नेत्रतेजःप्रतिघातः, अतिशयदीप्त्या दृष्टेरस्थैर्यम्।
चकित, वि. (सं.) विस्मित, आश्चर्यान्वित, विस्मयाकुल, साश्चर्य, विस्मय,-उपहत-अन्वित। २. संभ्रांत, व्यामूढ, व्याकुल, ३. सशंक, त्रस्त।
चकोटना, क्रि. स., (हिं. चिकोटी) अङ्गुल्यग्रेण पीड् (चु.)।
चकोतरा-त्रा, सं. पुं. (सं. चक्र>) (वृक्ष) मधुकर्कटी, मातुलुङ्गः, सुगंधा, सदाफलः, महाजंभीरः। (फल) मधुकर्कटिकं, मातुलुंगम् इ.।
चकोर, सं. पुं. (सं.) कौमुदीजीवनः, चंद्रिकापायिन्।
चकोरी, सं. स्त्री. (सं.) चंद्रिकापायिनी।
चक्कर, सं. पुं. (सं. चक्रं) रथांगं, मंडलं २. गोलः-लं, वृत्तं, वलयः-यं ३. वात,-आवर्त्तः-भ्रमः, वात्या ४. जल-,आवर्तः, जलगुल्मः। ५. उभयसंभवः, विकल्पः ६. संभ्रमः, व्यामोहः ७. कृच्छ्रं, संकटं ८. कौटिल्यं, वक्रत्वं ९. पर्यटनं, वि-आ-वर्तः १०. भ्रमिः-घूर्णिः (स्त्री.), भ्रामरम्।
—खाना, मु., परिभ्रम् (भ्वा. दि. प. से.), घूर्ण् (तु. प. से.)।
—मारना, मु., विचर्-पर्यट् (भ्वा. प. से.)।
—में आना, मु., कृच्छ्रे पत् (भ्वा. प. से.), संकटे मस्ज् (तु. प. अ.)।
—में डालना, मु., कृच्छ्रे-संकटे,-पत्-मस्ज् (प्रे.)।
चक्का, सं. पुं. (सं. चक्रं) दे. 'चक्कर' (१,२)। ३. बृहद्वर्तुलखंडः-डं ४. इष्टक-प्रस्तर,-राशिः (पुं.)।
चक्की, सं. स्त्री. (सं. चक्री) यन्त्रपेषणी, दे. 'चकरी' (१–२) ३. जानुफलकम्।
—पीसना, क्रि. स., चक्र्या पिष् (रु. प. अ.)-क्षुद् (रु. उ. अ.)-चूर्ण् (चु.)। मु., घोरं-अत्यधिकं परिश्रम् (दि. प. से.)-उद्यम् (भ्वा. प. अ.)।
चक्कू, सं. पुं., दे. 'चाकू'।
चक्र, सं. पुं. (सं. न.) दे. 'चक्कर' (१–४)। ५. तैलपेषणी ६. कुलाल-कुम्भकार,-चक्रं-पट्टः ७. अस्त्रभेदः ८. गणः, समूहः।
—धर, सं. पुं. (सं.)
—धारी, सं. पुं. (सं.-रिन्)
—पाणि, सं. पुं. (सं.)
} विष्णुः, चक्रभृत्।
—वर्ती,—सं. पुं. (सं.-र्तिन्) राजाधिराजः, मंडलेश्वरः, सम्राज् (पुं.), अधि,-राजः-ईश्वरः।

—वाक, सं. पुं. (सं.) दे. 'चकवा'
—वृद्धि, सं. स्त्री. (सं.) चक्रवार्द्धुष्यम्।
—व्यूह, सं. पुं. (सं.) मंडलाकारः सैन्य-संनिवेशः।
—हस्त, सं. पुं. (सं.) विष्णुः।
चक्राकार, सं. पुं. (सं.) गोल, मंडलाकृति।
चक्री, सं. पुं. (सं.-क्रिन्) चक्र,-धर-धारिन् २. विष्णुः ३. कुलालः ४. गुप्तचरः ५. तैलिकः, तैलिन् ६. सर्पः ७. चक्रवाकः ८. चक्रवर्तिन्।
चक्षु, सं. पुं. [सं. चक्षुस् (न.)] नेत्रं, नयनम्।
चखना, क्रि. स. (सं. चर्पणं) आ-,स्वाद् (भ्वा. आ. से.), चप् (भ्वा. उ. से.), रस् (चु.), रसं परीक्ष् (भ्वा. आ. से.), रसनया स्पृश् (तु. प. अ.)।
सं. पुं., आस्वादनं, चर्पणं, रसनं, ईषद्दशनम्।
चखाना, क्रि. प्रे., व. 'चखना' के प्रे. रूप।
चगलना, क्रि. स. (अनु. चग>अथवा चर्वणं+गिलनं>) क्षुधां विना भक्ष् (चु.)।
चचा, सं. पुं. दे. 'चाचा'।
चची, सं. स्त्री., दे. 'चाची'।
चचेरा, वि. (हिं. चचा) पितृव्यसंबंधिन्।
—भाई, सं. पुं., पितृव्यपुत्रः, पितृव्यजः।
चचेरी बहिन, सं. स्त्री., पितृव्यपुत्री, पितृव्यजा।
चचोड़ना, क्रि. स. (अनु.) दंतैः निपीड्य आ-,चूष् (भ्वा. प. से.), बलवत् स्तन्यं धे (भ्वा. प. अ.)।
चट, क्रि. वि. / चटपट, „ / चटसे „ (सं. झटिति) क्षणेन, क्षण-निमेष,-मात्रेण, सपदि, द्राक्, अंजसा, क्षणात्-सद्यः,-एव, तत्क्षणं-णे-णेन।
—करना, मु., अशेषं निगल् (भ्वा. प. से.) २. परद्रव्यमात्मसात् कृ।
—पट करना, क्रि. अ., त्वर् (भ्वा. आ. से.), आशु कृ।
चटक, सं. स्त्री. (सं. चटुल>) शोभा, श्रीः-कांतिः-द्युतिः-दीप्तिः (स्त्री.)।
—मटक, सं. स्त्री., प्रसाधनं, अलंकरणं, मंडनं २. हावभावाः, विलसितं, विलासः।
चटक(ख)ना, क्रि. अ. (अनु. चट) स्फुट् (तु. प. से.), द्-भंज्-भिद् (कर्म.), वि-,दल् (भ्वा. प. से.)। सं. पुं., चपेटः-टिका।
चटकनी, सं. स्त्री. (अनु. चट) कीलः-लं, अर्गलं, तोलकम्।
चटकाना, क्रि. स. (हिं. चटकना) दे. 'चटकना' के प्रे. रूप २. अंगुलीः स्फुट् (क्रि.)।
जूतियाँ—, मु., कर्मणि दारिद्र्येण वा भ्रम् (भ्वा. दि. प. से.)।
चटकीला, वि. (हिं. चटक) भास्वर, उज्ज्वल, प्रभावत् २. चित्र, नानावर्ण ३. दे. 'भड़कदार'।
चटनी, सं. स्त्री. (हिं. चाटना) अवलेहः, उप-अव,-दंशः, व्यंजनं, उपस्करः।
चटपटा, वि. (हिं. चाट) स्वाद्, सुरस, सरस, रुच्य, रुचिकर २. तीक्ष्ण, तिक्त।
चट(टा)पटी, सं. स्त्री. (हिं. चटपट) त्वरा, तूर्णिः (स्त्री.), शीघ्रता, क्षिप्रता। २. उत्सुकता, आकुलता।
चटरजो, सं. पुं. (सं.) चट्टोपाध्यायः, बंगप्रांतीयब्राह्मणभेदः।
चटवाना, क्रि. प्रे., व. 'चाटना' के प्रे. रूप।
चटशाल, चटसार-ल, सं. स्त्री., (हिं. चट्टा=चेटा+सं. शाला) पाठशाला, विद्यालयः।
चटाई, सं. स्त्री. (सं. कटः?) किलिंजकः, किलंजं, तृणपूली, पादपाशी, आस्तरः।
चटाक, चटाका-खा, सं. पुं. (अनु.) विरावः, सशब्द,-भंगः-स्फोटनं, परुषस्वनः, चटाक,-शब्दः-ध्वनिः (पुं.)।
चटाचट, सं. स्त्री. (अनु.) चटचटा,-शब्दः-नादः, चटचटायितं, चटचटात्,-कारः-कृतिः (स्त्री.)-कृतम्।
चटाना, क्रि. प्रे., व. 'चाटना' के प्रे. रूप।
चटुल, वि. (सं.) चंचल, चपल, लोल २. सुंदर।
चटोर-रा, वि. (हिं. चाटना) अग्रार, धस्मर, अल्पाहारिन्, बहुभोजिन् २. स्वादरस,-प्रिय-लोलुप, जिह्वालोल।
चटोरपन, सं. पुं. (हिं. चटोर) धस्मरता, औदरिकता २. स्वादलोलुपता, जिह्वालौल्यम्।
चट्टा, सं. पुं. (सं. चेटः>) छात्रः, शिष्यः।
—बट्टा, सं. पुं. (हिं. चट्टू+बट्टा) क्रीडनकसमूहः।
एक ही थैली के चट्टे बट्टे, मु. समस्वभावाः-तुल्यशीलाः मानवाः।

चट्टान, सं. स्त्री. (हिं चट्टा = चकत्ता) शिलोच्चयः, स्थूलशिला, शैलः, महाप्रस्तरः ।

चट्टी[1], सं. स्त्री. (अनु. चटचट) पादत्रं, पादुका, पादः (स्त्री.) ।

चट्टी[2], सं. स्त्री. (हिं. चाँटा) हानिः-क्षतिः (स्त्री.) २. दंडः, अपकारशुद्धिः-क्षतिनिष्कृतिः (स्त्री.) ।

चट्टू, सं. पुं. (हिं. अनु. चट) पाषाणमयं तृहदुदूखलम् ।

चड्डा, सं. पुं. (देश.) जंघामूलं, ऊरुसंधिः (पुं.), वि. मंदबुद्धि, मूर्ख ।

चढ़ना, क्रि. अ. (सं. उच्चलनं) उदि-उद्या (अ. प. अ.), उपरि-उद्, गम्, अधि-आ-रुह् (भ्वा. प. अ.), अधिक्रम् (भ्वा. प. से., भ्वा. आ. अ.) २. उत्था (भ्वा. प. अ.), समुत्था (भ्वा. आ. अ.) ३. सं-ऋध् (दि. प. से.), उप-प्र-चि (कर्म.) ४. आक्रम्, अभिद्रु-अवस्कंद् (भ्वा. प. अ.) ५. उत्पत् (भ्वा. प. से.), उड्डी (भ्वा. आ. से.) ६. उपहारी-उपायनी,-कृ (कर्म.), उपह-निवप् (कर्म.) ७. प्रवृत् (भ्वा. आ. से.) । सं. पुं. उदयनं, उद्गमनं, अधिरोहणं; उत्थानं, आक्रमणं, उड्डयनं इ. ।

चढ़ने योग्य, वि. उदेतव्य, आरोहणीय; आक्रमणीय ।

चढ़ने वाला, सं. पुं. उदेतृ-अधिरोढृ-अभिद्रावक ।

चढ़ा हुआ, वि., उदित, उद्गत, अधिरूढ, आक्रांत ।

चढ़वाना, क्रि. प्रे., व. 'चढ़ना' के प्रे. रूप ।

चढ़ाई, सं. स्त्री. (हिं. चढ़ना) उद्गमनं, आरोहणं २. उद्गमः, उदयः ३. आरोहः ४ आक्रमः, अवस्कंदः ।

चढ़ाउतरी, सं. स्त्री. (हिं. चढ़ना + उतरना) असकृत् आरोहणावरोहणं-णे ।

चढ़ाऊपरी, सं. स्त्री. (हिं. चढ़ना + ऊपर) प्रतिस्पर्द्धा, अहंपूर्विका ।

चढ़ाना, क्रि. स., व. 'चढ़ना' के प्रे. रूप ।

चढ़ाव, सं. पुं. (हिं. चढ़ना) आरोहः, उद्गमः, उत्थानं २. वृद्धिः (स्त्री.), उपचयः ।

—उतार, सं. पुं., आरोहावरोहौ, उद्गमावगमौ ।

चढ़ावा, सं. पुं. (हिं. चढ़ाना) उपहारः, उपायनं, उत्सर्गः, वलिः (पुं.) २. दे. 'बढ़ावा' ।

चणक, सं. पुं. (सं) दे. 'चना' ।

चतुरंग, सं. पुं. (सं. न.) अक्षक्रीडाभेदः २. चत्वारि सेनांगानि (हस्त्यश्वरथपदातय इति ३. चतुरंगिणी सेना । वि., अंगचतुष्टयवत् ।

चतुरंगिणी, सं. स्त्री. (सं.) हस्त्यश्वरथपदातिरूपिणी सेना । वि. स्त्री., अंगचतुष्टयवती ।

चतुर, वि. (सं.) निपुण, दक्ष, प्रवीण, कुशल, विचक्षण, विशारद २. धीमत्, बुद्धिमत्, प्रज्ञ, प्राज्ञ ३. कापटिक-छाद्मिक [-की (स्त्री.)], कितव, धूर्त्त ।

चतुरता, सं. स्त्री. (सं.) नैपुण्यं, दाक्ष्यं, कौशलं, प्रावीण्यं २. बुद्धिमत्त्वं, प्राज्ञता ३. कैतवं, कापट्यं इ० ।

चतुराई, सं. स्त्री., दे. 'चतुरता' ।

चतुरानन, सं. पुं. (सं.) चतुर्मुखः, ब्रह्मन् (पुं.) ।

चतुर्थ, वि. (सं.) तुर्य, तुरीय ।

चतुर्थी, वि. स्त्री. (सं.) तुर्या, तुरीया २. पक्षस्य तुरीया तिथिः ३. दे. 'चौथा' ।

चतुर्दिक्, सं. पुं., दे. 'चतुर्दिश' ।

चतुर्दिश, सं. पुं. (सं. न.) दिक्चतुष्टयम्, चतुर्दिक्समूहः । क्रि. वि., चतुर्दिक्षु, सर्वतः, समंततः, विश्वतः, समंतात्, सर्वत्र (सब अव्य.) ।

चतुर्भुज, वि. (सं.) चतुर्बाहु, चतुर्हस्त २. चतुष्कोण, चतुरस्र । सं. पुं. (सं.) विष्णुः २. चतुष्कोणः, चतुरश्रः-स्रः ३. चतुर्भुजं, वर्गः, सम,-चतुर्भुजः-चतुरस्रः ।

चतुर्मुख, सं. पुं. (सं.) दे. 'चतुरानन' । क्रि. वि., सर्वतः, परितः, समंतात् (सब अव्य.) ।

चतुर्युग, सं. पुं. (सं. न.) युग,-चतुष्कं-चतुष्टयम् ।

चतुर्युगी, सं. स्त्री. (सं.) दे. 'चतुर्युग' ।

चतुर्वर्ग, सं. पुं. (सं.) धर्मार्थकाममोक्षाः ।

चतुर्वर्ण, सं. पुं. (सं.) ब्राह्मणक्षत्रियवैश्यशूद्राः, चातुर्वर्ण्यं, वर्ण,-चतुष्टयं-चतुष्कम् ।

चतुष्कोण, वि. (सं.) चतुरस्र, चतुरश्र, चतुर्भुज २. सम,-चतुर्भुज चतुरश्र । सं. पुं. (सम-) चतुर्भुजः-चतुरश्रः ।

चतुष्टय, सं. पुं. (सं. न.) चतुःसंख्या, चतुष्कं, चतुर्वस्तुसमूहः, चतुष्कम् ।

चतुष्पथ, सं. पुं. (सं. पुं. न.) दे. 'चौराहा' ।

चतुष्पद, सं. पुं. तथा वि. (सं.) दे. 'चौपाया' ।

चद्दर, सं. स्त्री. (फ़ा. चादर) शयनास्तरणं, शय्याच्छादनं, प्रच्छद,-पटः-वस्त्रं, प्रच्छदः उत्तरच्छदः २. (धात की) फलकः-कं, पत्रम् ।

—चरित, सं. पुं. (सं. न.) जीवन,-चर्या-वृत्तान्तः-चरित्रम्।
जीवन वृत्त,-वृत्तान्त, सं. पुं. (सं.) दे. 'जीवन चरित'।
जीवनवृत्ति, सं. स्त्री. (सं.) आजीविका, व्यवसायः, उपजीविका, जीवनोपायः, जीवनसाधनम्।
जीवात्मा, सं. पुं. (सं.-त्मन्) दे. 'जीव'।
जीविका, सं. स्त्री. (सं.) दे. 'जीवनवृत्ति'।
जीवित, वि. (सं.) दे. 'जीता'।
जुआ, सं. पुं. (सं. द्यूतं) पणः, पणनं-देवनं-ना, द्यूत-अक्ष,- क्रीडा।
—खेलना, क्रि. अ., दिव् (दि. प. से.) (अक्षैः) क्रीड् (भ्वा. प. से.)।
जुआरी, सं. पुं. (हिं. जुआ) द्यूतकारः, कितवः, अक्षदेविन्, देवितृ।
ज़ुकाम, सं. पुं. (अ.) प्रतिश्यायः, श्लेष्मस्रावः।
जुग, सं. पुं. (सं. युगं) कालमानभेदः २. युगलं, द्वन्द्वन्।
जुगनू, सं. पुं. (हिं. जुगजुगाना) खद्योतः, ज्योति-रिङ्गणः, दृष्टिबन्धुः, प्रभाकीटः, उपसूर्यकः, तमोमणिः।
जुगल, सं. पुं. (सं. युगलं) दे. 'युगलं' या 'जुग' (२)।
जुगालना, क्रि. अ. (सं. उद्गिलनम् >) रोमन्थं कृ, रोमन्थायते (ना. धा.)।
जुगाली, सं. स्त्री. (हिं. जुगालना) रोमन्थः, पुनश्चर्वणम्।
जुगुप्सा, सं. स्त्री. (सं.) बीभत्सः, घृणा, गर्हा, अरुचिः (स्त्री.)।
जुटना, जुड़ना, क्रि. अ. (सं. युक्त) सं-,युज् (कर्म.); संश्लिष् (दि. प. अ.); संमिल् (तु. प. से.)।
जुटाना, जुड़ाना, क्रि. प्रे., व. 'जुड़ना' के प्रे. रूप।
जुतना, क्रि. अ. (सं. युक्त >) 'युगं-योक्त्रं वह् (भ्वा. उ. अ.)।
जुदा, वि. (फ़ा.) पृथक्, भिन्न।
—करना, क्रि. स. वियुज् (रुध. उ. अ.) पृथक्-कृ।
—होना, क्रि. अ., पृथग्भू, विश्लिष् (दि. प. अ.)।
जुदाई, सं. स्त्री. (फ़ा.) वियोगः, पार्थक्यम्।
जुद्ध, सं. पुं. (सं. युद्धं) संग्रामः।
जुमा, सं. पुं. (अ.) शुक्र-भृगु-,वारः-वासरः।
जुरअत, सं. स्त्री. (फ़ा.) साहसिक्यं, साहसं, उत्साहः।
जुरमाना, सं. पुं. (फ़ा.) दमः, अर्थदण्डः।
जुर्म, सं. पुं. (अ.) अपराधः, दोषः।
जुर्माना, सं. पुं. (फ़ा.) दे. 'जुरमाना'।
—करना, क्रि. अ., दण्ड् (चु. द्विकर्मक)।
—देना, क्रि. स., दण्डं-दमं दद् (भ्वा. उ.अ.)।
—मुआफ करना, क्रि. स., दण्डं-दमं क्षम् (भ्वा. आ. से.)।
जुलाब, सं. पुं. (अ. जुल्लाब) रेचनं, विरेचनं, उदरशोधनं २. रेचकः-कं, विरेचकः-कम्।
—देना, क्रि. स., विरिच् (प्रे.)।
—लेना, क्रि. अ. (उदरं) विरिच् (रु. प. अ.)।
जुलाहा, सं. पुं. (फ़ा. जौलाह) तन्तुवायः, वयः, कुविन्दः, तंत्रवापः, पटकारः।

जुलूस, सं. पुं. (अ.) दे. 'जलूस'।
ज़ुल्फ, सं. स्त्री. (फ़ा.) कुटिल-चूर्ण,-कुन्तलः, अलकः २. द्विफालबद्धाः चिकुराः।
ज़ुल्म, सं. पुं. (अ.) अत्याचारः, क्रूर-घोर-, कर्मन् (न.)।
जुवा, सं. पुं. (हिं. जुआ) दे. 'जुआ'।
जुवारी, वि. (हिं. जुआरी) दे० 'जुआरी'।
जुही, सं. स्त्री. (सं. यूथी) (सफ़ेद) यूथिका, बालपुष्पी, वासन्ती, (पीली) पीत-सुवर्ण-, यूथी, हेमयूथिका, कनकप्रभा, हेमपुष्पिका।
जूं, सं. स्त्री. (सं. यूका) केशटः, केशकीटः, स्वेदसंभवा, यूकाः-का, षट्पदः-दी।
जूआ, सं. पुं. (सं. द्युगं-गः) योक्त्रं,धुर्वी, प्रासंगः, ईषान्तबंधनं, धुर् (स्त्री.)।
जूआ, सं. पुं., दे. 'जुआ'।
जूठ-जूठन, सं. स्त्री. (हिं. जूठा) भुक्तशेषः, उच्चिष्टं, अवशिष्टम्।
जूठा, वि. (सं. जुष्ट) उच्छिष्ट, भुक्तशेष।
जूड़ा, सं. पुं. (सं. जूटः) जूटकं, केशबन्धः, जटाग्रन्थिः।
जूत-जूता, सं. पुं. (सं. युक्त>) पादत्राणं, उपानह् (स्त्री.)।
—मारना, मु., पादत्राणेन तड् (चु.) २. तिरस्कृ।
—खाना, मु., तिरस्कारं लभ् (भ्वा. आ. अ.)।
जूती, सं. स्त्री., दे. 'जूता'।
जूथ, सं. पुं., दे. 'यूथ'।
जूनियर, वि. (इं.) अवर, अधर, अवरपदभाज्।
जूही, सं. स्त्री., दे. 'जुही'।
जृम्भा, सं. स्त्री. (सं.) जृम्भः, जृम्भणं, जृम्भिका, जंभा, जंभका।
जेठ, सं. पुं., दे. 'ज्येष्ठ'।
जेठा, सं. पुं. (सं. ज्येष्ठः) प्रथमजः, अग्रजः।
जेठानी, सं. स्त्री., दे. 'जिठानी'।
जेब, सं. पुं. (फ़ा.) (चोलकञ्चुकादीनां) कोशः-षः।
जेर, सं. स्त्री. (सं. जरायुः) उल्वं, कललः।
जेल, स. पुं. (अं.) कारा,-गृहं-आगारं, बन्दि,-गृहं-शाला।
—खाना, सं. पुं. (अ. फ़ा.) दे. 'जेल'।
जेवर, सं. पुं. (फ़ा.) वि-आ-, भूषणं, आभरणं, अलंकारः, अलंकरणम्।
जेहन, सं. पुं. (अ.) दे. 'ज़िहन'।
जैन, सं. पुं. (सं.) जैनमतावलम्बिन् २. जैन,-मतं-सम्प्रदायः।
जैनी, सं. पुं. (सं. जैन) दे. 'जैन' (१)।
जैसा, वि. (सं. यादृश) यादृश्(श), यत्प्रकारक [जैसी (स्त्री.)=यादृशी]।
—का तैसा, मु., पूर्ववत्, यथापूर्वम्।
—चाहिए, मु., यथोचितं, यथार्हं, यथायोग्यम्।
जो, सर्व. (सं. यः) यः (पुं.) या (स्त्री.), यत् (न.)।
—कुछ, यत्किञ्चित्।
—कोई, यः कश्चित्-कश्चन-कोऽपि।
जोक, जोंक, सं. स्त्री. (सं. जलौका) जलुका, रक्त,-पा-पायिनी, जलाका, जलजन्तुका।
जोखों, सं. स्त्री., संकटं, विपद् (स्त्री.)।
जोग, सं. पुं. (सं. योगक्षेम ?) दे. 'योग'।
जोगिया, वि. (हिं. जोगी) परिव्राजक, योगिसम्बन्धिन्, २. गैरिकरागयुक्त, गैरिकाक्त, गैरिकवर्ण।
जोगी, सं. पुं. (सं. योगिन्) दे. 'योगी'।
जोगिन, सं. स्त्री., दे. 'योगिनी'।
जोजन, सं. पुं. (सं. योजनं) दे. 'योजन'।
जोड़, सं. पुं. (सं. जोडः) बन्धनं, मेलनं २. योगः, संकलः, परिसंख्या, पिंडः। ३. अंग-सन्धिः, अंगग्रन्थिः।
जोड़ना, क्रि. स. (सं. जोड़नं) एकत्र कृ, संमिल् (प्रे.) जुड् (भ्वा. तु. प. से.) युज् (रुध. उ. अ.), संश्लिष् (प्रे.) २. संकल् (चु.), परिसंख्या (अ. प. अ.)।
जोड़ा, सं. पुं. (हिं. जोड़ना) युगलं, युग्मं २. द्वन्द्वं, मिथुनं ३. उपानद्युगलं ४. वेषः-शः।
जोड़ी, सं. स्त्री. (हिं. जोड़ा) दे. 'जोड़ा' (१-२)।
जोत[1], सं. स्त्री. [सं. ज्योतिस् (न.)] प्रकाशः, आभा, द्युतिः।
जोत[2], सं. स्त्री. (हिं. जोतना) चर्मपट्टः, वरत्रा, वध्री।
जोतना, क्रि. स. (सं. युक्त>) योक्त्रयति (ना. धा.), युज् (चु.) २. कृष् (भ्वा. प. अ.), हल् (भ्वा. प. से.)।
जोतिष, सं. पुं., दे. 'ज्योतिष'।
जोतिषी, सं. पुं., दे. 'ज्योतिषी'।

जोधा, सं. पुं. (सं. योद्धृ) योधः, भटः ।
जोबन, सं. पुं. (सं. यौवनं) तारुण्यम् ।
ज़ोर, सं. पुं. (फ़ा.) बलं, शक्तिः २. वशः, अधिकारः ३. वृद्धिः-समृद्धिः (स्त्री.) ४. वेगः, आवेशः ५. आश्रयः ६. परिश्रमः ७. व्यायामः ।
ज़ोरावर, वि. (फ़ा.) बलिष्ठ, शक्तिशालिन् ।
ज़ोरदार, वि. (फ़ा.) प्रबल, बलवत् २. अकाट्य, अखण्ड्य ।
जोरू, सं. स्त्री. (हिं. जोड़ा) भार्या, पत्नी, गेहिनी ।
जोलाहा, सं. पुं., दे. 'जुलाहा' ।
जोश, सं. पुं. (फ़ा.) उत्तेजनं-ना, उत्साहः, व्यग्रता, चण्डता, मनोवेगः, आवेशः ।
—**देना**, क्रि. स , प्रोत्सह् (प्रे.), उत्तिज् (प्रे.) २. पच् (भ्वा. प. अ.), क्वथ् (भ्वा. प. से.)।
जोशीला, वि., व्यग्र, उग्र, उत्साहिन्, उत्साहवत् , प्रचण्ड ।
जोहड़, सं. पुं.(देश.) जलाशयः, ह्रदः, पल्वलम् ।
जौ, सं. पुं. (सं. यवः) प्रवेटः, दीर्घ-सित,-शूकः, अश्वप्रियः, महाबुसः ।
जौहर, सं. पुं. (अ.) रत्नं, मणिः (पुं., कभी स्त्री.) २. सारः, तत्त्वम् ।
जौहरी, सं. पुं. (फ़ा.) मणिकारः, रत्नकारः २. रत्नपरीक्षकः ।
ज्ञातव्य, वि. (सं.) ज्ञेय, अवगन्तव्य, बोद्धव्य ।
ज्ञाता, वि. (सं. ज्ञातृ) वेत्तृ, ज्ञानिन्, बोद्धृ ।
ज्ञाति, सं. पुं. (सं.) सगोत्रः, बन्धुः, बान्धवः, स्वः, स्वजनः, सकुल्यः, अंशकः, दायादः ।
ज्ञान, सं. पुं. (सं.न.) बोधः, प्रतीतिः (स्त्री.) ।
ज्या, सं. स्त्री. (सं.) मौर्वी, शिञ्जिनी, गुणः ।
ज्यादती, सं. स्त्री. (फ़ा.) आधिक्यं, प्राचुर्यं, अधिकता २. अत्याचारः ।
ज्यादा, वि. (फ़ा.) अधिक, महत्, बहु ।
—**तर**, वि. बहुसंख्याक, अधिकतर, भूयस् ।
ज्येष्ठ, सं. पुं. (सं.) अग्रजः,-प्रथमजः २. भर्तुः ज्यायान् भ्रातृ ३. ज्यैष्ठः(मास :) । वि., वृद्ध २. श्रेष्ठ ।
ज्यों, क्रि. वि. (सं. यः + इव यथा,)येन प्रकारेण ।
—**का त्यों**, मु., यथापूर्वम् ।
—**त्यों**, मु., यथा तथा ।
ज्योति, सं. स्त्री. [सं. ज्योतिस् (न.)] प्रकाशः, प्रभा, द्युतिः (स्त्री.) ।
ज्योतिष, सं. पुं. (सं. न.) ज्योतिर्विद्या, ज्योतिःशास्त्रं, नक्षत्रविद्या ।
ज्योतिषी, सं. पुं. (सं. ज्योतिषिन्) दैवज्ञः, ज्योतिर्विद्, ज्योतिषिकः ।
ज्योत्स्ना, सं. स्त्री. (सं.) चन्द्रिका, कौमुदी ।
ज्वर, सं. पुं. (सं.) ज्वरिः, ज्वरा, जूर्तिः (स्त्री.), महागदः, तापकः ।
थोड़ी थोड़ी देर बाद होनेवाला—, स्वल्पविरामज्वरः ।
दौरेवाला—, पौनःपुनिकज्वरः ।
प्रतिदिन होनेवाला—, अन्येद्युष्कज्वरः ।
रुक रुककर होनेवाला—, सविरामज्वरः ।
सड़ा—, रक्तदुष्टिः (स्त्री.) ।
हर तीसरे दिन होनेवाला—, तृतीयकज्वरः ।
हर चौथे दिन होनेवाला—, चतुर्थकज्वरः ।
ज्वलंत, वि. (सं. ज्वलत्) उद्दीप्त, प्रकाशित ।
ज्वलन, सं. पुं. (सं. न.) दाहः, तापः २. अग्निः ३. ज्वाला ।
ज्वार[1] सं. स्त्री. (सं. यावनालः) अन्नविशेषः, वृत्ततण्डुलः, क्षेत्रेक्षुः ।
ज्वार[2], सं. पुं. (देश.) वेलावृद्धिः (स्त्री.) ।
—**भाटा**, सं. पुं., वेलाया वृद्धिक्षयौ (द्वि.) ।
ज्वाला, सं. स्त्री. (सं.) शिखा, अर्चिः (न.) ।
—**मुखी**, सं. पुं. (सं.) अग्निपर्वतः ।

झ

झ, देवनागरीवर्णमालाया नवमो व्यञ्जनवर्णः, झकारः ।
झं, झंकार, सं. पुं., स्त्री. (अनु.) झणत्कारः, झणझणध्वनिः, शिञ्जितम् ।
झंखाड़, सं. पुं. (हिं. 'झाड़' का अनु.) कंटगुल्मः-मं, कंटस्तम्बः ।
झंझट, सं. स्त्री, (अनु.) कृच्छ्रम्, आयासः, क्लेशः, वैषम्यम् ।
झंझनाना, क्रि. अ. (अनु.) झणझणायते (ना. धा.), झणझणध्वनिं उत्पद् (प्रे.) ।
झंझनाहट, सं. स्त्री. (अनु.) दे. 'झंकार' ।
झंझा, सं. स्त्री. (सं.) झंझावातः, सवृष्टिको वातः ।

झंझोड़ना, क्रि. स. (सं. झर्झनम्) क्षुभ् (प्रे.), सरभसं कंप् (प्रे.)।

झंडा, सं. पुं. (हिं. झण्डी) ध्वजः, केतुः, केतनम्।

झंडी, सं. स्त्री. (सं. जयन्ती) वैजयन्ती, पताका, दे. 'झंडा'।

झक, सं. स्त्री. (अनु.) आवेशः, अभिनिवेशः, आग्रहः, निर्बन्धः २. प्रलापः, असंबद्धभाषणं, प्रजल्पः।

—मारना, क्रि. स., प्रलप्-प्रजल्प् (भ्वा. प. से.), निर्विवेकं भाष् (भ्वा. आ. से.)।

झकझक, सं. स्त्री. (अनु.) दे. 'झक'।

झकना, क्रि. अ., प्रलप्-प्रजल्प् (भ्वा. प. से.), विवद् (भ्वा. आ. से.)।

झक्की, सं. पुं. (हिं. झक) वावदूकः, प्र-, जल्पकः, वाचालः २. दृढाग्रहिन्।

झख, सं. स्त्री. (अनु.) दे. 'झक'।

झगड़ना, क्रि. अ. (हिं. झकझक) विवद् (भ्वा. आ. से.), विप्रलप् (भ्वा. प. से.), कलहं कृ, कलहायते (ना. धा.)।

झगड़ा, सं. पुं. (हिं. झगड़ना) वाग्युद्धं, कलिः, कलहः, विवादः।

झगड़ालु-लू, वि. (हिं. झगड़ा) विवादिन्, कलहप्रिय।

झट, क्रि. वि. (सं. झटिति) तत्क्षणं, अनुपदं, शीघ्रम्।

—पट, क्रि. वि., तत्कालमेव, सत्वरम्।

झटकना, क्रि. स. (हिं. झट) (सहसा) वेप्-कंप् (प्रे.) २. छलेन बलेन वा अपहृ (भ्वा. प. अ.)।

झटका, सं. पुं. (हिं. झटकना) हस्तादिकेन प्रचालनं-प्रेरणं-प्रणोदनं, ईषत्,-आघातः-प्रहारः २. सहसा वधः-हननम्।

झड़, सं. स्त्री. (हिं. झड़ना) दे. 'झड़ी'।

झड़झड़ाना, क्रि. स. (अनु.) दे. 'झंझोड़ना'।

झड़ना, क्रि. अ. (सं. झरणम्>) पत्-क्षर् (भ्वा. प. से.), शृ (कर्म.) २. धाव्-निर्णिज् (कर्म.)।

झड़प, सं. स्त्री. (अनु.) कलहः २. क्रोधः ३. आवेशः।

झड़बेरी, सं. स्त्री. (हिं. झाड़+बेरी), (फल) वन्यवदरम् (वृक्ष) भूवदरी, वन्यवदरः, शबराहारः।

झड़ी, सं. स्त्री. (हिं. झड़ना) सतत,-क्षरणं-पतनं २. सततवृष्टिः (स्त्री.)।

झड़वाना, क्रि. स. (झाड़ना) शुध्-मृज् (प्रे.) २. अपवह् (प्रे.), व. 'झाड़ना' के (प्रे.) रूप।

झड़ाना, क्रि. स. (झाड़ना) दे. 'झड़वाना'।

झपक, सं. स्त्री. (हिं. झपकना) नेत्रनिमीलनं, पक्ष्मसंकोचः, निमेषः, तन्द्रा, ईषन्निद्रा २. पलं, क्षणः-णम्।

झपकना, क्रि. स. (अनु. झप्) निमील् (भ्वा. प. से.) नेत्रं संकुच् (भ्वा. प. से.), निमिष् (तु. प. से.)। क्रि. अ., निमील्, निमिष् २. अल्पं निद्रा (अ. प. अ.)-स्वप् (अ. प. अ.)।

झपकाना, क्रि. स., दे. 'झपकना' क्रि. स.।

झपट, सं. स्त्री. (हिं. झपटना) आच्छेदः, आकस्मिकग्रहणं २. सहसाक्रमणं, आकस्मिकः प्रहारः।

झपटना, क्रि. स. अ. (सं. झंपः>) आच्छिद् (रु. प. अ.), सहसा आ-कृष् (भ्वा. प. अ.) २. आक्रम् (दि. प. से.)।

झपट्टा, सं. पुं., **झपेट,** सं. स्त्री., } दे. 'झपट'।

झबरा, वि. (अनु.) सघनकेश, लोमश, दीर्घलोमन्।

झबरीला, वि., दे. 'झबरा'।

झमक, सं. स्त्री. (हिं. चमक) द्युतिः (स्त्री.), आभा, कान्तिः (स्त्री.)।

झमझम, झमाझम, } सं. स्त्री. (अनु.) धारासारः, धारापातः, झंझा २. झणत्कारः, झणझणशब्दः।

झमेला, सं. पुं. (अनु. झांव) दे. 'झंझट'।

झरना, क्रि. अ. (सं. झरणं>) क्षर् (भ्वा. प. से.), स्रु (भ्वा. प. अ.), प्रपत् (भ्वा. प. से.)। सं. पुं., प्रपातः, स्रोतस् (न.), निर्झरः, उत्सः।

झरोखा, सं. पुं. (अनु. झरझर+हिं. गोखा) गवाक्षः, वातायनम्।

झलक, सं. स्त्री. (सं. झल्लिका) आभा, द्युतिः (स्त्री.), प्रकाशः २. प्रतिविम्बः-बं, प्रतिच्छाया, प्रतिफलम्

झलकना, क्रि. अ. (हिं. झलक) प्रकाश-विद्युत् (भ्वा. आ. से.) २. प्रतिफल् (भ्वा. प. से.) संक्रान्त-प्रतिबिंबित-प्रतिफलित (वि.) भू, प्रतिभा (अ. प. अ.)।

झलकाना, क्रि. स., व. 'झलकना' के प्रे. रूप।

झलना, क्रि. स. (हिं. झलझल) वीज् (चु.), व्यजनं धूर्ण् (प्रे.)।

झलवाना, क्रि. प्रे., व. 'झलना' के प्रे. रूप।

झल्लाना, क्रि. अ. (हिं. झल = क्रोध) प्रकुप् (दि. प. से.), क्रुध् (दि. प. अ.)। क्रि. स., व. उक्त धातुओं के प्रे. रूप।

झष, सं. पुं. (सं.) मत्स्यः, मीनः।

—केतु, सं. पुं. (सं.) कामः, मारः, रतिपतिः, मनोजः।

झांई, सं. स्त्री. (सं. छाया) प्रतिविम्बः-म्बं, प्रति,-च्छाया-फलं-रूपं २. अंधकारः २. छलम्।

झांकना, क्रि. अ. (सं. झष् अथवा अध्यक्ष) जालमार्गेण दृश् (भ्वा. प. अ.) २. निगूढं निरूप् (चु.)।

झांकी, सं. स्त्री. (हिं. झांकना) ईषद् अभिव्यक्तिः (स्त्री.) २. ईक्षणं, निरूपणं ३. दृश्यं ४. गवाक्षः।

झांझ, सं. स्त्री. (अनु. झनझन) झल्लकं, झल्लरी, कांस्यकरतालकम्।

झाँझन, सं. स्त्री. (अनु.) नूपुरः-रम्।

झाँझरी, सं. स्त्री., दे. 'झाँझ' तथा 'झाँझन'।

झांवां, सं. पुं. (सं. झामकम्) दग्धेष्टका २. क्रोधः ३. कुचेष्टा।

झांसा, सं. पुं. (सं. अध्यासः >) छलं, कपटं, प्रतारणा।

—देना, झांसना, क्रि. स., वंच् (चु.), प्रतृ (प्रे.), छलयति (ना. धा.)।

झाऊ, सं. पुं. (सं. झावूः) पिचुलः, झावुः, क्षुपभेदः।

झाग, सं. पुं. (हिं. गाज) फेनः, डिंडीरः, अम्बुकफः, मंडः-डम्।

झाड़, सं. पुं. (सं. झाटः >) कंटगुल्मः-मं, कंटस्तम्बः। (झाड़ी स्त्री.)।

—झंखाड़, सं. पुं., गोक्षुरः, शुष्कगुल्मः।

—झूंड, सं. पुं., गुल्मगहनं, निविडस्तम्बः।

—फानूस, सं. पुं., काचदीपिका।

—पोंछ, सं. स्त्री., मार्जनं, शोधनम्।

झाड़न, सं. पुं. (हिं. झाड़ना) नक्तकः, मार्जनपटः।

झाड़ना, क्रि. स. (हिं. झड़ना) रेणुं अपमृज् (अ. प. वे.), निर्धूलीकृ।

—पोंछना, क्रि. स., प्रोंछ् (भ्वा. प. से.)।

झाड़ू, सं. स्त्री. (हिं. झाड़ना) संमार्जनी, शोधनी।

—देना, क्रि. स., संमृज् (अ. प. वे.), शुध् (प्रे.)।

झामा, सं. पुं. (सं. झामकं) दग्धेष्टका।

झालर, सं. स्त्री. (सं. झल्लरी) दशाः (स्त्री. बहु.), वस्तयः (स्त्री. पुं. बहु.), वस्त्रप्रान्तः।

—दार, वि., झल्लरीयुक्त, प्रान्तोपेत।

झिझक, सं. स्त्री. (हिं. झिझकना) आशंका, विकल्पः, सन्देहः।

झिझकना, क्रि. अ. (अनु.) आशंक्-विकल्प् (भ्वा. प. से.), दोलायते-चिरायते (ना. धा.), संशी (अ. आ. से.)।

झिड़क, सं. स्त्री. (हिं. झिड़कना) भर्त्सनं, आक्रोशः, अधिक्षेपः।

झिड़कना, क्रि. स. (अनु.) आक्रुश् (भ्वा. प. अ.), अधिक्षिप् (तु. प. अ.), निर्भर्त्स् (चु. आ. से.)।

झिड़की, सं. स्त्री. (हिं. झिड़कना) दे. 'झिड़क'।

झिलमिल, सं. स्त्री. (अनु.) प्रकम्पमानः प्रकाशः।

झिल्ली[1], सं. स्त्री. (सं.) चिल्ली, झिरी, झिरिका, झिल्लिका, भृङ्गारी।

झिल्ली[2], सं. स्त्री. (सं. चैलं >) सूक्ष्म-त्वच् (स्त्री.)-चर्मन् (न.) २. जरायुः, उल्बम्।

झींकना, झींखना, क्रि. अ. (हिं. खीजना) अनुशुच् (भ्वा. प. से.), अनुतप् (दि. आ. अ.), पश्चात्तापं कृ। सं. पुं., पश्चात्तापः, विप्रतीसारः, अनुतापः अनुशयः।

झींगुर, सं. पुं. (अनु. झीं-झीं) दे. 'झिल्ली'(१)।

झीना, वि. (सं. झीर्ण >) सूक्ष्म, विरल, तनु।

झील, सं. स्त्री. (सं. क्षीरं >) सरोवरः, जलाशयः, सरसी, सरस् (न.)।

झीवर, सं. पुं. (सं. धीवरः) नाविकः, औडुपिकः २. कैवर्तः, मत्स्याजीवः।

झुंझलाना, क्रि. अ. (अनु.) कुप् (दि. प. से.), क्रुध् (दि. प. अ.)।

झुंझलाहट, सं. स्त्री. (हिं. झुंझलाना) कोपः, क्रोधः, रोषः, अमर्षः।

झुंड, सं. पुं. (सं. झुण्टः >) समुदायः, समूहः, गणः, वृन्दं, कदम्बकम्।

झुकना, क्रि. अ. (सं. युज् >) अव-, नम् (भ्वा प. अ.), नम्रीभू २. वक्रीभू।

झुकाना, क्रि. स. (हिं. झुकना) नम् (प्रे.), वक्री कृ।

झुकवाना, क्रि. प्रे. (हिं. झुकना) दे. 'झुकाना'।

झुकाव, सं. पुं. (हिं. झुकना) प्रवणता, नतिः (स्त्री.) २. वक्रता ३. प्रवृत्तिः (स्त्री.)।

झुकावट, सं. स्त्री. (हिं. झुकना) दे. 'झुकाव'।

झुटलाना, झुठलाना, झुठाना, क्रि. स. (हिं. झूठ) मिथ्यावादित्वं प्रमाणयति (ना. धा.), निराकृ, प्रत्याख्या (अ. प. अ.)।

झुनझुना, सं. पुं. (अनु.)* झुणझुणकः।

झुनझुनी, सं. स्त्री. (अनु.) *झुणझुणी, अंगेषु जाड्यानुभूतिः (स्त्री.)।

झुमका, सं. पुं. (हिं. झूमना) तालपत्रम्।

झुरमट, झुरमुट, सं. पुं. (सं. झुंटः >) समुदायः, समूहः २. स्तम्बः, गुल्मः।

झुर्री, (हिं. झुरना) वली-लिः (स्त्री.), चर्मसंकोचः २. पुटः, भंगः।

झुलसना, क्रि. अ. (सं. ज्वलनं) ईषत् दह्-प्लुष् (कर्म.)।

झुलसाना, क्रि. स., ईषत् दह् (भ्वा. प. अ.), प्लुष् (भ्वा. प. से.)।

झुलाना, क्रि. स. (हिं. झूलना) प्रेंख् (प्रे.) इतस्ततः चल् (प्रे.)।

झूट, झूठ, सं. पुं. (सं. अयुक्त) असत्यं, अनृतं, अलीकं, मिथ्यावचनं, असत्यभाषणं। वि., मिथ्या-मृषा-(समासके आदिमें) असत्य, अतथ्य, वितथ।

झूटा, झूठा, वि. (हिं. झूट-ठ) मिथ्या, असत्य, असत्यवादिन्-मिथ्याभाषिन्।

झूम, सं. स्त्री. (हिं. झूमना) तन्द्रा, आलस्यं २. आन्दोलनं, प्रेंखणम्।

झूमना, क्रि. अ. (सं. झंपः अथवा 'घूम'का (अनु.))इतस्ततः चल् (भ्वा. प. से.)।

झूल, सं. स्त्री. (हिं. झूलना) कुथः-थं-था, प्रवेणी-णिः (स्त्री.), परिस्तोमः, सज्जना।

झूलना, क्रि. अ. (सं. दोलनं) दोलायते(ना. धा.), प्रेंख् (भ्वा. प. से.)।

झूला, सं. पुं. (सं. दोला-लः-लिका) प्रेंखा, हिंदोलः, आन्दोलः।

झेलना, क्रि. स. (सं. क्ष्वेलनं >) सह् (भ्वा. आ. से.), मृष् (दि. उ. से.)।

झोंकना, क्रि. स. (हिं. झुकना) अग्नौ क्षिप् (तु. उ. अ.) २. प्रेर् (चु.) प्रणुद् (प्रे.)।

झोंक देना, क्रि. स., दे. 'झोंकना' (२)।

झोंका, सं. पुं. (हिं. झोंकना) वायुवेगः, पवनप्रहारः, वातगुल्मः।

झोंपड़ा, सं. पुं. (हिं. छोपना ?) उटजः-जं, कुटीरः-रं, कुटी, कुटीरकः, पर्णशाला।

झोल, सं. पुं. (हिं. झूलना) शैथिल्यं, संकोचः २. संवरणं, व्यवधानं ३. रञ्जनं, लेपनम्।

—फेरना, लिप् (तु. उ. अ.), रंज् (प्रे.)।

झोला, सं. पुं. (हिं. झूलना) पुटः-टं, प्रसेवः, कोषः (झोली स्त्री. = लघुपुटः इ.)।

ञ

ञ, देवनागरीवर्णमालाया दशमो व्यञ्जनवर्णः, ञकारः।

ट

ट, देवनागरीवर्णमालाया एकादशो व्यञ्जनवर्णः, टकारः।

टंक, सं. पुं. (सं.) आवदारणः, पाषाणभेदनः २. व्रश्चनः, तक्षणी ३. परशुः, कुठारः ४. खड्गः ५. चतुर्माषकात्मकः चतुर्विंशतिरक्तिकात्मको वा तोलभेदः ६. क्रोधः ७. अभिमानः ८. जंघा ९. खनित्रं १०. कोषः, निधिः ११. मुद्रा, नाणकम्।

टँकना, क्रि. अ., (सं. टंकणं) व. 'टाँकना' के कर्म. के रूप।

टंकवाई, टंकाई, सं. स्त्री. (हिं. टंकवाना) १–३. टंकन-सीवन-लेखन,-भृत्या-भृतिः (स्त्री.)।

टँकवाना, टंकाना, क्रि. प्रे., व. 'टाँकना' के प्रे. रूप।

टंकार, सं. स्त्री. (सं. पुं.) ज्या-मौर्वी,-घोषः-शब्दः, शिंजिनीशिंजितं २. टणत्कारः, रणितिः ३. झण-झण,-रणितं-निनदः।

टंकारना, क्रि. स. (सं. टंकारः>) ज्यां घुष् (चु.), मौर्वीं आस्फल् (प्रे.), टंकारयति (ना.धा.)।

टंकी, सं. स्त्री. (अं. टैंक) तोयाधारः, वापिका २. द्रोणी-णिः (स्त्री.)।

टंगना, क्रि. अ., दे. 'लटकना'।

टंटा, सं. पुं. (अनु. टन टन) उपद्रवः, कलहः २. प्रपंचः, आडंबरः।

टक, सं. स्त्री. (सं. टंक् = बाँधना>) अनिमेष-बद्ध-स्थिर,-दृष्टिः (स्त्री.)।

—बाँधना, मु., अनिमि(मे)षनयन (वि.) दृश् (भ्वा. प. अ.)।

—लगाना, मु. प्रतीक्ष् (भ्वा. आ. से.)।

टकटकी, सं. स्त्री., दे. 'टक'।

—बाँधना, मु., बद्ध-स्थिर,-दृष्ट्या अवलोक् (चु.)।

टकराना, क्रि. अ. (हिं. टक्कर) संघट्ट् (भ्वा. आ. से.), अभि-आ-प्रति,-हन् (अ. प. अ.), अभि-सं-पत् (भ्वा. प. से.)। क्रि. स., उक्त धातुओं के प्रे. रूप।

टकसाल, सं. स्त्री. (सं. टंकशाला), मुद्रांकणशाला।

टकसाली-लिया, सं. पुं. (हिं. टकसाल) टंक,-अध्यक्षः-पतिः (पुं.), नैष्किकः। वि., टंकशालासंबन्धिन् २. शुद्ध, निर्दोष ३. सर्व-सम्मत ४. प्रामाणिक, परीक्षित।

टका, सं. पुं. (सं. टंकः>) अर्द्धाणी, पणयुगलं २. रूप्यं-प्यकं, कार्षिकः, टंकः ३. धनम्।

—सा जवाब देना, मु., झटिति नि-प्रति-षिध् (भ्वा. प. से.)-प्रत्याख्या (अ. प. अ.)।

—सा मुँह लेकर रह जाना, मु., त्रप् (भ्वा. आ. से.), लज्ज् (तु. आ. से.)।

टकोर, सं. स्त्री. (सं. टङ्कारः) दे. 'टङ्कार'(२), २. आघातः, प्रहारः ३. पटहप्रहारः ४. दुंदुभि-पटह,-ध्वनिः (पुं.) ५. प्र-,स्वेदनं, (उष्णजलादिना) सेकः।

टकोरना, क्रि. स. (हिं. टकोर) भेरीं आहन् (अ. प. अ.) २. प्रह (भ्वा. प. अ.) ३. (उष्णजलादिभिः) सिच् (तु. प. अ.), लिप् (तु. प. अ.), प्र-, स्विद् (प्रे.)।

टक्कर, सं. स्त्री. (अनु. टक) संघट्टः, संमर्दः, समा-प्रति,-घातः २. विग्रहः, संग्रामः, संप्रहारः ३. हानिः (स्त्री.) ४. मस्तक-शीर्ष,-आघातः।

—का, मु., सम, समान, तुल्य।

—खाना, मु., दे. 'टकराना' क्रि. अ.।

—मारना, मु., व. 'टकराना' के प्रे. रूप २. विरुध् (रु. उ. अ.) ३. यत् (भ्वा. आ. से.)।

टखना, सं. पुं. (सं. टंकः = टांग>) गुल्फः, घुटिकः, घुटी, घुण्टः, खुडकः।

टटोल, सं. स्त्री. (हिं. टटोलना) स्पर्शः, सम्पर्कः, परामर्शः, स्पर्शजो बोधः।

टटोलना, क्रि. स. (सं. त्वक् + तोलनं>) स्पर्शेन परीक्ष् (भ्वा. आ. से.)-निरूप् (चु.), स्पृश्-परामृश् (तु. प. अ.) २. अंधकारे अन्विष् (दि. प. से.)-निरूप्-परामृश्।

टट्टी, सं. स्त्री. (सं. स्थात्री ?) (वंशतृणादिरचित) कपा(वा)टः-टं-टी, २. प्रतिसीरा, तिरस्करिणी ३. सूक्ष्मभित्तिः (स्त्री.) ४. शौचकूपं, मलालयः ५. मलं, उच्चारः।

—जाना, मु., पुरीषोत्सर्गाय गम्।

—की आड़ (या. ओट) से शिकार खेलना, मु., प्रच्छन्नं प्रह (भ्वा. प. अ.), निभृतं पाप-माचर् (भ्वा. प. से.)।

टट्टू, सं. पुं. (अनु.) क्षुद्रघोटकः, अश्वशावकः।

टन, सं. पुं. (अनु.) घंटाध्वनिः (पुं.), टण-त्कारः, टणिति।

—टन, सं. पुं., टणटण,-निनदः-रणितं, टणटण-त्कारः-कृतिः (स्त्री.)।

टन, सं. पुं. (अं.) अष्टाविंशतिमणकल्पः, तोल-भेदः, *टनम्।

टनकना, क्रि. अ. (अनु.) टणटणायते (ना. धा.), टणत्कारं कृ २. घर्मेण शिरः पीड् (कर्म.)।

टनटनाना, क्रि. स. (अनु.) घंटां नद्-वद् (प्रे.)। क्रि. अ., दे. 'टनकना'।

टनाटन, सं. स्त्री. (अनु.) निरन्तरः टणटणत्कारः।

टप[1], सं. पुं. (हिं. तोपना = ढांकना) प्रवहणादीनाम् आच्छादनं-आवरणं-छत्रम्।

टप[2], सं. पुं. (अं. टब) द्रोणी-णिः (स्त्री.)।

टप[3], सं. स्त्री. (अनु.) विंदुपातध्वनिः (पुं.), टप् इति शब्दः।

—से, मु., झटिति, आशु, शीघ्रम् ।

टपक, सं. स्त्री., दे. 'टपकाव' ।

टपकना, क्रि. अ. (अनु. टप) कणशः-बिंदु-क्रमेण क्षर्-गल् (भ्वा. प. से.)-स्रु (भ्वा. प. अ.)-स्यन्द् (भ्वा. आ. से.) २. (फलादि) झटिति नि-अव-पत् (भ्वा. प. से.) ३. परिस्रु, क्षर् ४. दे. 'टीसना' ।

टपका, सं. पुं. (हिं. टपकना) स्वयं पतितं पक्वफलम् ।

—**टपकी,** सं. स्त्री., शीकर,-वर्षः-पातः २. सतत-फलपातः ।

टपकाना, क्रि. स., व. 'टपकना' के प्रे. रूप ।

टपकाव, सं. पुं. (हिं. टपकना), (कणशः) क्षरणं-गलनं-स्यन्दनं-स्रावः ।

टपना, क्रि. अ., दे. 'कूदना' ।

टपाटप, क्रि. वि. (अनु.) सततं, निरंतरं, अविरतम् ।

टप्पा, सं. पुं. (अनु.) प्लवः, प्लवनं, प्लुतं-तिः (स्त्री.), झंपः-पा २. गीतिकाभेदः ।

—**खाना,** क्रि. अ., उत्पत् (भ्वा. प. से.), उत्प्लु (भ्वा. आ. अ.) ।

टब, सं. पुं. (अं.) दे. 'टप'[२] ।

टब्बर, सं. पुं., दे. 'कुटुम्ब' ।

टमटम, सं. स्त्री. (अं. टैंडम) अश्वयानभेदः, *टमटमम् ।

टमाटर, सं. पुं. (अं. टमैटो) आंग्लीय-रक्त, वृन्ताकम् ।

टर, सं. स्त्री. (अनु.) टरशब्दः, अप्रिय-कर्कश-कर्णकटु,-शब्दः २. भेकरवः ३. दर्पोक्तिः (स्त्री.) ४. दुराग्रहः, प्रतीपता ५. तुच्छवचनम् ।

—**टर** सं. स्त्री., वृथालापः, प्र-,जल्पः-पितं २. भेकरुतम् ।

—**टर करना,** क्रि. अ., दे. 'टरटराना' ।

टरकना, क्रि. अ., दे. 'टलना' तथा 'टरटराना'

टरकाना, क्रि. स., दे. 'टालना' ।

टरटराना, क्रि. अ. (अनु. टरटर) प्रलप्-प्रजल्प् (भ्वा. प. से.) २. अविनयेन ब्रू (अ. उ. से.) ३. टरटरायते (ना. धा.) ।

टर्रा, वि. (अनु. टरटर) वावदूक, वाचाल इ. २. धृष्ट, निर्व्रीड ।

टर्राना, क्रि. अ. (अनु. टर) साभिमानं वद् (भ्वा. प. से.), धार्ष्ट्येन ब्रू (अ. उ. से.). कटु वद् ।

टलना, क्रि. अ. (सं. टलनं >) विचल् (भ्वा. प. से.), अपसृ (भ्वा. प. अ.) २. स्थानान्तरं या (अ. प. अ.), प्रस्था (भ्वा. आ. अ.) ३. वि-,नश् (दि. प. वे.), लुप् (दि. प. अ.) ४. व्याक्षिप् (कर्म.), विलंब् (भ्वा. आ. से.) ५. अन्यथा भू ६. (समयः) व्यति-इ (अ. प. अ.), गम् ।

टस, सं. स्त्री. (अनु.) गुरुद्रव्यसरणशब्दः, टस् इति शब्दः ।

—**से मस न होना,** मु., ईषदपि न विचल् ।

टसक, सं. स्त्री. (हिं. टसकना) दे. 'टीस' ।

टसकना, क्रि. अ. (हिं. टस) अप,-गम्-सृ (भ्वा. प. अ.), अपया (अ. प. अ.) २. दे. 'टीसना' ।

टसकाना, क्रि. स., व. 'टसकना' के प्रे. रूप ।

टसर, सं. पुं. (सं. त्रसरः >) क्षौमभेदः, *टसरम् ।

टसर-मसर, सं. पुं. (हिं. टस+मस) विलंबः, व्याक्षेपः ।

टसुआ, सं. पुं. (हिं. आँसुआ) मिथ्याश्रु (न.), वितथवाष्पः ।

टहना, सं. पुं. (सं. तनुः >) विटपः, शाखा ।

टहनी, सं. स्त्री. (हिं. टहना) तनु-सूक्ष्म,-विटपः-शाखा ।

टहल, सं. स्त्री., दे. 'सेवा' ।

टहलना, क्रि. अ. (सं. तत्+चलनं ?) परि,-अट्-भ्रम् (भ्वा. प. से.), विह् (भ्वा. प. अ.), इतस्ततः चर् (भ्वा. प. से.), परिक्रम् (भ्वा. प. से; भ्वा. आ. अ.) ।

टहलनी, सं. स्त्री., दे. 'नौकरानी' ।

टहलाना, क्रि. स., व. 'टहलना' के प्रे. रूप ।

टहलुआ—वा, **टहलू,** } सं. पुं., दे. 'नौकर' ।

टहलुई, सं. स्त्री., दे. 'नौकरानी' ।

टाँक[१], सं. स्त्री. (सं. टंकः) चतुर्मापकात्मकः तोलभेदः २. अर्घगणना, मूल्यनिरूपणम् ।

टाँक[२], सं. स्त्री. (हिं. टाँकना) लेखः, लिखनं, लिपिः (स्त्री.) २. दे. 'निब' ।

टाँकना, क्रि. स. (सं. टंकनं) टंक् (भ्वा. प.

से; चु.), कीलादिभिः संधा (जु. उ. अ.)-संयुज् (रु. उ. अ.) २. सिव् (दि. प. से.), वे (भ्वा. उ. अ.) ३. पादुकाः संधा ४. संश्लिष् (प्रे.) संयुज् ५. पंजिकादिषु लिख् (तु. प. से.) ६. शिलादीनि दंतुरयति (ना. धा.)।

टाँका, सं. पुं. (हिं. टाँकना) संधायक-संयोजक,-कीलः-शंकुः २. सी(से)वन,-अंशः-भागः ३. सी(से)वनं, स्यूतिः (स्त्री.) ४. पट-वस्त्र,-खंडः ५. टंकन-संधायक,-धातुः ६. व्रणसेवनम्।

टाँकी, सं. स्त्री. (सं. टंकः) तक्षणी, व्रश्चनः २. खर्बूजादिषु कृतं छिद्रं ३. दे. 'टाँका'।

टांग, सं. स्त्री. (सं. टंगा) टंकः-कं-का, जंघा, प्रसृता, पादः।

—अड़ाना, मु., परकार्याणि चर्च् (तु. प. से; चु. आ. से.)-निरूप् (चु.)।

टाँगना, क्रि. स., दे. 'लटकाना'।

टांगा, सं. पुं. (हिं. टँगना) अश्ववाहनभेदः।

टांगी, सं. स्त्री., दे. 'कुल्हाड़ी'।

टाँड, सं. स्त्री. [सं. स्थाणुः (पुं.)>] मंचः २. दे. 'परछत्ती'।

टाँयटाँय, सं. स्त्री. (अनु.) कर्कश कटु,-शब्दः-ध्वनिः (पुं.) २. प्रलापः, प्र-,जल्पः।

—फिस, मु., निष्फलः आडंबरः, व्यर्थः प्रयासः।

टाइप, सं. पुं. (अं.) मुद्राक्षरं २. टंकण-यन्त्रम्।

टाइफ़स बुख़ार, सं. पुं. (अं.+अ.) मोहज्वरः, *यूकाज्वरः।

टाट, सं. पुं. (सं. तंतुः>) शाण,-पटः-वस्त्रं, शाणं, वराशिः-सिः (पुं.)।

टाप, सं. स्त्री. (अनु.) अश्व,-खुरः-क्षुरः-शफः-शफम् २. अश्वपादशब्दः।

टापना, क्रि. अ. (हिं. टाप) खुरेण अभिहन् (अ. प. अ.)-विलिख् (तु. प. से.) २. अधीर-व्यग्र (वि.) भू ३. व्यर्थं परिभ्रम् (भ्वा. प. से.) ४. दे. 'कूदना'।

टापू, सं. पुं., दे. 'द्वीप'।

टारना, क्रि. स., दे. 'टालना'।

टारपीडो, सं. पुं. (अं.) अन्तर्जलाग्निनालिका, अस्त्रभेदः, *तारपीडुः।

टार्च, सं. स्त्री. (अं.) विद्युज्जिह्मिनी।

टाल[1], सं. स्त्री. (सं. अट्टालः>) चयः, राशिः (पुं.), उत्किरः, चितिः (स्त्री.) २. (काष्ठादीनां) बृहद्,-आपणः-विपणिः (स्त्री.)।

टाल[2], सं. स्त्री. (हिं. टालना) अप-व्यप,-देशः, छलेन परिहरणं, निह्नवः।

—टूल,
—मटा(टू, टो)ल, } सं. स्त्री., अप-नि,-ह्नवः, अप-व्यप,-देशः, विलंबः, व्याक्षेपः।

—करना, क्रि. अ., अतिपत् (प्रे.), विलंब् (तु. प. अ.), व्याक्षिप् (तु. प. अ.)।

टालना, क्रि. स. (हिं. टलना) वक्रोक्त्या-शाठ्येन परिह (भ्वा. प. अ.), अप-व्यप्,-दिश् (तु. प. अ.), अप-नि-ह्नु (अ. आ. अ.) २. व. 'टलना' (१-६) के प्रे. रूप।

टायर, सं. पुं. (अं.) (चक्र—) वलयः-यम्।

टिंचर, सं. पुं. (अं. टिंक्चर) कषायः, निर्यासः, फांटः।

टिंडा, सं. पुं. (सं. टिंडिशः) रोमशफलः, तिंदिशः, डिंडिशः।

टिकट, सं. पुं. (अं.) अनुज्ञा-निर्देश-प्रवेश,-पत्रकम्।

टिकटिकी[1], सं. स्त्री., दे. 'टकटकी'।

टिकटिकी[2], सं. स्त्री., दे. 'टिकठी'।

टिकठी, सं. स्त्री. (हिं. तीन+काठ) त्रिकाष्ठी, २. त्रिपादी।

टिकना, क्रि. अ. (सं. स्थित+क>) वस्-स्था (भ्वा. प. अ.), वृत् (भ्वा. आ. से.) २. विरम् (भ्वा. प. अ.), अवस्था (भ्वा. आ. अ.)।

टिक(कु)ली, सं. स्त्री. (हिं. टीका) धातुतारा, चक्रकम्।

टिकस, सं. पुं. (अं. टैक्स) करः, राजस्वं, शुल्कः-कं, वलिः (पुं.)।

टिकस, सं. पुं., दे. 'टिकट'।

टिकाऊ, वि. (हिं. टिकना) चिर-, स्थायिन्, दृढ, ध्रुव, स्थिर, अक्षय।

टिकाना, क्रि. स., व. 'टिकना' के प्रे. रूप।

टिकाव, सं. पुं. (हिं. टिकना) स्थिरता, चिर-स्थायिता २. स्थितिः (स्त्री.), विरामः ३. दे. 'पड़ाव'।

टिकिया, सं. स्त्री. (सं. वटिका) चक्रिका, वटी, वटिका २. अपूपः, पूपः, पिष्टकः ।

टिकैत, सं. पुं. (हिं. टीका) दे. 'युवराज' ।

टिकड़, सं. पुं. (हिं. टिकिया) स्थूल-वृहत्,-पूपः ।

टिक्का, सं. पुं. (देश.) दे. 'टीका' ।

टिक्की, सं. स्त्री., दे. 'टिकिया' ।

टिघलना, क्रि. अ., दे. 'पिघलना' ।

टिचन, वि. (अं. अटेन्शन) सज्ज, सन्नद्ध, उद्युक्त २. सिद्ध, उपकल्पित, आयोजित ।

टिटकारना, क्रि. स. (अनु.) (अश्वादीन्) सटिकटिकशब्दं प्रोत्सह्-प्रणुद् (प्रे.) ।

टिटिह,-हा,-हरा, सं. पुं. (सं. टिट्टिभः) टिट्टिभकः, टीटिभकः, टिटिभः ।

टिटिहरी, सं. स्त्री. (हिं. टिटिहरा) टिटि(ट्टि)भी, टिट्टिमकी ।

टिड्डा, सं. पुं. (सं. टिट्टिभः >) शर(ल)भः, पतंगः ।

टिड्डी, सं. स्त्री. (हिं. टिड्डा) शिरिः (पुं.), शर(ल)भः ।

—दल, मु., विपुलवृंदं, असंख्यसमूहः ।

टिपटिप, सं. स्त्री. (अनु.) विंदुपातध्वनिः (पुं.), टिपटिपशब्दः ।

टिप्पणी-नी, सं. स्त्री. (सं.) टीका, भाष्यं, वृत्तिः (स्त्री.), व्याख्या ।

टिप्पस, सं. स्त्री. (देश.) उपायः, युक्तिः (स्त्री.)।

टिब्बा, सं. पुं., दे. 'टीला' ।

टिमटिमाना, क्रि. अ. (सं. तिम्=ठंडा होना >) स्फुर् (तु. प. से.) तरलं-मंदं-सकंपं दीप् (दि. आ. से.) द्युत्-प्रकाश् (भ्वा. आ. से.) प्रभा (अ. प. अ.) २. आसन्नमृत्यु (वि.) वृत् (भ्वा. आ. से.) ।

टिमटिमाहट, सं. स्त्री. (हिं. टिमटिमाना) तरल,-प्रभा-ज्योतिस् (न.), स्फुरणं-रितम् ।

टीका[1], सं. पुं. (सं. तिलकः-कं) चित्रकं, विशेषकः-कं, पुण्ड्रः-ड्रकः, तमालपत्रं २. तिलकं, औद्वाहिकरीतिविशेषः ३. अन्तः,-स्नावणं-प्रवेशनं ४. (रोगनिवारणाय) रोगद्रव्यनिवेशनं ५. गव्यद्रव्यसंक्रामणं ६. प्रधानः, मुख्यः, ७. युवराजः ८. राजत्व,-चिह्नं-लक्षणं ९. राज्य-, अभिषेकः १०. विंदुः (पुं.), लाञ्छनं, चिह्नम् ११. ललाटिका, मस्तकभूषणभेदः ।

—करना, क्रि. स., (रोगनिवारणार्थं) रोगद्रव्यं निविश्-संक्रम् (प्रे.) २. गव्यद्रव्यं निविश्-संक्रम् (प्रे.) ।

—करनेवाला, सं. पुं., गव्य-रोग,-द्रव्यनिवेशकः ।

—भेजना, क्रि. स., औद्वाहिकोपहारान् प्रेष् (प्रे.) ।

—लगाना, क्रि. स., तिलकं कृ अथवा विधा (जु. उ. अ.) ।

टीका[2], सं. स्त्री. (सं.) व्याख्या, वृत्तिः (स्त्री.), भाष्यं, टिप्पणी-नी ।

—कार, सं. पुं. (सं.) टीका-भाष्य-व्याख्या-वृत्तिः,-कारः-कृत् (पुं.) ।

टीन, सं. पुं. (अं. टिन) रंगं, वंगं, कस्तीरं, त्रपु (न.) रंगलिप्तं लौहतनुफलकम् ।

टीप, सं. स्त्री. (हिं. टीपना), (हस्तेन) आपीडनं २. शनैः प्रहरणं ३. इष्टकासंधिषु सुधापूर्ति-रेखाः ४. (समय-) लेखः-पत्रं ५. जन्म,-पत्र-पत्रिका ।

—करना, क्रि. स., इष्टकादिसंधिषु सुधां पूर् (चु.) ।

—टाप, सं. स्त्री., आडंबरः वैभवं २. संस्कारः, परिष्कारः, भूषा, अलंकरणम् ।

—टाप करना, क्रि. स., अलं-परिष्,-कृ, मंड् (चु.) ।

टीपना, क्रि. स. (सं. टेपनं = फेंकना) आपीड् (चु.), संकोच् (भ्वा. प. से.) २. लिख् (तु. प. से.) ३. शनैः प्रह (भ्वा. प. अ.) ४. उच्चैः गै (भ्वा. प. अ.) ।

टीम, सं. स्त्री. (अं.) क्रीडकसंघः २. गणः, वर्गः ।

टीमटाम, सं. स्त्री. (देश.), दे. 'टीपटाप' ।

टीरा, सं. पुं. (सं. टेरः) टेरकः, केकरः, केदरः, टगरः, वलिरः ।

टीला, सं. पुं. (सं. अष्ठीला >) उन्नतभूभागः २. क्षुद्रपर्वतः ३. मृत्तिकाचयः, वल्मीकः-कम् ।

टीस, सं. स्त्री. (अनु.) विध्यद्-स्फुरद्,-व्यथा-वेदना-यातना ।

टीसना, क्रि. अ., (हिं. टीस) मुहुर्मुहुः व्यथ (भ्वा. आ. से.), सस्पंदं पीड् (कर्म.) ।

टुंड, सं. पुं. (सं. तुंड >) छिन्नो हस्तः २. छिन्न-शाखः तरुः, स्थाणु (पुं. न.), ध्रुवः, शंकुः (पुं.) ।

टुंडा, वि. (हिं. टुंड) अहस्त, छिन्नहस्त २. शाखाहीन ३. एकशृंग।

टुंडी, सं. स्त्री. [सं. तुंडिः (स्त्री.)], नाभिः (स्त्री.)।

टुक, क्रि. वि. (सं. स्तोकं) क्षणं, कंचित्कालम्। वि., किंचित्, अल्पं, क्षुद्रं।

टुकड़ा, सं. पुं. (हिं. टुक) खंडः-डं, शकलः-लं, लवः, वि-, भागः, अंशः, वि-, दलं २. ग्रासः, कवलः, पिंडः।

टुकड़े करना, क्रि. स., भंज् (रु. प. अ.), खंड् (चु.), शकली कृ २. विच्छिद्-विभिद् (रु. प. अ.), विभज् (भ्वा. उ. अ.)।

टुकड़े-टुकड़े करना, मु., चूर्ण् (चु.), खंडशः भंज्, मृद् (क्र. प. से.)।

टुकड़े माँगना, मु., भिक्ष् (भ्वा. आ. से.), भिक्षां याच् (भ्वा. आ. से.)।

टुकड़ी, सं. स्त्री. (हिं. टुकड़ा) दे. 'टुकड़ा'(१) २. समूहः, गणः ३. सैन्यदलं, गुल्मः-ल्मम्।

टुच्चा, वि. (सं. तुच्छ) क्षुद्र, नीच, हीनजाति।

टुटपुँजिया, वि. (हिं. टूटी + पूंजी) परिक्षीण, निर्धन, अल्प-धन-मूल, दरिद्र।

टुँडी, सं. स्त्री., दे. 'टुंडी'।

टुक-का, सं. पुं., दे. 'टुकड़ा'।

टुना, क्रि. अ. (सं. त्रुट्) द्र-भंज्-भिद् (कर्म.), त्रुट् (दि. तथा तु. प. से.), स्फुट् (तु. प. से.) २. विरम् (भ्वा. प. अ.), विच्छिद् (कर्म.), निवृत् (भ्वा. आ. से.) ३. वियुज् (कर्म.), थक् भू ४. निर्बली-भू ५. दरिद्र (वि.) र (दि. आ. से.) ६. आक्रम् (भ्वा. दे.), अभिद्रु (भ्वा. प. अ.)। सं. पुं., भजनं, भंगः; विरामः, विच्छेदः; निवृत्तिः (स्त्री.)।

टूटनेवाला, सं. पुं., भिदुर, भंगुर, सुभंग।

टूटा, वि., भग्न, दीर्ण, त्रुटित, स्फुटित; विच्छिन्न, निवृत्त इ.।

—फूटा, वि., शकली-खंडशः-कृत, खंडित, विदीर्ण।

टूर्नामेंट, सं. स्त्री. (अं.) पुरस्कारान्विता कौडा-खेला, कौडाप्रतियोगिता।

टेंट-टी, सं. स्त्री. (देश.) शाटीपुटः-टं, शाटिकाव्यावृत्तिः (स्त्री.) २. दे. 'क़रील' (वृक्ष तथा फल)।

टेंटुआ, सं. पुं. (देश.) श्वासनालिका, कंठः, गलः।

टेंटें, सं. स्त्री. (अनु.) शुकशब्दः, कीररावः, टेंटें इति ध्वनिः (पुं.) २. प्रलापः, व्यर्थवचनम्।

—करना, निर्विवेकं भाष् (भ्वा. आ. से.), जल्प् (भ्वा. प. से.)।

टेंपेचर, सं. पुं. (अं.) तापः, ऊष्मन् (पुं.)।

टेक, सं. स्त्री. (हिं. टिकना) स्थूणा, उपस्तंभः, उत्तंभः, अवष्टंभः; उपमः २. आश्रयः, अवलंबः ३. वेदी ४. आग्रहः, अभिनिवेशः ५. क्षुद्रपर्वतः ६. प्रतिज्ञा ७. स्थायिन् (संगीत) ८. अभ्यासः, नित्यव्यवहारः।

टेकना, क्रि. स. (हिं. टेक) अव-आ,-लंब् (भ्वा. आ. से.), अवष्टंभ् (क्र. प. से.), धृ (भ्वा. प. अ; चु.)।

माथा—, क्रि. स., प्रणम् (भ्वा. प. अ.), पादयोः पत् (भ्वा. प. से.), वंद् (भ्वा. आ. से.)।

टेटेनस, सं. पुं. (अं.) धनुर्वातः, प्रतानः (भय कररोगः)।

टेढ़ा, वि. (सं. तिरस् >) अराल, कुटिल, जिह्म, वक्र, आ-,न(ना)मित, अंशुभ, न्युब्ज, आकुञ्चित, विषम, तिर्यंच् २. कठिन, दुष्कर ३. उद्धत, अशिष्ट, दुःशील।

—करना, क्रि. स., आवृज् (चु.), वक्री-कुटिली-कृ, अव-आ-,नम् [प्रे. न(ना)मयति], आ-वि-, मुज् (तु. प. से.)।

—मेढ़ा, वि., वक्र, कदाकार, कुटिल।

—होना, मु., क्रुद्ध-रुष्ट (वि.) भू।

टेढ़ापन, सं. पुं. (हिं. टेढ़ा) कुटिलता, जिह्मता, वक्रता, अरालता इ.।

टेढ़ी, वि. स्त्री. (हि. टेढ़ा) वक्रा, कुटिला, जिह्मा इ.।

—खीर, मु., दुष्करं कार्यम्।

—चितवन, मु., कटाक्षः, साचिविलोकितं, अपांगदृष्टिः (स्त्री.)।

टेढ़े, क्रि. वि. (हिं. टेढ़ा) तिरः, तिर्यक्, वक्रं, साचि (सब अव्य.)।

टेनिस, सं. पुं. (अं.) कंदुककांडामेदः।

टेर, सं. स्त्री. (सं. तारः) तारध्वनिः, उच्चस्वरः २. आह्वानं, संबोधनं, आह्वानशब्दः।

टेरना, क्रि. स. (हिं. टेर) उच्चैः गै (भ्वा. प. अ.) २. आकृ (प्रे.), आह्वे (भ्वा. प. अ.)।

टेलिग्राम, सं. पुं. (अं.) तड़ित्-विद्युत्,-संदेशः।

टेलिफ़ोन, सं. पुं. (अं.) दूर,-भाषं-ध्वनम्।

टेव, सं. स्त्री. (हिं. टेक) दे. 'आदत'।

टेवा, सं. पुं. (सं. टिप्पनं >) जन्मपत्रिका।

टेसू, सं. पुं. (हिं. केसू) किंशुकः, पलाशः, रक्तपुष्पकः, यज्ञियः २. किंशुककुसुमम्।

टेस्ट्यूब, सं. स्त्री. (अं.) परीक्षणनालिका।

टोंटी, सं. स्त्री. (सं. तुंडं >) नाली, नालिका।

टोक, सं. स्त्री. (हि. 'रोक' का अनु.) अंतराय-उपरोध-विघ्न,-वचनं-वाक्यं २. कुदृष्टिः (स्त्री.) ३. कुदृष्टिप्रभावः।

—टाक या टोका टाकी, सं. स्त्री., निषेध-वृच्छा-व्याघात,-वचनानि (न. बहु.)।

टोकना, क्रि. स. (हिं. टोक), नि-विनि-, वृ (प्रे.), अव-नि-प्रति-, रुध् (क्र्. प. अ.), (प्रश्नैः) बाध् (भ्वा. आ. से.)-निषिध् (भ्वा. प. से.)

टोकनेवाला, सं. पुं., विघ्नकरः, निवारकः, प्रतिबंधकः।

टोकरा, सं. पुं. (?) कंडोलः, करंडः।

टोकरी, सं. स्त्री. (हिं. टोकरा) करंडी, कंडोलकः।

टोटका, सं. पुं. (सं. त्रोटकः >) गारुडं, मंत्रः २. रक्षाकरंडः।

टोटल, सं. पुं. (अं.) योगः, पिंडः, संकलः, परिसंख्या।

टोटा, सं. पुं. (हिं. टूटना) हानिः-क्षतिः (स्त्री.) २. अभावः, न्यूनता ३. खंडः-डं, शकलः-लम्।

टोड़ी, सं. स्त्री. (सं. त्रोटकी) रागिणीभेदः।

टोडी, सं. पुं. (अं.) श्ववृत्तिः, चाटुपटुः, प्रजा-स्वदेश,-शत्रुः-द्रोहिन्।

टोना, सं. पुं. (सं. तंत्रं) अभिचार-,मंत्रः, अभिचारः; कुहकं, वशक्रिया, मोहः, योगः २. गीतिभेदः।

टोनेबाज़, सं. पुं., कुहकः, अभिचारिन्, कौसृतिकः।

टोप, सं. पुं. (हिं. तोपना = ढाँकना) *टोपं, आंग्लीय-गुरुंड,-शिरस्कं २. शिरस्त्राणं। ३. कोशः-षः, वेष्टनम्।

टोपी, सं. स्त्री. (हिं. टोप) टोपी। शीर्षण्यं, शिरस्कं, *टोपी।

टोला, सं. पुं. (सं. प्रतोलिका) नगर-पुर,-विभागः २. वर्गः, गणः।

टोली, सं. स्त्री. (हिं. टोला) गणः, संघः, वर्गः, समूहः।

टोह, सं. स्त्री., दे. 'खोज'।

टोहना, क्रि. स., दे. 'खोजना' तथा 'टटोलना'।

ट्रंक, सं. पुं. (अं.) लौह-आयस,-पिटक-पेटिका-समुद्गकः।

ट्राम, सं. स्त्री. (अं.) विद्युच्छकटिकाः, ट्रामाख्यं यानम्।

ट्रेडमार्क, सं. पुं. (अं.) पण्यमुद्रा।

ट्रेन, सं. स्त्री. (अं.) वाष्पशकटी।

ठ

ठ, देवनागरीवर्णमालाया द्वादशो व्यंजनवर्णः, ठकारः।

ठंठ, वि., दे. 'ठूँठ'।

ठंडक, सं. स्त्री. (हिं. ठंढा) शीतं, शीतता, शैत्यं, हिमं, हिमता, शीतलता।

ठंड(ढ)क, सं. स्त्री. (हिं. ठंढा) दे. 'ठंड' २. तृप्तिः (स्त्री.), संतोषः ३. उपद्रव-रोग,-शांतिः (स्त्री.)।

ठंढा, वि. (सं. स्तब्ध) शीत, शीतल, उष्णता-रहित, आर्द्र, हिम, शिशिर २. धीर, प्रशांत ३. तृप्त, संतुष्ट ४. मृत, दिवंगत ५. निर्वाण, निर्वापित।

—करना, क्रि. स., आर्द्री-शीती,-कृ, आर्द्रयति (ना. धा.), तापं ह (भ्वा. प. अ.)। मु., तुष्-प्रसद्-प्रशम् (प्रे.), सांत्व् (चु.) २. निर्वा (प्रे. निर्वापयति)।

—होना, क्रि. अ., शीती-शीतली-भू, शीतलायते (ना. धा.)। मु., दे. 'मरना'।

ठंढी सांस, सं. स्त्री., दीर्घ,-श्वासः-निश्वासः, नि-(निः)श्वासः, उच्छ्वासः।

—पड़ना, मु., उप-प्र-शम् (दि. प. से.), हस् (भ्वा. प. से.), क्षि (कर्म.)।

कलेजा—होना, मु., वैर,-निर्यातनं-साधनं-शुद्धिः (स्त्री.) जन् (दि. आ. से.) २. प्रसद् (भ्वा. प. अ.)।

ठंडा(ढा)ई, सं. स्त्री. (हिं. ठंढा) शीतपेयं, तापहरपानं २. भंगापेयम्।

ठक, सं. स्त्री. (अनु.) अभिघात-पात-प्रहार,-शब्दः, ठक् इतिध्वनिः (पुं.)।

—ठक, सं. स्त्री. (अनु.) ठकठकायितं, ठकठकध्वनिः २. कलहः, कलिः। वि., स्तब्ध, चकित, निश्चेष्ट।

ठकठकाना, क्रि. स. (अनु.) ठकठकायते (ना. धा.), मंदं अभि आ-हन् (अ. प. अ.) अथवा प्रह (भ्वा. प. अ.) २. लघु प्रह या तड् (चु.)।

ठकुरसुहाती, सं. स्त्री. (हिं. ठाकुर + सुहाना) दे. 'खुशामद'।

ठकुराइ(य)न, सं. स्त्री. (हिं. ठाकुर) ठक्कुरी, ठक्कुरभार्या (२) नापिती, क्षुरिणी ३. स्वामिनी, ईश्वरी।

ठकुराई, सं. स्त्री. (हिं. ठाकुर) प्रभुत्वं, आधिपत्यं, स्वामित्वं २. अधिकारः, शासनं ३. महत्त्वम्

ठग, सं. पुं. (सं. स्थगः) कितवः, दांभिकः, धूर्तः, प्रतारकः, वंचकः।

—बाज़ी, सं. स्त्री., कैतवं, कपटं, दंभः, प्रतारणं, स्थगत्वं, अति-अभि,-संधानं, वंचनम्।

ठगना, क्रि. स. (सं. स्थगनं) अति-अभि,-संधा (जु. उ. अ.), प्रतृ-मुह् (प्रे.), वंच्-शठ् (चु.), विप्रलभ् (भ्वा. आ. अ.)। सं. पुं., दे. 'ठगबाज़ी'।

ठग(गि)नी, सं. स्त्री. (हिं. ठग) वंचिका, प्रतारिका, दांभिकी, कपटिनी।

ठगी, सं. स्त्री., दे. 'ठगबाज़ी'।

ठगाना, क्रि. प्रे., व. 'ठगना' के प्रे. रूप।

ठट, सं. पुं., दे. 'ठठ'।

ठट(ठ)री, सं. स्त्री. (हिं. ठाट) शवयानं, खाटः-टी २. कंकालः, अस्थिपंजरः ३. घास-पलाल,-जालं ४. कृशमनुष्यः।

ठट्ठा, सं. पुं. (सं. अट्टहासः या अनु.) हास्यं, परि(री)हासः, क्ष्वेला-लिका, प्रहसनं, नर्मन् (न.), नर्म-विनोद-परिहास,-आलापः-उक्तिः (स्त्री.)-वचनं २. उपहासः।

—करना, क्रि. स., परिहस् (भ्वा. प. से.), विनोदवचनं उदीर् (प्रे.) २. अव-उप-वि,-हस्; उपहासास्पदी कृ, अवज्ञा (क. उ. अ.)।

ठट्ठेबाज़, सं. पुं., (हिं. + फ़ा.) विनोदशीलः, हास्यप्रियः, वैहासिकः, भंडः।

ठट्ठेबाज़ी, सं. स्त्री., विनोद,-कारिता-शीलता, वैहासिकता।

ठठ, सं. पुं. (सं. स्थित >) समूहः, समुदायः, जन-,संमर्दः-ओघः।

ठठेरा-री, सं. पुं. (अनु. ठन ठन) कांस्य-ताम्र,-कारः।

ठठेरिन, सं. स्त्री. (हिं. ठठेरा) कांस्य-ताम्र,-कारी।

ठठोल, सं. पुं. (हिं. ठट्ठा) दे. 'ठट्ठेबाज़'।

ठठोली, सं. स्त्री. (हिं. ठठोल) दे. 'ठट्ठेबाजी'।

ठनक, सं. स्त्री. (हिं. ठनकना) ठणितिः, ठणत्कारः, शिंजा, क्वणनं, झणत्कारः, मृदंगादीनां ध्वनिः (पुं.) २. दे. 'टीस'।

ठनकना, क्रि. अ. (अनु. ठन ठन) क्वण् (भ्वा. प. से.), शिंज् (अ. आ. से.)। ठणठणायते (ना. धा.), ठणिति कृ।

ठनकाना, क्रि. स., व. 'ठनकना' के प्रे. रूप।

ठनठन, सं. स्त्री. (अनु.) दे. 'ठनक'।

—गोपाल, सं. पुं., दरिद्रः, निर्धनः २. निस्सारं वस्तु।

ठनना, क्रि. अ., (हिं. ठानना) निर्णी-निश्चि-अध्यवसो (कर्म.)।

ठनाका, सं. पुं., दे. 'ठनक'।

ठनाठन, क्रि. वि. (अनु. ठनठन) सठणत्कारं, सझणत्कारम्।

ठप्पा, सं. पुं. (सं. स्थापनं) मुद्रा, मुद्रायंत्रं, २. आकार-संस्कार,-साधनं ३. अंकः, चिह्नं, मुद्रा, न्यासः।

—लगाना, क्रि. स., मुद्रयति-चिह्नयति (ना. धा.), अंक् (चु०), लांछ् (भ्वा. प. से.)।

ठरना, क्रि. अ., दे. 'ठिठुरना'।

ठर्रा, सं. पुं. (देश.) निकृष्टसुरा २. स्थूलसूत्रं ३. अर्द्धपक्वेष्टका।

ठस, वि. (सं. स्थास्नु >) घन, दृढसंधि, सुदृढ, कठिन, स्थूल, सुसहत २. दे. 'गफ़' ३. गुरु, भारवत् ४. अलस, मंथर ५. (सिक्का) कूट-कपट-कृत्रिम-(समासारंभ में) ६. धनाढ्य ७. कृपण ८. अल्पग्रहिन् ९. ठसिति शब्दः, वस्तुभंगध्वनिः (पुं.)।

ठेसना, क्रि. स., दे. 'ठूसना'।

ठोंकना, क्रि. स. (अनु. ठक-ठक) अयोघनेन-मुद्गरेण तड् (चु.)-प्रहृ (भ्वा. प. अ.) २. वलेन-ताडनेन प्रविश् (प्रे.) ३. अभि-आ-हन् (अ. प. अ.), तड् (चु.), प्रहृ। ४. अभियुज् (रु. आ. अ.); राजकुले निविद् (प्रे.) ५. हस्तेन लघुप्रहृ-आहन्, करेण स्पृश्-परामृश् (तु. प. अ.)।

ठोंक बजाकर, मु., निपुणं परीक्ष्य, सम्यक् पर्यालोच्य-निरूप्य।

ठोंगना, क्रि. स. (सं. तुंडं >) तुंडेन-चंचुपुटेन अभिहन् (अ. प. अ.)-प्रहृ (भ्वा. प. अ.), चंचूप्रहारं कृ।

ठोंसना, क्रि. स., दे. 'ठूंसना'।

ठोकना, क्रि. स., दे. 'ठोंकना'।

ठोकर, सं. स्त्री. (हिं. ठोकना) स्खलनं, स्खलितं, आघातः, आहतिः (स्त्री.) २. पाद-लत्ता,-आघातः, प्रहारः ३. कट्वनुभवः।

—खाना, क्रि. अ., प्र-,स्खल् (भ्वा. प. से.), पदं विषमी-भू। मु., हानिं-क्षतिं-कष्टं सह् (भ्वा. आ. से.) ३. वंच्-प्रतार् (कर्म.) ४. जीविकार्थमितस्ततः भ्रम् (भ्वा. प. से.)।

—मारना, क्रि. स., लत्तया-पादेन प्रहृ (भ्वा. प. अ.)-आहन् (अ. प. अ.)-तड् (चु.), पादप्रहारं कृ।

—लगना, क्रि. अ., दे. 'ठोकर खाना'।

ठोड़ी-ढ़ी, सं. स्त्री. (सं. तुंडं >) चिबुकं, हनुः (पुं. स्त्री.)।

ठोला, सं. पुं. (देश.) खगाहारशरावः २. अंगुलि,-संधिः-ग्रंथिः-पर्वन् (न.)।

—मारना, क्रि. स., अंगुलिपर्वणा प्रहृ (भ्वा. प. अ.)।

—रखना, मु., हन् (अ. प. अ.), मृ. (प्रे.)।

ठोस, वि. (हिं. ठस) सान्द्र, सु-, संहत, कठिन, संघातवत्, घन २. पूर्णगर्भ, छिद्ररहित, सगर्भ।

ठोसाई, सं. स्त्री. (हिं. ठोस) घनता, काठिन्यं, निश्छिद्रता।

ठौर, सं. पुं. (हिं. ठाँव) स्थानं, स्थली, प्रदेशः २. अवसरः, सुयोगः, योग्यकालः।

—ठिकाना, सं. पुं., वासस्थानं, आ-नि,-वासः।

ड

ड, देवनागरीवर्णमालायास्त्रयोदशो व्यञ्जनवर्णः, डकारः।

डंक, सं. पुं. (सं. दंशः) कंटकः, दंशचंचूः (स्त्री.), शंकुः (पुं.), (बिच्छू का) अलं २. दंशव्रणः-णं ३. दे. 'निब'।

—मारना, क्रि. स., दंश् (भ्वा. प. अ.) २. मर्माणि भिद् (रु. प. अ.)।

—वाला, वि., सदंश, दंशिन्, दंशक।

डंका, सं. पुं. (सं. ढक्का) यशःपटहः, विजय-मर्दलः, दुन्दुभिः, डिंडिमः।

—बजाना मु., प्र-,शास् (अ. प. से.), तंत्र् (चु.)।

—बाजना, मु., विश्रुत-विख्यात (वि.) भू।

डंके की चोट कहना, मु., प्रकाशं उद्घुष् (चु.)।

डंगर, सं. पुं. (सं. कडंग(क)रीयः) पशुः, मृगः, चतुष्पदः, चतुष्पाद् (पुं.)।

डंठल, सं. पुं. (सं. दंडः) कांडः-डं, नालः-लीलं २. वृंतं, प्रसव-,बंधनम्।

डंड, सं. पुं. (सं. दण्डः) लगुडः, यष्टिः (स्त्री.) २. बाहुः (पुं.), भुजः-जा ३. अर्थ-धन,-दंडः ४. निग्रहः, शासनं ५. हानिः-क्षतिः (स्त्री.) ६. व्यायामप्रकारः, साष्टाङ्ग-दंड,-व्यायामः।

—देना, क्रि. स., दंड् (चु.)-शास् (अ. प. से., दोनों द्विकर्मक), दम् (प्रे. दमयति), निग्रह् (क्र. प. से.)।

—पेलना, क्रि. अ., (दंडवत्) व्यायम् (भ्वा. प. अ.)-व्यायामं कृ।

—भरना, क्रि. अ., अर्थदंडं परि-,शुध् (प्रे.)।

—लेना, क्रि. स., अर्थदंडं दा (प्रे. दापयति)।

—पेल, सं. पुं., मल्लः, मल्लयोद्धृ (पुं.), व्यायामिन्, दृढांगः, वज्रदेहः।

डंडवत्, सं. स्त्री., दे. 'दंडवत्'।

डंडा, सं. पुं. (सं. दंडः) काष्ठं, काष्ठखंडः, लगुडः, यष्टिः (स्त्री.); वेत्रं, वेत्रयष्टिः। २. प्राचीरं, प्राकारः, वरणः।

डंडिया, सं. पुं. (हिं. डांड) करोद्ग्राहकः, शुल्कसंग्राहकः।

डंडी, सं. स्त्री. (हिं. डंडा) सूक्ष्म-तनु,-दंडः-यष्टिः (स्त्री.) २. तुलायष्टी ३. मुष्टिः (स्त्री.), वारंगः ४. कांडः-ड, नालः-लं ५. पर्वतीय-वाहनभेदः । सं. पुं., दंडधारिन्, सन्न्यासिन् ।

पग—, सं. स्त्री., चरण-पाद,-पथः, पद्धतिः (स्त्री.), पद्या, पदवी ।

डंडौत, सं. पुं. स्त्री., दे. 'दंडवत्' ।

डकरना, क्रि. अ. (अनु.) हंभारवं कृ, रेभ् (भ्वा. आ. से.), नि-,नद् (भ्वा. प. से.) ।

डकार, सं. पुं. (सं. उद्गारः) उद्गिरणं, उद्गमः, उद्गमनं २. गर्जनं, गर्जितं, निनादः ।

—लेना, क्रि. अ., दे. 'डकारना' ।

—जाना या **—बठना,** मु., छलेन आत्मसात् कृ, ग्रस् (भ्वा. आ. से.) ।

डकारना, क्रि. अ. (हिं. डकार) उद्गृ (तु. प. से.), उद्गम् (भ्वा. प. से.) २. दे. 'डकरना' ३. दे. 'डकार जाना' ।

डकत, सं. पुं., दे. 'डाकू' ।

डकैती, सं. स्त्री., दे. 'डाका' ।

डकौत-तिया, सं. पुं. (देश.) मिथ्यामौहूर्तिकः, ज्योतिर्विदाभासः २. जातिविशेषः ।

डग, सं. पुं. (हिं. डाँकना) दीर्घ,-विक्रमः, पादन्यासः ।

—भरना, क्रि. अ., विक्रम् (भ्वा. प. से., भ्वा. आ. अ.) दीर्घपादान् विन्यस् (दि. प. से.)-निक्षिप् (तु. प. अ.) ।

डगमगाना, क्रि. अ. (हि. डग + मग) प्र-, कंप्-वेप् (भ्वा. आ. से.), वेल् (भ्वा. प. से.) २. प्रस्खल्-विचल् (भ्वा. प. से.) ३. विशंक्-विकल्प् (भ्वा. आ. से.), चित्तं दोलायते (ना. धा.) ।

डगमगाहट, सं. स्त्री. (हिं. डगमगाना) प्रकंपः, वेपथुः २. प्रस्खलनं, विचलनं ३. विक्षोभः, चित्तवैकल्यं, धृतिनाशः ।

डगर, सं. स्त्री. (हिं. डग) दे. 'मार्ग' ।

डटना, क्रि. अ. (हिं. ठाढा) दृढं-स्थिरं-निश्चलं स्था (भ्वा. प. अ.), अवस्था (भ्वा. आ. अ.), वृत् (भ्वा. आ. से.) ।

डट्टा, सं. पुं. (हिं. डाटना) कूपोच्छिद्र-,पिधानं, अवष्टंभः, रोधः ।

—लगाना, क्रि. स., रोधेन-अवष्टम्भेन अपि-पि,-धा (जु. उ. अ.)-सं-आ-वृ (स्वा. उ. से.) ।

डढ़ियल, वि. (हिं. डाढ़ी) कूर्चधर, लंबकूर्च, श्मश्रुल, सश्मश्रु ।

डपट, सं. स्त्री. (सं. दर्पः) निर्भर्त्सना, वाग्दंडः ।

डपटना, क्रि. स. (हिं. डपट) तर्ज् (भ्वा. प. से; चु. आ. से.), वाचा दंड् (चु.), निर्भर्त्स् (चु. आ. से.) ।

डपोरसंख, सं. पुं. (अनु. डपोर = बड़ा + सं. शंखः) आत्मश्लाघिन्, विकत्थनशीलः २. बालबुद्धिः (पुं.) ।

डफ, डफला, सं. पुं. (अ. दफ़) डिंडिमभेदः, *डफम् ।

डफली, सं. स्त्री. (हिं. डफला) लघु,-डिंडिमः-डफम् ।

डफाली, सं. पुं. (हिं. डफला) डफ-डिंडिम,-वादकः ।

डबडबाना, क्रि. अ. (अनु.) सास्र-सवाष्प-सजलनयन-साश्रु (वि.) भू ।

डबडबाई आँखों से, क्रि. वि., सास्रं, साश्रु, सवाष्पं, पर्यश्रु ।

डबोना, क्रि. स., दे. 'डुबोना' ।

डब्बा, सं. पुं. (सं. डिंबः >) संपुटः, संपुटकः, करंडकः, समुद्गकः । २. (रेलगाड़ी का) शकटः-टम् ।

डमरू, सं. पुं. (सं.-रुः) क्षीणमध्यो गुटिका-द्वययुक्तो वाद्यभेदः ।

—मध्य, सं. पुं. (सं. न.) विशालभूभागद्वय-योजकः संबाधभूखंडः ।

जलडमरूमध्य, सं. पुं. (सं. न.) सामुद्रधुनी ।

डर, सं. पुं. (सं. दरः-रं) सं-,त्रासः, भीः-भीतिः (स्त्री.), भयं, साध्वसं २. शंका, चिंता ।

डरना, क्रि. अ. (हिं. डर) भी (जु. प. अ.), वि-सं-त्रस् (भ्वा. दि. प. से.), उद्विज् (तु. प. अ.), भयार्त्त-त्रस्त (वि.) भू २. आ-वि-, शंक् (भ्वा. आ. से.) ।

डरपोक, वि. (हिं. डरना + पोंकना) भीत, भीरु, सभय, ससाध्वस २. साशंक, शंकिल ।

डराना, क्रि. स., व. 'डरना' के प्रे. रूप ।

डरावना, वि. (हिं. डर) भीम, भीषण, भयंकर ।

डल, सं. स्त्री. (सं. तल्लः) तटाकः-कं (-नाः,-गं), सरोवरः ।

ढलना, क्रि. अ. (हिं. ढालना) न्यस्-निक्षिप् (कर्म.) २. नि-,सिच् (कर्म.), स्रु (भ्वा.प.अ.)।
ढलवाना, क्रि. प्रे., व. 'ढालना' के प्रे. रूप।
ढला[1], सं. पुं. (सं. दलः-लं) खंटः-डं, स्थूल,-अंशः-भागः २. पिंडः-डं, घनः, गंडः, गुल्मः।
ढला[2], सं. पुं. [सं. ढल(ल्ल)कं] दे. 'टोकरा'।
ढलिया, सं. स्त्री. (हिं. ढला) दे. 'टोकरी'।
ढली, सं. स्त्री. (हिं. ढला) पिंडकः-कं, क्षुद्रगंडः २. शकलः-लं, खंडः-डं ३. दे. 'सुपारी'।
ढसना, क्रि. स. (सं. दंशनं) दंश् (भ्वा. प. अ.), कंटकेन व्यध् (दि. प. अ.) २. मर्माणि भिद् (रु. प. अ.)।
ढसनेवाला, सं. पुं., दंशकः २. अरुंतुदः, मर्मस्पृश्।
ढहढहा, वि. (अनु.) हरित, रसवत्, सरस, विकसित, विकच २. अभिनव, प्रत्यग्र ३. प्रसन्न, आनंदित।
ढहढहाना, क्रि. अ. (हिं. ढहढह) प्रफुल्-विकस् (भ्वा. प. से.), हरितीभू २. सम्-ऋध् (दि. प. से.), सं-वि-वृध् (भ्वा. आ. से.) ३. मुद् (भ्वा. आ. से.)।
ढाँग, सं. स्त्री. (सं. दंडकः) लगुडः-रः-लः, स्थूल-वृहद्,-दंडः।
ढाँट, सं. स्त्री. (सं. दांतिः >) तर्जनं, तर्जितं, निर्-, भर्त्सनं-ना, वाग्दंडः।
—डपट, सं. स्त्री., भ्रूभंगेन तर्जनं, आक्रोशः, विभीषिका, भयदर्शनं, अपकारगिर् (स्त्री.)।
ढाँटना, क्रि. स. (हिं. ढाँट)निर्-, भर्त्स् (चु. आ. से.), भयं दृश् (प्रे.), भी (प्रे.), तर्ज् (भ्वा. प. से.; चु. आ. से.)।
ढाँटने योग्य, वि., तर्जनीय, निर्भर्त्सनीय-वाग्दंडार्ह।
ढाँटनेवाला, सं. पुं., तर्जकः, निर्भर्त्सकः।
ढाँड़, सं. पुं. (सं. दंडः) यष्टिः (स्त्री.), लगुडः २. क्षेपणी, नौदंडः ३. पृष्ठवंशः, कशेरुका ४. धन-अर्थ,-दंडः ५. निग्रहः, शासनं, दंडः ६. सम-सरल,-रेखा ७. सीमा।
ढाँड़ना, क्रि. स. (सं. दंडनं) अर्थ-धनं दंड् (चु.)।
ढाँढ़ा, सं. पुं. (हिं. ढाँड़) दे. 'मेंढ़'।
ढाँढ़ी, सं. स्त्री. (हि. ढाँड़) दे. 'डंडी' (१-४)।
ढाँवाँडोल, वि. (हिं. डोलना) अस्थिर, चंचल, तरल, लोल, कम्पमान। (मनुष्य) अस्थिरबुद्धि, चलचित्त, चंचलमानस।
ढाँस[1], सं. पुं. (सं. दंशः) दंशकः, अरण्य-गो-वन,-मक्षिका, पांशुरः, क्षुद्रिका।
ढाँस[2], सं. पुं. (अं.) नृत्यम्, दे. 'नाच'।
डाक, सं. स्त्री. (हिं. ढाँकना = फाँदना)। प्रेष्य,-पत्राणि-पत्रिकाः (बहु.) २. पत्रवाहन,-व्यवस्था-संस्था।
—खाना, सं. पुं. (हिं.+फा.) (प्रेष्य-) पत्र,-स्थानं-गृहं-कार्यालयः।
—गाड़ी सं. स्त्रीं., पत्रशकटी।
—घर, सं. पुं., दे. 'डाकखाना'।
—बँगला, सं. पुं. (हिं.+अं.) विश्राम-विश्रांति,-गृहम्।
—महसूल, सं. पुं. (हिं.+अ.) } पत्रवाहन-
—व्यय, सं. पुं.(हिं.+सं.) } शुल्कम्।
डाका, सं. पुं. (हिं. डाकना) प्रसह्य चौर्यम्, लुंठिः (स्त्री.)-टी, लुंठनम्।
—ज़नी, सं. स्त्री. (हिं.+फा.) दे. 'डाका'।
—डालना या मारना, क्रि. स., लुंट्-लुंठ् (भ्वा. प. से., चु.), प्रसह्य अपहृ (भ्वा. प. अ.)।
—पड़ना, क्रि. अ., लुंठकैः अवस्कंद्-आक्रम् (कर्म.)।
डाकिन,-नी, सं. स्त्री. (सं.-नी) कुहकिनी, अभिचारिणी, योगिनी, मायाविनी, कालीगण-भेदः। २. स्थविरा, वृद्धा ३. कुरूपा नारी।
डाकिया, सं. पुं. (हिं. डाक) पत्रवाहकः।
डाकू, सं. पुं. (हिं. डाकना=कूदना) दस्युः, महासाहसिकः, लुंठकः, लुंटा(ठा)कः, माचलः, प्रसह्यचौरः, चिल्लाभः।
डाट, सं. स्त्री. (सं. दांति>) तोरणः-णं २. दे. 'डट्टा' ३. दे. 'डाँट'।
—लगाना, क्रि. स., वृत्तखंडाकृत्या-तोरण-रूपेण निर्मा (जु. आ. अ.)।
डाटना, क्रि. स. (हिं. डाट) अत्यन्तं पूर् (चु.) २. अत्यधिकं भक्ष् (चु.) ३. सावलेपं वस्त्रादिकं परिधा (जु. उ. अ.) ४. दे. 'डाँटना'।
डाढ़, सं. स्त्री. (सं. दाढ़ा) चर्वणदंतः, जंभः, दंष्ट्रा।

डाढ़ी, सं. स्त्री., दे. 'दाढ़ी'।

डाब, सं. स्त्री., दे. 'डाभ'

डाबर, सं. पुं. (सं. दभ्रः=सागर>) अनूप-कच्छ,-भूः (स्त्री.)-देशः २. पल्वलः-लं ३. आविलजलं ४. दे. 'चिलमची'।

डाभ, सं. पुं. (सं. दर्भः) कुशः-शं २. आम्र-मंजरी ३. अपक्वनारिकेलः-रः।

डायन, सं. स्त्री. (दे. डाकिनी)

डायनामो, सं. पुं. (अं.) विद्युज्जनकं लघुयंत्रम्।

डायरी, सं. स्त्री. (अं.) दैनंदिनी, दैनिकी।

डायरेक्ट स्पीच, सं. स्त्री. (अं.) प्रत्यक्षवर्णनम्।

डायल, सं. पुं. (अं.) घटीमुखं २. सूर्यघटी ।

डायस, सं. पुं. (अं.) उच्चासनं, मंचः।

डार, सं. स्त्री. [सं. दारु (न.)] विटपः, शाखा, २. पंक्तिः-ततिः (स्त्री.), श्रेणी।

डाल, सं. स्त्री. [सं. दारु (न.)] विटपः, शाखा २. असि,-धारा-पत्रं-फलम्।

डालना, क्रि. स. (सं. तलनं) प्र-, अस् (दि. प. से.), प्र-, क्षिप् (तु. प. अ.), पत् (प्रे.) २. प्र-, स्रु (प्रे.), नि-, सिच् (तु. प. अ.) ३. परिधा (जु. उ. अ.), वस् (अ. आ. अ.), धृ (चु.) ४. नि-प्र-विश् (प्रे.), निधा (जु. उ. अ.) ५. विस्मृ-परित्यज् (भ्वा. प. अ.) ६. मिश्र् (चु.), संमिल् (प्रे.) ७. उपपत्नीत्वेन अवरुध् (रु. उ. अ.)।

डाली,[१] सं. स्त्री. (हिं. डाल) शाखा, विटपः।

डाली,[२] सं. स्त्री. (हिं. डाला) दे. 'टोकरी' २. उपहारः, उपायनम्।

डाह, सं. पुं. (सं. दाहः) ईर्ष्या, अभि-, असूया, मत्सरः, मात्सर्यं, परोत्कर्षद्वेषः २. द्वेषः, द्रोहः।

डिंगल, वि. (सं. डिंगर) दुष्ट, दुर्वृत्त २. क्षुद्र,नीच। सं. स्त्री., राजस्थानस्य भाषाविशेषः।

डिंडिम, सं. पुं. (सं.) लघु,-पटहः-दुंदुभिः (पुं.)।

डिंभ, सं. पुं. (सं.) डिंवः, शिशुः, पृथुकः, कलभः, पोतः-तकः, शावः-वकः, अर्भकः, अपत्यं, पृथुकः २. मूर्खः, जडः।

डिक्टेशन, सं. स्त्री. (अं.) दे. 'इम्ला'।

डिक्शनरी, सं. स्त्री. (अं.) (शब्द)-कोशः-पः, अभिधानम्।

डिगना, क्रि. अ. (हिं. डग) अप,-सृ-गम् (भ्वा. प. अ.), प्र-वि-सृप् (भ्वा. प. अ.) २. विचल् (भ्वा. प. से.), पराङ्मुखी-विमुखी भू, अति-व्यति-इ (अ. प. अ.), अति-व्यभि-चर् (भ्वा. प. से.) ३. दे. 'गिरना'।

डिगरी[१], सं. स्त्री. [अं. उपाधिः (पुं.)], उपपदं २. अंशः, कला, मात्रा, समकोणस्य नवतो ($\frac{1}{90}$) भागः।

डिगरी[२], सं. स्त्री. (अं. डिक्री) स्वत्वप्रापकः आधिकरणिकनिर्णयः, राजाज्ञा, व्यवस्था।

—देना, क्रि. स., स्वत्वप्रापणात्मकं निर्णयं कृ, व्यवस्था (प्रे.)।

डिठौना, सं. पुं. (हिं. डीठ) कुदृष्टिनिवारकं कज्जलतिलकम्।

डिपटी, सं. पुं. (अं. डिपुटि) प्रति,-निधिः-पुरुषः-हस्तः-हस्तकः, नियोगिन्, नियुक्तः।

—कमिशनर, सं. पुं. (अं.) उपायुक्तः।

डिपार्टमेंट, सं. पुं. (अं.) विभागः, शाखा।

डिपो, सं. पुं. (अं.) भांडागारं, आलयः, शाला।

डिप्लोमा, सं. पुं. (अं.) प्रमाणपत्रं, अधिकारपत्रम्।

डिफथीरिया, सं. पुं. (अं.) रोहिणी।

डिबिया, सं. स्त्री. (हिं. डिब्बा) कोषकः, संपुटकः।

डिब्बा, सं. पुं., दे. 'डब्बा'।

डिसमिस, वि. (अं.) अधिकारच्युत, भ्रष्टाधिकार।

—करना, क्रि. स., अधिकारात्-पदात् च्यु-भ्रंश्-अवरुह् (प्रे.)।

डिसिनफेक्टेंट, वि. (अं.) रोगाणुनाशक।

डिस्टिल्लेशन, सं. पुं. (अं.) आसवनम्।

डींग, सं. स्त्री. (सं. डीनं>) आत्मश्लाघा, स्व-प्रशंसा, विकत्थनम्।

—मारना या हाँकना, आत्मानं श्लाघ्-विकत्थ (भ्वा. आ. से)।

डींगिया, वि. (हिं. डींग) आत्मश्लाघिन्, विकत्थनशील, पिंडीशूर।

डीठ, सं. स्त्री., दे. 'दृष्टि'।

डील, सं. पुं. (देश.) (देह-) प्र-परि,-माणं, आकारः, आकृतिः (स्त्री.), कायमानम्।

—डौल, सं. पुं., मूर्तिः (स्त्री.), संस्थानं, आकारमानम्।

डुगडुगी, सं. स्त्री. (अनु.) डिंडिमः, लघुपटहः।

—पीटना, मु., (सर्वत्र डिमनादं) उद्-वि-घुष् (चु.), प्रख्या (प्रे. प्रख्यापयति)।

डुग्गी, सं. स्त्री., दे. 'डुगडुगी'।

डुबकी, सं. स्त्री. (हिं. डूबना) अवगाहः, आप्लवः, निमज्जथुः (पुं.)।

—लगाना, क्रि. अ., वाङ्-अवगाह् (भ्वा. आ. से.), आप्लु (भ्वा. आ. अ.), निमस्ज् (तु. प. अ.)।

डुबाना, क्रि. स., व. 'डूबना' के प्रे. रूप।

डुबाव, सं. पुं. (हिं. डूबना) अगाधता, गांभीर्यम्।

डुबोना, क्रि. स., व. 'डूबना' के प्रे. रूप।

डुलाना, क्रि. स., व. 'डोलना' के प्रे. रूप।

डूबना, क्रि. अ., (हिं. बूड़ना का विपर्यय; अथवा अनु. डुब-डुब) निमस्ज् (तु. प. अ.), निमज्जनेन मृ (तु. आ. अ.)-व्यापद् (दि. आ. अ.) २. अस्तं इ-या (अ. प. अ.), अस्ताचलं-अस्तशिखरं अवलंब् (भ्वा. आ. से.)--प्राप् (स्वा. प. अ.) ३. नष्ट-ध्वस्त-निर्मूल(वि.) भू, नश् (दि.प.वे.), ध्वंस् (भ्वा. आ. से.), परिक्षि(कर्म.), प्र-वि-ली (दि. आ. अ.) ४. निध्यै (भ्वा. प. अ.), सततं आलोच्-चिंत् (चु.), चिंताकुल (वि.) भू ५. निमग्न-निरत-आसक्त-व्यापृत (वि.) भू। सं. पुं., निमज्जनं, आप्लावः, प्लावनं, निमज्जनेन मरणं, अस्तः, अस्तमनं; नाशः, ध्वंसः; सततचिंतनं, कार्यासक्तिः (स्त्री.)।

डूश, सं. पुं. (अं.) योनिक्षालनम्।

डेंगू बुखार, सं. पुं. (अं.+अ.) दण्डक-अस्थि-भंजन,-ज्वरः।

डेढ़, वि. (सं. अध्यर्द्ध) सार्द्धैक।

—ईंट की मसजिद जुदी बनाना, मु. (दर्पादितः) कार्यमसंभूयैव कृ।

डेपुटेशन, सं. पुं. (अं.) प्रतिनिधिवर्गः, शिष्टमंडलं, नियुक्तजनाः।

डेरा, सं. पुं. (हिं. ठहरना) पट-वस्त्र,-गृहं-कुटी-मंडपः-वेश्मन् (न.), दूष्यं-श्यं २. गृहं, आलयः, आवासः ३. विश्रामः, अस्थिरवासः ४. शिविरं, निवेशः।

—डालना, मु., सैन्यं निविश् (तु. प. अ.) समावस् (भ्वा. प. अ.)।

डेल्टा, सं. पुं. (यू., अं.) नदीमुखपुलिनः-नम्।

डेलिगेट, सं. पुं. (अं.) नियोगिन्, प्रतिनिधिः (पुं.)।

डेवढ़ा, वि. (हिं. डेढ़) अध्यर्द्धगुण। सं. पुं., अध्यर्द्धगुणनसूची।

डेवढ़ी, सं. स्त्री., दे. 'ड्योढ़ी'।

डेस्क, सं. पुं. (अं.) लेखन,-पीठिका-फलकम्।

डोंगा, सं. पुं. (सं. द्रोणं >) वेडा, वारिरथः, नौः (स्त्री.), तरी।

पान[2], सं. पुं. (सं. पर्ण) तांबूली, तांबूलवल्ली, नाग,-लता-वल्ली २. तांबूलं, पर्णं, नागवल्ली-दलं ३. क्रीडापत्ररंगभेदः ४. पत्रं, किसलयः।

—गोष्ठी, सं. स्त्री. (सं.) आपानं, मद्यपान,-चक्रं-सभा।

—दान, सं. पुं. (हिं+फ़ा) *पर्णधानं, तांबूल-करंकः।

पानक, सं. पुं. (सं. न.) *मधुराम्लपेयम्।

पाना, क्रि. स. (सं. प्रापणं) प्र-,आप् (स्वा.-उ. अ.), लभ् (भ्वा. आ. अ.), विद् (तु.-उ. वे.), समा-सद् (प्रे.) आ-प्रति-पद् (दि. आ. अ.) अधिगम्, आदा (जु. आ. अ.), ग्रह् (क्र्. प. से.), २. (सुखादि) अनुभू, भुज् (रु. आ. अ.) ३. बुध् (भ्वा. उ. से.),

विद् (अ. प. से.) ४. तुल्य-सदृश (वि.) भू ५. खद् (भ्वा. प. से.) ६. सह (भ्वा. आ. से) । सं. पुं., प्रापणं, लब्धिः (स्त्री.), अधिगमनं, आदानं; अनुभवः; बोधः; भुक्तिः इ. ।

पाने योग्य, वि., प्राप्य, लभ्य, आदेय, ग्राह्य इ ।

पानेवाला, सं. पुं., प्रापकः, अधिगंतृ-आदातृ-ग्रहीतृ (पुं.) इ. ।

पाया हुआ, वि., प्राप्त, अधिगत, लब्ध, गृहीत इ. ।

पानिप, सं. पुं. (हिं. पानी) द्युतिः-कांतिः (स्त्री.) २. दे. 'पानी' ।

पानी, सं. पुं. (सं. पानीयं) वारि-अंभस् (न.), दे. 'जल' २. कांतिः-द्युतिः (स्त्री.) ३. प्रतिष्ठा, संमानः ४. वृष्टिः (स्त्री.) ५. पौरुषं, वीर्यं ६. वातवर्षादिसामग्री, *जलवायु (न.) ७. रसः, ८. शीतलवस्तु (न.) ९. समयः, अवसरः १०. परिस्थितिः (स्त्री.) ।

—से डरना, सं. पुं., आलर्कं, जल,-आतंकः-सत्रासः ।

—दार, वि. (हिं + फा.) कांतिमत्, भासुर २. मान्य ३. आत्माभिमानिन् ।

—देवा, सं. पुं., तर्पकः, पिंडदः २. पुत्रः ३. स्ववंशीयः ।

—फल, सं. पुं., दे. 'सिंघाड़ा' ।

—का बुलबुला, मु., क्षणभंगुर, असार, नश्वर ।

—कर देना, मु., क्रोधं अपनी (भ्वा. प. अ.) शम (प्रे., शमयति) ।

—की तरह बहाना, मु., अपव्ययं (चु), अमितं व्यय्, मुधा क्षै (प्रे., क्षपयति) ।

—के मोल, मु., स्वल्पमूल्येन, अत्यल्पार्घेण ।

—भरना, मु., (तुलनायां) तुच्छ (वि.) प्रतीयते ।

—देना, मु., (पितॄन्) उदकेन तृप् (प्रे.) २. उदकं पत् (प्रे.)-निषिच् (तु. प. अ.) ।

—पड़ना, मु., वृष् (भ्वा. प. से.) ।

—पानी होना, मु., अतीव लज्-लस्ज् (तु. आ. से.) ।

—पी-पी कर कोसना, नितरां आक्रुश्-शप् (भ्वा. प. अ.)-अभिशंस् (भ्वा. प. से.) ।

—में आग लगाना, मु., शांतं कलहं पुनः उज्जीव् (प्रे.)-नवीकृ ।

—लगना, मु., प्रतिकूलजलवायुनाऽस्वस्थ (वि.) भू ।

—सा पतला, मु., जलरूप, जलबहुल, जल-विरल ।

अदरक का—, सं. पुं., आर्द्रकजलम् ।

खारा—, सं. पुं, क्षारजलम् ।

पानीय, वि. (सं.) पेय, पातव्य । सं. पुं. (सं. न.) दे. 'जल' ।

पांथ, सं. पुं. (सं.) दे. 'पथिक' ।

पाप, सं. पुं. (सं. न.) अधर्मः, पाप्मन् (पुं.) पापकं, किल्विषं, कल्मषं, वृजिनं, अघं, अंहस्,-एनस् (न.), दुरितं, दुष्कृतं, पातकं, शल्यं २. अपराधः, दोषः ३. वधः ४. पापबुद्धिः (स्त्री.) ५. अनिष्ट, अहितम् ।

—करना, क्रि. स., पापं कृ अथवा आचर् (भ्वा. प. से.) २. अपराध् (दि. स्वा. प. अ.) ।

—कटना, क्रि. अ., पापेभ्यः मुच् (कर्म.), पापं नश् (दि. प. वे.) ।

—नाशी, वि. (सं.-शिन्) पापघ्न, अघनाशक, पापहर ।

—बुद्धि, वि. (सं.) पाप-कु-दुर्,-मति-बुद्धि ।

—रोग, सं. पुं. (सं.) रतिजरोगः (प्रमेहादिः) ।

—लोक, सं. पुं. (सं.) दे. 'नरक' ।

पापड़, सं. पुं. (सं. पर्पटः) माषयोनिः, शिंबी-पूपः, वैदलपिष्टकः । वि., तनु २. शुष्क ।

—बेलना, मु., घोरं परिश्रम् (दि. प. से.) २. दुःखं जीव् (भ्वा. प. से.) ।

पापड़ा, सं. पुं. (सं. पर्पटः) अरकः, वरकः, प्रगंधः, सुतिक्तः २. दे. 'पित्तपापड़ा' ।

—खार, सं. पुं. (सं. पर्पटक्षारः) *कदलीक्षारः ।

पापाचार, सं. पुं. (सं.) दुराचारः, दुर्वृत्तम् ।

पापात्मा, वि. (सं.-त्मन्) दे. 'पापी' ।

पापिन-नी, वि. स्त्री. (सं.) पातकिनी, दुष्टा, दुराचारिणी, पाप,-करी-कारिणी, एनस्विनी २. अपराधिनी, दोषिणी ।

पापिष्ठ, वि. (सं.) पाप(पि)ष्ठम, दुष्टतम [पापिष्ठा (स्त्री.) = पापतमा, दुष्टतमा] ।

पापी, वि. (सं.-पिन्) पातकिन्, पाप, पाप-कर, कु-पाप-दुष् दुष्ट,-कर्मन्, एनस्विन्, किल्बि-षिन्, पाप, निरत-बुद्धि-मति, पापकृत्-पापा-त्मन् २. अपराधिन्, दोषिन् ।

पापोश, सं. स्त्री. (फ़ा.) दे. 'जूता'।

पाबंद, वि. (फ़ा.) नि-, बद्ध, परतन्त्र, निरुद्ध, संयत नियन्त्रित।

पाबंदी, सं. स्त्री. (फ़ा.) बंधः, बंधनं, नियंत्रणं वा २. विवशता. बाध्यता।

पामर, वि. (सं.) दुष्ट, खल, दुर्वृत्त २. नीच, अधम ३. मूर्ख, जड।

पामाल, वि. (फ़ा.) पादाक्रांत, पददलित, पादक्षुण्ण, अव-सं.-मर्दित २. वि-,ध्वस्त-नष्ट।

पायँचा, सं. पुं. (फ़ा.) *पादायामजंघा।

पायँता, सं. पुं. (हिं. पायँ) खट्वायाः *पद्धानं, *पदस्थानः।

पायँती, सं. स्त्री., दे. 'पायँता'।

पायंदाज़, सं. पुं. (फ़ा.) *पादघर्षणम्।

पाय, सं. पुं. (सं. पादः) दे. 'पाँव'।

पायख़ाना, सं. पुं., दे. 'पाख़ाना'।

पायजामा, सं पुं, दे. 'पाजामा'।

पायजेब, सं स्त्री., दे. 'पाजेब'।

पायदार, वि. (फ़ा.) चिर-, स्थायिन्, दृढ।

पायदारी, सं. स्त्री. (फ़ा.) चिरस्थायिता, दृढता।

पायमाल, वि. (फ़ा.) दे. 'पामाल'।

पायल, सं. स्त्री. (हिं. पाय) दे. 'पाजेब' २. वंशनिःश्रेणी ३. शीघ्रगामिनी हस्तिनी।

पायस, सं. पुं. (सं. पुं न.) परमान्नं, दे. 'खीर' २. श्रीवासः, दे. 'तारपीन'।

पाया, सं. पुं. (सं. पादः) (पर्यंकादीनां) पादः, जंघा, टंगा २. स्तंभः, स्थूणा, स्थाणुः (पुं.) ३. पदं, पदवी-विः (स्त्री.), स्थितिः (स्त्री.) ४. सोपान,-पथः-मार्गः, परम्परा।

पायु, सं. पुं. (सं.) दे. 'गुदा'।

पारंगत, वि. (सं.) पारग,-परतीर-पार,-गत, २. प्रौढपंडित, अधीतिन्, सुविद्वस्, शास्त्र-मर्मज्ञ।

पार, सं. पुं. (सं. पुं. न.) पर-तीरं-तटं २. अन्यतरं तटं ३. पर-अभिमुख,-पार्श्वः-दिशा ४. अंतः, पर्यंतः, सीमा ५. तलं, अधोभागः। अव्य., परे, दूरे, अग्रे, परतः।

—करना, क्रि. स., सं-उत्,-तॄ (भ्वा. प. से.), उत्,-लंघ् (भ्वा. आ. से.; चु.), अति-इ (अ. प. अ.), अतिक्रम् (भ्वा. प. से.) २. समाप् (स्वा. उ. अ.) संपूर् (चु.), निर्वृत (प्रे.) ३. दे. 'बाँधना'।

—दर्शक, वि. (सं.) स्वच्छ, किरण-प्रकाश,-भेद्य।

—दर्शी, वि. (सं.-र्शिन्) दूरदर्शिन्, भविष्य-दर्शिन्।

—पाना, मु., सम्यक् बुध् (भ्वा. प. से.), आद्यंतं या (अ. प. अ.) अथवा संपूर् (चु.)।

आर—, सं.पुं., पारापारं, पारावारम्। क्रि. वि., आवारपारम्।

वार—, सं पुं.. दे. 'आरपार'।

पारखी, सं. पुं. (हिं. परख >) परीक्षकः, गुण-दोषविद् (पुं.)।

पारग, पारगत, वि. (सं.) दे. 'पारंगत'।

पारण, सं. पुं. (सं. न.) पारणा, उपवासानन्तरं प्राथमिकभोजनं २. तर्पणं ३. समाप्तिः(स्त्री.)।

पारतंत्र्य, सं. पुं. (सं. न.) दे. 'परतंत्रता'।

पारद, स पुं. (सं.) दे. 'पारा'।

पारदेशिक-शी, वि., दे. 'परदेसी'।

पारधी, सं पुं., दे. 'शिकारी'।

पारलौकिक, वि. (सं.) आमुष्मिक, परलोक,-संबंधिन्-विषयक, अपार्थिव।

पारस, सं. पुं. (सं. स्पर्शः >) स्पर्श,-मणिः-उपलः २. अतिलाभदः पदार्थः।

पार साल, सं. पुं. (सं. पार + फ़ा. साल) गतवर्ष, परुत् (अव्य.)। क्रि. वि., गताब्दे, परुत्।

पारसी, वि. (फ़ा.) पारसवासिन् २. भारतस्थाः पारसीकाः ३. दे. 'फ़ारसी'।

पारसीक, सं. पुं. (सं.) पारसदेशः, पारसिकः २. पारसवासिन् ३. पारसघोटकः, वानायुजः।

पारस्परिक, वि. (सं.) दे. 'परस्पर का'।

पारा, सं. पुं. (सं. पारः) महा-दिव्य-,रसः, रस,-राजः-नाथः-उत्तमः-इन्द्रः, चपलः, पारदः, शिववीजं, सिद्धधातुः।

पारायण, सं. पुं. (सं. न.) समापनं, समाप्तिः (स्त्री.) २. आद्यन्तपाठः।

पारावत, सं. पुं. (सं.) कपोतः, २. कपिः ३. पर्वतः।

पारावार, सं. पुं. (सं.) समुद्रः। (सं. न.) तटद्वयं २. सीमा, पर्यंतः, अवधिः।

पारिजात, सं. पुं. (सं.) सुर-देव-कल्प,-तरुः-वृक्षः, मंदारः ।

पारितोषिक, सं. पुं. (सं. न.) सिद्धिपालं, जयलाभः, दे. 'इनाम' ।

पारिभाषिक, वि. (सं.) सांकेतिक, परिभाषा-संकेत,-संबंधिन् ।

पारिषद, सं. पुं. (सं.) सभासद् (पुं.), सभ्य, पारिषद्य २. गणः, अनुचरवर्गः ।

पारी, सं. स्त्री., दे. 'बार' ।

पार्थक्य, सं. पुं. (सं. न.) पृथक्ता, भिन्नता ३. वियोगः, विरहः, विश्लेषः ।

पार्थिव, वि. (सं.) मृण्मय (-यी स्त्री.) मार्तिक (-की स्त्री.) २. भौम, पृथिवीसंबंधिन् ३. लौकिक, ऐहिक (-की स्त्री.) । सं. पुं., नृपः २. कुजः ।

पार्लियामेंट, सं. स्त्री. (अं.) व्यवस्थापिका सभा ।

पार्वती, सं. स्त्री. (सं.) उमा, अद्रिजा, अंबिका, गौरी, नंदा, भवानी, महादेवी, शिवा, रुद्राणी, सती, सिंहवाहिनी, हिमाद्रितनया, हैमवती ।

—नंदन, सं. पुं. (सं.) कार्त्तिकेयः ।

पार्श्व, सं. पुं. (सं. पुं. न.) कक्षाधोभागः, पार्श्व-पक्ष,-भागः, कुक्षिः २. पक्षः, पार्श्वः-र्श्वं, समीप-निकट,-स्थानं ३. पार्श्वास्थि (न.), पार्श्वकम् ।

—वर्ती, सं. पुं. (सं.-र्तिन्) समीपस्थ-निकटस्थ,-जनः ।

—शूल, सं. पुं. (सं. पुं. न.) शूलरोगभेदः ।

पाल[1], सं. पुं. (सं.) पालकः, पोषकः २. पतद्-ग्रहः, दे. 'पीकदान' ।

पाल[2], सं. पुं. (हिं. पालना) फलपाकाय पलालास्तरणम् ।

पाल[3], सं. पुं. (सं. पटः वा पाटः >) नौ-,* वातपटः २. पट,-मंडपः-गृहं ३. शकटाच्छादनम् ।

पाल[4], सं. स्त्री. [सं. पालिः (स्त्री.)] सेतुः, धरणः, वप्रबंधः २. उच्च,-तीरं-कूलं, दे. 'कगार' ।

पालक[1], सं. पुं. (सं.) पोषकः, रक्षकः, पालन-कर्तृ पालयितृ २. अश्व,-पालः-रक्षः ३. दत्तक-पुत्रः ४. चित्रकवृक्षः ।

पालक[2], सं. पुं. (सं. पालंकः) पालंकी, सु-स्निग्ध,-पत्रा, मधुरा, क्षुरपत्रिका, ग्रामीणा ।

पालकी, सं. स्त्री. (सं. पल्यंकः >) शिरस्का, डयनं, शिबिका, *पल्यंकी, रथगर्भकः, याप्य-यानम् ।

—गाड़ी, सं. स्त्री.,* पल्यंकी शकटी ।

पालतू, वि. (सं. पालित) गृह,-वर्धित-पोषित, गृह्य, छेक, गृह-, ग्राम- ।

पालथी, सं. स्त्री., दे. 'पलथी' ।

पालन, सं. पुं. (सं. न.) भरणं, पोषणं, सं-, वर्धनं, अन्नवसनै रक्षणं २. निर्वाहः, अनुकूला-चरणं, अनुवर्तनं, साधनं, पूरणम् ।

पालना, क्रि. स. (सं. पालनं) परि-, पा (प्रे. पालयति), परि-, पुष् (भ्वा. क्र्. प. से. तथा प्रे.), संवृध् (प्रे.), सं-, भृ (भ्वा. जु. प. अ.) २. (पशुविहगान्) विनी (भ्वा.प.अ.), दम् (पे.), गृहे पुष्-संवृध् (प्रे.) ३. अनुकूलं आचर् (भ्वा. प. से.), निर्वह् (प्रे.), संपूर्-साध् (प्रे.) । सं. पुं., दे. 'पालन' २. (शिशु-) प्रेंखा-दोला ।

पालने योग्य, वि., परि-, पालनीय-पोषणीय, भरणीय, विनेय, निर्वाह्य, इ. ।

—वाला, सं. पुं., दे. 'पालक'[1] (१) २. विनेतृ, गृहे पोषकः ३. निर्वाहकः, साधकः ।

पाला हुआ, वि., परि-, पालित-पोषित, सं-, भृतः गृहे संवर्धितः संपूरितः रक्षितः, इ. ।

पाला[1], सं. पुं. (सं. प्रालेयं) तुषारः, नीहारः, कुज्झटिका, मिहिका, तुहिनं, २. घनजलं, जल-घनः, तुषारसंघातः, हिमं ३. शीतं, शैत्यं, हिमः ।

—मार जाना, मु., नीहारेण नश् (दि. प. वे.), तुषारेण ध्वंस् (भ्वा. आ. से.) ।

पाला[2], सं. पुं. (हिं. पल्ला) व्यवहारावसरः, संबंधः ।

—पड़ना, मु., व्यवहारः-संबंधः-कार्यं जन् (दि. आ. से.) ।

पाले पड़ना, मु., वशीभू, अधीन (वि.) जन् ।

पाला[3], सं. पुं. (सं. पट्टः >) प्रधानस्थानं, मुख्यकार्यालयः २. विभाजकरेखा ३. क्षेत्रसीमा ४. अन्नार्थं बृहत्पात्रं ५. मल्लयुद्धभूमिः (स्त्री.), व्यायामशाला ।

पालागन, सं. स्त्री. (हिं. पाँय + लगना) चरणचुंबनं, पादप्रणतिः (स्त्री.), प्रणामः, वंदना, नमस्कारः ।

पालित, वि. (सं.) दे. 'पाला हुआ' (पालना के नीचे) ।

पालिश, सं. स्त्री. (अं.) प्रमार्जम्, *कांतिकरी।
पाली[1], सं. स्त्री. (सं. पालिः=पंक्तिः>) भारत-वर्षस्य प्राचीनभाषाविशेषः (प्रायः बौद्ध धर्म-ग्रंथ इसी में हैं)।
पाली[2], वि. (सं.-लिन्) पालक, पोषक २. रक्षक।
पाली[3], सं. स्त्री. (सं. पल्लिः=स्थान>) कुक्कुट-युद्ध-भूमिः (स्त्री.)।
पाँव, सं. पुं., दे. 'पाँव'।
पाव, सं. पुं. (सं. पादः) चतुर्थ,-अंशः-भागः, तुर्य, तुरीयं २. (चार गिरह) गजतुर्यं, हस्तार्द्धं ३. सेर-, पादः, षट्टंकचतुष्कम्।
पावक, सं. पुं. (सं.) अनलः, अग्निः २. तापः ३. सूर्यः। वि., पावन, शोधक, मार्जक।
पावन, वि. (सं.) शुद्ध, पूत, पवित्र, शुचि २. दे. 'पावक'। वि. [पावनी (स्त्री.)]।
पावस, सं. स्त्री. (सं. प्रावृष्) दे. 'बरसात' (मौसिम)।
पावा, सं. पुं., दे. 'पाया' (१)।
पाश, सं. पुं. (सं.) शस्त्रभेदः, बंधनं २. जालं, मृगबंधनी, पातिली, वागुरा ३. दे. 'पाँसा'।
पाश्चात्य, वि. (सं.) पश्चिमदेशज, प्रतीच्य २. उत्तर, उत्तरगामिन् ३. पश्चिम, चरम, अपर, अवर।
पाषंड, सं. पुं., दे. 'पाखंड'।
पाषंडी, वि., दे. 'पाखंडी'।
पाषाण, सं. पुं. (सं.) दे. 'पत्थर'।
पासंग, सं. पुं. (फ़ा.) प्रतितोलकं, तुलापूरकम्।
पास[1], सं. पुं. (सं. पार्श्वः-र्श्वं) पक्षः, दिशा २. अधिकारः, आधिपत्यं (अव्य), निकटे, समीपं-पे, अंतिकं-के, आरात्, उपकंठं, निकषा, समया, सविधे (सब अव्य.)।
—पड़ोस, सं. पुं., समीप-सन्निहित,-देशः, प्रति-वेशः २. प्रातिवेश्याः-प्रतिवासिनः (पुं. बहु.)।
आस—, क्रि. वि., इतस्ततः, अभितः, परितः २. दे. 'लगभग'।
पास[2], सं. पुं. (अं.) *अनुज्ञापत्रम्। वि., उत्तीर्ण, सफल, सफलीभूत २. स्वीकृत, उररीकृत।
—बुक, सं. स्त्री. (अं.) धनागारपुस्तकम्।
पासा, सं. पुं. (सं. पाशकः) दे. 'पाँसा' २. दे. 'चौसर'।
—फेंकना, मु., भाग्यं परीक्ष् (भ्वा. आ. से.) २. अक्षैः दिव् (दि. प. से.)।
पाहुना, सं. पुं. (सं. प्राघुणः) प्राघुण(णि)कः, प्राघूर्णिकः, अतिथिः २. जामातृ, दे. 'दामाद'।
पाहुनी, सं. स्त्री. (हिं. पाहुना) प्राघुणिका-की, प्राघूर्णिकी २. आतिथ्यं, अतिथि-सत्कारः।
पिंग, वि. (सं.) आ-ईषत्,-पीत २. कपिल, पिंगल, पिशंग ३. आ-ईषत्,-पिंगल-कपिल।
पिंगल, सं. पुं. (सं.) छंदःसूत्रकारो मुनि-विशेषः २. (पिंगलरचितं) छंदःशास्त्रं ३. कपिः ४. उल्लूकः ५. अग्निः। वि., दे. 'पिंग'।
—शास्त्र, सं. पुं. (सं. न.) छन्दो,-विद्या-विज्ञानम्।
पिंगला, सं. स्त्री. (सं.) शरीर-नाडीभेदः।
पिंजड़ा-रा, सं. पुं. (सं. पिंजरं) पंजरः-रं, वि-(वी)तंसः।
पिंजर, सं. पुं. (सं. न.) कायास्थिवृंदं, कंकालः, अस्थिपंजरः-रं २. स्वर्णं ३. दे. 'पिंजड़ा'। वि., ईषत् पीत २. सुवर्णाभ ३. कपिल, पिंगल।
पिंड, सं. पुं. (सं. पुं. न.) गोलः-लं, वर्तुलद्रव्यं २. लोष्टः-ष्ठं, मृत्-खंडः-पिंडः, द्रव्यखंडः-डं, गंडः, घनः ३. चयः, राशिः ४. निवापः, श्राद्धोपयोगिभक्तादिगोलः ५. आहारः ६. शरीरं, देहः।
—खजूर, सं. स्त्री. (सं. पिंडखर्जूरः) राजजंबूः (स्त्री.), स्थूलपिण्डा, पिंडखर्जूरी, दीप्या, फलपुष्पा, हयभक्षा।
—दान, सं. पुं. (सं. न.) पिंडनिर्वापः।
—छोड़ना, मु., न वाध् (भ्वा. आ. से.)।
पिंडली, सं. स्त्री. (सं. पिंडी) जंघापिंडः, पिंडिका, पिंडिः (स्त्री.), पिचिंडिका।
पिंडा, सं. पुं. (सं. पिंडः-डं) दे. 'पिण्ड' (१, २, ४, ६)।
—पानी देना, मु., पितृभ्यः पिंडोदकं दा।
पिंडालू, सं. पुं. (पिंडालुः) रोमालुः, रोम-पिंड,-कंदः, रोमशः।
पिंडिका, सं. स्त्री. (सं.) क्षुद्रपिंडः-डं २. लोष्टकं ३. दे. 'पिंडली' ४. चक्रनाभिः (स्त्री.) ५. प्रति-मावेदिका।
पिंडित, वि. (सं.) पिंडी-धर्ना,-भूत २. गणित ३. गुणित।

पिंडी, सं. स्त्री. (सं.) दे. 'पिंडिका' (१,३,४)। ४. अलाबूः (स्त्री.) ५. पिंडखर्जूरः ६. वलिवेदी ७. सूत्रगोलः-लम्।

पिउ, वि. (सं. प्रिय) वल्लभ, कांत, दयित। सं. पुं., पतिः, भर्तृ।

पिक, सं. पुं. (सं.) कोकिलः, दे. 'कोयल'।

—बंधु, सं. पुं. (सं.) पिक,-रागः-वल्लभः, आम्रवृक्षः।

—बैनी, सं. स्त्री., कोकिलकंठा-ठी, सु-मधु-, कंठा-ठी।

पिघलना, क्रि. अ. (सं. प्रघरणम् >) गल्-क्षर् (भ्वा. प. से.), वि-, द्रु (भ्वा. प. अ.), द्रवीभू, वि-, ली (दि. आ. अ.) २. करुणार्द्रीदयार्द्रीभू, करुणया द्रु, दय् (भ्वा. आ. से.)। सं. पुं., क्षरणं, गलनं, विलयनं, द्रवणं २. दयार्द्रीभावः, दयनं, अनुकम्पनम्।

पिघलनेवाला, वि., वि-, लेय, द्रवणीय, गलनार्ह। पिघला हुआ, वि., वि,-लीन, वि,-द्रुत, गलित।

पिघलाना, क्रि. स., व. 'पिघलना' (१-२) के प्रे. रूप। सं. पुं., वि,-द्रावणं-लावनं, द्रवीकरणम्।

पिघलानेवाला, सं. पुं., विद्रावकः, विलयनकृत्।

पिघलाया हुआ, वि., वि,-द्रावित-लापित, क्षारित, गालित।

पिघालबिंदु, सं. पुं. (हिं.+सं.) द्रावाङ्कः, द्रवण,-अङ्कः-बिंदुः।

पिचकना, क्रि. अ., व. 'पिचकाना' के कर्म. के रूप।

पिचकाना, क्रि. स. (अनु. पिच) आ-नि-सं-पीड् (चु.), संमृद् (क्र. प. से.), आ-सं-कुच् (भ्वा. प. से)। सं. पुं., संपीडनं, संमर्दनं, संकोचनम्।

पिचकानेवाला, सं. पुं., संपीडकः संमर्दकः इ.।

पिचकाया हुआ, वि., संपीडित, संकोचित इ.।

पिचकारी, सं. स्त्री. (अनु. पिच >) रेचनयन्त्रं, शृङ्गं, शृङ्गकं, वस्ति (पुं. स्त्री.)।

—छोड़ना या मारना, मु., शृङ्गेण क्षिप् (तु. प. अ.), तरलद्रव्यं सवेगं प्रास् (दि.प.से.)।

पिचपिचा, (हिं. पिचपिचाना) उन्न, क्लिन्न, श्यान, सांद्र।

पिचपिचाना, क्रि. अ. (अनु. पिचपिच >) पिचपिचायते (ना. धा.), (शनैः) क्षर् (भ्वा. प. से.), प्र-स्नु (अ. प. से.)।

पिचुक्का, सं. पुं., दे. 'पिचकारी' २. दे. 'गोलगप्पा'।

पिछड़ना, क्रि. अ. (हिं. पिछाड़ी) मंदं चल्-र् (भ्वा. प. से.), मंदायते-चिरायति (ना.धा.), पश्चात् वृत् (भ्वा. आ. से.)।

पिछड़नेवाला, सं. पुं., मंदः, मंथरः, मंदगामिन्।

पिछलगा-पिछलग्गू, सं. पुं. (हिं. पीछे+लगना) अनुयायिन्, अनुगामिन्, अनुवर्तिन्, शिष्यः २. सेवकः ३. आश्रितः।

पिछला, वि. (हिं. पीछा) पृष्ठस्थ, पश्चिम, पृष्ठ्य, पश्च-, पश्चात्-, २. उत्तर, उत्तरकालीन, अपर, पर, पाश्चात्य ३. अन्त्य, अन्तिम, उत्तर ४. गत, अतीत, पुराण।

पिछवाड़ा, सं. पुं. } (हिं. पीछा) गृहस्य
पिछवाड़ी, सं. स्त्री. } पृष्ठ, पृष्ठभागः २. पृष्ठपश्चाद्,-भागः ३. गृहपृष्ठवर्तिभूमिः (स्त्री)।

पिछाड़ी, सं. स्त्री. (हिं पीछा) पृष्ठ, पृष्ठ-पश्चाद्,-भागः-देशः २.(अश्वादीनां) पृष्ठपादरज्जुः स्त्री.)।

पिटना, क्रि. अ. (हिं. पीटना) ताड्-आहन् (कर्म.)।

पिटवाना, क्रि. प्रे., व. 'पीटना' के प्रे. रूप।

पिटाई, सं. स्त्री. (हिं. पीटना) ताडनं, प्रहरणं, आहनन २. ताडनभृतिः (स्त्री.)।

पिटारा, सं. पुं. (सं. पिटः) पेटः, करंडः, कडोलः।

पिटारी, सं. स्त्री. (हिं. पिटारा) पिटकः-कं, पेट(टा)कः, पेडा, मंजूषा, पेटि(डि)का, तराः रिः (स्त्री.)।

पिट्ठू, सं. पुं. (हिं. पीठ) अनुगामिन्, अनुयायिन् २. सहायः, साहाय्यकारिन्।

पित, सं. स्त्री. (सं. पित्तं >) धर्मचर्चिका, घर्मकंटकः।

पितपापड़ा, सं. पुं. (सं. पर्पटः) अरकः, वरकः, सु-, तिक्तः, चरकः, शीतः, प्रगंधः।

पितर, सं. पुं. (सं. 'पितृ' का बहु.) पिंड-स्वधा श्राद्ध, भुजः-भाजः, पिंडाशाः (सब बहु.)।

पितराई, सं. स्त्री. (हिं. पीतल) पित्तल-ताम्र,-किट्टं-मलं-स्वादः, दे. 'कसाव'।

पिता, सं. पुं. (सं. पितृ) तातः, जनकः, वप्तृ, प्रसवितृ, जनयितृ, जनितृ, जन्मदः, वीजिन् ।
—मह, सं. पुं. (सं.) दे. 'दादा' ।
—मही, सं. स्त्री. (सं.) दे. 'दादी' ।
पितृ, सं. पुं. (सं.) दे. 'पिता' २. दिवंगताः पूर्वपुरुषाः २. देवविशेषाः ।
—ऋण, सं. पुं. (सं. न.) जायमानस्य ऋण-भेदः (अपना पुत्र उत्पन्न होने पर मनुष्य पितृ-ऋण से मुक्त होता है । धर्म.) ।
—कर्म, सं. पुं. [सं.-र्मन् (न.)] श्राद्धतर्पणादिक्रिया ।
—गृह, सं. पुं. (सं. न.) श्मशानं २. दे. 'मायका' ।
—तर्पण, सं. पुं. (सं. न.) नि-निर्,-वापः, निवपनं, निर्वपणं २. दे. 'तिल' ।
—तिथि, सं. स्त्री. (सं. पुं. स्त्री.) अमाव-(वा)स्या ।
—तीर्थ, सं. पुं. (सं. न.) गया २. वाराणस्यादितीर्थस्थानानि ३. तर्जन्यंगुष्ठयोर्मध्यम् ।
—पक्ष, सं. पुं. (सं.) आश्विनकृष्णपक्षः २. पितृ-संबंधिनः (बहु.) ।
—यज्ञ, सं. पुं. (सं.) पितृतर्पणम् ।
—लोक, सं. पुं. (सं.) पितृभुवनम् ।
पितृक, वि. (सं.) दे. 'पैतृक' ।
पितृव्य, सं. पुं. (सं.) दे. 'चाचा' ।
पित्त, सं. पुं. (सं. न.) मायुः, पलज्वलः, तिक्तधातुः ।
—की थैली, सं. स्त्री., पित्तकोषः (gall-bladder) ।
—पथरी, सं. स्त्री., पित्ताश्मरी ।
—घ्न, वि. (सं.) पित्त-मायु,-हर-नाशक ।
—ज्वर, सं. पुं. (सं.) पैत्तिक-मायुज,-ज्वरः ।
—पापड़ा, सं. पुं., दे. 'पितपापड़ा' ।
—प्रकृति, वि. (सं.) मायुप्रकृति २. क्रोधिन् ।
—प्रकोप, सं. पुं. (सं.) पित्त-मायु,-प्रकोपः-आधिक्यं-विकारः ।
—हर, वि. (सं.) दे. 'पित्तघ्न' ।
पित्तल, सं. पुं (सं. न.) आरकूटः,-टं, आरः, क्षुद्र-सुवर्णं, रीती-तिः (स्त्री.), पीतलकं, पीतकं, पिंगललोहम् ।
—का, वि., पित्तल-पीतक,-मय(-यी स्त्री.) ।
पित्ता, सं. पुं. (सं. पित्तं>) दे. 'पित्ताशय' २. साहसं, वीर्यं, शौर्यं ३. कोपः, क्रोधः ।
—खौलना, मु., अत्यंतं क्रुध् (दि. प. अ.) ।
—निकालना, मु., नितरां परिश्रम् (प्रे.) ।
—पानी करना, मु., सुतरां परिश्रम् (दि.प.से.)।
—मारना, मु., क्रोधं जि-नियम् (भ्वा.प.अ.)।
पित्ताशय, सं. पुं. (सं.) पित्त-मायु,-कोषः ।
पित्ती, सं. स्त्री. (सं. पित्तं>) शीतपित्तम्, पित्तविकारजः त्वग्रोगभेदः, २. दे. 'पित' ।
पिदड़ी, सं. स्त्री., दे. 'पिद्दी' ।
पिद्दा, सं. पुं. } (अनु. पिद)
पिद्दी, सं. स्त्री. } चटकभेदः २. तुच्छ,-जीवः-पदार्थः ।
पिधान, सं. पुं. (सं. न.) आच्छादनं, आवरणं, कोषः २. छदः, छदनं, पुटः-टं-टी ३. असिकोषः ।
पिन, सं. स्त्री. (अं.) *धातुकटकः-कं, अन्धसूची ।
पिनकना, क्रि. अ. (अनु.) (अहिफेनमदेन) ईषत् निद्रा-स्वप् (अ. प. अ.) ।
पिनाक, सं. पुं. (सं. पुं. न.) (शिवस्य) चापः, धनुस् (न.) २. त्रिशूलम् ।
पिनाकी, स. पुं. (सं.-किन्) शिवः, महादेवः ।
पिन्ना, सं. पुं. (सं. पिंडः-डं) तैलकिट्ट-पिण्याक,-पिंडः-डं २. सूत्र,-गोलः-पिंडः ।
पिन्नी, सं. स्त्री. (सं. पिंडी) पिंडिका, पिंडिः (स्त्री.) कांदव,-मिष्टान्न-भेदः २. दे. 'पिंडली' ।
पिपरामूल, सं. पुं. (सं. पिप्पलीमूलं) कोल-कटु,-मूलं, ग्रंथिक, सर्व-पड्-कटु,-ग्रंथि (न.) ।
पिपली, सं. स्त्री. (सं. पिप्पली) पिप्पलिः (स्त्री.) श्यामा, कृष्णा, मागधी, उ(ऊ)षणा, कोला, दंतफला ।
पिपासा, सं. स्त्री. (सं.) तृषा, दे. 'प्यास' ।
पिपासित, वि. (सं.) तृषित, दे. 'प्यासा' ।
पिपासु, वि. (सं.) तृषित, दे. 'प्यासा' ।
पिपीलक, सं. पुं. (सं.) पिपीलः, पिपीलिकः, पीलकः, दे. 'चींटा' ।
पिपीलिका, सं. स्त्री. (सं.) पिपी(पि)ली, हीरा, दे. 'चींटी' ।
पिप्पल, सं. पुं. (सं.) अश्वत्थः, दे. 'पीपल' ।
पिप्पलाद, सं. पुं. (सं.) ऋषिविशेषः ।
पिप्पली, सं. स्त्री. (सं.) दे. 'पिपली' ।

—मूल, सं. पुं., दे. 'पिपरामूल'।
पिय, पिया, वि. (सं. प्रिय) वल्लभ, कांत, दयित। सं. पुं, पतिः, भर्तृ।
पिरिच, सं. पुं. (देश.) दे. 'तश्तरी'।
पिरोना, क्रि. स. (सं. प्रोत>) सूत्र् (चु.), गु(गुं)फ् (तु. प. से.), सं-,ग्रंथ् (क्र. प. से.), सं-,दृभ् (चु; भ्वा., तु. प. से.)। सं. पुं., सूत्रणं, गुंफनं, ग्रंथनं, संदर्भणम्।
पिरोने योग्य, सूत्रयितव्य, गुंफनीय इ.।
पिरोनेवाला, सं. पुं., गुंफकः, ग्रंथकः, सूत्रयितृ इ.।
पिरोया हुआ, वि., सूत्रित, गुंफित, ग्र(ग्रं)थित, संदृब्ध इ.।
पिलना, क्रि. अ. (सं. पेलनं>) सहसा प्रविश् (तु. प. अ.) २. सवेगं अभिद्रु (भ्वा. प. अ.)-आपत् (भ्वा. प. से.) ३. सोत्साहं प्रवृत् (भ्वा. आ. से.), अत्यंतं परिश्रम् (दि. प. से.) ४. निष्पीड्-निष्कृष् (कर्म.)।
पिलपिला, वि. (अनु. पिलपिल) शिथिल, अतिपक्व, अतिमृदु।
पिलाना, क्रि. प्रे. (हिं. पीना) पा (प्रे. पाययति), धे (प्रे., धापयति), चम् (प्रे., चामयति), २. स्तन्यं-स्तनं पा-धे (प्रे.)।
पिल्ला, सं. पुं. (तामिल) श्व,-शावकः-शिशुः।
पिशंग, वि. (सं.) कपिल, पिंगल।
पिशाच, सं. पुं. (सं.) भूतः, प्रेतः, राक्षसः, वेतालः, असुरः, दानवः, दैत्यः, निशाचरः।
पिशाचनी, सं. स्त्री. (सं. पिशाची) पिशाचिका, निशाचरी, राक्षसी।
पिशुन, सं. पुं. (सं.) द्विजिह्वः, सूचकः, कर्णेजपः २. परोक्षनिंदकः, परिवादरतः ३. दुर्जनः, खलः, नीचः, गर्ह्यः।
पिशुनता, सं. स्त्री. (सं.) पैशुन्यं, पिशुनत्वं, द्विजिह्वता २. परोक्ष,-निंदा-परि(री)वादः ३. दुर्जनता।
पिष्ट, वि. (सं.) चूर्णित, चूर्णीकृत, क्षुण्ण। सं. पुं., दे. 'पीठी'।
—**पेषण,** सं. पुं (सं. न.) चूर्णितचूर्णनं, क्षुण्णक्षोदनं २. पुनरुक्तिः (स्त्री.), पौनरुक्त्यं, पुनर्,-वचनं-वादः।
पिसनहारी, सं. स्त्री. (हिं. पीसना) *पेषणकारी।
पिसना, क्रि. अ., व. 'पीसना' के कर्म. के रूप।
पिसाई, सं. स्त्री. (हिं. पीसना) पेषणं, चूर्णनं, विदलनं, क्षोदनं २. पेषण-चूर्णन,-भृतिः (स्त्री.)-भृत्या ३. घोरपरिश्रमः।
पिसान, सं. पुं. (हिं. पिसा+सं. अन्नम्) दे. 'आटा'।
पिसा(सवा)ना, क्रि.प्रे.,व. 'पीसना' के प्रे. रूप।
पिस्ता, सं. पुं. (फ़ा.) मुकूलकम्।
पिस्तौल, सं. पुं. (अं. पिस्टल) गुलिकास्त्रं, लघ्वग्न्यस्त्रम्।
पिस्सू, सं. पुं. (फ़ा. पश्शः=मच्छर) *कुटकी, देहिका, कुटः।
पिहित, वि. (सं.) तिरोहित, गुप्त २. अर्थालंकारभेदः (सा.)।
पींजना, क्रि. स. (सं. पिंजनं=धुनकी>) *पिंज् (प्रे. पिंजयति) दे. 'धुनना'।
पीक, सं. स्त्री. (अनु. पिच्) पर्णष्ठ्यूतं, तांबूललाला।
—**दान,** सं. पुं. (हिं+फ़ा.) पतद्ग्रहः, प्रतिग्राहः, *लालाधानं, निष्ठीवनपात्रम्।
पीच, सं. स्त्री. (सं. पिच्छा) पिच्छलः-लं-ला, भक्तमंडः-डं, दे. 'मांड'।
पीछा, सं. पुं. (सं. पश्चात्>) पृष्ठं, पृष्ठ-पश्च-पश्चाद्-भागः-देशः २. अनु,-गमनं-सरणं-धावनं ३. अन्वेषणम्।
—**करना,** मु., अनु,-इ-या (अ. प. अ.) अनु,-गम्-सृ (भ्वा. प. अ.), अनु-धाव्-व्रज् (भ्वा. प. से.) २. साग्रहं प्रार्थ् (चु. आ. से.)।
—**छुड़ाना,** मु., परिहृ (भ्वा. प. अ.), वि-परि-वृज् (चु.), आत्मानं रक्ष् (भ्वा. प. से.)-त्रै (भ्वा. आ. अ.)।
—**छोड़ना,** मु., न बाध् (भ्वा. आ. से.) व्यथ्-संतप् (प्रे.)।
पीछे, क्रि. वि. (हिं. पीछा) अनु (द्वितीया के साथ), पृष्ठतः, पश्चात्, पश्चाद्-पृष्ठ,-भागे-देशे २. अनंतरं, ऊर्ध्वं, परं, पश्चात् (सब अव्य.) ३. अनुपस्थितौ, अभावे, परोक्षं-क्षे ४. निधनानंतरं ५. हेतोः, कारणात्, निमित्तात् ६.-अर्थं,-अर्थे, कृते (षष्ठी के साथ) ७. अंततः, अंते, परिणामे।

—आना, मु., विलंबेन या कालमतिक्रम्य आया (अ. प. अ.)।
—चलना, मु., अनु-इ-या (अ. प. अ.), अनु-व्रज् (भ्वा. प. से.)-सृ (भ्वा. प. अ.)-कृ।
—घूटना या रहना, मु., अतिक्रम्-अतिलंघ् (कर्म.) मंदं चल् (भ्वा. प. से.) मंदायते (ना. धा.)।
—पड़ना, मु., साग्रहं प्रार्थ् (चु. आ. से.) २. सततं बाध् (भ्वा. आ. से.)-अर्द्-व्यथ् (प्रे.)।
—लगना, मु.. इष्टसिद्धये सततं अनुगन्, २. रोगादिभिः निरंतरं पीड् (कर्म.)।
पीटना, क्रि. स. (सं. पीडनं>) अभि-उप-प्र-हन् (अ. प. अ.), आहन् (अ. उ. अ.), प्रहृ (भ्वा. प. अ., सप्तमी के साथ) २. तड् (चु.), तुद् (तु. प. अ.), प्रहृ, आहन्, अर्द्-पीड् (चु.) ३. दंड् (चु.), निग्रह् (क्र. प. से.)। सं. पुं., आहतिः (स्त्री.), आघातः, प्रहारः; ताडनं, प्रहरणं, पाडनं, दंडनं, निग्रहः; मृत्यु-शोकः, आपद्-विपद् (स्त्री.)।
पीटने योग्य, वि., आहननीय, प्रहरणीय, ताडनीय, दंडयितव्य।
—वाला, सं. पुं., आ-अभि-, हंतृ, प्रहर्तृ; ताडयितृ, पीडकः, दंडयितृ।
पीटा हुआ, वि., आहत, प्रहत, ताडित, दंडित इ.।
पीठ[1], सं. स्त्री. (सं. पृष्ठं) पश्चिमांगं, तनुचरमं २. पश्चाद्-पृष्ठ,-भागः-देशः।
—चारपाई से लगना, मु., नितरां क्षि (भ्वा. प. अ.)-कृशी भू।
—ठोंकना, मु., उत्तिज्-प्रोत्सह् (प्रे.)।
—दिखाना या देना, मु., पलाय् (भ्वा. आ. से.) अपधाव् (भ्वा. प. से.) २. परित्यज् (भ्वा. प. अ.)।
—पर हाथ फेरना, मु., दे. 'पीठ ठोंकना' २. पृष्ठं परामृश् (तु. प. अ.)।
—पीछे, मु., अनुपस्थितौ, परोक्षं-क्षे।
—पीछे कहना, मु., परोक्षे निंद् (भ्वा. प. से.)।
—फेरना, मु., प्रस्था (भ्वा. आ. अ.) २. प्राङ्-मुखी भू (३-४) दे. 'पीठ दिखाना'।
—लगना, मु., मल्लयुद्धे उत्तानो निपत् (भ्वा. प. से.) २. सर्वथा पराजि (कर्म.)।
—लगाना, मु., मल्लयुद्धे उत्तानं निपत् (प्रे.) ३. सर्वथा विजि (भ्वा. आ. अ.)।
पीठ[2], सं. पुं. (सं. न.) (काष्ठपाषाणचर्मादिनिर्मितं) आसनं, पीठी २. (व्रतिनां) कुशासनं, विष्टरः ३. प्रतिमाधारः ४. अधिष्ठानं, आवासः ५. सिंहासनं ६. वेदी-दिका ७. प्रदेशः, प्रांतः।
पीठिका, सं. स्त्री. (सं.) दे. 'पीठ' (१)। २. (स्तंभादीनां) आधारः, पादः ३. अंशभागः।
पीठी, सं. स्त्री. (सं. पिष्टिका), पिष्टार्द्रदालीलिः (स्त्री.), पिष्टद्विदलः।
पीड़क, सं. पुं. (सं.) दुःख,-दः-दायकः-दायिन्, क्लेशकरः, पीडावहः।
पीड़न, सं. पुं. (सं. न.) अर्दनं, बाधनं, उपमर्दन, क्लेशनं २. दे. 'दबाना'।
पीड़ा, सं. स्त्री. (सं.) वेदना, व्यथा, दुःख, रुज् (स्त्री.), रुजा, अ(आ)र्तिः (स्त्री.), क्लेशः, बाधः-धा, यातना, कष्टं, कृच्छ्रं, परि-सं,-तापः।
—कर, वि. (सं.) दुःख-कष्ट-व्यथा,-कर-आवह-प्रद इ.। [—करी (स्त्री.) = दुःखदा]।
मानसिक—, सं. स्त्री. (सं.) आधिः, मनोव्यथा, चित्तोद्वेगः।
शारीरिक—, सं. स्त्री. (सं.) व्याधिः, रोगः।
पीड़ित, वि. (सं.) दुःखित, व्यथित, क्लेशित, सव्यथ, सरुज, कृच्छ्रगत।
पीढ़ा, सं. पुं. (सं. पीठं) दे. 'पीठ' (१)।
पीढ़ी, सं. स्त्री. (सं. पीठी) पीठकः-कं (काष्ठादिनिर्मितं) उपासना, क्षुद्रासनम्।
पीढ़ी[2], सं. स्त्री. (सं. पीठी) वंशपरापरायां पितृपितामहपुत्रपौत्रादीनां पूर्वापरस्थानं, संततिक्रमः।
पीत, वि. (सं.) हरिद्राभ, दे. 'पीला'।
पीतल, सं. पुं., दे. 'पित्तल'।
पीतांबर, सं. पुं. (सं. न.) हरिद्राभवस्त्रं २. श्रीकृष्णचंद्रः। वि., पीतवस्त्रधारिन्।
पीढ़ी, सं. स्त्री., दे. 'पिंडी'।
पीन, वि. (सं.) पीवर, स्थूल, पुष्ट, मांसल।
पीनक, सं. स्त्री. (हिं. पिनकना) अफेनतंद्रा, अहिफेननिद्रा।

पीनता, सं. स्त्री. (सं.) पीवरता, स्थूलता, पुष्टता ।

पीनस[1], सं. पुं. (सं.) अपीनसः, नासिकामयः, घ्राणशक्तिराहित्यम् ।

पीनस[2], सं. स्त्री. (फ़ा. फीनस) दे. 'पालकी' ।

पीना, क्रि. स. (सं. पानं) पा-पे (भ्वा. प. अ.), चम् (भ्वा. प. से.), पानं कृ २. सह् (भ्वा. आ. से.) ३. (क्रोधादीन्) नि-सं-यम् (भ्वा. प. अ.), प्र-, शम् (प्रे.) ४. मद्यं पा, सुरापानं कृ ५. उत्-, शुष् (प्रे.) ६. धूमं पा, धूमपानं कृ । सं. पुं., धयः, पानं, आचमनं, पीतिः (स्त्री.)।

पीने योग्य, वि., पेय, पानीय, चमनीय, धेय ।

—वाला, सं. पुं.-धयः, पायिन्, धातृ २. पान,-आसक्तः रतः शौंडः, मद्यपः ।

पिया हुआ, वि., पीत, धीत, चांत ।

पीप-व, सं. स्त्री. (सं. पूयः-यं) क्षतजं, मलजं, प्रसितं पूयनं, कुणपम् ।

—पड़ना, क्रि. अ., पूय् (भ्वा. आ. से) ।

पीपल[1], सं. पुं. (सं. पिप्पलः) अश्वत्थः, क्षीरशुचि-बोधि,-द्रुमः, चल,-दलः-पत्रः, कुञ्जराशनः ।

पीपल[2], सं. स्त्री., दे. 'पिपली' ।

पीपलामूल, सं. पुं., दे. 'पिपरामूल' ।

पीपा, सं. पुं. (देश.)*पटहपात्रम् ।

पीयूष, सं. पुं. (सं. पुं. न.) सुधा, अमृतं २. (नवप्रसूतायाः गोः) दुग्धम् ।

—वर्षी, वि. (सं.-र्षिन्) सुधास्यंदिन्, सुमधुर ।

पीर[1], सं. स्त्री. (सं. पीड़ा) दे. 'पीड़ा' २. सहानुभूतिः (स्त्री.) ३. प्रसवपीड़ा ।

पीर[2], वि. (फ़ा.) वृद्ध, जरठ २. धूर्त्त । सं. पुं., धर्मगुरुः, सिद्धः (मुसलमान) ।

पीरी, सं. स्त्री. (फ़ा.) जरा, वार्धक्यम् ।

पील, सं. पुं. (फ़ा.) गजः, द्विपः ।

—पाँव, सं. पुं. (फ़ा. + हिं.) श्लीपदं, शिलीपदम् ।

पीला, वि. (सं. पीत) पीतल, हरिद्राभ, सुवर्ण-कुंकुम,-वर्ण २. निस्तेजस्क, कांतिहीन । (पीली (स्त्री.) = पीता, हरिद्राभा) ।

—बुखार, सं. पुं., पीतज्वरः ।

—पड़ना या होना, मु., पांडुच्छाय (वि.) भू, गतश्रीक-नीरक्त (वि.) जन् (दि. आ. से.) ।

पीलिया, सं. पुं. (हिं. पीला) दे. 'पांडुरोग' ।

पीलू, सं. पुं. (सं. पीलुः) गुड़फलः, शीतसहः, विरेचनः, श्यामः, करभवल्लभः २. कृमिः, कीटः ३. रागभेदः ।

पीवर, वि. (सं.) दे. 'पीन' ।

पीसना, क्रि. स. (सं. पेषणं) पिष्-क्षुद् (रु. प. अ.), चूर्ण् (चु.), चूर्णीकृ, मृद् (क्र्. प. से.) २. सजलं पिष् इ. ३. विकटं परिश्रम् (दि. प. से.) । सं. पुं., पेषणं, चूर्णनं, मर्दनं, खंडनं २. पेषणीयपदार्थः ।

पीसने योग्य, वि., पेषणीय, चूर्णयितव्य इ. ।

—वाला, सं. पुं., पेषकः, चूर्णयितृ, मर्दकः ।

पीसा हुआ, वि., पिष्ट, चूर्णित, मर्दित ।

—पीसना, मु., सततं घोरं च परिश्रम् ।

पीहर, स. पुं. (सं. पितृगृहं >) नारीणां पितृवेश्मन् (न.) ।

पुंगव, सं. पुं. (सं.) वृषः, वृषभः । वि., श्रेष्ठ, उत्तम (उ. नरपुंगवः = मानवोत्तमः) ।

पुंज, सं. पुं. (सं.) उत्करः, राशिः, चयः ।

पुंड, सं. पुं. (सं.) पुंड्रः, दे. 'तिलक' ।

पुंडरीक, सं. पुं. (सं. न.) शुक्लाब्जं, शतपत्रं, महापद्मं, सित,-अंबुज-अंभोजं २. कमलं ३. सिंहः ४. व्याघ्रः ५. तिलकः ६. श्वेतच्छत्रं ७. शर्करा ८. तीर्थविशेषः ९. कुष्ठभेदः ।

पुंडरीकाक्ष, सं. पुं. (सं.) विष्णुः । वि., कमलनयन (नयनी-ना, स्त्री) ।

पुंड्र, सं. पुं. (सं.) दे. पुंड्रक (१) २. दे. 'पुंडराक' (१) ३. दे. 'पुंड' ।

पुंड्रक, सं. पुं. (सं.) रसालः-ली, इक्षु,-वाटी-योनिः (स्त्री.), रसदालिका, करंकशालिः, इक्षुभेदः । २. माधवी लता ३. तिलकः ४. तिलकवृक्षः ।

पुंलिंग, सं. पुं. (सं. न.) पुरुषचिह्नं २. शिश्नः ३. (प्रायः) पुरुषवाचकशब्दः (व्या.) ।

पुंश्चली, सं. स्त्री. (सं.) कुलटा, व्यभिचारिणी, त्रपारंडा, स्वैरिणी ।

पुंसवन, सं. पुं. (सं. न.) संस्कारभेदः (धर्म.) ।

पुंस्त्व, सं. पुं. (सं. न.) पौरुषं, पुरुषत्वं, मैथुनसामर्थ्यं २. शुक्रं, वीर्यं ३. तेजस्-ओजस् (न.) ।

पुआ, सं. पुं. (सं. पूपः) अपूपः, पिष्टकः ।

पुआल, सं. पुं., दे. 'पयाल' ।

पुकार, सं. स्त्री. (हिं. पुकारना) आह्वयनं, आह्वानं आहावः, आह्(हु)तिः (स्त्री.), आकार(क)णं-णा, संबोधनं २. परिदेवनं, दुःखनिवेदनं ३. प्रबलप्रार्थना, उच्चस्वरेण याचना ४. चीत्कारः, उत्क्रोशः ।

पुकारना, क्रि. स. (सं. प्लुतकरणं >) आ-, ह्वे (भ्वा. प. अ.), आकृ संवुज् (प्रे.) २. उच्चैः कथ् (चु.), उद्व्युप् (प्रे.) ३. तारस्वरेण याच् (भ्वा. आ. से.)-प्रार्थ् (चु. आ. से.) ४. रक्षायै आ वि-कृश् (भ्वा. प. अ.) ५. (प्रतिकारार्थं) परिदेव् (भ्वा. आ. से., चु.), दुखं निन्दि (चु.) ६. नाम कृ, अभिधा (जु. उ. अ.) । सं. पुं., दे. 'पुकार' ।

पुकारने योग्य, वि., आ-, ह्वेय, आकार्य, संबोधनीय ।

—वाला, सं. पुं., आह्वायकः, आकारकः इ. ।

पुकारा हुआ, वि., आहूत, आकारित इ. ।

पुखराज़, सं. पुं. (सं. पुष्पराजः) पुष्परागः, पीतः, पीत,-स्फटिकः-मणिः-अश्मन् (पुं.), मंजुमणिः ।

पुचकार-री, सं. स्त्री. (हिं. पुचकारना) पुच,-कारः-करणं-कृतिः (स्त्री.) ।

पुचकारना, क्रि. स. (अनु. पुच) पुचपुचायते (ना. धा.), पुचिति शब्दं कृ ।

पुच्छ, सं. स्त्री. (सं. पुं. न.) दे. 'पूँछ' ।

पुच्छल, वि (सं. पुच्छं >) पुच्छिन्, सपुच्छ, लांगूलिन्, लांगूलवत् ।

—तारा, सं. पुं., धूम्र-केतुः, उल्का, उत्पातः ।

पुछल्ला, सं. पुं. (हिं. पूंछ) दीर्घपुच्छः-च्छं, लंब-लांगूलं २. चाटुकारः, मिथ्याशंसकः ३. परिहायसंगिन् ।

पुजना, क्रि. अ. (हिं. पूजना) पूज्-अभ्यर्च् (कर्म.) ।

पुजवाना, पुजाना, क्रि. प्रे., व. 'पूजना' के प्रे. रूप ।

पुजापा, सं. पुं. (सं. पूजापत्रं) पूजा,-प्रसेवः-पुटः २. पूजासामग्रो, देव,-उपायनं-उपहारः, नैवेद्यम् ।

पुजारी, सं. पुं. (सं. पूजाकारिन्) प्रतिमा-, पूजकः, देवलः-लकः २. भक्तः, उपासकः ।

पुट[1], सं. पुं. (अनु.) शाकरसेकः २. आ ईषद्-रंजनं ३. आ ईषत्,-मिश्रणं-संपर्कः ।

पुट[2], सं. पुं. (सं. पुं. न.) आच्छादनं, आवरणं, कोषः, स्थानं, वेष्टनं २. पर्णपुटः ट., पत्र-, द्रोणं ३. द्रोणाकारपदार्थः (उ., अंजलिपुटं) ४. औषधपाकाय पात्रभेदः ।

—पाक, सं. पुं. (सं.) पुटस्थौषधपचनं (वैद्यक) ।

पुटका, सं. स्त्री. (सं. पुटकं >) दे. 'पोटला' ।

पुट्ठा, सं. पुं. (सं. पृष्ठं >) नितंबः, जघनं, कटिप्रोथः, २. अश्वादीनां नितंबः इ. ३. ग्रंथावरकपृष्ठम् ।

पुट्ठो, सं. स्त्री. (हिं. पुट्ठा >) शकटनेमीनामः ।

पुड़ा, सं. पुं.(सं. पुटः-ट) खपोलः २. दे. 'पुड़ी' ।

पुड़िया, स. स्त्री. (सं. पुटिका) पत्र-, पुटिका २. औषधपुटिका ।

पुड़ी, सं. स्त्री. (सं. पुटी >) दे. 'पुड़िया' २. पटह-चर्मन् (न.) ।

पुण्य, सं. पुं. (सं. न.) शुभादृष्टं, सुकृतं, धर्मसु-भद्र,-कृत्यं, धर्मः, वृषः, श्रेयस् (न.) । वि., शुभ, मंगल, पवित्र, भद्र, शास्त्र-धर्म,-विहित ।

—भूमि, सं. स्त्री. (सं.) भारतं, भ(भा)रतवर्षं, आर्यावर्तः ।

—लोक, सं. पुं. (सं.) स्वर्गः, नाकः, सुरलोकः ।

—वान्, वि. (सं.-वत्)
—शाल, वि. (सं.) } दे. 'पुण्यात्मा' ।

—श्लोक, वि. (सं.) सच्चरित्र, आर्यवृत्त ।

—स्थान, सं. पुं. (सं. न.) पवित्रस्थलं २. तीर्थस्थानम् ।

पुण्यात्मा, वि. (सं.-त्मन्) पुण्यवत्, पुण्यशील, धर्मशील, धार्मिक, धर्मात्मन् ।

पुण्योदय, सं. पुं (सं.) सौभाग्योदयः, पूर्वसुकृतफलम् ।

पुतला, सं पुं. (सं. पुत्तलकः) दे. 'पुतली' (१) (मृत्तिकावस्त्रादिनिर्मिता) प्रतिमूर्तिः-प्रतिकृतिः (स्त्री.) ।

अकल का—, वि., चतुर, दक्ष ।

ख़ाक का—, सं. पुं., मानवः, मनुष्यशरीरम् ।

पुतली, सं. स्त्री. (सं. पुत्तली) पुत्रिका, पुत्तलिका, कुरुटी, पांचाली-लिका, शालभंजिका २. कनीनिका, तारा,-तारका ३. तन्वी, कृशांगी ४. वस्त्रयंत्रं ५. भेकाकारमश्वखुरमांसम् ।

—का तमाशा, सं. पुं., पुत्तली,-कौतुकं-नृत्यम्।
—घर, सं. पुं., वस्त्रयंत्रालयः।
—फिरना, मु., कनीनिके स्तंभ् (कर्म., मृत्यु-चिह्न) २. दृप् (दि. प. अ.)।
पुताई, सं. स्त्री. (हिं. पोतना) लेपः, लेपनं २. लेपन,- भृतिः (स्त्री.)-भृत्या ३. सुधालेपः।
पुत्तलिका, सं. स्त्री. (सं.) दे. 'पुतली' (१)।
पुत्र, सं. पुं. (सं.) पुत्रः, आत्मजः, तनयः, सुतः, सूनुः, तनु(नू)जः, पुंसंतानः, दायादः, नंदनः, आत्मजन्मन् (पुं.), अंगजः, कुमारः, दारकः।
—वती, वि. स्त्री. (सं.) सुपुत्रा, सुतवती।
—वधू, सं. स्त्री. (सं.) स्नुषा, वधूः (स्त्री.), जनी, पुत्रपत्नी।
पुत्रिका, सं. स्त्री. (सं.) दे. 'पुत्री' २. दे. 'पुतली' ३. कनीनिका, तारा।
पुत्री, सं. स्त्री. (सं.) कन्या, आत्मजा, दुहितृ (स्त्री.), तनुजा, सुता, तनया, स्वजा, नंदिनी।
पुत्रेष्टि, सं. स्त्री. (सं.) पुत्रनिमित्तक-यज्ञभेदः।
पुदीना, सं. पुं. (फ़ा. पोदीनः) पुदीनः, व्यञ्जनः, सुगंधिपत्रः, वातहारिन्, अजीर्णहरः, रुचिष्यः।
पुनः, अव्य. (सं. पुनर्) भूयः (अव्य.)।
—पुनः, अव्य. (सं.) भूयोभूयः, वारंवारं,-रेण, अनेकवारं, मुहुः, असकृत्, पौनःपुन्येन।
पुनरावृत्ति, सं. स्त्री. (सं.) पुनः पाठः, पुनरध्ययनं २. आवृत्तिः-प्रत्यावृत्तिः (स्त्री.) ३. पुनः,-विधानं-संपादनं-करणं ४. पुनरीक्षणं, संशोधनम्।
पुनरुक्ति, सं. स्त्री. (सं.) पौनरुक्त्यं, पुनर्वचनम्।
पुनर्जन्म, सं. पुं. [सं.-जन्मन् (न.)] पुनर्भवः, पुनरुत्पत्तिः (स्त्री.), प्रेत्यभावः, देहांतरप्राप्तिः (स्त्री.)।
पुनर्भू, सं. स्त्री. (सं.) द्विरूढा, दिधिषूः (स्त्री.)।
पुनर्वसू, सं. पुं. (सं. द्वि.) यामकौ, आदित्यौ (द्वि.)।
पुनीत, वि. (सं.) पूत, पवित्र, शुद्ध, निर्दोष।
पुन्य, सं. पुं., दे. 'पुण्य'।
पुमान्, सं. पुं. (सं. पुंस्) नरः, पु(पू)रुषः, नृ (पुं.)।
पुरंदर, सं. पुं. (सं.) दे. 'इंद्र' २. नगरभंजकः ३. चौरः।
पुरंध्री, सं. स्त्री. (सं.) पुरंध्रिः (स्त्री.), कुटुंबिनी २. नारी।

पुरः, अव्य. (सं. पुरस्) अग्रे, अग्रतः, संमुखे, पुरतः, पुरस्तात्, समक्षं (सब अव्य. षष्ठी के साथ) २. पूर्वं, प्राक्, अर्वाक् (सब अव्य. पंचमी के साथ) ३. प्राच्यां दिशि।
पुर, सं. पुं. (सं. न.) नगरं-री, पुर् (स्त्री-) पुरी, पत्तनं, स्थानीयं २. शरीरं ३. दुर्गं ४. गृहं ५. लोकः, भुवनम्।
—द्वार, सं. पुं. (सं. न.) नगरं, द्वारम्।
—वासी, सं. पुं. (सं.-सिन्) पौरः, नागरिकः, पुर-नगर,-जनः।
अंतः—, सं. पुं. (सं. न.) अवरोधः, शुद्धांतः।
पुरखा, सं. पुं. (सं. पुरुषः>) पूर्वजाः, पूर्वपुरुषाः, पितरः, वंशकराः (प्रायः बहु. में)।
पुरज़ा, सं. पुं. (फ़ा.) पत्रवस्त्रादीनाम्) खंडः-डं, शकलः-लं २. अवयवः, अंगम्।
चलता—, मु., चतुर २. उद्योगिन्।
पुरवा[1], सं. पुं. (सं. पुरं>) लघुग्रामः, ग्रामटिका।
पुरवा[2], सं. पुं. (सं. पूर्ववातः) प्राचीपवनः।
पुरश्चरण, सं. पुं. (सं. न.) पुरस्क्रिया, पूर्वानुष्ठानम्।
पुरस्कार, सं. पुं. (सं.) पारितोषिकः, उपायनं, प्रतिफलं २. आदरः, संमानः, पूजा।
पुरस्कृत, वि. (सं.) आदृत, संमानित २. प्राप्तोपायन, लब्धपारितोषिक।
पुरा[1], अव्य. (सं.) पूर्वं-प्राचीन-पुरातन,-काले। वि., अतीत, प्राचीन (उ. पुरावृत्त)।
पुरा[2], सं. पुं. (सं. पुरं>) ग्रामः।
—कल्प, सं. पुं. (सं.) पूर्वकल्पः २. प्राचीनकालः।
पुराण, वि. (सं.) प्राचीन, पुरातन। सं. पुं. (सं. न.) प्राचीन,-कथा-आख्यानं २. हिंदूनामष्टादश आख्यानग्रन्थाः (ब्रह्मविष्णुशिवपुराणादि)।
पुरातन, वि. (सं.) पुराण, प्रतन, प्रत्न, चिरंतन, चिरत्न, प्राचीन। (पुरातनी स्त्री.)।
पुराना, वि. (सं. पुराण) दे. 'पुरातन' २. जीर्ण, शीर्ण, ३. अनुभविन्, सानुभव।
—खुर्राट, सं., वृद्ध, जरठ २. अत्यनुभविन्।
पुरी, सं. स्त्री. (सं.) नगरी, नृपावासः, दे. 'पुर'।
पुरीष, सं. पुं. (सं. न.) विष्ठा, दे. 'पाख़ाना' २. जलम्।

पुरु, सं. पुं. (सं.) नृपविशेषः, ययातेः कनिष्ठ-पुत्रः। वि., प्रचुर, बहु।

पुरुष, सं. पुं (सं.) मनुजः, मानुषः, दे. 'मनुष्य' २. नरः, नृ, पुंस् ३. परमेश्वरः ४. आत्मन् ५. पूर्वजः, पूर्वपुरुषः ६. पतिः ७. क्रियासर्वनामादीनां रूपभेदः (व्या.) ८. शरीरम्।

—कार, सं. पुं. (सं) उद्योगः, पुरुषार्थः।

—पुर, सं. पुं. (सं. न.) गांधारदेशराजधानी (वर्तमान पिशावर)।

—मेध, सं. पुं. (सं.) यज्ञभेदः, नरमेधः।

—सूक्त, सं. पुं. (सं. न.) ऋग्वेदस्य यजुर्वेदस्य च सूक्तविशेषः (यह 'सहस्रशीर्षा' से आरंभ होता है)।

महा—, सं. पुं. (सं.) महाजनः, नरकुञ्जरः महात्मन् २. दुष्टः, दुरात्मन्।

पुरुषत्व, सं. पुं. (सं. न.) पौरुषं, वीर्यं, साहसं २. पुंस्त्वं, नरत्वम्।

पुरुषार्थ, सं. पुं. (सं.) उद्यमः, प्रयत्नः, उद्योगः, परिश्रमः, पौरुषं, पराक्रमः, पुरुषकारः २. पुरुष,-प्रयोजनं-लक्ष्यं (धर्मार्थकाममोक्षाः) ३. शक्तिः (स्त्री.), बलम्।

पुरुषार्थी, वि. (सं.-र्थिन्) उद्यमिन्, उद्योगिन्, परिश्रमिन्, उद्योग-उद्यम-परिश्रम,-शील-पर २. समर्थ, बलवत्।

पुरुषोत्तम, सं. पुं. (सं.) पुरुषर्षभः, नरकुंजरः, मनुजश्रेष्ठः २. विष्णुः ३. श्रीकृष्णः।

पुरोहित, सं. पुं. (सं.) पुरोधस् (पुं.), सौवस्तिकः, धर्मकर्मादिकारयितृ; याज्ञिकः, याजकः, ऋत्विज्।

पुरोहिताई, सं. स्त्री. (सं. पुरोहितः>) पौरोहित्यं, पुरोहितकर्मन् (न.) २. पुरोहित-दक्षिणा।

पुरोहितानी, सं. स्त्री. (सं. पुरोहितः>) पुरोहित,-पत्नी-भार्या।

पुल, सं. पुं. (फ़ा.) सेतुः, वारणः, संवरः।

—बाँधना, सेतुं बंध् (क्र. प. अ.)-निर्मा (जु. आ. अ.)।

पुलक, सं. पुं. (सं.) रोमांचः, रोम,-उद्गमः-हर्षः-विकारः-उद्भेदः, त्वक्पुष्पं, त्वगंकुरः २. रत्नभेदः।

पुलकावली, सं. स्त्री. (सं.) पुलकावलिः (स्त्री.), हर्षोत्फुल्लरोमाणि (न. बहु.)।

पुलकित, वि. (सं.) रोमांचित, रोमांकित, पुलकिन्, जातपुलक, सपुलक, कंटकित २. प्रहृष्ट, प्रसन्न।

—करना, क्रि. स., रोमांचयति (ना. धा.), रोमाणि उद्-हृष् (प्रे.)।

—होना, क्रि. अ, रोमाणि उद्गम् (भ्वा. प. अ.) हृष् (-दि. प. से.)।

पुलपुला, वि. (अनु.) दे. 'पिलपिला'।

पुलाव, सं. पुं. (फ़ा.) मांसौदनं, भक्तामिषम्।

पुलिंद, सं. पुं. (सं.) चंडालभेदः, प्राचीन-जातिविशेषः।

पुलिंदा, सं. पुं. (हिं. पूला) कूर्चः, गारः, पोट्टली।

पुलिन, सं. पुं. (सं. पुं. न.) तोयोत्थिततटः-टं-टी २. कूलं, तीरं, तटं, ३. सैकतं, सिकता-मयं तटम्।

पुलिस, सं. स्त्री. (अं.) नगररक्षकाः, पुरपालाः, रक्षापुरुषाः (बहु.), रक्षिगणः।

—इन्स्पैक्टर, सं. पुं. (अं.) रक्षक-रक्षि,-निरीक्षकः।

—मैन, सं. पुं. (अं.) रक्षकः, दंडधरः, रक्षक-रक्षा-रक्षि,-पुरुषः, नगरपालः, राजपुरुषः।

—सब इन्स्पैक्टर, सं. पुं. (अं.) रक्षकोप-निरीक्षकं, दे. 'थानेदार'।

—सुपरिन्टैंडैंट, सं. पुं. (अं.) रक्षकाध्यक्षः।

पुवाल, सं. स्त्री., दे.'पयाल'।

पुश्त, सं. स्त्री. (फ़ा.) दे. 'पीठ[1]' २. दे. 'पीढ़ी[2]'।

—दर पुश्त, क्रि. वि., वंशपरंपरया।

पुश्तैनी, वि. (फ़ा. पुश्त>) कुलक्रम-वंश-परंपरा,-आगत प्राप्तः, परंपरीय, परंपरीण।

पुष्कर, सं. पुं. (सं. न.) कमलं, पद्मं २. जलं ३. तडागः-गं ४. गजशुंडाग्रं ५. तीर्थविशेषः।

पुष्करिणी, सं. स्त्री. (सं.) कासारः-रं, तटाकः-कं, सरसी, सरोवरः।

पुष्कल, वि. (सं.) अधिक, बहु, प्रचुर, प्रभूत, बहुल, विपुल २. पर्याप्त, पूर्ण।

पुष्ट, वि. (सं.) पालित, सं-, वर्धित, पोषित, भृत २. बलिष्ठ, पीन, पीवर ३. बल,-प्रद-वर्धक ४. दृढ।

पुष्टई, सं. स्त्री. (सं. पुष्ट >) पुष्टिकरं भक्ष्य-औषधं वा, रसायनम् ।

पुष्टता, सं. स्त्री. (सं.) पीनता, पीवरता, दृढांगता ।

पुष्टि, सं. स्त्री. (सं.) भरणं, पोषणं, सं-, वर्धनं २. बलिष्ठता, दृढांगता, पीवरता ३. दृढता ४. समर्थनं, अनुमोदनं, दृढीकरणं, उपोद्बलनम् ।

—कारक, वि. (सं.) पुष्टि, कर-दायक, बल-वीर्य-वर्धक ।

पुष्प, सं. पुं. (सं. न.) कुसुमं, प्रसूनं, मणी-चक, सुमं, सूनं, सुमनः, प्रसवः, सुमनस् (स्त्री. न., केवल बहुवचन में) २. आर्तवं, ऋतुस्रावः, रजःस्रावः ३. नेत्ररोगभेदः (हिं. फूला) ४. कुबेरविमानम् ।

—धन्वा,—बाण,—शर, सं. पुं. (सं.) पुष्पधन्वन् (पुं.), मदनः, दे. 'कामदेव' ।

—पुर, सं. पुं. (सं. न.) दे. 'पटना' ।

—रेणु, सं. पुं. (सं.) परागः, पुष्पधूलिः (स्त्री.) ।

—रस, सं. पुं. (सं.) पुष्पासवं, भ्रामरं, मकरंदः ।

—राज, सं. पुं. (सं.) दे. 'पुखराज' ।

—वाटिका, सं. स्त्री. (सं.) पुष्प-कुसुम,-वाटी-उद्यानम् ।

—वृष्टि, सं. स्त्री. (सं.) पुष्प-कुसुम,-आसारः-वृष्टिः ।

पुष्पक, सं. पुं. (सं. पुं. न.) कुबेरविमानं २. पुष्पं ३. चक्षूरोगभेदः ४. पित्तलभस्मन् (न.) ।

पुष्पित, वि. (सं.) कुसुमित, कुसुम-पुष्प,-विशिष्ट-युक्त ।

पुष्पोद्यान, सं. पुं. (सं. न.) दे. 'पुष्पवाटिका' ('पुष्प' के नीचे) ।

पुष्य, सं. पुं. (सं.) सिध्यः, तिष्यः, (अष्टम-नक्षत्रं) २. पौषमासः ।

पुस्तक, सं. पुं. (सं. पुं. न.) ग्रंथः, पुस्तं-ती ।

पुस्तकालय, सं. पुं. (सं.) ग्रंथ,-आलयः-अगार-शाला ।

पूँछ, सं. स्त्री. (सं. पुच्छः-च्छं) लांगू(गु)लं, लूमं; (बालोंवाली पूँछ) बालधिः, बालहस्तः २. पृष्ठ-पश्चाद् -भागः ३. दे. 'पिछलगा' ।

पूँजी, सं. स्त्री (सं. पुंजः >) मूल,-द्रव्यं-धनं मूलं २. संचितसंपत्तिः (स्त्री.) धन,-पुंजः-राशिः ।

—पति, सं. पु., द्रव्यवत्, धनिकः, कोटीश्वरः, धनाढ्यः ।

पूआ, सं. पुं (सं. पूपः) अपूपः, पिष्टकः ।

पूग, सं. पुं. (सं.) गु(गू)वाकः, क्रमुः, क्रमुकः २ समुदायः, समूहः ३. (सं. न.) क्रमुक-गु(गू)वाक-फलम् ।

—फल, पूगीफल, सं. पुं, (सं. पूगफलं) पूगं, चिका क्रमं क्रमा, उद्गमम् ।

पूछ, सं. स्त्री. (हिं. पूछना) पृच्छा, प्रच्छना, अनुयोगः, प्रश्नः, जिज्ञासा २. आदरः, संमानः, प्रतिष्ठा ३. आवश्यकता, प्रयोजनं ४. अन्वेषणं-णा, गवेषणं णा ।

—गाछ,
—ताछ,
—पाछ, } सं. स्त्री., दे. 'पूछ' (१) ।

पूछना, क्रि. स. (सं. पृ(प्र)च्छनं), प्रच्छ् (तु. प. अ.), प्रश्नयति (ना. धा.), अनुयुज् (रु. आ. अ.) २. आदृ (तु. आ. अ.), संमन (प्रे.) । सं. पुं., प्रच्छनं-ना, पृच्छा, अनुयोगः, जिज्ञासा ।

पूछने योग्य, वि., प्रष्टव्य, जिज्ञासितव्य, अनुयोक्तव्य ।

पूछनेवाला, सं. पुं., प्रष्टृ, अनुयोक्तृ, जिज्ञासुः ।

पूछा हुआ वि., पृष्ट, अनुयुक्त, जिज्ञासित इ. ।

बात न—, मु., न आदृ (तु. आ. अ.) न संमन् (प्रे.) ।

पूजक, सं. पुं. (सं.) पूजयितृ, अर्चकः, उपासकः, आराधकः, भक्तः ।

पूजन, सं पुं. (सं. न.) पूजा, अभि-, अर्चनं-ना, अर्चा, आराधनं-ना, सपर्या, उपासनं-ना २. संमाननं, सत्करणं ३. वंदनं-ना ।

पूजना, क्रि. स. (सं. पूजनं) पूज् (चु.), अभि-, अर्च् (भ्वा. प. से.; चु.), उपास् (अ. आ. से.), आराध् (स्वा. प. अ.), भज् (भ्वा. उ. अ.) २. संमन् (प्रे.), आदृ (तु. आ. अ.) ३. वंद् (भ्वा. आ. से.), नमस्यति (ना. धा.) ४. उत्कोचं दा । सं. पुं., दे. 'पूजन' ।

पूजने योग्य, वि., दे. 'पूज्य' ।

पूजनेवाला, सं. पुं., दे. 'पूजक' ।

पूजा हुआ, वि., दे. 'पूजित' ।

पूजनीय, वि. (सं.) दे. 'पूज्य'।
पूजा, स. स्त्री. (स.) दे. 'पूजन'।
पूजित, वि. (सं.) अभि-, अर्चित, आराधित, उपासित २. संमानित, आदृत, सत्कृत ३. वंदित, नमस्कृत।
पूज्य, वि. (सं.) पूजनीय, पूजयितव्य, पूजार्ह, अभि-,अर्चनीय, आराधनीय, भजनीय २. आदरणीय, माननीय, सत्कार्य, वंदनीय।
—**तम,** वि. (सं.) परम-अत्यंत,-पूजनीय-आराध्य।
पूड़ा, सं. पुं. (सं. पूपः) अपूपः, पिष्टकः।
पूड़ी, सं. स्त्री.. दे. 'पूरी'।
पूत, वि. (सं.) दे. 'पवित्र'।
पूत, सं. पुं., दे. 'पुत्र'।
पूतना, सं. स्त्री. (सं.) राक्षसीविशेषः २. बाल-रोगभेदः।
पूनि, सं. स्त्री. (सं.) दे. 'पवित्रना'।
पूनी, सं स्त्री. (सं. पू>) पिंजिका, तूल,-नालिका-वर्त्तिका।
पूप, सं. पुं. (सं.) अपूपः, पिष्टकः।
पूर, सं. पुं. (सं.) जल-विप्लवः-बृंहणं २. व्रण-संशुद्धिः (स्त्री)।
पूरक, वि. (सं.) पूरयितृ, पूरणकर्तृ २. खैलिक, परिशिष्टात्मक। सं. पुं., बीजपूरः, मातुलुंगः, सुफलः २. गुणकांकः (गणित) ३. प्राणायामभेदः।
पूरण, सं. पुं. (सं. न.) भरणं, निचयनं, संकुलाकरणं, व्यापनं २. निर्वर्तनं, निष्पादनं, समापनं, संसादनं ३. अंकगुणनम्। वि., पूरक, पूरयितृ।
पूरना, क्रि. स. (सं. पूर्णं) पूर् (चु.) पृ-भृ (जु. उ. अ.) २. आच्छद् (चु.) ३. संपद्-साध् (प्रे.) ४. धमा (भ्वा. प. अ.), (वायुना) पूर् (चु.) ५. दे. 'भरना'।
पूरब, सं. पुं., दे. 'पूर्व'।
पूरबी, वि., दे. 'पूर्वी'।
पूरा, वि. (सं. पूर्ण) पूरित, व्याप्त, संकीर्ण, आ-सं-समा,-कुल, आविष्ट, निचित, संभृत २. समग्र, समस्त, सकल, ३. अविकल, निर्दोष ४. यथेष्ट, पर्याप्त ५. संपन्न, संपादित, कृत।
—**करना,** क्रि. स., समाप् (स्वा. उ. अ.) निर्वृत् (प्र.), निःशिष् (प्र.), अंतं गम् (प्र.), सर् (चु)।
—**होना,** क्रि. अ., समाप् (कर्म.), अंतं गम् (भ्वा. प. अ.), निःशेषं भू, संपद् (दि. आ. अ.)।
—**उतरना,** मु., यथोचितं वृत् (भ्वा. आ. से.) २. सफलीभू।
—**होना,** मु., स्वर्गं दिवं गम्, मृ (तु.आ.अ.)।
पूरित, वि. (सं.) दे. 'पूरा' (१)। २. तृप्त, तुष्ट ३. गुणित, आ-नि,-हत।
पूरी, सं. स्त्री. (सं.) पूपी)लिका, पूपिका। खस्ता—, शष्कुली।
पूर्ण, वि. (सं.) दे. 'पूरा'(१-५)।
—**काम,** वि. (स.) आप्तकाम, सफलमनोरथ २. निष्काम, अकाम, निरिच्छ।
—**चंद्र,** सं. पुं. (सं.) पूर्णेंदुः।
—**विराम,** सं. पुं. (सं.) वाक्यपूर्णताचिह्नम्।
पूर्णतया, **पूर्णतः,** } क्रि. वि. (सं.) अशेषतः, सर्वथा, साकल्येन, सामग्र्येण, सामस्त्येन, निरवशेषम्।
पूर्णता, सं. स्त्री. (सं.) समग्रता, साकल्यं २. सिद्धिः, समाप्तिः (स्त्री.) ३. अविकलता, निर्दोषता ४. पूरितत्वं, संभृतता।
पूर्णमासी, सं. स्त्री. (सं.) दे. 'पूर्णिमा'।
पूर्णाहुति, सं. स्त्री. (सं.) यागांताहुतिः (स्त्री.) २ अनुष्ठानावसानकृत्यम्।
पूर्णिमा, सं. स्त्री. (सं) पूर्णमा, पौर्णमासी, राका, पित्र्या, चांद्री, सिता, इंदुमती, ज्योत्स्ना।
पूर्त्त, सं. पुं. (सं. न.) पालनं २. वापी-कूप-तडागादिनिर्माणम्।
पूर्त्ति, सं. स्त्री. (सं.) (आरब्धस्य) समाप्तिः-निर्वृत्तिः-सिद्धिः-निष्पत्तिः (स्त्री.) २. पूर्णता, समग्रता ३. पूरणं ४. गुणनं ५. अपेक्षितद्रव्योपस्थापनम्।
पूर्व, सं. पुं. (सं. पूर्वा) प्राची, पूर्व,-दिशा-दिश् (स्त्री.)-आशा, ऐंद्री २. पूर्वदेशः, पौरस्त्यजनपदः। वि., अग्रग, पूर्वग, अग्र-पूर्व,-गामिन्-वर्तिन् २. पुराण, प्राचीन ३. दे. 'पिछला'। क्रि. वि., प्राक्, अर्वाक् (दोनों अव्य.)।
—**काय,** सं. पुं. (सं.) (पशूनां) देहाग्रभागः २. (नराणां) देहोर्ध्वभागः।

—काल, सं. पुं. (सं.) प्राक्-पूर्व-प्राचीन,-समयः-कालः-वेला ।

—कालिक, वि. } (सं.) पुराण, प्राचीन, प्राक्-
—कालीन, वि. } कालीन, पुरातन, प्राक्तन ।

—कृत, वि. (सं.) प्राग्विहित २. पूर्वजन्मकृत ।

—जन्म, सं. पुं. [सं.-जन्मन् (न.)] प्राग्जनिः (स्त्री.) ।

—दिशा, सं. स्त्री. (सं.) दे. 'पूर्व' सं. पुं.(१)।

—पक्ष, सं. पुं. (सं.) शास्त्रीय,-प्रश्नः-शंका, चोद्यं, देश्यं, फक्किका २. कृष्णपक्षः ३. दे. 'पूर्ववादः' ।

—पक्षी, सं. पुं. (सं.-क्षिन्) वादिन्, सिद्धांत-विरोधिन् ।

—मीमांसा, सं. स्त्री. (सं.) जैमिनिमुनिप्रणीत-दर्शनग्रंथविशेषः ।

—वत्, क्रि. वि. (सं.) यथापूर्वं, पूर्वसदृशम्।

—वर्ती, वि. (सं.-र्तिन्) प्राग्वर्तिन्, पूर्व-अग्र,-गामिन् ।

—वाद, सं. पुं. (सं.) भाषा, भाषापादः, पूर्व-, पक्षः, प्रतिज्ञा, अभियोगः, दे. 'नालिश' ।

—वादी, सं. पुं. (सं.-दिन्) अभियोक्तृ, अर्थिन्, वादिन्, शिरोवर्तिन्, दे. 'मुद्दई' ।

पूर्वज, सं. पुं. (सं.) पूर्वपुरुषाः, पितरः (बहु.) २. अग्रजः, ज्यायान् भ्रातृ । वि., प्रागुत्पन्न ।

पूर्वापर, वि. (सं.) अग्रिमपश्चिम, पूर्वपरवर्तिन् । सं. पुं., प्राचीप्रतीच्यौ (द्वि.) २. हानिलाभौ (द्वि.) ।

पूर्वाभिमुख, वि. (सं.) प्राङ्मुख (-खी स्त्री.) ।

पूर्वाह्न, सं. पुं. (सं.) त्रिधा विभक्तदिवसस्य प्रथमभागः, प्राह्णः, प्रातरह्नः ।

पूर्वी, वि. (सं. पूर्वीय) प्राच्य, पौरस्त्य, पूर्व-देशीय, पूर्वदिक्स्थ, प्राच् [-ची (स्त्री.)] । सं. स्त्री., पूर्वीयभाषाविशेषः २. रागिणीभेदः ।

पूर्वीय, वि. (सं.) दे. 'पूर्वी' वि. ।

पूला, सं. पुं. (सं. पूलः) पूलकः ।

पूष, पूस, सं. पुं., दे. 'पौष' ।

पृथक्, वि. (सं.) भिन्न, व्यतिरिक्त, विश्लिष्ट, विभक्त, असंलग्न । अव्य., विना, ऋते, अंतरेण (सब अव्य.) ।

—पृथक्, अव्य., वि,-भिन्नम् ।

पृथक्ता, सं. स्त्री. (सं.) पृथक्त्वं, पृथग्भावः, पार्थक्यं, भिन्नता, विश्लेषः, विभेदः ।

पृथिवी, सं. स्त्री. (सं.) पृथ्वी, पृथिविः (स्त्री.), क्षितिः-भूः-भूमिः (स्त्री.), धरा, धरित्री, क्षोणी, वसुधा, वसुमती, वसुंधरा, अवनी-निः (स्त्री.), मेदिनी, धरणी-णिः (स्त्री.), मही-हिः (स्त्री.), अचलकीला, अचला, स्थिरा, इड़ा ।

—तल, सं. पुं. (सं. न.) भू-धरणी,-तलं २. संसारः ।

—नाथ, सं. पुं. (सं.) भू,-पतिः-पालः ।

पृष्ट, वि. (सं.) अनुयुक्त, प्रश्नित, जिज्ञासित ।

पृष्ठ, सं. पुं. (सं. न.) दे. 'पीठ'[1](१-२) । ३. पुस्तक,-पत्रं-पर्ण ४. पुस्तकपृष्ठम् ।

—पोषक, सं. पुं. (सं.) सहायः-यकः, उपकर्तृ ।

पेंग, सं. स्त्री. (सं. प्रेंखा >) दोलनं, प्रेंखणं, दोलागतिः (स्त्री.) ।

—बढ़ाना या चढ़ाना, मु., सवेगं प्रेंख् (प्रे.), उच्चैः प्रेंखोलयति (ना. धा.) ।

पेंदा, सं. पुं. (सं. पिंडः-डं >) तलं, अधोभागः, बुध्नः ।

पेंसिल, सं. स्त्री. (अं.) अङ्कनी, स्वयंलेखनी, वर्णिका, वर्णमातृ (स्त्री.) ।

पेच, सं. पुं. (फ़ा.) व्यावर्तनं, मोटनं, आ-,कुंचनं २. विघ्नः, विघातः, प्रत्यूहः ३. धूर्तता, शाठ्यं ४. उष्णीष-व्यावर्तनं ५. यंत्रं ६. यंत्रावयवः ७. वलयकीलकः ८. पतंगसूत्रसंग्रथनं ९. (मल्ल-युद्धादीनां) कपटोपायः, युक्तिः (स्त्री.) १०. उष्णीषादेरलंकारः ११. दे. 'पेचिश' ।

—खाना, क्रि. अ., मंडली-वर्तुली भू ।

—डालना, क्रि.स., पतंगसूत्राणि मिथः संश्लिष् (प्रे.) ।

—पड़ना, क्रि.अ., पतंगसूत्राणि परस्परं संश्लिष् (दि. प. अ.) ।

—कश, सं. पुं. (फ़ा.) *वलयकीलकर्षः २. *पिधानकर्षः ।

—ताब, सं. पुं. (फ़ा.) अंतः,-कोपः-क्रोधः ।

—दार, वि. (फ़ा.) आकुंचित, व्यावर्तित २. गहन, कठिन, दुर्बोध ३. संश्लिष्ट, संग्रथित ।

—वान, सं. पुं. (फ़ा.) बृहद्धूमपानयन्त्रं २. धूमपानयन्त्रस्य बृहन्नाली ।

पेचक, सं. स्त्री. (फ़ा.) सूत्र-तन्तु,-गोलः-गोलम्

पेचिश, सं. स्त्री. (फ़ा.) प्रवाहिका, आमरक्तम् २. उदरवेदनाभेदः।

पेचीदगी, सं. स्त्री. (फ़ा.) कौटिल्यं, वक्रत्वं २. दुर्बोधता, क्लिष्टत्वं, गहनत्वम्।

पेचीदा, वि. (फ़ा.)
पेचीला, वि. (फ़ा. पेच) } दे. 'पेचदार'।

पेट, सं. पुं. (सं. पेटः >) उदरं, जठरः-रं, कुक्षिः, फंडः, मलुकः २. गर्भः ३. आमाशयः ४. अन्तःकरणं ५. अवकाशः ६. विस्तारः ७. जीवनं, प्राणधारणम्।

—काटना, मु., धनसंचयाय अल्पं खाद् (भ्वा. प. से.)।

—का धंधा, मु., जीवनोपायः, आजीविका-साधनम्।

—का पर्दा, मु., अंत्रावरणम्।

—का हलका, मु., क्षुद्रप्रकृति, तुच्छ, प्राकृत।

—की आग, मु., क्षुधा, बुभुक्षा।

—की आग बुझाना, मु., क्षुधां निवृत् (प्रे.)।

—गिरना, मु., गर्भः पत् (भ्वा. प. से.)-च्यु (भ्वा. प. अ.)।

—गुड़गुड़ाना या बोलना, मु, कर्दनं जन् (दि. आ. से.), कर्द् (भ्वा. प. से.)।

—दिखाना, मु., निजदारिद्र्यं प्रकटयति (ना. धा.)।

—पालना, मु., कृच्छ्रेण जीव् (भ्वा- प. से.), यथाकथंचित् उदरं पॄ (जु. प. से.)।

—पीठ एक होना, मु. अत्यंतं क्षि (भ्वा. प. अ.),-कृशीभू।

—फटना, मु., अधीर (वि.) भू, धैर्यं मुच् (तु. प. अ.)।

—फूलना, मु., हासातिशयेन उदरं स्फाय् (भ्वा. आ. से.)-स्फि (भ्वा. प. से.)।

—भर, मु., उदरपूर्त्ति यावत् २. यथेष्टम्।

—भरना, मु., सं-परि-तुष् (दि. प. अ.), परि-,तृप् (दि. प. अ.) २. उदरं पूर् (कर्म.)।

—में चूहे दौड़ना, मु., नितरां क्षुध् (दि. प. अ.), अत्यन्तं अशनायति (ना. धा.)।

—रहना
—से होना } मु., गर्भं धृ (चु.), अन्तर्वत्नी भू।

—वाली, मु., गर्भिणी, गर्भवती, अन्तर्वत्नी।

पेटा, सं. पुं. (हिं. पेट) मध्यं, मध्यभागः २. विस्तृतविवरणं ३. दे. 'विज्ञप्ति' ४. कोशः ५. परिषिः ६. सरिद्प्रवाहमार्गः ७. नदी विस्तारः ८. पर्यायं ९. अप्रसंगसूत्रविशिष्टकथनम्।

पेटी[1], सं. स्त्री. (सं.) पेटिका, क्षुद्र-पेटः-पेटं-पेटा, मंजूषा, समुद्गकः २. नासिकचीनांशुकः।

पेटी[2], सं. स्त्री. (हिं. पेट) कटि-सूत्रं वेष्टः, मेखला, करधनी २. क्षुद्रकटिसूत्रम्।

पेटीकोट, सं. पुं. (अं.) चोली, पटवासः।

पेटू, वि. (हिं. पेट) औदरिक, उदर-दरी,-भरि, अक्षर, घस्मर।

पेटेंट, वि. (अं.) निर्दिष्टाधिकारदायिना नवरचना।

पेट्रोल, सं. पुं. (अं.) अग्निरसेक्षम्।

पेठा, सं. पुं. (देश.) (वनौ.) कूष्माण्डं, पीतपुष्पं, पुष्प-पुष्पं, कर्कं (पीला पेठा-दे. 'कुम्हड़ा')।

पेड़, सं. पुं. (सं. पिंडः-र्डं >) दे. 'वृक्ष'।

पेड़ा, सं. पुं. (सं. पिंडः) क्षीरादिपिंडः २. आर्द्रचूर्णपिंडः।

पेड़ी, सं. स्त्री. (हिं. पेड़) तरु,-स्कन्ध-प्रकांडः २. कबन्धः ३. नागबलीदलभेदः ४. सहदेवी नीलीक्षुपः।

पेढ़, सं. पुं. (हिं. पेट) वस्तिः (पुं. स्त्री.) २. गर्भाशयः।

पेदड़ी, सं. स्त्री., दे. 'पिंडी'।

पेन्शन, सं. स्त्री. (अं.) वार्द्धक्य-पूर्वसेवा,-वृत्तिः (स्त्री.)।

पेन्शनर, सं. पुं. (अं.) पूर्वसेवावृत्तिभोजिन्।

पेन्सिल, सं. स्त्री. (अं.) दे. 'पेंसिल'।

पेपर, सं. पुं. (अं.) पत्रं, दे. 'काग़ज़' २. लेखः, लेख्यपत्रं ३. वृत्त-समाचार,-पत्रम्।

पेय, वि. (सं.) पानीय, पानार्ह, पेय। सं. पुं., पानीयपदार्थः २. जलं ३. दुग्धम्।

पेयूस, सं. पुं. (सं. पे(पी)यूषः-षं) सद्यःप्रसूतायाः गोः क्षीरं २. अमृतं ३. अभिनवघृतम्।

पेरना, क्रि. स. (सं. पीडनं) (रसतैलादिकं) निष्पीड् (चु.), निष्क्रुप् (भ्वा. प. अ.) २. नितरां पीड् (चु.)-अर्द् (भ्वा. प. से.)।

पेलना, क्रि. स. (सं. पीडनं) सहसा निविश् (प्रे.) बलात् अंतः प्रविश् (प्रे.) २. (हस्तादिकेन) प्र-वि-चल् (प्रे.), प्रणुद्-प्रवृत् (प्रे.) ३. उपेक्ष् (भ्वा. आ. से.), अवगण् (चु.)

४. त्यज् (भ्वा. प. अ.), प्रास् (दि. प. से.) ५. वलं प्रयुज् (रु. आ. अ.) ६.-७. दे. 'पेरना' (१-२)।

पेलवाना, क्रि. प्रे., व. 'पेलना' के प्रे. रूप।

पेला, सं. पुं. (हिं. पेलना) कलहः, वाग्युद्धं २. अपराधः, दोषः ३. आक्रमणं ४. (बलात्) अपसारणं संचालनम्।

पेश, क्रि. वि. (फ़ा.) अग्रे, पुरः, पुरतः, संमुखं (सर्व अव्य.)।

—आना, मु., व्यवहृ (भ्वा. प. अ.), आचर् (भ्वा. प. से.) २. घट्-वृत् (भ्वा. आ. से.)।

—करना, मु., पुरतः स्था (प्रे. स्थापयति) दृश् (प्रे.) २. उपहृ (भ्वा. प. अ.), ऋ (प्रे. अर्पयति)।

—चलना या जाना, वि., प्रभु वं वृत्।

—होना, मु., उपस्था (भ्वा. आ. अ.), पुरतः स्था (भ्वा. प. अ.)।

पेशगी, सं. स्त्री. (फ़ा.) प्राग्दत्तमूल्यं, *अग्रार्घः।

पेशवा, सं. पुं. (फ़ा.) नेतृ, नायकः, अग्रणीः २. पुरोहितः ३. महाराष्ट्रामात्योपाधिः।

पेशवाई, सं. स्त्री. (फ़ा.) प्रत्युद्गमनं, दे. अगवानी २. नेतृत्वम्।

पेशा, सं. पुं. (फ़ा.) व्यवसायः, उपजीविका, वृत्तिः (स्त्री.)।

पेशानी, सं. स्त्री. (फ़ा.) मस्तकं २. भाग्यं ३. अग्रभागः।

पेशाब, सं. पुं. (फ़ा., मि० सं. प्रस्रावः) मूत्रम्।

—की अधिकता, सं. स्त्री., मूत्र,-मेहः आधिक्यम्।

—खाना, सं. पुं. (फ़ा.) मूत्रालयः, मेहनशाला, प्रस्रावागारम्।

—जल कर आना, सं. पुं., मूत्रकृच्छ्रम्।

—रुकना, सं. पु., मूत्र,-रोधः-स्तम्भः।

पेशावर,[1] सं. पुं. (फ़ा.) व्यवसायिन्, उपजीविन्।

पेशावर,[2] सं. पुं. (फ़ा. पेश+आवर>) पुरुषपुरम्।

पेशी,[2] सं. स्त्री. (फ़ा.) व्यवहारदर्शनं, विचारः २. उप-पुरः,-स्थानं-स्थितिः (स्त्री.), *पुरोभावः।

पेशी,[1] सं. स्त्री. (सं.) (देहस्था) मांस,-पिंडी-ग्रन्थिः (पुं.) २. वज्रं ३. अंडः-डं ४. असि-कोशः-षः ५. गर्भावेष्टनचर्ममयकोषः।

पेशीनगोई, सं. स्त्री. (फ़ा.)-भविष्यद्वादः, अनागतकथनम्।

पेषण, सं. पुं. (सं. न.) चूर्णनं, मर्दनं, खंडनम्।

बू, सं. स्त्री. (फ़ा.) गंधः, वासः २. दुर्गन्धः।

बूआ, सं. स्त्री. (देश.) पितृष्वसृ (स्त्री.), पितृभगिनी २. अग्रजा।

बूचड़, सं. पुं. (अं. बुचर) शौ(सौ)निकः, मांसिकः, खट्टिकः, कौटिकः।

—खाना, सं. पुं., सूना, शूना।

बूझ, सं. स्त्री. (सं. बुद्धिः) बोधः, ज्ञानं, विवेकः २. प्रहेलिका।

बूझना, क्रि. अ. (हिं. बूझ) ज्ञा (क्र. उ. अ.)-बुध् (भ्वा उ. से.) २. प्रच्छ् (तु. प. अ.)।

बूट, सं. पुं. (अं.) उपानह् (स्त्री.), पन्नद्धी।

बूटा, सं. पुं. (सं. विटपः) वृक्षकः, बालवृक्षः, लता, ओषधिः (स्त्री.) २. वंशः, वंशपरंपरा।

बूटी, सं. स्त्री. (हिं. बूटा) ओषधिः (स्त्री.), काष्ठौषधम् २. भंगा ३. वस्त्रस्था पत्रपुष्परचना।

बूड़ना, क्रि. अ., दे. 'डूबना'।

बूढ़ा, सं. पुं. (सं. वृद्धः) जरठः, स्थविरः पलितः, जरितः। वि., जरठ-ण, जरित-न, जीन, जीर्ण, वयस्क, प्रवयस्, वृद्ध, स्थविर, पलित।

—होना, क्रि. अ., जॄ (दि. क्र. प. से.), ज्या (क्र. प. अ.), परिणम् (भ्वा. प. अ.), वृद्ध (वि.) भू।

—पन, सं. पुं., जरा, परिणतिः-ज्यानिः-जीर्णिः (स्त्री.), वार्धक-क्यं, वृद्धावस्था।

बूढ़ी, सं. स्त्री. (हिं. बूढ़ा) वृद्धा, जरती, स्थविरा, पलिता, पलिक्नी। वि., व. 'बूढ़ा' वि. के स्त्री. रूप।

बूता, सं. पुं. (सं. वित्त>) बलं, शक्तिः (स्त्री.)।

बूरा, सं. पुं. (हिं. भूरा) शर्करा २. सुपिष्टा, शुभ्रा ३. चूर्णं, क्षोदः ४. काष्ठचूर्णम्।

बृहत्, वि. (सं.) विशाल, महत् २. दृढ, बलवत् ३. पर्याप्त ४. उच्च (स्वरादि)।

बृहस्पति, सं. पुं. (सं.) देवताविशेषः, सुरगुरुः, गुरुः, वाचस्पतिः, वागीशः (दू. त.) २. सौर-मंडलस्य पंचमो ग्रहः।

—वार, सं. पुं. (सं.) गुरु,-वारः-वासरः।

बेंच, सं. स्त्री. (अं.) (काष्ठादिनिर्मितं) *लंबासनं, २. धर्म-व्यवहार,-आसनं ३. आधिकरणिकाः-धर्माध्यक्षाः (पुं. बहु.)।

बेंत, सं. पुं. (सं. वेत्रः) वेतसः, वानीरः, वंजुलः, नीरप्रियः, अभ्रपुष्पः। २. वेत्र-वेतस्,-दंडः-यष्टिः (स्त्री.)।

बेंदी, सं. स्त्री. (सं. विंदुः) वर्तुलचिह्नं २. तिलकः-कं ३. शून्यं, खम्।

बे,[1] अव्य. (सं. हे) अरे, रे, अयि।

बे,[2] अव्य. (फ़ा., मि. सं. वि.) अ-, अन्-, वि-, निर्-, रहित,-वर्जित,-व्यतिरिक्त,-वंचित।

—अक़ल, वि. (फ़ा. + अ.) निर्बुद्धि, मूर्ख।

—अक़ली, सं. स्त्री., निर्बुद्धिता, मौर्ख्यम्।

—अदब, वि. (फ़ा. + अ.) अविनीत, धृष्ट।

—अदबी, सं. स्त्री., धृष्टता, वैयात्यम्।

—आबरू, वि. (फ़ा.) निराकृत, अवधीरित, संमानरहितः।

—आबरूई, सं. स्त्री., अवधीरणा, अवज्ञा, अपमानः।

—इंतिहा, (फ़ा. + अ.) अनंत, असीम।

—इन्साफ़, वि. (फ़ा. + अ.) अन्यायिन्, अधर्मिन्।

—इन्साफ़ी, सं. स्त्री., अन्यायः, अधर्मः।

—इज़्ज़त, वि. (फ़ा + अ.) दे. 'बेआबरू'।

—इज़्ज़ती, सं. स्त्री., दे. 'बेआबरूई'।

—इल्म, वि. (फ़ा. + अ.) अविद्य, निरक्षर।

—ईमान, वि. (फ़ा. + अ.) कुटिल, जिह्म, धर्म-न्याय,-विमुख, कपटिन्, वंचक, शठ।

—ईमानी, सं. स्त्री., कुटिलता, वंचना, अधर्म।

—औलाद, वि. (फ़ा. + अ.) निरपत्य, निस्संतान।

—क़दर, वि. (फ़ा.) दे. 'बेआबरू'।

—क़दरी, सं. स्त्री. (फ़ा.) दे. 'बेआबरूई'।

—क़रार, वि. (फ़ा.) अशांत, विकल, व्याकुल।

—क़रारी, सं. स्त्री. (फ़ा.) अशांतिः (स्त्री.), व्याकुलता।

—कस, वि. (फ़ा.) निस्सहाय २. दरिद्र ३. अनाथ, मातृपितृहीन।

—क़ाबू, वि. (फ़ा.+अ.) संयमशून्य, विवश २. अदम्य, अवश्य।

—काम, वि. (फ़ा.+हिं.) वृत्तिहीन, व्यवसाय-शून्य २. व्यर्थ, निरर्थक।

—कायदा, वि. (फ़ा.+अ.) नियमविरुद्ध, अवैध, अनियमित।

—कार, वि. (फ़ा.) दे. 'बेकाम' (१-२)। क्रि. वि., व्यर्थ, निष्प्रयोजनम्।

—कारी, सं. स्त्री., नियोगाभावः, वृत्तिराहित्यम्।

—क़ुसूर, वि. (फ़ा.+अ.) निरपराध, निर्दोष।

—खटके, क्रि. वि. (फ़ा.+हिं) निःसंकोचं, निःशंकं, निर्भयम्।

—ख़बर, वि. (फ़ा.) अज्ञ, अपरिचित २. मूर्च्छित, निःसंज्ञ।

—ख़बरी, सं. स्त्री., अज्ञता, प्रमादः २. मूर्च्छा, मोहः, संज्ञालोपः।

—ख़ौफ़, वि. (फ़ा.) निर्भय, त्रासहीन।

—ग़रज़, वि. (फ़ा.+अ.) निरपेक्ष, निश्चिंत।

—गुनाह, वि. (फ़ा.) निष्पाप २. निरपराध।

—चैन, वि. (फ़ा.) विकल, अशांत २. विनिद्र।

—चैनी, सं. स्त्री., व्याकुलता २. विनिद्रता।

—ज़बान, वि. (फ़ा.) अवाच्, मूक २. दीन।

—जा, वि. (फ़ा.) अनुचित, असंगत २. कुत्सित, गर्ह्य।

—जान, वि. (फ़ा.) निष्प्राण, मृत २. निर्बल, अशक्त।

—ज़ाब्ता, वि. (फ़ा.+अ.) अवैध, अनैयमिक।

—जोड़, वि. (फ़ा.+हिं.) अनुपम २. अखंड।

—ठिकाने, वि. (फ़ा.+हि.) स्थान,-च्युत-भ्रष्ट, २. निरर्थक ३. असंगत।

—डौल, वि. (फ़ा.+हिं.) कुरूप, कदाकार।

—ढंगा, वि. (फ़ा.+हिं.) अनाचारिन्, दुर्वृत्त २. कुरूप ३. अक्रम, कुव्यवस्थित।

—ढब, वि. (फ़ा.+हिं.) कदाचार, कुशील, २. कुदर्शन, कुरूप।

—तकल्लुफ़, वि. (फ़ा.+अ.) उपचारोपेक्षक, निराडंबर २. ऋजु, सरल।

—तकल्लुफ़ी, सं. स्त्री., उपचारोपेक्षा, आडंबर-हीनता २. आर्जवं, सरलता।

—तमीज़, वि. (फ़ा. अ.) अशिष्ट, असभ्य, उद्धृत, वियात।

—तरह, क्रि. वि. (फ़ा.+अ.) अनुचितं, अस्थाने, असम्यक् २. असाधारण-विलक्षण,-रूपेण। वि., अत्यधिक।

—तरीक़ा, वि. (फ़ा.+अ.) अनुचित, अनैय-मिक। क्रि. वि., अनुचितम्।

—तहाशा, क्रि. वि. (फ़ा.+अ.) अति,-जवेन-वेगेन-शीघ्रतया २. ससंभ्रमं ३. अविचार्य्य, अविमृश्य।

—ताब, वि. (फ़ा.) दुर्बल २. विकल।

—तावी, सं. स्त्री. (फ़ा.) निर्बलता ३. व्याकुलता।

—तार, वि. (फ़ा.+सं.) वितार, तंतुहीन।

—तार का तार, सं. पुं., *वितारतारः, वितारो विद्युत्संदेशः।

—तुका, वि. (फ़ा.+हिं.) विषमस्वर, सामं-जस्यहीन २. दे. 'बेढब'।

—छंद, सं. पुं. (हिं.+सं. छंदस्) अंत्यानु-प्रासहीनं छन्दस् (न.), अमिताक्षरं वृत्तम्।

—दख़ल, वि. (फ़ा.) निष्कासित, निरस्त, अपास्त, अधिकार-भ्रष्ट।

—दख़ली, सं. स्त्री. (फ़ा.) निष्कासनं, अपासनं अधिकारभ्रंशः।

—दम, वि. (फ़ा.) मृत, निष्प्राण २. मृतप्राय, मरणासन्न।

—दर्द, वि. (फ़ा.) निर्दय, निष्करुण।

—दाग़, वि. (फ़ा.) निष्कलंक, शुद्धाचार २. निर्दोष, निरपराध ३. स्वच्छ।

—धड़क, क्रि. वि. (फ़ा.+हिं.) निःसंकोचं २. निर्भयं ३. अविमृश्य। वि., निःसंकोच, निर्भय, अविमृश्यकारिन्।

—नज़ीर, वि. (फ़ा.+अ.) अनुपम, अद्वितीय।

—नसीब, वि. (फ़ा.+अ.) मंद-हत,-भाग्य।

—परदा, वि. (फ़ा.) अनावृत, निरावरण २. नग्न।

—परवाह, वि. (फ़ा.) निश्चिंत, वीतचिंत २. स्वेच्छाचारिन् ३. उदार।

—परवाही, सं. स्त्री., निश्चिंतता २. स्वेच्छा-चारः ३. औदार्यम्।

—पीर, वि. (फ़ा.+हि.) निर्दय, अकरुण २. सहानुभूतिशून्य ।
—फ़ायदा, वि. (फ़ा.) निष्फल, निरर्थक । क्रि. वि., मोघं, निष्फलम् ।
—फ़िक्र, वि. (फ़ा.) दे. 'बेपरवाह' ।
—फ़िक्री, सं. स्त्री., दे. 'बेपरवाही' ।
—बस, वि. (सं. विवश) अशक्त, अवश, निरधिकार २. परवश, पराधीन ।
—बसी, सं. स्त्री. (हिं.) विवशता, अवशता, २. परवशता ।
—बाक़, वि. (फ़ा.) निस्तारित, शोधित ।
—बुनियाद, वि. (फ़ा.) निर्मूल, निराधार ।
—भाव, वि. (फ़ा.+हिं.) असंख्यात, अगणित ।
—मज़ा, वि. (फ़ा.) नीरस, विरस, निस्स्वाद ।
—मानी, वि. (फ़ा.+अ.) निरर्थक ।
—मुरव्वत, वि. (फ़ा.) निःसंकोच, अविनीत, अदक्षिण, कुशील ।
—मौक़ा, वि.(फ़ा.)असामयिक, असमयोचित ।
—रहम, वि. (फ़ा.+अ.) निष्ठुर, निर्दय ।
—रहमी, वि., निर्दयता, निष्ठुरता ।
—रोक, —रोक-टोक, } क्रि. वि. (फ़ा.+हिं.) निष्प्रतिबंधं, निर्विघ्नं, निर्व्याघातम् ।
—रोज़गार, वि. (फ़ा.) दे. 'बेकार' ।
—रोज़गारी, सं. स्त्री., दे. 'बेकारी' ।
—रौनक, वि. (फ़ा.) शोभाहीन, निःश्रीक २. निष्प्रभ, कांतिहीन ।
—लाग, वि. (फ़ा.+हिं.) निःसंग, निर्मोह २. निष्कपट, निर्व्याज ।
—वफ़ा, वि. (फ़ा.+अ.) विश्वास,-घातकः-घातिन्, भक्तिहीन २. दुःशील ३. कृतघ्न ।
—वफ़ाई, सं. स्त्री. (फ़ा.) विश्वासघातः २. दुःशीलता ३. कृतघ्नता ।
—शऊर, वि. (फ़ा.+अ.) दे. 'बेतमीज़' ।
—शक, क्रि. वि.(फ़ा.+अ.) अवश्यं, निःसंदेहम् ।
—शरम, वि. (फ़ा.-शर्म) निर्लज्ज, अपत्रप ।
—शरमी, सं. स्त्री., निर्लज्जता, निर्व्रीडता ।
—शुमार, वि. (फ़ा.) अगणित, असंख्य ।
—सब्र, वि. (फ़ा.+अ.सब्र) अधीर २.असंतुष्ट ।
—सबरी, सं. स्त्री., धैर्यलोपः २. संतोषाभावः ।
—सरो सामान, वि. (फ़ा.) निष्परिच्छद, दरिद्र, अकिञ्चन ।
—सुध, वि. (फ़ा.+हिं.) मूर्च्छित, नष्टसंज्ञ, निस्संज्ञ २. अज्ञ, जड ।
—सुधी, सं. स्त्री., मूर्च्छा २. जडता ।
—सुर, —सुरा, वि. (सं. विस्वर) विषमस्वर २. दुःश्राव्य, कटुस्वर ३. दे. 'बेमौक़ा' ।
—स्वाद, वि. (सं. विस्वाद) दे. 'बेमज़ा' ।
—हद, वि. (फ़ा.) असीम, निस्सीम, अपरिमित २. अत्यधिक ।
—हया, वि. (फ़ा.) दे. 'बेशरम' ।
—हयाई, सं. स्त्री., दे. 'बेशरमी' ।
—हाल, वि. (फ़ा.+अ.) विकल २. दुर्गत ।
—हाली, सं. स्त्री., विकलता २. दुर्गतिः (स्त्री.) दारिद्र्यम् ।
—हिसाब, क्रि. वि. (फ़ा.+अ.) अत्यधिकं, अपरिमितम् । वि., अत्यंत, अगणनीय ।
—होश, वि. (फ़ा.) दे. 'बेसुध' ।
—होशी, सं. स्त्री., दे. 'बेसुधी' ।
—भाव की पड़ना, मु., भृशं ताड् (कर्म.) ।
बेकल, वि. (सं. विकल) अशांत, विह्वल, दे. 'व्याकुल' ।
बेकली, सं. स्त्री. (हिं. बेकल) अशांतिः अनिवृतिः (स्त्री.), दे. 'व्याकुलता' ।
बेकिंग पाउडर, सं. पुं. (अं.) भर्जनक्षोदः ।
बेकटीरिया, सं. पुं. (अं.) कीटाणवः (पुं. बहु.) ।
बेगम, सं. स्त्री. (तु.) राज्ञी, राजपत्नी २. राज्ञीचित्रांकितक्रीडापत्रभेदः ।
बेगाना, वि. (फ़ा.) अस्वीय, अस्वकीय, अनात्मीय, पर, अन्य २. अपरिचित, अज्ञात ।
बेगार, सं. स्त्री. (फ़ा.) विष्टिः-आजूः-आजुर् (स्त्री.) ।
—टालना, मु., अमनोयोगेन कृ; येन केन प्रकारेण विधा (जु. उ. अ.) ।
बेगारी, सं. पुं. (फ़ा.) अनिष्टोद्योगकारिन्, आजुर्-आजूः (स्त्री.) ।
बेचना, क्रि. स. (सं. विक्रयणम्) विक्री (क्र्. आ. अ.), मूल्येन दा (जु. उ. अ.), विपण् (भ्वा. आ. से.) । सं. पुं., विक्रयः-यणं, मूल्येन दानं, विपणः-पनम् ।
बेचने योग्य, वि., विक्रेय, विपणनीय, पण्य ।
—वाला, सं. पुं., विक्रेतृ, विक्रयिन्, विक्रयिकः, विपणिन्, विपणितृ ।

बेचा हुआ, वि., विक्रीत, मूल्येन दत्त, विपणित।
बेचारा, वि. (फ़ा.) दीन, निरवलंब।
बेटा, स. पुं. (सं. वंटः>) पुत्रः, आत्मजः, सूनुः।
—**बेटी,** सं. स्त्री., सन्तानः, संततिः (स्त्री.)।
—**गोद लेना,** मु., पुत्री कृ, पुत्रत्वेन परिग्रह् (क्र्. प. से.), दे. 'गोद' के नीचे॥
बेड़ा, सं. पुं. (सं. वेडा) तरणः, तरंडकः, भेलः २. बृहन्नौका ३. नौकागणः, पोतावली, (युद्ध-) नौनिकरः।
—**डूबना,** मु., विपदा नश् (दि. प. वे.)।
—**पार करना,** मु., संकटात् त्रै (भ्वा. आ. अ.), विपदं हृ (भ्वा. प. अ.),।
—**पार होना,** मु., कष्टात् मुच् (कर्म.)।
बेड़ी,[1] सं. स्त्री. (सं. वलयः>) निगडः-डं, शृंखला-लम्।
—**डालना,** क्रि. स., निगडयति (ना. धा.); शृंखलैः-निगडैः बंध् (क्र्. प. अ.), निगडितं कृ।
बेड़ी,[2] सं. स्त्री. (हिं. बेडा) तरणकः, भेलकः-कं २. नौका, उडुपम्।
बेत, सं. पुं, दे. 'बेंत'।
बेताल[1], सं. पुं., दे. 'वेताल'।
बेताल[2], सं. पुं., दे. 'वैतालिक'।
बेदाना, सं. पुं. (फ़ा.) दाडिमभेदः २. निर्बीज-द्राक्षा। वि., निर्बीज, निरष्ठील, अष्ठिहीन।
बेधना, क्रि. स., दे. 'बींधना'।
बेधिया, सं. पुं., दे. 'बींधनेवाला'।
बेन, सं. स्त्री. (सं. वेणुः) मुरली २. वंशः।
बेनी, सं. स्त्री., दे. 'वेणी'।
बेनु, सं. पुं. (सं. वेणुः) वंशः, तृणध्वजः। २. मुरली।
बेर, सं. पुं. (सं. बदरी) (वृक्ष) कर्कंधूः (स्त्री.), कर्कन्धुः, बदरिका, कोलं, घोंटा, (बदरः, बालेष्टः) २. (फल) बदरं, बदरी-फलम् इ.।
बेर[1], सं. स्त्री. (सं. वारः) दे. 'बार'।
बेर[2], सं. स्त्री. (सं. वेला>) दे. 'देर'।
बेरियम, सं. पुं. (अं.) अहर्यातु (न.)।
बेरी, सं. स्त्री. (सं. बदरी) दे. 'बेर' (वृक्ष)।
बेल[1], सं. [सं. त्रि(वि)ल्वः] (वृक्ष) मालूरः, महा-श्री-सदा-सत्य,-फलः, शिवद्रुमः, पत्रश्रेष्ठः,-मंगल्यः। (फल) बिल्वं, मालूरफलम् इ.।
—**पत्र,** सं. पुं. (सं. न.) बिल्व-मालूर,-पत्रम्।
बेल[2], सं. स्त्री. (सं. वल्ली) लता, वल्लरी, व्रततीतिः (स्त्री.) उलपः, गुल्मिनी, प्रतानिनी २. वंशः, संततिः (स्त्री.)।
—**बूटा,** सं. पुं., सूची,-कर्मन्-शिल्पं, वस्त्रचित्रितं पुष्पपत्रम्।
बेलचा, सं. पुं. (फ़ा.) खनित्रं, अवदारणम्।
बेलदार, सं. पुं. (फ़ा.) भूखनकः, टंगचालकः।
बेलन, सं. पुं. (सं. वेलनं>) *वेलनम्।
बेलना, सं. पुं. (सं. वेल्लनं) वेल्लनी। क्रि. स., वेल्-वेल्ल् (प्रे.), (क्विन्न-चूर्णपिण्डं) रोटिका-रूपेण 'परिणम्' (प्रे.)।
बेला[1], सं. पुं. (सं. मल्लिका) मल्ली, षट्पद-प्रिया, वनचंद्रिका, अतिगंधा।
बेला[2], सं. पुं., दे. 'वेला'।
बेवकूफ़, वि. (फ़ा.) मूर्ख, मूढ, जड़, निर्बुद्धि।
बेवकूफ़ी, सं. स्त्री. (फ़ा.) मूर्खता, मूढता इ.।
बेवा, सं. स्त्री. (फ़ा.) दे. 'विधवा'।
बेशकीमत-ती, वि. (फ़ा.+अ.) बहुमूल्य, महार्घ।
बेशी, सं. स्त्री. (फ़ा.) अधिकता, आधिक्यं २. वृद्धिः (स्त्री.) ३. लाभः।
बेसन, सं. पुं. (देश.) चणचूर्ण, चणकक्षोदः।
बेसनी, वि. (हिं. बेसन) बेशन-चणचूर्ण,-मय-मिश्रित।
बेसर, सं. पुं. (सं. वेसरः) वेश्वरः, वेगसरः, अश्वतरः।
बेसर, सं. पुं., दे. 'नथ'।
बेहूदगी, सं. स्त्री. (फ़ा.) अशिष्टता, असभ्यता।
बेहूदा, वि. (फ़ा.) अशिष्ट, असभ्य २. अशिष्टतापूर्ण।
—**पन,** सं. पुं., दे. 'बेहूदगी'।
बैंगन, सं. पुं. (सं. वंगनः) (पौदा) मांस-वृत्त-नील,-फला, वार्ताकी, वृंताकः-की, वंगः २. (तरकारी) वृंताकं, वंगफलम्।
बैंग(ज)नी, वि. (हिं. बैंगन) नील-, लोहित-अरुण।
बै, सं. स्त्री. (अ.) विक्रयः, विक्रयणं, मूल्येन दानम्।
बैकुण्ठ, सं. पुं. (सं. वैकुंठः), स्वर्गः, नाकः।
बैजंती, बैजयंती, सं. स्त्री., दे. 'वैजयंती'।
बैज, सं. पुं. (अं.) चिह्नं, लक्षणं, लक्ष्मन् (न.) २. दे. 'चपरास'।

बैटरी, सं. स्त्री. (अं.) विद्युद्यंत्रं २. *विद्युद्दीपिका, दे. 'टार्च' ३. दे. 'तोपखाना'।

बैठक, सं. स्त्री. (हिं. बैठना) *उपवेशकोष्ठकः, दर्शनगृहं, सभाजनकोष्ठः २. आसनं, पीठं ३. अधिवेशनं ४. उपवेशः-शनं ५. उत्थानोपवेशनात्मको व्यायामभेदः ६. संगः।

बैठना, क्रि. अ. (सं. विष्ट>) उपविश् (तु. प. अ.), निषद् (भ्वा. प. अ.), आस् (अ. आ. से.) २. खच्-अनुव्यध् (कर्म.) ३. अभ्यस्त (वि.) भू ४. अधः-अधत्रा तलं गम् ५. नि-,मस्ज् (तु. प. अ.) ६. संकुच् (तु. भ्वा. प. से.), मूल्येन ग्रह् (कर्म.), क्री (कर्म.) ७. लक्ष्यं व्यध् (दि. प. अ.), सिध् (दि. प. अ.) ८. आ-अधि-रुह् (भ्वा. प. अ.) ९. आ-,रोप् (कर्म.), निधा (कर्म.), प्रति-,स्थाप् (कर्म.) १०. दृढं वस् (भ्वा. प. अ.) ११. (केनचित् सह) पत्नीत्वेन संवस् १२. वृत्तिक्षीण (वि.) वृत् (भ्वा. आ. से.) १३. दरिद्री भू, परिक्षि (कर्म.) १४. अप्,-सृ-गम् (भ्वा. प. अ.)। सं. पुं., उपवेशः-शनं, निषदनं, आसितं, आसनं, निषत्तिः(स्त्री.)।

बैठने योग्य, वि., उपवेशनीय, निषदनीय, आसितव्य।

बैठनेवाला, सं. पुं., उपवेशकः, उपवेष्टृ, उपवेशिन्, आसक, निषादिन्।

बैठा हुआ, वि., उपविष्ट, निषण्ण, आसीन।

बैठते-उठते, क्रि. वि., सदा, प्रतिक्षणम्।

बैठे बैठे, बैठे बैठाए, } क्रि. वि., निष्कारणं अहेतुकं २. अकांडे, अतर्कितम्।

बैठवाना, क्रि. प्रे., व. 'बैठना' के प्रे. रूप।

बैठाना, बैठालना, } क्रि. स., व 'बैठना' के प्रे. रूप।

बैत, सं. स्त्री. (अ.) पद्यं, श्लोकः।

बैतरनी, सं. स्त्री., दे. 'बैतरणी'।

बैताल, सं. पुं., दे. 'बेताल'।

बैन, सं. पुं. (सं. वचनं*) शब्दः २. वार्ता ३. *परिदेवनपद्यम् (पंजाब)।

बैना, सं. पुं. (सं. वायनं) वायनकं, सांस्कारिकमिष्टान्नम्।

बैनामा, सं. पुं. (अ. बै+फ़ा. नामः) विक्रयपत्रम्।

बैरंग, वि. (अं. *बेयरिंग) शुल्कापेक्षिन्, *निस्तार्य।

बैर, सं. पुं., दे. 'वैर'।

बैराग, सं. पुं., दे. 'वैराग्य'।

बैरागी, सं. पुं., दे. 'वैरागी'।

बैरी, सं. पुं., दे. 'वैरी'।

बैरोमीटर, सं. पुं. (अं.) वायुभारमापकम्।

बैल, सं. पुं. (सं. व(ब)लीवर्दः) बलदः, वृषः, वृषभः, उक्षन्-अनडुह्-वृषन्-ककुद्मत् (पुं.), पुंगवः, शाङ्करः, सौरभेयः २. जडः, मूढः।

—गाड़ी, सं. स्त्री., बलदशकटी, वृषभव(वा)हनम्।

छकड़े का —, सं. पुं., शाकटः, धुरंधरः, धुरीणः, धौरेयः, प्रासंग्यः।

बूढ़ा —, सं. पुं., जरद्गवः।

हल खींचनेवाला —, सं. पुं., सैरिकः, हालिकः।

बैरून, सं. पुं. (अं.) दे. 'गुब्बारा'।

बैसाख, सं. पुं., दे. 'वैशाख'।

बैसाखी[1], सं. स्त्री. (सं. वैशाखी) आर्याणां पर्वविशेषः।

बैसाखी[2], सं. स्त्री. (सं. वैशाखः>) *वैशाखी, कुक्षियष्टिः (स्त्री.)।

बोझ, सं. पुं. (सं. वोढव्यं ?) भारः, भरः, वीवधः, पर्याहारः २. गुरुत्वं, तोलः, भारः ३. दुष्करकार्यं ४. कार्यचिंता ५. कार्यभारः ६. उत्तरदायित्वम्।

बोझ(झि)ल, वि. (हिं. बोझ) गुरु, भारवत्, भारिक, भारिन्, दुर्वह।

बोटा, सं. पुं. (सं. वृंतं>) छिन्नस्थूलकाष्ठखंडः २. खंडः-डं, शकलः-लम्।

बोटी, सं. स्त्री. (हिं. बोटा) मांसखंडकः-कम्।

—बोटी काटना, मु., शरीरं खंडशः कृत् (तु. प. स.)-शकली कृ, देहं स्तोकशः खंड् (चु.)।

बोतल, सं. स्त्री. (अं. बॉटल) काचकूपी।

बोदा, वि. (सं. अबोध) दुर्-मंद-जड़,-मति-धी-बुद्धि, मूर्ख २. अलस, मंथर ३. निर्बल, अशक्त ४. शिथिल, श्लथ।

बोध, सं. पुं. ( ) उपलब्धिः-प्रतिपत्तिः (स्त्री.), ज्ञानं २. धैर्यं, आश्वासनम्।

—गम्य, वि. (सं.) ज्ञेय, बुद्धिगम्य, सुबोध, सुगम।

बोधक, सं. पुं. (सं.) अध्यापकः, शिक्षकः। वि., शापक, व्यंजक।

बोधन, सं. पुं. (सं. न.) अध्यापनं, शिक्षणं २. ज्ञापनं, सूचनं ३. उत्थापनं, निद्राभंजनं ४. उद्दीपनं, प्रज्वलनम्।

बोना, क्रि. स. (सं. वपनं) आ-नि-,वप् (भ्वा. उ. अ.), (बीजानि)विकृ (तु. प. से.)-आरुह् (प्रे.)। सं. पुं., उप्तिः (स्त्री.), वपनं, वापः, वपः, बीज,-विकिरणं-आरोपणम्।

बोने योग्य, वि., वपनीय, वप्तव्य, वाप्य।

—वाला, सं. पुं., वपः, वापकः, वप्तृ, वापिन्।

बोया हुआ, वि., उप्त, भूमौ विकीर्ण (बीज)।

बोरा, सं. पुं. (सं. पुरं=दोना>) स्यूत, स्योत, प्रसेवः।

बोरिक एसिड, सं. पुं. (अं.) टंकणाम्लः।

बोरिया, सं. स्त्री. (हिं. बोरा) कटः, किलिंजकः २. आस्तरः-रणं, *विष्टरः ३. दे. 'बोरी'।

—(अथवा बोरिया बधना) उठाना, मु., गमन-प्रस्थान-उद्यत (वि.) भू।

बोरी, सं. स्त्री. (हिं. बोरा) स्यूतकः, स्योतकः, प्रसेवकः।

बोल, सं. पुं. (हिं. बोलना) वाणी, गिर्-वाच्-उक्तिः-व्याहृतिः (स्त्री.), वचस् (न.), शब्दः, वाक्यं, वचनं २. व्यंग्य-व्याज-छेक,-उक्तिः (स्त्री.), दे. 'बोली' ३. प्रतिज्ञा ४. वाद्यानां नियतध्वनिः ५. गीतांशः।

—चाल, सं. स्त्री., २. सौहार्दं, सद्भावः, आ-सं,-लापः।

—चाल की भाषा, सं. स्त्री., सांलापिक-व्यावहारिक,-भाषा।

—बाला होना, मु., वाक्यं आइ (कर्म.) २. भाग्यं उद्-इ (अ. प. अ.) ३. यशो वृध् (भ्वा. आ. से.)।

बोलना, क्रि. अ. (सं. ब्रू) आलप्-गद्-भण् (भ्वा. प. से.), ब्रू (अ. उ.), वच् (अ. प. अ.) २. किलकिलायति-ते (ना. धा.), कूज् (भ्वा. प. से.) ३. कथ् (चु.) ४. गै (भ्वा. प. अ.)। सं. पुं., आलपनं, निगदनं, भाषणं, वचनं, गदनं कथनं, कूजनम्।

बोलने योग्य, वि., आलपनीय, वचनीय, गेय।

—वाला, सं. पुं, वाचकः, वक्तृ, निगदितृ, कथकः, व्याख्यातृ, गायकः।

बोला हुआ, वि., उक्त, गदित, कथित, गीत।

बोली, सं. स्त्री. (हिं. बोलना) गिर्-वाच् (स्त्री.), गिरा, उदीरणा, वाणी २. वचनं, उक्तिः (स्त्री.), वाक्यं, शब्दः ३. विक्रय-घोषणा ४. भाषा, वाणी, गिरा ५. उप-प्राकृत-प्रादेशिक,-भाषा ६. वक्र-व्यंग्य-व्याज-छेक-भंगि,-उक्तिः (स्त्री.)-भाषितं, कूटाक्षेपः।

—ठोली, सं. स्त्री., दे. 'बोली' ६.।

—ठोली मारना, मु., भंग्या आक्षिप् (तु. प. अ.) वक्रोक्त्या अधिक्षिप्, व्याजोक्त्या सूच् (चु.)।

बोवा(आ)ना, क्रि. प्रे., व. 'बोना' के प्रे. रूप।

बोहनी, सं. स्त्री. (सं. बोधनं>) प्रथमविक्रयः।

बौखलाना, क्रि. अ. (सं. वायुस्खलनं>) ईषत् उन्मद् (दि. प. से.)-वातुलीभू।

बौछाड़-र, सं. स्त्री. (सं. वायुक्षरणं>) झंझा, झंझा,-अनिलः-वातः-मरुत् (पुं.) २. आसारः, धारासंपातः ३. *सततसंपातः ४. व्यंग्योक्तिः (स्त्री.), दे. 'बोली'(६)।

बौद्ध, सं. पुं. (सं.) गौतमबुद्धानुयायिन्। वि., बुद्ध,-संबंधिन्-प्रचारित।

—धर्म, सं. पुं. (सं.) बुद्धप्रवर्तितधर्मः, बुद्धमतम्।

बौना, सं. पुं. (सं. वामनः) खर्वः, ह्रस्वः, खट्टनः, खट्टरकः, न्यंच्। वि., खर्व, ह्रस्व।

बौरा, वि. (सं. बातुल) विक्षिप्त, उन्मत्त २. अज्ञ, मूर्ख।

बौली, सं. स्त्री. (देश.) विकं, सद्यःप्रसूताया गोदुग्धम्।

ब्याज, सं. पुं, दे. 'सूद'।

ब्याध, सं. पुं., दे. 'व्याध'।

ब्याना, क्रि. स. (सं. बीजं>) जन्-उत्पद् (प्रे.), प्रसू (अ. आ. से.)।

ब्याह, सं. पुं. (सं. विवाहः) उद्वाहः, परिणयः, उपयमः, पाणिः,-ग्रहः-ग्राहः-ग्रहणं, दार,-परिग्रहः-अधिगमः।

ब्याहता, वि. स्त्री. (सं. विवाहिता) ऊढा, परिणीता। सं. पुं., पतिः, भर्तृ।

ब्याहना, क्रि. स. (सं. विवहनं) (पत्नीग्रहण) उद्-वि-वह् (भ्वा. प. अ.), परिणी (भ्वा. प. अ.), उपयम् (भ्वा. आ. अ.), परि-प्रति-

ग्रह् (क्र्. प. से.) २. (पति-ग्रहणं) पतिं विद् (तु. उ. वे.)-लभ् (भ्वा. आ. अ.)-अधिगम् (भ्वा. प. अ.), वृ (स्वा. उ. से.), भर्त्रा संयुज् (कर्म.) ३. उद्वाहं कृ (प्रे.), पाणिं ग्रह् (प्रे.), विवाहेन संयुज् (प्रे.), पाणिग्रहणं संपद् (प्रे.) । सं. पुं., दे. 'ब्याह' सं. पुं. ।

ब्याहने योग्य, वि., उद-वि,-वाह्य-वोढव्य, परिणेय, विवाहयोग्य ।

—वाला, सं. पुं., वि-उद्-वोढृ, परिणेतृ, परिणायकः, पाणि-ग्राहः-ग्राहकः-ग्रहीतृ ।

ब्याहा हुआ, वि. पुं., विवाहित, सपत्नीक, सभार्य, कृतदार, स्त्रीमत्, कुटुंविन्, ऊढ, परिणीत । (वि. स्त्री.) सभर्तृका, पतिवत्नी, सधवा, सुवासिनी, परिणीता, ऊढा ।

ब्योंत, सं. स्त्री. (सं. व्यवस्था) वृत्तं, वृत्तांतः २. कार्यं,-विधिः-प्रणाली-शैली ३. युक्तिः(स्त्री.), उपायः ४. आयोजनं, उपकल्पनं ५. अवसरः ६. व्यवस्था, प्रबंधः ७. सीवनाय वस्त्रकर्तनम् ।

ब्योंतना, क्रि. स., दे. 'कतरना' ।

ब्योपार-री, सं. पुं., दे. 'व्यापार-री' ।

ब्योरा, सं. पुं., दे. 'व्योरा' ।

ब्योहार, सं. पुं., दे. 'व्यवहार' ।

ब्रज, सं. पुं., दे. 'व्रज' ।

ब्रत, सं. पुं., दे. 'व्रत' ।

ब्रह्म, सं. पुं. [सं. ब्रह्मन् (न.)] परमात्मन्, परमेश्वरः, सच्चिदानंदः, जगत्कर्तृ २. आत्मन्, देहिन् ३. ब्राह्मणः (प्रायः समासारंभ में, उ. ब्रह्महत्या) ४. चतुर्मुख, विधिः, पद्मासनः ५. वेदः ६. ब्रह्मांडं, भुवनकोषः ।

—चर्य, सं. पुं. (सं. न.) आश्रमभेदः, प्रथमाश्रमः २. वीर्यरक्षा, अष्टांगमैथुनप्रतिषेधः, यमभेदः (योग.), ऊर्ध्वरेतस्त्वम् ।

—चारिणी, सं. स्त्री. (सं.) ब्रह्मचर्यधारिणी, २. प्रथमाश्रमिणी २. अनूढा, कुमारी ।

—चारी, सं. पुं. (सं-रिन्) व्रतिन्, लिंगिन्, लिङ्गस्थः, ब्रह्मचर्यधारिन् वर्णिन् २. प्रथमाश्रमिन्, अविवाहितः ।

—ज्ञान, सं. पुं. (सं. न.) परमेश्वरबोधः ।

—ज्ञानी, सं. पुं. (सं.-निन्) ब्रह्मवेत्त २. अद्वैतवादिन् ।

—दिन, सं. पुं. (सं.न.) परमेष्ठिदिवसः, सृष्ट्यवधिः (= १०० चतुर्युगी) ।

—पुराण, सं. पुं. (सं. न.) पुराणविशेषः ।

—बंधु, सं. पुं. (सं.) पतितो विप्रः ।

— भोज, सं. पुं. (सं.-ज्यं) ब्राह्मणभोजनम् ।

—मुहूर्त, सं. पुं. (सं. पुं. न.) सूर्योदयात् त्रिचतुरघटीपूर्ववर्तिकालः, ब्रह्मराधः ।

—यज्ञ, सं. पुं. (सं.) ब्रह्मसत्रं, सविधि वेदाध्ययनाध्यापनम् ।

—रंध्र, सं. पुं. (सं. न.) ब्रह्म,-छिद्रं-द्वारम् ।

—रात्रि, सं. स्त्री. (सं.) ब्रह्मणो निशा, प्रलयावधिः (= १०० चतुर्युगी) ।

—वर्चस, सं. पुं. (सं. न.) तपःस्वाध्यायजं तेजस् (न.) ।

—वर्चस्वी, वि. (सं.-स्विन्) ब्रह्मवर्चसविशिष्ट ।

—वादिनी, सं. स्त्री. (सं.) गायत्री । वि., वेदोपदेष्ट्री ।

—वादी, वि. (सं.-दिन्) वेदोपदेशकः ।

—विद्, वि. (सं.) ब्रह्मवेत्तृ २. वेदार्थज्ञः ।

—विद्या, सं. स्त्री. (सं.) उपनिषद्-परा,-विद्या ।

—वेत्ता, सं. पुं. (सं.-वेतृ) ब्रह्मज्ञः ।

—वैवर्त्त, सं. पुं. (सं. न.) पुराणविशेषः ।

—समाज, सं. पुं. (सं.) श्रीराममोहनराजप्रवर्तितः संप्रदायविशेषः ।

—सूत्र, सं. पुं. (सं. न.) दे. 'यज्ञोपवीत' २. शारीरिकसूत्रम् ।

—हत्या, सं. स्त्री. (सं.) विप्रवधः ।

—हत्यारा, सं. पुं. (सं+हिं.) विप्रघ्नः-ब्राह्मणघातकः ।

ब्रह्मत्व, सं. पुं. (सं. न.) परमेश्वर-त्वं-ता २. ब्राह्मणत्वम् ।

ब्रह्मा, सं. पुं. (सं.-ह्मन् पुं.) चतुर्मुखः, अष्टकर्णः, अजः, कः, कंजः, कमल-पद्म-अब्ज ,योनिः, वि-,धातृ, नाभिजः, पद्मासनः, परमेष्ठिन्, पितामहः, विधिः, विरिंचः-चिः-चनः, विश्वसृज्, सर्वतोमुख, स्रष्टृ, स्वयंभूः, हंसवाहनः, हिरण्यगर्भः (सब पुं.) ।

ब्रह्मांड, सं. पुं. (सं. न.) भुवनकोषः, विश्वगोलकः, विश्वं, जगत् (न.), जगती, त्रिभुवनम् ।

ब्रह्माणी, सं. स्त्री. (सं.) ब्रह्मणः पत्नी, शतरूपा, सावित्री, सरस्वती, गायत्री ।

ब्रह्मावर्त्त, सं. पुं. (सं.) तपोवटः, देशविशेषः ।
ब्रह्मासन, सं. पुं. (सं.न.) योग-ध्यान,-आसनम् ।
ब्रह्मास्त्र, सं. पुं. (सं. न.) ब्रह्मस्वरूपमस्त्रं २. अमोघास्त्रभेदः ।
ब्राह्मण, सं. पुं. (सं.) आर्याणामुत्तमो वर्णः २. विप्र., ज्येष्ठवर्णः, अग्र,-जन्मन्-जातकः । भूदेवः, द्वि,-जन्मन्-जातिः, वक्त्रजः, द्विजः, गुरुः, द्विजोत्तमः, षटकर्मन्, ब्रह्मन् (सब पुं.) ।
ब्राह्मणत्व, सं. पुं. (सं. न.) द्विजत्वं, विप्रत्वं, ब्राह्मण्यम् इ. ।
ब्राह्मणी, सं. स्त्री. (सं.) ब्राह्मणपत्नी २. ज्येष्ठवर्णा, द्विजोत्तमा ३. बुद्धिः (स्त्री.) ।
ब्राह्ममुहूर्त्त, सं. पुं. (सं. पुं. न.) अरुणोदयकालस्य प्रथमदंडद्वयम् ।
ब्राह्मी, सं. स्त्री. (सं.) दुर्गा २. भारतवर्षस्य प्राचीनलिपिविशेषः ३. (बूटी) सोमवल्ली, सुरसा, परमेष्ठिनी, ब्रह्मकन्यका, शारदा, सरस्वती ।
ब्रिटिश, वि. (अं.) आंग्ल ।
ब्रुश, सं. पुं. (अं.) आघर्षणी, लोममयी शोधनीमार्जनी २. कूर्चिका-र्ची, तूलिका, वर्तिका ।
ब्रूरी, सं. स्त्री. (अं. ब्रूयूरी) यवासवनी ।
ब्रोंकाइटस, सं. पुं. (अं.) श्वासनालीभुजप्रदाहः ।
ब्लाक, सं.पुं. (अं.) *चित्रफलकः-कं २. चतुरस्रो भूखंडः ३. गृहवर्गः ।
ब्लीचिंग पौडर, सं. पुं. (अं.) श्वेतनक्षोदः, रंगनाशकचूर्णम् ।
ब्लैडर, सं. पुं. (अं.) मूत्राशयः, वस्तिः (पुं. स्त्री.) २. पित्ताशयः ३. (पादकन्दुकस्य) अन्तःकोषः ।

भ

भ, देवनागरीवर्णमालायाश्चतुर्विंशो व्यंजनवर्णः, भकारः ।
भंग[1], सं. स्त्री., दे. 'भांग' ।
भंग[2], सं. पुं. (सं.) भंजनं, भेदनं २. विनाशः, विध्वंसः ३. अतिक्रमणं, उल्लंघनं ४. तरंगः, कल्लोलः ५. पराजयः ६. खंडः-डं ७. बाधा, विघ्नः ८. वक्रता, जिह्मता ९. दे. 'लकवा' ।
भंगड़, वि. (हिं. भांग) भंगाप, भंगापायिन् ।
भँगरा[1], सं. पुं. (सं. भृंगराजः) केश्यः, केशरंजनः, कुंतलवर्द्धनः, पितृप्रियः, भृंगः, केशराजः ।
भँगरा[2], सं.पुं.(हिं.भंग) शाणपटः, वराशिः-सिः ।
भंगराज, सं. पुं. (सं. भृङ्गराजः) पिकाकारः खगभेदः २. दे. 'भंगरा'[1] ।
भंगिन, सं. स्त्री. (हिं. भंगी[1]) खलपूः (स्त्री.), सम्मार्जिका ।
भंगी[1], सं. पुं. (सं. भक्तः>) खलपूः (पुं.), मल्हारकः, संमार्जकः २. क्षुद्रजातिभेदः ।
भंगी[2], वि. (हिं. भंग[1]) दे. 'भंगड़' ।
भंगी,[3] सं. स्त्री. (सं.) भेदः, विच्छेदः २. कुटिलता, वक्रता ३. अंगनिवेशः, विन्यासः ४. कल्लोलः,लहरी ५. व्याजः ६. प्रतिकृतिः (स्त्री.)।
भंगी[4], वि. (सं. भंगिन्) भिदुर, भंगुर, सुभंग, भंजनशील २. भंजक, भंजन, खंडक, खंडन ।
भंगुर, वि. (सं.) भिदुर, सुभंग २. नश्वर, अध्रुव २. कुटिल, वक्र ।
भंजक, वि. (सं.) खंडक, खंडन, त्रोटक २. उल्लंघक, अतिक्रमणकारिन् ।
भंजन, सं. पुं. (सं. न.) खंडनं, त्रोटनं, भेदनं, शकलीकरणं २. अतिक्रमः-मणं, उल्लंघनं, भंगः, व्याहननं ३. वि-,ध्वंसनं ४. भंगः, ध्वंसः ५. नाशनं, लोपनम् । वि., दे. 'भंजक' (१-२) ।
भंजना, क्रि. अ. (सं. भंजनं) दे. 'टूटना' ।
भटा, सं. पुं. (सं. वृंताकः) दे. 'बैंगन' ।
भंड, सं. पुं. (सं.) दे. 'भांड़' ।
भंडा, सं. पुं., दे. 'भांडा' ।
भंडार, सं. पुं. (सं. भांडारं) कोशः-षः, निधिः, शेवधिः, निधानं २. धान्य,-कोष्ठः- अ(आ)गारः-रं ३. पाकशाला. ४. उदरं, जठरं ५. भांडागारः-रं ६. 'दे' 'भंडारा' ।
भंडारा, सं. पुं. (हिं. भंडार) दे. 'भंडार' (१-५) २. समूहः, राशिः ३. साधूनां भोजनोत्सवः ।
भंडारी, सं (हिं. भंडार) कोष्ठकः, अ(आ)गारकः-कं २. कोशः-षः ।
भंडारी, सं. पुं. (भांडारिन्) कोशा(षा)ध्यक्षः, धनाध्यक्षः २. भांडागारिकः, भांडारिकः ३. सूदः, पाचकः ।

भंभीरी, सं. स्त्री. (अनु.) रक्तवर्णः पतंगभेदः, *भंभीरी २. दे. 'तीतरी'।

भँवर, सं. पुं. (सं. भ्रमरकः) जल,-आवर्तः-गुल्मः, भ्रमिः (स्त्री.), आवर्तः, अवघूर्णः, कूलडुंडकः, तानूरः २. दे. 'भ्रमर' ३. गर्तः-र्तं, अवटः।

भँवरा, सं. पुं., दे. 'भ्रमर'।

भँवरी, सं. स्त्री. (हिं. भँवर) दे. 'भँवर' (१), शरीरागस्थं रोम,-वर्तुलं-मंडलम्।

भँवरी, सं. स्त्री. (हिं. भँवरना, सं. भ्रमणं >) दे. 'भाँवर' २. वैवधिकता, भांडवाहकता ३. (प्रजारक्षायै अधिकारिणां) पर्यटनं-परिभ्रमणम्।

भइया, सं. पुं. (हिं. भाई, दे.)।

भक, सं. स्त्री. (अनु.) ज्वाला-झलका,-ध्वनिः (पुं.)।

भक्त, वि. (सं.) धार्मिक, धर्मात्मन्, पुण्य-धर्म,-शील, पुण्यात्मन्। सं.पुं., पूजकः; उपासकः, सेवकः २. अनुयायिन्, अनुगामिन् ३. पक्ष-पातिन्, सहायकः।

भक्ताई, सं. स्त्री., दे. 'भक्ति'।

भक्ति, सं. स्त्री. (सं.) ईश्वर,-सेवा-पूजा-अर्चा-उपासना-परायणता २. नियमः, धार्मिकता, धर्मक्रिया, तपस् (न.) ३. श्रद्धा, निष्ठा ४. परायणता, निरतिः (स्त्री.), अनुरागः, अभिनिवेशः।

भक्षक, वि. (सं.) खादक, अद्मर, भोक्तृ, घस्मर, भोजिन्, -अद, -अद् [भक्षिका (स्त्री.) = खादिका, भोजिनी, भोक्त्री]।

भक्षण, सं. पुं. (सं. न.) अशनं, आस्वादनं, खादनं, भोजनं, अभ्यवहरणं २. आहारः।

भक्षित, वि. (सं.) भुक्त, खादित, अशित।

भक्षी, वि. (सं.-क्षिन्) दे. 'भक्षक'।

भक्ष्य, वि. (सं.), खाद्य, भोज्य, अभ्यवहार्य। सं. पुं. (सं. न.) भोजनं, आहारः, खाद्यवस्तु (न), अन्नम्।

भगंदर, सं. पुं. (सं.) अपानदेशे व्रणरोगभेदः।

भग, सं. पुं. (सं.) सूर्यः २. ऐश्वर्य, धनं ३. सौ-भाग्य,-भाग्यं ४. चंद्रः ५. योनिः (स्त्री.) ६. गुदं ७. पूर्वाफाल्गुनीनक्षत्रं ८. धर्मः ९. कांतिः (स्त्री.) १०. मोक्षः ११. माहात्म्यं १२. यत्नः।

भगण, सं. पुं. (सं.) नक्षत्रसमूहः २. गणभेदः। (SII; छंदशास्त्र)।

भगत, सं. पुं. तथा. वि.; दे. 'भक्त'।

भगतानी, सं. स्त्री. (हिं. भगत) भक्त,-भार्या-पत्नी २. ईश्वर,-उपासिका-पूजिका-सेविका, धर्मशीला ३. अनुगामिनी।

भगती, सं. स्त्री., दे. 'भक्ति'।

भगदर, सं. स्त्री. (हिं. भाग + दौड़) पलायनं, अप,-क्रमणं-यानं, विद्रावः।

—पड़ना या मचना, क्रि. अ., पलाय् (भ्वा. आ. से.), वि-प्र द्रु (भ्वा. प. अ.), अपधाव् (भ्वा. प. से.)।

भगवंत, सं. पुं. (सं. भगवन्तः >) ईश्वरः, भगवत् (पुं.)।

भगवती, सं. स्त्री. (सं.) देवी २. गौरी ३. सरस्वती ४. गंगा ५. दुर्गा।

भगवत्, वि. (सं.) श्रीमत्, लक्ष्मीवत्, ऐश्वर्यशालिन् २. पूज्य, मान्य, अर्चनीय। सं. पुं. (सं.) परमेश्वरः, जगदीश्वरः ३. विष्णुः ४. शिवः ५. जिनः ६. बुद्धः।

—गीता, सं. स्त्री. (सं.) श्रीकृष्णार्जुनसंवादात्मको विख्यातो धर्मग्रंथविशेषः।

भगवाँ-वा, सं. पुं., दे. 'गेरु'। वि., दे. 'गेरुआ'।

भगवान-न्, वि. (सं. भगवत्) दे. 'भगवत्' वि. तथा सं. पुं.।

भगाना, क्रि. स., व. 'भागना' के प्रे. रूप।

भगिनी, सं. स्त्री. (सं.) सोदरा, दे. 'बहन'।

भगीरथ, सं. पुं. (सं.) अयोध्यापतिविशेषः। वि., सुमहत्, विपुल, अत्यधिक।

भगोड़ा, वि. (हिं. भागना) रणविमुख, युद्ध-त्यागिन् २. अपधावित, प्रपलायित ३. भीरु, कातर।

भग्न, वि. (सं.) खंडित, त्रुटित, ध्वस्त २. भिन्न, वि-,दीर्ण ३. पराजित, पराभूत।

भग्नावशेष, सं. पुं. (सं.) ध्वंसावशेषः, दे. 'खंडहर'।

भजन, सं. पुं. (सं. न.) पूजा, अर्चा, सेवा, तपर्य्या २. जपः, संततस्मरणं ३. भक्तिगीतं-तिका।

—करना, क्रि. स., दे. 'भजना'।

भजना, क्रि. स. (सं. भजनं) भज् (भ्वा. उ. अ.), पूज्-सभाज् (चु.), उपास् (अ. आ. से.), आराध् (चु.), नमस्यति (ना. धा.), सेव् (भ्वा. आ. से.) २. जप् (भ्वा. प. से.), निरंतरं स्मृ (भ्वा. प. अ.) ३. आ-श्रि (भ्वा. उ. से.)। क्रि. अ., दे. 'भागना'। सं. पुं. ,दे. 'भजन' (१-२)।

भजने योग्य, वि., भजनीय, उपास्य, सेव्य, जपार्ह, आश्रयणीय।

भजनेवाला, सं.पुं., भक्तः, उपासकः, आराधकः।

भजनीक, सं. पुं. (सं. भजनं>) गायकः, गातृ, गातुः, गेष्णः।

भट, सं. पुं. (सं.) योधः, योद्धृ (सैनिकः, आयुधिकः) २. वीरः, शूरः ३. वर्णसंकरभेदः।

भटकटाई, भटकटैया, सं. स्त्री. (सं. भटः+कंटकः>) दुःस्पर्शा, दुष्प्रधर्षिणी, बहुकंटा, चित्रफला।

भटकना, क्रि. अ. (सं. भ्रान्तक>) मोर्घं पर्यट्-परिभ्रम् (भ्वा. प. से.) २. पथभ्रष्ट (वि.), इतस्ततः या (अ. प. अ.), विपथंगम् ३. भ्रम्, मुह् (दि. प. से.)। सं. पुं., व्यर्थपर्यटनं, पथभ्रंशः, उन्मार्ग-गमनं, भ्रमः, माया, मोहः।

भटकाना, क्रि. स., ब. 'भटकना' के प्रे. रूप।

भटका हुआ, वि., उन्मार्ग-विपथ,-गामिन्, पथ-भ्रष्ट, भ्रांत, मूढ।

भट्ट[1], सं. पुं. (सं. भट्टः) जातिविशेषः २. स्तुति-पाठकः, दे. 'भाट'।

भट्ट[2], सं. पुं., दे. 'भट'।

भट्टा, सं. पुं. (सं. भ्राष्ट्रः>) आपाकः, कंदुः (पुं. स्त्री.), पाकपुटी।

भट्टी, सं. स्त्री. (हिं. भट्टा) अश्मंतं, उद्धानं, अंतिका, अंदिका, अधिश्रयणी, अग्निकुंडं २. संधानी, अभिषवशाला ३. रजककटाहः।

भठियारा, सं. पुं. (हिं. भट्टा) पांथागार,-अध्यक्षः-पतिः २. भृष्टकारः, भ्राष्ट्रमिधः, भर्जन,-कारः-कर्तृ।

भठियारिन-री, सं. स्त्री. (हिं. भठियारा) पांथा-गाराध्यक्षा २. भर्जन,-कारी-कर्त्री, भृष्टकारी।

भड़क, सं. स्त्री. (अनु.) औज्ज्वल्यं, प्रभा, भास् (स्त्री.), अति-बाह्य,-कांतिः-दीप्तिः (दोनों स्त्री.)-शोभा।

—दार, वि. (हिं.+फा.) भासुर, भासमान, उज्ज्वल, दीप्तिमत्।

भड़कना, क्रि. अ. (हिं. भड़क) उत्-प्र ज्वल् (भ्वा. प. से.), उत्-प्र-सं दीप् (दि. आ. से.) २. ससाध्वसं अपसृ (भ्वा. प. अ.)-परावृत् (भ्वा. आ. से.), सहसा कंप् (भ्वा. आ. से.) ३. क्रुध् (दि. प. अ.)।

भड़काना, क्रि. स. व., 'भड़कना' के प्रे. रूप २. उत्तिज् उद्दीप्-(प्रे.)।

भड़कीला, वि. (हिं. भड़क) दे. 'भड़कदार'।

भड़भड़िया, वि. (अनु. भड़भड़) वाचाल, वाचाट, वावदूक, जल्पक, बहुभाषिन्।

भड़भूँजा, सं. पुं. (हिं. भाड़ भूंजना) दे. 'भठियारा' (२)।

भड़भूजी,-जिन, सं. स्त्री. (हिं. भड़भूंजा) दे. 'भठियारिन' (२)।

भड़ुआ, स. पुं. (हिं. भाँड) भगाजीविन्, वेश्याचार्यः, कुंडाशिन्, विटः।

भड्डर, सं. पुं. (सं. भद्र>) क्षुद्रब्राह्मणभेदः।

भणित, वि. (सं.) उक्त, कथित, व्याहृत।

भतीजा, सं. पुं. (सं. भ्रातृजः) भ्रातृव्यः, भ्रात्री-(त्रे)यः, भ्रातुः पुत्रः।

भतीजी, सं. स्त्री. (हिं. भतीजा) भ्रातृजा, भ्रातृव्या, भ्रात्रीया, भ्रातुःपुत्री, भ्रात्रेयी।

भत्ता, सं. पुं. (सं. भक्तं>) *भक्तं, मार्गव्ययः, यात्रावृत्तिः (स्त्री.), यात्रिकम्।

भदभद, वि. (अनु.) अतिस्थूल २. कुदर्शन।

भद्दा, वि. (अनु. भद) कदाकार, कुदर्शन, कुरूप, विषमांग २. नैपुण्य-दाक्ष्य-शून्य ३. अश्लील, अवाच्य।

भद्र[1], वि. (सं.) सभ्य, शिष्ट, सुशिक्षित, श्रेष्ठ, गुणिन्, प्रशस्त, साधु, सुवृत्त, सुशील २. मंगल, कल्याण, शुभ ३. उचित, उपयुक्त। सं. पुं. (सं. न.) कल्याणं, क्षेमं, मंगलं, कुशलं, हितं २. चंदनं ३. गजजातिभेदः ४. सुवर्ण ५. समृद्धिः (स्त्री.)।

भद्र[2], सं. पुं. (सं. भद्राकरणं) केशकूर्चश्मश्रु-मुंडनं, मुंडनम्।

भद्रता, सं. स्त्री. (सं.) शिष्टता, सभ्यता, सज्जनता, सुशीलता।

भद्रासन, सं. पुं. (सं. न.) नृपासनं, सिंहासनं २. योगासनभेदः ।

भनक, सं. स्त्री. (सं. भण् >) मंद-अस्पष्ट-ध्वनिः २. जनप्रवादः, किंवदंती ।

भनभनाना, क्रि. अ. (अनु.) भणभणायते (ना. धा.), गुंज् (भ्वा. प. से.), झंकारं कृ ।

भनभनाहट, सं. स्त्री. (हिं. भनभनाना) भणभणायितं, भणभणध्वनिः, गुंजनं, गुंजितं, झंकारः ।

भव(भ)का, सं. पुं. (हिं. भाप) वक-संधान,-यंत्रम् ।

भभक, सं. स्त्री. (अनु. भक) ज्वालोत्थानं, कीलोद्गतिः (सं. स्त्री.) २. दे. 'उबाल' ।

—मारना, क्रि. अ., गर्ज् (भ्वा. प. से.) ।

भभकना, क्रि. अ. (हिं. भभक) प्रज्वल् (भ्वा. प. से.), उद्दीप् (दि. आ. से.) २. तापातिशयेन स्फुट् (तु. प. से.)-भंज् (कर्म.) ३. दे. 'उबलना' ।

भभकी, सं. स्त्री. (हिं. भभक) विभीषिका, तर्जना, भर्त्सना, भयदर्शनम् ।

—देना, क्रि. स., निर्-,भर्त्स्, तर्ज् (दोनों चु. आ. से.) ।

गीदड़—, मु., कपटविभीषिका, मिथ्या तर्जना ।

भभभड़, सं. पुं., दे. 'भीड़भाड़' ।

भभूका, सं. पुं. (हिं. भभक) ज्वाला, शिखा, अर्चिस् (न.) ।

भभूत, सं. स्त्री. [सं. विभूतिः (स्त्री.)] गोमयभस्मन् (न.) २. वैभवम् ।

—लगाना, क्रि. स., विभूत्या विग्रहं लिप् (तु. उ. अ.) । सं. पुं. भस्मगुंठनम् ।

भयंकर, वि. (सं.) त्रास-भीति भय,-जनक-द-प्रद-आवह, भीम, भीषण, भयानक, रौद्र, भैरव ।

भयंकरता, सं. स्त्री. (सं.) भीमता, भीषणता, भयानकता इ. ।

भय, सं. पुं. (सं. न.) भीः-भीतिः (स्त्री.), साध्वसं, सं-,त्रासः, दरः-रं, भिया २. आतंकः ३. आशंका ।

—खाना या लगना, क्रि. अ., भी (जु. प. अ.), वि-सं-त्रस् (भ्वा. दि. प. से.), दे. 'डरना' ।

—कारक,—प्रद, वि., दे. 'भयंकर' ।

—भीत, वि. (सं.) भीत, भयार्त, ससाध्वस, त्रस्त, सभय, सदर ।

—हीन, वि. (सं.) निर्भय, अभय, निर्भीक, अकुतोभय, दे. 'निर्भय' ।

भयातुर, वि. (सं.) दे. 'भयभीत' ।

भयानक, वि. (सं.) दे. 'भयंकर' ।

भयावना, वि. (सं. भयं >) दे. 'भयंकर' ।

भयावह, वि. (सं.) दे. 'भयंकर' ।

भर, वि. (हिं. भरना) समस्त, सम्पूर्ण, समग्र, यावत् (-ती स्त्री.)-तावत् (-ती स्त्री.) । क्रि. वि., यावत् (द्वितीया के साथ), आ-(पंचमी के साथ-मात्र,-मित,-परिमित,-परिमाण ।

आयु—, क्रि. वि., यावज्जीवं, आमृत्योः ।

कोस—, क्रि. वि., क्रोशं यावत्, क्रोशमात्रम् ।

बाँस—, वि., वंश,-मात्र-मित-परिमाण ।

शक्ति—, क्रि. वि., यथाशक्ति (न.), यावच्छक्यं, यावच्छक्ति (अव्य.) ।

सेर—, वि., सेर-सेटक,-मात्र-परिमित ।

भरण, सं. पुं. (सं. न.) पालनं, पोषणं, संवर्धनं, रक्षणं, समालंबनम् ।

भरणी, सं. स्त्री. (सं.) नक्षत्रविशेषः, यमदेवता २. घोषकलता । वि. स्त्री. (सं.) पालयित्री, पोषिका ।

भरत, सं. पुं. (सं.) कैकेयीपुत्रः, रामानुजः २. शाकुंतलेयः, दौष्यंतिः, सर्वदमनः ३. ऋषभदेवपुत्रः ४. नाट्यशास्त्रलेखको मुनिविशेषः ५. नटः ।

—खंड, सं. पुं. (सं. न.) भारतं, भारतवर्षः र्षं २. भारतांतर्गतकुमारिकाखंडम् ।

भरता[1], सं. पुं. (देश.) *वृंताकभृक्तम् ।

भरता[2]**, भरतार,** सं. पुं. [सं. भर्तारः (बहु.)] भर्तृ, पतिः, धवः २. स्वामिन्, प्रभुः ।

भरती, सं. स्त्री. (हिं. भरना) सैन्यप्रवेशः, २. प्रवेशः ३. भरणं, पूरणं, पूर्तिः (स्त्री.) ।

—करना, क्रि. स., सैन्ये प्रवेशं कृ (प्रे.) ।

—होना, क्रि. अ., सेनायां प्रविश् (तु. प. अ.) ।

—डालना, क्रि. स., गर्तं पूर् (चु.) ।

भरना, क्रि. स. (सं. भरणं) भृ (भ्वा. उ.अ.), भृ (जु. उ. अ.), पॄ. (जु. प. अ.), पॄ (जु. प. से.), पूर् (चु.), व्याप् (स्वा. प. अ.) २. प्रस्तु- पद् (प्रे.) ३. ऋणादिकं शुध्-निस्तृ

(प्रे.) ४. सद् (भ्वा. आ. से.) ५. उत्तिज्-प्रकुप् (प्रे.) ६. लिप् (तु. उ. अ.)। क्रि. अ., भृ-पृ-पॄ-व्याप्-पूर् (कर्म.) २. अंतः कुप् (दि. प. से.) ३. ऋणादिकं शुध् (दि. प. अ.) ४. पुष् (कर्म.)। सं. पुं., भरणं, पूरणं, व्यापनं, पूर्तिः-भृतिः (स्त्री.) २. ऋणं ३. उत्कोचः।

भरने योग्य, वि., भर्तव्य, भरणीय, पूरणीय, पूरयितव्य २. शोधनीय (ऋणादि)।

—वाला, सं. पुं., पूरकः, भर्तृ, पूरयितृ २. ऋणादिशोधकः।

भरा हुआ, वि., सं,-भृत, पूर्ण, पूरित, आ-सं-कीर्ण, व्याप्त, निचित, संकुल, आविष्ट।

भरनी[1], सं. स्त्री. (हिं. भरना) मल्लिकः,त्र (त)-सरः, सूत्रवेष्टः-ष्टनं २. तिर्यक्तंतवः (पुं. बहु.)।

भरनी[2], सं. स्त्री., दे. 'भरणी'।

भरपूर, वि. (हिं. भरना+पूरा) सं-परि-, पूर्ण-पूरित-भृत-संकीर्ण-व्याप्त, निचित। क्रि.वि., पूर्णतया, अशेषेण २. सम्यक्, साधु।

भरभराना, क्रि. अ. (अनु.) आकुल (वि.) भू।

भरमार, सं. स्त्री. (हिं. भरना+मार) बहुलता, प्रचुरता, विपुलता, भूयिष्ठता।

भरवाना, क्रि. प्रे., ब. 'भरना' के प्रे. रूप।

भरसक, क्रि. वि. [हिं. भर+सक (=शक्ति)] यथा,-शक्ति-बलं-सामर्थ्यं, पूर्ण,-शक्त्या-बलेन।

भराई, सं. स्त्री. (हिं. भरना) दे. 'भरना' सं. पुं. २. भरण-पूरण,-भृतिः (स्त्री.)-वेतनम्।

भराना, क्रि. प्रे., ब. 'भरना' के प्रे. रूप।

भरा पूरा, वि. (हिं. भरना+पूरा) संपन्न, समृद्ध २. परि-सं-,पूर्ण।

भरी, सं. स्त्री. (हिं. भर) दशमाषी।

भरोसा, सं. पुं. (हिं. भरा+सं. विश्वासः>) विश्वासः, प्रत्ययः २. आश्रयः, अवलंबः-बनं, आधारः ३. आशा।

—करना, क्रि. अ., आ-अव-लंब् (भ्वा. आ. से.) २. विश्वस् (अ. प. से.) ३. आशां बंध् (क्र. प. अ.)।

भर्ता, भर्तार, } सं. पुं. (सं. भर्तृ) दे. 'भरता'[2]।

भर्ता, सं. पुं., दे. 'भरता'[1]।

भर्ती, सं. स्त्री., दे. 'भरती'।

भर्त्सना, सं. स्त्री. (सं.) तर्जना, निर्भर्त्सना, अधिक्षेपः, निंदा, गर्हा, वाग्दंडः, उपालंभः।

—करना, क्रि. स., निर्भर्त्स्-तर्ज् (चु. आ. से.), गर्ह् (भ्वा. आ. से.), निंद् (भ्वा. प. से.)।

भलमनसत, भलमनसाहत, भलमनसी, } सं. स्त्री. (हिं.भला+मानुस) भद्रता, सज्जनता, आर्यत्वं, महानुभावता।

भला, वि. (सं. भद्र) शुभ, वर, शोभन, उत्तम, श्रेष्ठ, गुणवत्, निर्दोष, साधु, प्रशस्त, प्रशस्य, वर; सु-, सत्- २. उत्कृष्ट, विशिष्ट। सं. पुं. (सं. न.) कल्याणं, कुशलं, मंगलं, हितं २. लाभः, प्राप्तिः (स्त्री.)। अव्य., भवतु, अस्तु, तावत्।

—करना, मु., उपकृ, साहाय्यं दा (जु.उ.अ.)।

—चंगा, वि., नीरोग, स्वस्थ, निरामय।

—बुरा, सं. पुं., दुर्-अश्लील,-वचनं २. हानि-लाभौ।

—मानुस, सं. पुं., भद्रः, आर्यः, सज्जनः।

भले ही, मु., कामं, (लोट्, विधिलिङ् से भी अनुवाद किया जाता है)।

भलाई, सं. स्त्री. (हिं. भला) सज्जनता, साधुता, आर्यता २. उपकारः, उपकृतिः (स्त्री.), परहितम्।

भव, सं. पुं. (सं.) ससारः, जगत् (न.), २. जन्मन् (न.), उत्पत्तिः (स्त्री.) ३. पुनर्जन्मदुःखं ४. सत्ता ५. शिवः ६. मेघः।

—बंधन, सं. पुं. (सं. न.) जगज्जालम्।

—भजन, सं. पुं. (सं.) ईश्वरः, मुक्तिदः।

—भय, सं. पुं. (सं. न.) पुनर्जन्मत्रासः।

—मोचन, वि. (सं.) मोक्षद।

—सागर, सं. पुं. (सं.) संसारपारावारः।

भवदीय, सर्व. (सं.) भावत्क, युष्मदीय, त्वदीय, तावक-यौष्माक [—की (स्त्री.)], यौष्माकीण।

भवन, सं. पुं. (सं. न.) अ(आ)गारः-रं, वेश्मन्-सद्मन् (न.), सदनं, निकेतनं, मंदिरं, गृहं, गेहं २. प्रासादः, नृपमंदिरम्।

भवानी, सं. स्त्री. (सं.) दे. 'पार्वती'।

भवितव्य, वि. (सं.) अवश्यं भाविन्, भवनीय।

भवितव्यता, सं. स्त्री. (सं.) नियतिः (स्त्री.), भाग्यं, भागधेयं, दैवम् ।

भविष्य, वि. (सं.) आगामिन्, अनागत, उत्तर, भविष्यत्, श्वस्तन [—नी (स्त्री.) । सं. पुं. (सं. न.), भविष्यत्-आगामि-भावि-उत्तर-अनागत,-कालः-समयः, अनागतं, श्वस्तनं, प्रगेतनं, भाविन्-आगामिन् (न.), आयतिः (स्त्री.), उदर्कः ।

भविष्यत्, वि. तथा सं. पुं., दे. 'भविष्य' ।

भविष्य(द्)वक्ता, सं. पुं. (सं.-वक्तृ) भविष्यद्-वादिन्, दैवज्ञः, ।

भविष्य(द्)वाणी, सं. स्त्री. (सं.) भावि-कथनं-सूचनं, भविष्यद्वादः ।

भव्य, वि. (सं.) सश्रीक, शोभान्वित, दिव्य, सुप्रभ, शोभन २. शुभ, मंगल ३. सत्य, यथार्थ ४. योग्य ५. भाविन् ६. श्रेष्ठ ७. प्रसन्न ८. महत्, गुरु ।

भव्यता, सं. स्त्री. (सं.) दिव्यता, शोभा, श्रीः (स्त्री.), सुंदरता इ. ।

भसींड, सं. स्त्री. (देश.) मृणालः-लं, शालूकं (विसदंडः ?), विसं, नालीकः २. करहाटः, कर्कटः, शिफाकंदः ।

भसुंड, सं. पुं., दे. 'हाथी' ।

भसुर, सं. पुं. (हिं. ससुर का अनु.) ज्येष्ठः, भर्तुरग्रजः ।

भस्म, सं. पुं. [सं. भस्मन् (न.)] भसितं, वि-,भूतिः (स्त्री.) ।

—करना, क्रि. स., भस्मा(स्मी)कृ, भस्मसात् कृ २. दे. 'जलाना' ।

—होना, क्रि. अ., भस्मीभू, भस्मसात्भू २. दे. 'जलना' ।

—लेपन, सं. पुं. (सं. न.) भस्म,-लुंठन-उद्धूलनम् ।

भस्मक, सं. पुं. (सं. न.) भस्मकीटः, उदररोगभेदः २. क्षुधातिशयः ३. सुवर्ण ४. विडंगः ।

भस्मीभूत, वि. (सं.) भसितीभूत, सर्वथा दग्ध ।

भहराना, क्रि. अ. (अनु.) त्रुट् (दि. प. से.) २. सहसा पत् (भ्वा. प. से.) ३. स्खल् (भ्वा. प. से.) ।

भाँग, सं. स्त्री. (सं. भंगा) गजा, मादिनी, वि-,जया, मातुलानी ।

—खा या पी जाना, मु., उन्मत इव भाष् (भ्वा. आ. से.) ।

भांजा, सं. पुं. (हिं. बहिन) भागिनेयः, स्वस्रि(स्त्री-स्रे)यः ।

भांजी, सं. स्त्री. (हिं. भांजा) भागिनेयी, स्वस्रि(स्त्री)या, स्वस्रेयी ।

भाँटा, सं. पुं., दे. 'बैगन' ।

भांड़, सं. पुं. (सं. भंडः) चाटुपटुः, विनोद-परिहास,-कारिन्, वैहासिकः, परिहासयितृ । (राजा का भांड़) विदूषकः, नर्मसचिवः २. अनुकारिन्, विडंबनकृत् ३. अपत्रप, निर्लज्ज ।

भांड़ा, सं. पुं. (सं. भांडं) (बृहत्-) पात्रं, भाजनं २. सामग्री, साधनानि (न. बहु.) ।

—फूटना, मु., रहस्यं भिद् (कर्म.) प्रकटीभू ।

—फाड़ना, मु., रहस्यं प्रकाश् (प्रे.)-भिद् (रु. प. अ.) ।

भांडागार, सं. पुं. (सं. पुं. न.) }
भांडार, सं. पुं. (सं. भांडारं) } दे. 'भंडार' ।

भाँति, सं. स्त्री. (सं. भेदः) प्रकारः, जातिः (स्त्री.), रूपं,-विधा (उ., बहुविध) २. रीतिः (स्त्री.), शैली, विधिः ।

—भाँति के, मु., विविध, बहु-अनेक-नाना,-विध-रूप-प्रकार ।

भाँपना, क्रि. स. (सं. भा >) ऊह् (भ्वा. आ. से.), अनुमा (जु. आ. अ.) ।

भाँवर-री, सं. स्त्री. (सं. भ्रमणं >) वैवाहिक,-प्रदक्षिणा-परिक्रमः २. परि,-भ्रमणं-अटनं-क्रमणम् ।

—फिरना या लेना, क्रि. अ., प्रदक्षिणीकृ, परिभ्रम्-परिक्रम् (भ्वा. प. से.) ।

भाई, सं. पुं. (सं. भ्रातृ) (सगा) सहोदरः, सोदरः, सोदर्य्यः, समानोदर्य्यः, सगर्भः, सहजः २. सगोत्रः, सजातीयः, सवर्णः, सकुल्यः, सवंशीयः, सनाभिः ३. (संबोधन में) सखे, मित्र, वयस्य, भ्रातः ।

चचेरा—, पितृव्य,-जः-पुत्रः ।

छोटा—, अनुजः, कनीयान् भ्रातृ ।

फुफेरा—, पैतृष्वसेयः, पि(पै)तृष्वस्रीयः ।

बड़ा—, अग्रजः, ज्यायान् भ्रातृ ।

ममेरा—, मातुल,-जः-पुत्रः, मातुलेयः ।

मौसेरा—, मातृष्वसेयः; मातृष्वस्रीयः।
सौतेला—, वैमात्रः, वैमात्रेयः।

—चारा, सं. पुं., भ्रातृत्वं, मातृभावः, सौभ्रात्रं २. मित्रत्वं ३. सवर्णत्वं, सगोत्रत्वम्।

—दूज, सं. स्त्री., यमद्वितीया, कार्तिकशुक्ला द्वितीया, पर्वविशेषः।

—बंद, सं. पुं., ज्ञातयः, स्वजनाः, भ्रातरः, बंधवः, बांधवाः, सजातीयाः, सगोत्राः, सुहृदः (सब बहु.)।

—बंदी, सं. स्त्री., दे. 'भाईचारा'।

—बिरादरी, सं. स्त्री., दे. 'भाईबंद'।

भाखा, सं. स्त्री. (सं. भाषा) दे. 'भाषा' २. हिन्दीभाषा।

भाग, सं. पुं. (सं.) अंशः, विभागः, खंडः-ड्डं २. पार्श्वः-र्श्वं ३. भाग्यं, भागधेयं ४. मस्तकं, ललाटं ५. सौभाग्यं ६. प्रातःकालः ७. वैभवं ८. गणितक्रियाभेदः (=तकसीम)।

—करना, क्रि. स., दे. 'बाँटना'।

—फल, सं. पुं. (सं. न.) फलं, लब्धिः (स्त्री.)।

भाज्यं
भाजकः ४) १६ (४ फलं
१६
×

—भरोसा, सं. पुं., भाग्याश्रयः, दैवपरता।

—जगना, मु., भाग्यं उद्-इ (अ. प. अ.)।

भागड़, सं. स्त्री. (हिं. भागना) सामूहिक-सामुदायिक,- पलायनं- अपमानं- अपधावनं, विद्रावः।

भागना, क्रि. अ. (सं. भाज्) पलाय् (भ्वा. आ. से.), अपधाव् (भ्वा. प. से.), वि-प्र-द्रु (भ्वा. प. अ.), अप,-सृ-सृप् (भ्वा. प. अ.) २. वृज् (चु.), परिहृ (भ्वा. प. अ.)। सं. पुं., पलायनं, अपधावनं, अप,-यानं-द्रवणं-सरणं; परिहरणम्।

भागनेवाला, सं. पुं., दे. 'भगोड़ा'।

भाग-दौड़, सं. स्त्री., दे. 'भगदड़'।

सिर पर पैर रखकर भागना, मु., महाजवेन पलाय् या अपधाव्।

भागवत, सं. पुं. (सं. न.) श्रीमद्भागवतं, महापुराणविशेषः २. देवीभागवतपुराणं ३. भगवद्भक्तः। वि., ऐश्वर; वैष्णव।

भागिनेय, सं. पुं. (सं.) दे. 'भाँजा'।

भागी, सं. पुं. (सं. भागिन्) अंशिन्, अंश-भाग, ग्राहिन्-हारिन् २. दायादः, दायिकः, रिक्थिन्, अंशकः।

भागीरथी, सं. स्त्री. (सं.) गंगा, जाह्नवी २. गंगाया वंगवर्तिशाखाविशेषः।

भाग्य, सं. पुं. (सं. न.) भागधेयं, दिष्टं, अदृष्टं, दैवं, नियतिः (स्त्री.), विधिः, भवितव्यता, विपाकः, प्राक्तनम्।

—उदय, सं. पुं. (सं.) पुण्योदयः, दैवानुकूलता।

—चक्र, सं. पुं. (सं. न.) दैवगतिः (स्त्री.), भाग्यक्रमः।

—वश,—वशात्, क्रि. वि., सौभाग्येन, सुदैवेन, दिष्ट्या, दैवात्।

—वान्, वि. (सं.-वत्) भाग्यशालिन्, महा-भाग, सुभग, धन्य, सौभाग्य-पुण्य,-वत्, सुकृतिन्, श्रीमत्।

—हीन, वि. (सं.) हत-दुर्-मंद,-भाग्य-भाग, दुर्दैव, दैवहतक।

भाजक, वि. (सं.) विभागकल्पक, विभेदक, विच्छेदक, विभाजयितृ २. हरः, हारः, हारकः (गणित) दे. 'भागफल' में।

भाजन, सं. पुं. (सं. न.) दे. 'पात्र'।

भाजित, वि. (सं.) विभक्त, विभाजित २. पृथक्कृत, विश्लेषित।

भाजी, सं. स्त्री. (सं.) व्यञ्जनं, उपसेचनं, अन्नोपस्करः २. शाकः, हरितकः, शिग्रुः ३. दे. 'भांड'।

भाज्य, वि. (सं.) भागार्ह, भाजनीय। सं. पुं. (सं. न.) भागार्हांकः (गणित) दे. 'भागफल' में।

भाट, सं. पुं. (सं. भट्टः) वर्णसंकरजातिविशेषः २. चारणः, वंदिन्, वैतालिकः, मागधः, स्तुति-पाठकः, मधुकः ३. चाटुकारः ४. राजदूतः।

भाटा, सं. पुं. (हिं. भाठना) वेला,-परिवर्तः-अपचयः, क्षीयमाण-अपचीयमान,-वेला।

ज्वार—, सं. पुं., वेलोपचयापचयौ (पुं. द्वि.)।

भाड़, सं. पुं. (सं. भ्राष्ट्रः-ष्ट्रं) अंबरीषं, भर्जनापाकः।

—झोंकना, मु., क्षुद्रकार्यं कृ २. कालं व्यर्थः या (प्रे. यापयति)।

—**में झोंकना** वा **डालना**, मु., नश् (प्रे.), क्षै (प्रे. क्षपयति) २. त्यज् (भ्वा. प. अ.), उपेक्ष् (भ्वा. आ. से.)।

—**में पड़े**, मु., नश्यतु, भस्मसात् भवतु।

भाड़ा, सं. पुं. (सं. भाटकः-कं) भाटं, भाटिः (स्त्री.)।

भाड़े का टट्टू, मु., अस्थिर, अस्थायिन् २. स्वार्थपर, अर्थपर ३. अल्पमूल्य, गुण-सार,-हीन।

भात, सं. पुं. (सं. भक्तं) ओदनः-नं, अन्नं, अंधस (न.) कूरं, भिस्सा, दीदिविः २. वर-वधूपित्रोर्भक्तभोजनात्मको वैवाहिकरीतिभेदः।

भाथा, सं. पुं. (सं. भस्त्रा) दे. 'तरकश'।

भादों, सं. पुं. (सं. भाद्रः) भाद्रपदः, नभस्यः, प्रौष्ठपदः।

भाद्र, भाद्रपद, सं. पुं. (सं.) दे. 'भादों'।

भान, सं. पुं. (सं.) प्रकाशः, ज्योतिस् (न.) २. ज्ञानं ३. आभासः, प्रतीतिः (स्त्री.)।

भानजा, सं. पुं., दे. 'भाँजा'।

भानजी, सं. स्त्री., दे. 'भांजो'।

भानमती, सं. स्त्री. (सं. भानुमती) ऐन्द्र-जालिकी, मायिनी।

भाना, क्रि. अ., दे. 'पसन्द आना'।

भानु, सं. पुं. (सं.) रविः, सूर्यः २. किरणः।

भानुजा, भानुतनया, सं. स्त्री. (सं.) यमुना, कालिंदी, भानुसुता।

भाप, सं. स्त्री. (सं. वा(वा)ष्पः-पम्)।

—**निकलना**, क्रि. अ., वा(वा)ष्पायते (ना.धा.), वाष्पं उत्क्षिप् (तु. प. अ.)-उद्गृ (तु. प. से.)।

—**देना**, क्रि. स., वाष्पेण स्विद् (प्रे.) या पच् (भ्वा. प. अ.)।

—**बनना** या **बनाना**, उद्वाष्पणं, वाष्पी,-भवनं-करणम्।

भाभी, सं. स्त्री. (सं. भातृभार्या) अग्रजपत्नी २. भातृ,-जाया-पत्नी, प्रजावती ३. जननी।

भामा, सं. स्त्री. (सं.) पत्नी, भार्या २. नारी ३. कद्धा स्त्री।

भामिनी, सं. स्त्री. (सं.) कोपना स्त्री २. नारी।

भार, सं. पुं. (सं.) दे. 'बोझ'।

—**वाह**, सं. पुं. (सं.) भारिन्, भारिकः, भार,-हरः-हारः, वाह(हि)कः।

—**उठाना**, मु., प्रष्टव्यतां अंगीकृ।

—**उतारना**, मु., उत्तरदायित्वं हा (जु. प. अ.)।

भारत, सं. पुं. (सं. न.) भारतवर्षः-र्षं, भ(भा)रतखंडं २. महाभारतग्रन्थः।

भारती, सं. स्त्री. (सं.) गिर्-वाच् (स्त्री.), वाणी २. सरस्वती, शारदा ३. वृत्तिभेदः (सा.)।

भारतीय, वि. (सं.) भारत,-देशीय-वर्षीय। सं. पुं., भारतवासिन्।

भारी, वि. (सं.-रिन्) भारिक, गुरु, दुर्वह, भारवत् २. कराल, भीषण ३. महत्, बृहत्, विशाल ४. अत्यंत, अत्यधिक ५. असह्य, दुर्भर, दुर्धर ६. प्रबल ७. शून, स्फीत ८. शांत, ग(गं)भीर।

—**पन**, सं. पुं., भारवत्त्वं, गुरुत्वं, गरिष्ठता।

—**भरकम**, वि., अति-बहु,-भारवत्।

पैर भारी होना, मु., गर्भं धृ (चु.)।

भार्या, सं. स्त्री. (सं.) दाराः (पुं. बहु.), दे. 'पत्नी'।

भाल, सं. पुं. (सं. न.) ललाटं, अलिकं, गोधिः (पुं. स्त्री.), निट(टि)लं, मूर्धन् (पुं.), मस्तं, मस्त(स्ति)कं, मस्तकः।

—**चंद्र,—नेत्र,—लोचन**, सं. पुं. (सं.) शिवः।

भाला, सं. पुं. (सं. भल्लः-ल्लं) दे. 'बरछा'।

—**बरदार**, सं. पुं. (हिं.+फ़ा.) दे. 'बरछैत'।

भालू, सं. पुं. (सं. भालूकः) मल्लु(ल्लू)कः, ऋक्षः, भल्लः, दुर्धर्षः, दीर्घकेशः, दुश्चरः, भालुकः, भाल्लूकः।

भाव, सं. पुं. (सं.) अस्तित्वं, सत्ता, विद्य-मानता २. मानस-मनो,-विकारः वृत्तिः (स्त्री.), विचारः ३. अभिप्रायः, आशयः ४. मुखाकृतिः (स्त्री.) ५. जन्मन् (न.) ६. आत्मन् (पुं.) ७. पदार्थः ८. विद्वस् (पुं.) ९. जंतुः १०. कृत्यं, विभूतिः (स्त्री.)। ११. सं-विषय,-भोगः १२. प्रेमन् (पुं. न.), अनुरागः १३. संसारः १४. कल्पना १५. स्वभावः १६. गूढेच्छा १७. शैली-रीतिः (स्त्री.) १८. दशा १९. भावना २०. विश्वासः २१. प्रतिष्ठा २२. वस्तु,-गुणः-धर्मः २३. उद्देश्य २४. मूल्यं, अर्घः, वस्नः, अवक्रयः, अर्घ-मूल्य,-प्रमाणं २५. श्रद्धा, भक्तिः (स्त्री.) २६. स्थायि-व्यभिचारिसात्त्विकभावाः (काव्य.), नायि-

कादिमानसविकाराः २८. हावः, दे. 'नखरा'।
—ताव, सं. पुं., मूल्यं, अर्घः।
—वाचक, सं. स्त्री. (सं.-वाचिका) संज्ञाभेदः (व्या., उ. श्रेष्ठता)।
—वाच्य, सं. पुं. (सं. न.) वाच्यभेदः (व्या., उ. हस्यते)।
—उतरना या **गिरना,** मु., अर्घः अपचि (कर्म.), मूल्यं ह्रस् (भ्वा. प. से.), मंदायते (ना. धा.)।
—चढ़ना या **बढ़ना,** मु., व्रस्नं वृध् (भ्वा. आ. से.), अवक्रयः उपचि (कर्म.)।
भावज, सं. स्त्री. (सं. भ्रातृजाया) दे. 'भाभी' (२)।
भावता, वि. (हिं. भावना = अच्छा लगना) प्रिय, रुचिकर, रोचक। सं. पुं., वल्लभः प्रियतमः, प्रेमपात्रम्।
भावना, सं. स्त्री. (सं.) ध्यानं, चिंता, विमर्शः, विचारः २. कामना, वासना, इच्छा ३. स्मृत्यनुभवजश्चित्तसंस्कारभेदः ४. सामान्य,-विचारः-कल्पना ५. दे. 'पुट' (वैद्यक)। वि., शोभन, प्रिय, रोचक। क्रि. अ., दे. 'पसंद आना'।
भावाभाव, सं. पुं. [सं.-वौ (द्वि.)] अस्तित्वानास्तित्वे (न.) २. उत्पत्तिविनाशौ ३. जन्ममृत्यू (सब द्वि.)।
भावार्थ, सं. पुं. (सं.) तात्पर्यार्थः, आशयः, तात्पर्यं, भावः २. भावप्रधानटीका।
भावित, वि. (सं.) विचारित, चिंतित।
भावी, वि. (सं.-विन्) दे. 'भविष्य' (वि.)। स. स्त्री., दे. 'भविष्य' सं. पुं. २. दे. 'भवितव्यता'।
भावुक, वि. (सं.) रसिक, सरस, रसभूयिष्ठ, भावप्रधान २. चिंतक, विचारक।
भाव्य, वि. (सं.) भवितव्य, अवश्यंभाविन्।
भाषण, सं. पुं. (सं. न.) कथनं, वचनं, उक्तिः (स्त्री.) २. व्याख्यानं, प्रवचनं, उपदेशः।
भाषांतर, सं. पुं. (सं. न.) अनुवादः।
भाषा, सं. स्त्री. (सं.) वाणी, वाच्-गिर् (स्त्री.), भारती, गिरा, उदीरणा २. हिन्दीभाषा ३. वचस् (न.), वचनं, वाक्यं, उक्तिः (स्त्री.), व्याहारः, निगदः, शब्दः, भाषितं, आलापः ४. सरस्वती ५. अभियोगपत्रं (अर्ज़ीदावा)।
भाषित, वि. (सं.) कथित, उक्त, उदीरित। सं. पुं. (सं. न.) कथनं, वार्तालापः।
भाषी, सं. पुं. (सं.-षिन्)-वादिन्, वक्तृ।
भाष्य, सं. पुं. (सं. न.) टीका, व्याख्या, वृत्तिः (स्त्री.), विवरणम्।
—कार, सं. पुं. (सं.) टीका-भाष्य-व्याख्या,-कारः-कृत् (पुं.) २. महाभाष्यकारः, पतंजलिः, गोनर्दीयः।
भासना, क्रि. अ. (सं. भासनं) भास्-प्रकाश् (भ्वा. आ. से.), २. प्रति-इ (कर्म.) ३. दृश् (कर्म.)।
भासुर, वि. (सं.) दे. 'भास्वर'।
भास्कर, सं. पुं. (सं.) सूर्यः २. अग्निः, (सं. न.) सुवर्ण ३. ज्योतिषग्रन्थकारो भास्कराचार्यः।
भास्वर, वि. (सं.) द्युति-कांति-दीप्ति,-मत्, उज्ज्वल, भासुर, देदीप्यमान, भ्राजमान।
भिंडी, सं. स्त्री. (सं. भिंडा) भिंड, भिंडकः, सुशाकः, करपर्णः, वृत्तबीजः, चतुष्पुंड्रः।
भिक्षा, सं. स्त्री. (सं.) याच्ञा, याचना, अर्थना, २. भिक्षाटनं ३. भैक्ष्यं, दानम्।
—पात्र, सं. पुं. (सं. न.) भिक्षा-दान,-पात्रं-भाजनम्।
भिक्षु, सं. पुं. (सं.) परिव्राज्, परिव्राजकः, व्रजकः, (बौद्ध-) सन्न्यासिन्, मस्करिन्, प(पा)राशरिन् २. दे. 'भिखारी'।
भिक्षुक, सं. पुं. (सं.) दे. 'भिखारी'।
भिखमंगा, सं. पुं., दे. 'भिखारी'।
भिखारिन, सं. स्त्री. (हिं. भिखारी) भिक्षुकी, भिक्षाकी, भिक्षाचरी।
भिखारी, सं. पुं. (हिं. भीख) भिक्षुः, भिक्षुकः, भिक्षाकः, भिक्षाचरः, भिक्षाशिन्, मार्गणः, याचकः, याचनकः, वनीयकः, अर्थिन्।
भिगोना, क्रि. स. (हिं. भीगना) क्लिद् (प्रे.), उंद् (रु. प. से.), आर्द्रीकृ।
भिजवाना, क्रि. प्रे., व. 'भेजना' के प्रे. रूप।
भिटनी, सं. स्त्री. (देश.) स्तनाग्रं, चूचुकम्।
भिड़, सं. स्त्री. (हिं. बर्रै ?) वरटः-टा-टी, इडाचिका, गंधोली, गृहकारिका।
भिड़ना, क्रि. अ. (अनु. भड़ ?) संघट्ट् (भ्वा. आ. से.), संमृद्-संहन् (कर्म.), उप,-इ-या

(अ. प. अ.), संमिल् (तु. प. से.) ३. कलहायते (ना. धा.), युध् (दि. आ. अ.)।

भिड़ाना, क्रि. स., ब. 'भिड़ना' के प्रे. रूप।

भित्ति, सं.स्त्री.(सं.) कु(कू)ड्यं, कुड्यकं, भित्तिका।

भिदना, क्रि. अ. (सं.भिद्) विध्-व्यध् (कर्म.), छिद्रित (वि.) भू २. आहन्-व्रण् (कर्म.)।

भिनकना, भिनभिनाना, क्रि. अ.(अनु. भिनभिन)भिण भिणायते(ना. धा.),भिणभिण,-रणितं-निनदं जन् (प्रे.)।

भिनभिनाहट, सं. स्त्री. (हिं. भिनभिनाना) भिणभिणायितं, भिणभिण,-रणितं-निनदः, झंकारः, गुञ्जनम्।

भिन्न, वि. (सं.) असंबद्ध, अलग्न, पृथग्भूत, विश्लिष्ट २. अन्य, इतर, अपर। सं. पुं. (सं. न.) अपूर्णांकः, राशि-,भागः।

—भिन्न, वि.,अनेक, विभिन्न २. वि-नाना,-विध।

भिन्नता, सं. स्त्री. (सं.) भिन्नत्वं, पृथक्त्वं, भेदः, अंतरम्।

भिलावाँ, सं. पुं. (सं. भल्लातकः) भल्लातः, शोथहृत् (पुं.), वीर,-तरुः-वृक्षः, कृमिघ्नः, भूतनाशनः, स्फोटवीजकः, व्रणकृत् (पुं.)।

भी, अव्य. (सं. अपि) च, अपि च २. अवश्यं ३. अधिकम्।

भीख, सं. स्त्री. (सं. भिक्षा) दे. 'भिक्षा' (१-३)।

—मांगना, क्रि. स., भिक्ष् (भ्वा. आ. से.), भिक्षां याच् (भ्वा. आ. से.)।

भीग(ज)ना, क्रि. अ. (सं. अभ्यंजनं>) क्लिन्न-आर्द्रीं भू, उंद् (कर्म. उद्यते), क्लिद् (दि. प. वे.)।

भीगी बिल्ली होना, मु., भयात् तूष्णीं स्था (भ्वा. प. अ.)।

भीड़, सं. स्त्री. (हिं. भिड़ना) जन,-समुदाय-संमर्दः-ओघः-समूहः २. आपद्-विपद् (स्त्री.)।

—भड़क्का, सं. पुं. **—भाड़,** सं. स्त्री. } सुमहान् जनसंमर्दः ३.।

भीत[1], वि. (सं.) भयार्त्त, त्रस्त, सभय।

ओछे की प्रीत ज्यों बालू की भीत, मु., •क्षुद्रसख्यं हि नश्वरम्।

भीत[2], सं. स्त्री., दे. 'भित्ति'।

भीतर, क्रि. वि. (सं. अभ्यंतरे) अंतः, गर्भे, अंतरे, दे. 'अंदर'। सं. पुं, हृदयं, मानसं, अंतःकरणं २. अंतःपुरं, अवरोधः।

भीतरी, वि. (हिं. भीतर) आंतर-आभ्यंतर [-री (स्त्री.)], अन्तर्, अंतस्थ, अंतर्भव २. गुप्त, गूढ, प्रच्छन्न।

भीति, सं. स्त्री. (सं.) दे. 'भय'।

भीम, सं. पुं. (सं.) युधिष्ठिरानुजः, भीमसेनः, वृकोदरः। वि., दे. भयंकर २. सुमहत्, अति-विशाल।

—के हाथी, मु., अप्रत्यागामि-अप्रत्यावर्ति,-पदार्थः।

भीरु, वि. (सं.) कातर, त्रस्नु, भयशील, भीरु(रु)कः।

भीरुता, सं. स्त्री. (सं.) कातर्यं, कापुरुषत्वं, क्लीवता, त्रस्नुता।

भील, स. पुं. (सं. भिल्लः) म्लेच्छजातिविशेषः।

भीलनी, सं. स्त्री. (हिं. भील) भिल्ली, भिल्लनारी।

भीषण, वि. (सं.) दे. 'भयंकर'।

भीषणता, सं. स्त्री. (सं.) दे. 'भयंकरता'।

भीष्म, सं. पुं. (सं.) गांगेयः, देवव्रतः, शांतनु-पुत्रः २. शिवः। वि., दे. 'भयंकर'।

भुक्खड़, वि. (हिं. भूख) बुभुक्षित, क्षुधार्त २. औदरिक, बहुभोजिन्, अग्नर, घस्मर, अत्याहारिन् ३. दरिद्र, दीन।

भुक्त, वि. (सं.) भक्षित, जग्ध २. उपभुक्त, व्यवहृत।

—शेष, वि. (सं.) उच्छिष्ट, जुष्ट।

भुक्ति, सं. स्त्री. (सं.) भोजनं, आहारः, अन्नं २. विषयोपभोगः, लौकिकसुखम्।

भुखमरा, वि. (हिं. भूख-मरना) दे. 'भुक्खड़' (२, ३)।

भुगतना, क्रि. स. (सं. भुक्त>) उप-,भुज् (रु. आ. अ.),अनुभू, प्राप् (स्वा. प. अ.) २. क्षम्-सह् (भ्वा. आ. से.), मृष् (दि. प. से.; चु.) ३. (ऋणादिकं) शुध् (दि. प. अ.), अपाकृ (कर्म.)। क्रि. अ., समाप् (कर्म.), पूर् (कर्म.), निर्वृत् (भ्वा. आ. से.), अवसो (कर्म.)।

भुगतान, सं. पुं. (हिं. भुगतना) निर्वृत्तिः-समाप्तिः-सिद्धिः-पूर्तिः (स्त्री.) २. (ऋणादि-कस्य) निस्तारः, परिशुद्धिः, अपनयनम्।

भुगताना, क्रि. प्रे., व. 'भुगतना' क्रि. स. के प्रे. रूप।

भुजंग
भुजंगम } सं. पुं. (सं.) दे. 'सर्प'।

भुजंगी-गिनी, सं. स्त्री., दे. 'सर्पिणी'।

भुज, सं. पुं. (सं.) भुजा, बाहुः, दोर्दंडः २. (ज्योमैट्री में) भुजः, बाहुः, पार्श्वः।

—दंड, सं. पुं. (सं.) दोर्-बाहु,-दंडः।

—पाश, सं. पुं. (सं.) आलिंगनं, परिष्वंगः।

—बंद, सं. पुं., अंगदं, केयूरं, बाहुवलयः।

—मूल, सं. पुं. (सं. न.) कक्षा, दोर्मूलं, खडिकः।

भुजना, सं. पुं. (हिं. भूजना) *भृष्टान्नम्।

भुजा, सं. स्त्री. (सं.) दे. 'भुज'।

भुजिया, सं. स्त्री. (हिं. भूजना) *भर्जिता, भृष्टशुष्क,-शाकः-शिग्रुः। सं. पुं, क्वथितधान्यं २. क्वथितधान्यतंडुलः।

भुट्टा, सं. पुं. (सं. भृष्ट >) मकायकणिशम्।

भुतना, सं. पुं., दे. 'भूत' (७-९)।

भुनगा, सं. पुं. (अनु.) (१-२) कीट-पतंग,-भेदः।

भुनना, क्रि. अ., व. 'भूनना' के कर्म. रूप २. व. 'भुनना' के कर्म. के रूप।

भुनभुनाना, क्रि. अ. (अनु.) भुगभुणायते (ना. धा.), अव्यक्तं वच् (अ. प. अ.)।

भुनवाना, क्रि. प्रे., व. 'भूनना' के प्रे. रूप। २. व. 'भुनाना' के प्रे. रूप।

भुनाई[१], सं. स्त्री. (हिं. भूनना) भर्जन,-भृतिः-भाटिः (दोनों स्त्री.)।

भुनाई[२], सं. स्त्री. (हिं. भुनाना) नाणकविनिमयभाटिः-भृतिः (दोनों स्त्री.)।

भुनाना[१], क्रि. प्रे., व. 'भूनना' के प्रे. रूप।

भुनाना[२], क्रि. स. (सं. भंजनं) अल्पनाणकेभ्यः बृहन्नाणकानि प्रतिदा (जु. उ. अ.), नाणकानि *भंज्-*त्रुट् (प्रे.), नाणकानि विनिमे (भ्वा. आ. अ.)।

भुरकुस, सं. पुं. (अनु. भुर >) *चूर्णं, क्षोदः।

—निकालना, मु., निर्दयं तड् (चु.) २. नश्-ध्वंस् (प्रे.)।

भुरता, सं. पुं. (अनु. भुर >) दे. 'भरता' २. चूर्णित-विकृत,-पदार्थः।

—करना, मु., आपीड्य चूर्णं् (चु.)-पिष् (रु. प. अ.)।

भुरभुरा, वि. (अनु.) भिदुर, भंगुर, सुभंग २. वालुकानिभ।

भुलक्कड़, वि. (हिं. भूलना) विस्मरणशील, मंद-अल्प,-स्मृति २. प्रमादिन्, प्रमत्त।

भुलाना, क्रि. प्रे., व. 'भूलना' के प्रे. रूप।

भुलावा, सं. पुं. (हिं. भुलाना) प्र-,वंचना, प्रतारणा, छलम्।

—देना, क्रि. स., प्रतृ (प्रे.), वंच् (चु.)।

भुवः, अव्य. (सं.) आकाशः-शं, अंतरिक्ष-लोकः, द्वितीयलोकः २. द्वितीयमहाव्याहृतिः (स्त्री.)।

भुवन, सं. पुं. (सं. न.) जगत् (न.), जगती, सृष्टिः (स्त्री.), संसारः २. जलं ३. जनः, लोकः ४. चतुर्दश-भुवनानि (न. वहु.)-लोकाः।

त्रि—, सं. पुं. (सं. न.) त्रिलोकी, लोकत्रयम्।

भुस, सं. पुं., दे. 'भूसा'।

भुसी, सं. स्त्री., दे. 'भूसी'।

भूँकना, क्रि. अ. (अनु.) दे. 'भौंकना' (१-२)।

भूँचाल, (सं. भूचालः) मही-, भू-कंपः-प्रकंपः-चलनं, क्ष्मायितम्।

भूँजना, क्रि. स., दे. 'भूनना' (१-२)।

भूँडाल, सं. पुं., दे. 'भूँचाल'।

भू, सं. स्त्री. (सं.) धरणी, धरा, दे. 'पृथिवी' २. स्थानं, स्थलम्।

—कंप, सं. पुं. (सं.) दे. 'भूँचाल'।

—चाल,
—डोल, } दे. 'भूँचाल'।

—तल, सं. पुं. (सं. न.) धरातलं २. पृथिवी।

भूख, सं. स्त्री. (सं. बुभुक्षा) क्षुधा, क्षुध् (स्त्री.), जिघत्सा, अश्नाया, अश्नायितं २. आवश्यकता ३. अभिलाषः।

—लगना, क्रि. अ., क्षुध् (दि. प. अ., चतुर्थी के साथ), भुज् (सन्नंत, बुभुक्षति-ते) क्षुधया अर्द्-पीड् (कर्म.)।

—का अभाव, सं. पुं., अरुचिः (स्त्री.), भक्त,-उपघातः-द्वेषः।

—प्यास, सं. स्त्री., क्षुधापिपासे, क्षुत्तृषे।

भूखों मरना, मु., आहाराभावात् मृ (तु. आ.

अ.)-अवसद् (भ्वा. प. अ.)-नश् (दि प. वै.)।

भूखा, वि. (हिं. भूख) क्षुधा,-आविष्ट-आतुर-आर्त्त-अन्वित-पीडित, क्षुधित, जिघत्सु, बुभुक्षु, अन्नार्थिन्, अश्नायित २. इच्छुक ३. दरिद्र।

—प्यासा, वि., क्षुत्पिपासित, क्षुत्तृषार्त्त।

भूखे प्यासे, मु., *निरन्नपानं, अन्नपानं विना।

भूगर्भ, सं. पुं. (सं.) धरा,-अंतरं-अभ्यंतरं-गर्भः।

—गृह, सं. पुं. (सं. न.) भू,-गेहं-गृहम्।

—शास्त्र, सं. पुं. (सं. न.) भूतत्त्व,-शास्त्रं-विद्या-विज्ञानम्।

—शास्त्रवेत्ता, सं. पुं. (सं.-तृ) भूतत्त्वज्ञः, भूगर्भशास्त्रज्ञः।

भूगोल, सं. पुं. (सं.) भूमंडलं, भुवनकोषः २. भूगोल,-विद्या-शास्त्रं, भूपृष्ठविद्या।

—वेत्ता, सं. पुं. (सं.-तृ) भूगोलशास्त्रज्ञः।

भूचक्र, सं. पुं. (सं. न.) पृथ्वीपरिधिः २. विषुवद्रेखा ३. अयनवृत्तं ४. क्रांतिवृत्तम्।

भूचर, सं. पुं. (सं.) स्थलचरः २. शिवः।

भूत, सं. पुं. (सं. न.) पृथ्व्यप्तेजोवाय्वाकाश-पंचकं २. जड़चेतनपदार्थः, चराचरवस्तु (न.) ३. प्राणिन्, जीवः ४. भूत-अतीत,-कालः ५. शवः ६. क्रियारूपभेदः (व्या.) ७. रुद्रानुचराः पिशाचाः ८. मृतस्य आत्मन् (पुं.) ९. पिशाचः, प्रेतः, रक्षस् (न.), राक्षसः। वि. (सं.) गत, वि-,अतीत, २. युक्त ३. सदृश ४. परिणत (सवप्रायः समासांत में)।

—उतारना, क्रि. स., भूतान् निष्कस् (प्रे.)-अपनुद् (तु. प. अ.)-अपस् (प्रे.)।

—काल, सं. पुं. (सं.) पूर्वभूत-अतीत-, कालः-समयः।

—नाथ
—भावन, } सं. पुं. (सं.) शिवः।

—पूर्व, वि. (सं.) प्राक्तन, पूर्वतन, पौर्विक।

—संचार, सं. पुं. (सं.) भूतावेशः।

—चढ़ना या सवार होना, मु., अतिनिर्बंधेन अव-स्था (भ्वा. आ. अ.) २. अत्यर्थं क्रुप् (दि. प. से.)।

भूतत्वविद्या, सं. स्त्री. (सं.) दे. 'भूगर्भविद्या'।

भूतात्मा, सं. पुं. (सं-त्मन्) जीवात्मन्, देहिन् २. शरीरं ३. परमेश्वरः ४. विष्णुः ५. शिवः।

भूताविष्ट, वि. (सं.) पिशाच-भूत,-ग्रस्त-पीडित-आक्रांत।

भूतावेश, सं. पुं. (सं.) भूत,-संचार-क्रांतिः (स्त्री.), पिशाचावेशः।

भूति(त)नी, सं. स्त्री. (हिं. भूत) शाकिनी, डाकिनी, राक्षसी, पिशाची-चिका।

भूदेव, सं. पुं. (सं.) ब्राह्मणः, भूसुरः।

भूधर, सं. पुं. (सं.) गिरिः, पर्वतः।

भूनना, क्रि. स. (सं. भर्जनं>) भृज् (भ्वा. आ. से.), भ्रस्ज् (तु. उ. अ.), ईषत्तापेन प्लुष् (भ्वा. प. से.)-शुष् (प्रे.)।

भूप, सं. पुं. (सं.) भूपतिः, भूपालः, नृपः, राजन् (पुं.)।

भूपति
भूपाल } सं. पुं. (सं.) नृपः, दे. 'राजा'।

भूभल, सं. स्त्री. (सं. भूः+हिं. बलना) उष्ण,-भसितं-भस्मन् (न.)-बालुका।

भूमंडल, सं. पुं. (सं. न.) पृथिवी, धरा, धरित्री।

भूमिका, सं. स्त्री. (सं.) प्रस्तावना, उपोद्घातः, अवतरणिका, आमुखं, मुखबंधः २. वेशांतर-परिग्रहः।

भूमि, सं. स्त्री. (सं.) धरा, धरित्री, दे. 'पृथिवी'।

—ज, वि. (सं.) भूमिजात।

—जा, सं. स्त्री. (सं.) जानकी, सीता।

—पुत्र, सं. पुं. (सं.) मंगलग्रहः, भूसुतः।

—सुता, सं. स्त्री. (सं.) सीता, वैदेही।

भूय, अव्य. (सं. भूयस्) पुनः, पुनरपि।

भूरा, वि. (सं. बभ्रु) धूलि-मृद्,-वर्ण-रंग २. कपिल-श, पिंग, पिंगल। सं. पुं., १-२ बभ्रु-पिंगल,-वर्णः-रंगः ३. शर्करा, सिता।

भूरि, वि. (सं.) अधिक, बहु, प्रचुर २. महत्, गुरु।

भूल, सं. स्त्री. (हिं. भूलना) विस्मरणं, विस्मृतिः (स्त्री.) २. दोषः, अपराधः ३. अशुद्धिः (स्त्री.), स्खलितं, स्खलनं २. मोहः, भ्रमः।

—चूक, सं. स्त्री., प्रमादः, अपराधः, त्रुटिः (स्त्री.), स्खलितम्।
—भुलैयाँ, सं. स्त्री., सुगहनस्थानं, भ्रांतिचक्रं २. संशय-संदेह,-आस्पदम्।
भूलना, क्रि. स. (प्रा. भुल्लइ) विस्मृ (भ्वा.प.अ.) २. स्खल् (भ्वा. प. से.), प्रमद् (दि. प. से.) ३. त्यज् (भ्वा. प. अ.), हा (जु. प. अ.)। क्रि. अ., विस्मृ (कर्म.) २. भ्रंश्-नश् (दि. प. से), च्यु (भ्वा. आ. अ.) ३. गर्वित-अवलिप्त (वि.) भू. ४. कम् (भ्वा. आ. से.), स्निह् (दि. प. से., सप्तमी के साथ)। सं. पुं., विस्मरणं, विस्मृतिः (स्त्री.) २. प्रमादः, स्खलितं ३. भ्रंशः, नाशः।
भूलने योग्य, वि., विस्मर्तव्य, विस्मरणीय।
भूलनेवाला, सं. पुं., दे. 'भुलक्कड़'।
भूला हुआ, वि., विस्मृत, स्मृतिपथात् अपेत।
भूला-भटका, वि., पथ-मार्ग,-भ्रष्ट।
भूलोक, सं. पुं. (सं.) मर्त्यलोकः, भूमिः (स्त्री.)।
भूशायी, वि. (सं.-यिन्) धराशायिन्, मृत, २. भूमिशयन ३. भूमौ पतित।
भूषण, सं. पुं. (सं. न.) आभरणं, अलंकारः, आ-,वि-भूषणं, दे. 'गहना'।
भूषा, सं. स्त्री. (सं.) अलंक्रिया, परिष्-,कारः-क्रिया, प्रसाधनं, नेपथ्यम्।
भूषित, वि. (सं.) अलंकृत, परिष्कृत, प्रसाधित, मण्डित।
भूसा, सं. पुं. (सं. बुसं>) पलालः-लं, यवसं, धान्यतृणं, पलः।
भूसी, सं. स्त्री. (हिं. भूसा) दे. 'भूसा' २. बुषं, बुसं, तुषः-सः, कडंगरः, धान्यत्वच् (स्त्री.)।
भूसुर, सं. पुं. (सं.) विप्रः, ब्राह्मणः।
भृंग, सं. पुं. (सं.) भ्रमरः, षट्पदः २. कीटभेदः।
—राज, सं. पुं. (सं.) पक्षिभेदः २. केशरंजनः, केश्यः, कुंतलवर्द्धनः, क्षुपभेदः।
भृकुटी, सं. स्त्री. (सं.) दे. 'भौंह'।
भृगु, सं. पुं. (सं.) मुनिविशेषः २. परशुरामः।
—नाथ, सं. पुं. (सं.) परशुरामः, भृगुरामः।
भृत, वि. (सं.) पूरित, पूर्ण, निचित २. पालित, पोषित।
भृतक, सं. पुं. (सं.) वैतनिकः, कर्मकरः।
भृति, सं. स्त्री. (सं.) वेतनं भृत्या २. कर्मण्या, तुलिका, भरण्यं, भर्मण्या ३. मूल्यं ४. पूरणं, भरणं ५. पालनं ६. वैतनिकता।
भृत्य, सं. पुं. (सं.) सेवकः, दे. 'नौकर'।
भृश, क्रि. वि. (सं. भृशं) अत्यंतं, अत्यधिकम्।
भेंगा, वि. (देश.) केकर, केदर, टेर, टगर, वलिर।
—पन, सं. पुं., तिर्यग्दृष्टिः (स्त्री.), टेरता इ.।
भेंट, सं. स्त्री. (सं. भिद्>) सं(समा)गमः, संमिलनं, साक्षात्कारः २. उपहारः, उपायनं, प्राभृतं-तकं, प्रदेशनम्।
—करना, क्रि. स., संमिल् (तु. प. से.), अभि-सं-मुखीभू, सं-इ (अ. प. अ.) २. उत्सृज् (तु. प. अ.), उपहृ (भ्वा. प. अ.), उपढौक् (प्रे.), ऋ (प्रे. अर्पयति)।
भेक, सं. पुं. (सं.) दे. 'मेढक'।
भेख, सं., पुं. दे. 'वेष'।
भेजना, क्रि. स. (सं. व्रजनं>) सं-,प्रेषू (प्रे.), प्र-हि (स्वा. प. अ.), प्रस्था (प्रे.), विसृज् (तु. प. अ.), सं-, प्रेर् (प्रे.)। सं. पुं., सं-, प्रेषणं-प्रेरणं, विसर्जनं, प्रस्थापनं, प्रहितिः(स्त्री.)।
भेजने योग्य, वि., प्रेषयितव्य, प्रस्थाप्य, प्रहयणीय।
भेजनेवाला, सं. पुं., प्रेषकः, प्रेरकः, प्रहेतृ।
भेजा हुआ, वि., प्रेषित, विसृष्ट, प्रहित।
भे(भि)जवाना, क्रि. प्रे.,व. 'भेजना' के प्रे.रूप।
भेजा, स. पुं. (दश.) दे. 'मग़ज़'।
भेड़, सं. स्त्री. (सं. भेडकः>) मेषी, एडका, अविला, उरणी, उरा, कुररी, जालकिनी, अविः (स्त्री.), रुजा (पुं., दे. 'भेड़ा') २. मूढः, मूढधीः, ऋजुः।
भेड़ना, क्रि. स., दे. 'बंद करना'।
भेड़ा, सं. पुं. (सं.भेड़ः) अविः, उरणः, उरभ्रः, ऊर्णायुः, एडकः, मेढ्रः, हुडः, रो(लो)मशः, भेड्डः, भेडकः।
भेड़िया, सं. पुं. (हिं. भेड़) वृकः, कोकः, ईहामृगः।
—धसान, सं. पुं., अंध,-अनुकरणं-अनुसरणं-अनुवर्तनम्।

भेड़ी, सं. स्त्री., दे. 'भेड़'।

भेद, सं. पुं. (सं.) छेदः, दे. 'भेदन' २. शत्रु-वशीकरणोपायभेदः, उपजापः ३. रहस्यं, गूढाशयः ४. अन्तरं, विशेषः ५. प्रकारः, जातिः (स्त्री.)।

—खोलना, क्रि. स., रहस्यं विवृ (स्वा.उ.से.)।

—पाना, क्रि. स., गुह्यं बुध् (भ्वा. प. से.)।

—लेना, क्रि. स., गोप्यं ज्ञा (सन्नंत,जिज्ञासते)।

—बुद्धि, सं. स्त्री. (सं.) विश्लेषः, विच्छेदः, ऐक्याभावः।

—भाव, सं. पुं. (सं.) अंतरं, विशेषः।

भेदक, वि. (सं.) भेत्तृ, छेत्तृ २. रेचक।

भेदन, सं. पुं. (सं. न.) विदारणं, छेदनं, वेधनं, व्यधः-धनं, त्रोटनम्। वि., भेदक २. रेचक।

भेदिया, भेदी. } सं. पुं. (सं. भेदः >) दे. 'जासूस' २. रहस्यविद् (पुं.)।

भेदी[२], वि. (सं. भेदिन्) छेदक, विदारक।

भेद्य, वि. (सं.) छेद्य, विदारणीय।

भेरी, सं. स्त्री. (सं.) भेरिः (स्त्री.), दुंदुभिः, डिंडिमः, पटहः, ढक्का।

भेली, सं. स्त्री. (देश.) गुडपिंडः-डम्।

भेष, सं. पुं., दे. 'वेष'।

भेषज, सं. पुं. (सं. न.) औषधं, अगदः, भैषज्यम्।

भेस, सं. पुं., दे. 'वेष'।

भैंस, सं. स्त्री. (सं. महिषी) मंदगमना, महाक्षीरा, पयस्विनी, कलुषा।

भैंसा, सं. पुं. (सं. महिषः) अश्वारिः, कलुषः, कासरः, कृष्णशृंगः, गद्गदस्वरः, जर(रं)तः, यमरथः, लुलापः(यः), वीरस्कंधः, सैरिभः, हेरंबः।

भैया, सं. पुं., दे. 'भाई'।

भैरव, सं. पुं. (सं.) शंकरः, शिवः २. शिवगण-भेदः ३. रागभेदः। वि., भीम, भीषण, भयङ्कर।

भैरवी, सं. स्त्री. (सं.) चामुंडा, देवीविशेषः २. रागिणीभेदः।

भैरों, सं. पुं., दे. 'भैरव'।

भोंकना, क्रि. स. (अनु. भक) सहसा शस्त्रादिकं निविश् (प्रे.), व्यध् (दि. प. अ.) २. अकस्मात् आहन् (अ. प. अ.)।

भोंडा, वि., दे. 'भद्दा'।

भोंदू, वि. दे., 'बुद्धू'।

भोंपू, सं. पुं. (अनु. भों) काहलः-लं-ला, मुख वाद्यभेदः।

भोक्ता, वि. (सं. भोक्तृ) खादक, भक्षक २. विलासिन्, विषयिन् ३. प्र-उप,-योक्तृ। सं. पुं., पतिः।

भोग, सं. पुं. (सं.) सुख-दुःखादीनामनुभवः-२. सुखं ३. दुःखं ४. रतिः (स्त्री.), संभोगः ५. सर्पफणः-णं-णा ६. सर्पः ७. धनं ८. गृहं ९. भक्षणं १०. शरीरं ११. परिमाणं १२. विपाकः, कर्मफलं १३. भुक्तिः (स्त्री.) (क़ब्ज़ा) १४. नैवेद्यं १५. भाटकः-कम्।

—लगाना, क्रि. स., देवाय नैवेद्यं ऋ (प्रे. अर्पयति) २. भक्ष् (चु.)।

—विलास, सं. पुं. (सं.) आमोदप्रमोदाः (पुं. बहु.), सुखं, हर्षः।

भोगना, क्रि. सं. (सं. भोगः >) दे. 'भुगतना' (१-२)।

भोगी, वि. (सं.-गिन्) भोग-विषय,-आसक्त-लंपट, विलासिन् २. भक्षक।

भोग्य, वि. (सं.) उपयोक्तव्य, उपयोगिन् २. भोगार्ह, उपभोक्तव्य ३. भक्ष्य। सं. पुं. (सं. न.) धनं २. धान्यम्।

भोज[१], सं. पुं. (सं.) धारानगरस्य नृपविशेषः।

भोज[२], सं. पुं. (सं. भोजनं) भक्ष्यं, आहारः २. सह-सं,-भोजनं, सन्धिः (स्त्री.)।

भोजन, सं. पुं. (सं. न.) भक्षणं, खादनं, अशनं, आस्वादनं २. खाद्यं, भोज्यं, भक्ष्यम्।

—करना, क्रि. स., भुज् (रु. आ. अ.), भक्ष् (चु.)।

—भट्ट, सं. पुं.-(सं. भोजनभटः) अत्याहारिन्, अक्षरः, धस्मरः।

—शाला, सं. स्त्री. (सं.) भोजन,-आलयः-आगारः(रं) २. पाकशाला, महानसः-सम्।

भोजनाच्छादन, सं. पुं. (सं. न.) अन्नवस्त्रं, अशनवसनम्।

भोजपत्र, सं. पुं. (सं.) भूर्जवृक्षः, बहुलवल्कलः, छत्रपत्रः, मृदु-बहु,-त्वच् (पुं.)।

भोज्यं, वि. (सं.) भक्ष्य, खाद्य, सं. पुं., भक्ष्यपदार्थः।

भोंपा, सं. पुं. (अनु. भों) दे. 'भोंपू' २. मूर्खः।
भोर, सं. पुं. (सं. विभावरी >) उषा, उषस् (स्त्री.) वि-प्र,-भातं, विहानः-नम् ।
भोला, वि. (हिं. भूलना) सरल, ऋजु, निष्कपट, निश्छल २. मूर्ख, जड ।
—नाथ, सं. पुं. (हिं. + सं.) शिवः ।
—पन, सं. पुं., आर्जवं, सरलता, निर्व्याजता २. मौर्ख्यं, अज्ञता ।
—भाला, वि., निष्कपट, सरल, ऋजु ।
भौं, सं. स्त्री., दे. 'भौंह' ।
भौंकना, क्रि. अ. (अनु. भौं भौं) वुक्क् (भ्वा. प. से., चु.), भष् (भ्वा. प. से.) २. प्र-,जल्प् (भ्वा. प. से.) । सं. पुं., वुक्कनं, भाषणं ३. जल्पः-पनम् ।
भौंर, सं. पुं. (सं. भ्रमरः) दे. 'भ्रमर' २. जलावर्तः, भ्रमिः (स्त्री.) ।
भौंरा, सं. पुं. (सं. भ्रमरः) दे. 'भ्रमर' २. भ्रमरकः-कं, क्रीडनकभेदः ३. भू,-गेहं-गृहम् ।
भौंरी, सं. स्त्री. (सं. भ्रमरी) षट्पदी, मधुकरी २. घोटकादिशरीरस्थं रोम,-चक्रं-मंडलं-वर्तुलं ३. वैवाहिक,-परिक्रमः-प्रदक्षिणा ४. आवर्तः, जलगुल्मः ।
भौंह, सं. स्त्री. [सं. भ्रूः (स्त्री.)] चिल्लिका, भ्रूलता, नयनोर्द्ध्वर्ति रोमराजी ।
—चढ़ाना या **तानना,** मु., कुप् (दि. प. से.), क्रुध् (दि. प. अ.) २. भ्रू(भ्र)कुटीं वंध् (क्र्. प. अ.)-रच् (चु.) ।
भौगोलिक, वि. (सं.) भूगोल,-विषयक-सम्बन्धिन् ।
भौंचक, भौचक्का, वि. (सं. भयचकित >) विस्मयापन्न, विस्मित, ससाध्वस, भयाभिभूत, स्तंभित ।
भौजाई, सं. स्त्री. (सं. भ्रातृजाया) दे. 'भाभी'(२) ।
भौतिक, वि. (सं.) भूतात्मक, भूतमय, आधिपांच,-भौतिक २. पार्थिव ३. शारीरिक, दैहिक, दैह्य ।
भौम, वि. (सं.) पार्थिव, भौमिक २. भूमिज । सं. पुं., मंगलग्रहः, कुजः ।
—वार, सं. पुं. (सं.) मंगलवासरः ।
भौमिक, वि., दे. 'भौम' वि. । सं. पुं., क्षेत्र,-पतिः-स्वामिन् ।
भ्रंश, सं. पुं. (सं.) अधः-अव,-पतनं-पातः २. वि-,नाशः = ध्वंसः ३. पलायनम् ।
भ्रम, सं. पुं. (सं.) भ्रांतिः (स्त्री.), माया, मिथ्या,-मतिः (स्त्री.), ज्ञानं, आभासः, अविद्या २. संशयः, संदेहः ३. मूर्च्छाभेदः ४. मूर्च्छा ५. कुलालचक्रं ६. भ्रमणं ७. भ्रमद्वस्तु (न.) ।
भ्रमण, सं. पुं. (सं. न.) पर्यटनं, विचरणं, परिभ्रमणं २. गतागतं ३. यात्रा ।
—करना, क्रि. अ., पर्यट्-विचर् (भ्वा. प. से.), परिक्रम् (भ्वा. दि. प. से.) ।
भ्रमात्मक, वि. (सं.) भ्रमोत्पादक २. संदिग्ध ।
भ्रमर, सं. पुं. (सं.) षट्पदः, द्विरेफः, मधु,-करः-पः-लिह् (पुं.), अलिः, अलिन्, भृङ्गः, शिलीमुखः, पुष्पंधयः, चंचरीकः २. कामुकः ।
भ्रमरी, सं. स्त्री. (सं.) षट्पदी, मधुकरी, शिलीमुखी २. जतुकालता, पुत्रदात्री ३. पार्वती ४. मृगीरोगः, भ्रामरम् ।
भ्रमी, वि. (सं.-मिन्) भ्रांत, भ्रमविशिष्ट, मिथ्याज्ञानिन् २. चकित, विस्मित ३. शंकाशील, साशंक ।
भ्रष्ट, वि. (सं.) अधः-अव,-पतित, अव,-गलित-स्रस्त, च्युत २. विकृत, दूषित, सदोष ३. दुर्वृत्त, दुराचार-रिन् ।
—करना, क्रि. स., भ्रंश्-दुष्-आधृष् (प्रे.), च्यु (प्रे.) २. सतीत्वं नश् (प्रे.) ३. मलिनी-कलुषीकृ ।
—होना, क्रि. अ., भ्रश् (दि. प. से.), भ्रंश् (भ्वा. आ. से.) २. दुष् (दि. प. अ.), विकारं आपद् (दि. आ. अ.) ३. मलिनी-कलुषीभू ४. क्षीणवृत्त (वि.) भू ।
भ्रष्टा, सं. स्त्री. (सं.) कुलटा, पुंश्चली ।
भ्रांत, वि. (सं.) भ्रांति-भ्रम,-विशिष्ट २. व्याकुल, विह्वल ३. उन्मत्त ४. पथभ्रष्ट ५. आवर्तित, चक्रवत् चालित ।
भ्रांति, सं. स्त्री. (सं.) भ्रमः, मोहः, आभास मिथ्याज्ञानं, मतिभ्रमः, माया २. संदेहः, संशय ३. स्खलितं, प्रमादः, त्रुटिः (स्त्री.) ४. भ्रम ५. मंडलाकारगतिः (स्त्री.) ६. अलंकारभेदः
भ्राता, सं. पुं. (सं. भ्रातृ) सोदरः, दे. 'भाई'

भ्रातृभाव, सं.पुं. (सं.) भ्रातृत्वं, दे. 'भाईचारा'।
भ्रात्रीय, वि. (सं.) भ्रातृक, भ्रात्रेय।
भ्रुकुटि-टी, सं. स्त्री. (सं.) भ्रूकुटी-टिः, भृकुटी-टिः (सब स्त्री.), भ्रू-विक्षेपः-भंगः-बंधः-संकोचः २. दे. 'भौंह'।
भ्रू, सं. स्त्री. (सं.) दे. 'भौंह'।
—भंग, सं. पुं. (सं.) दे. 'भ्रुकुटि' (१)।
भ्रूण, सं. पुं. (सं.) गर्भः, गर्भस्थशिशुः।
—हत्या, सं. स्त्री. (सं.) गर्भ,-पातनं-स्रावणं, गर्भस्थशिशुघातः।

म

म, देवनागरीवर्णमालायाः पंचविंशो व्यंजनवर्णः, मकारः।
मंगता, सं. पुं. (हिं. मांगना) दे. 'भिखारी'।
मंगनी, सं. स्त्री. (हिं. मांगना) दे. 'सगाई' २. याच्ञा, याचनं-ना।
मंगल, सं. पुं. (सं. न.) कल्याणं, कुशलं, भद्रं, हितं, क्षेमं, भव्यं, प्र-,शस्तं, अरिष्टं, शिवं, मद्रं २. अभीष्टसिद्धिः (स्त्री.) ३. ग्रहविशेषः, कुजः, भौमः, अंगारकः, महीसुतः, वक्रः, लोहितांगः, आवनेयः ४. मंगलवारः। वि., (सं.) शुभ, शिव, भद्र, मंगल्य, शिवं-शुभं,-कर, मांगलिक।
—कारक, वि. (सं.) कल्याण-मंगल,-कारिन्-प्रद, दे. 'मंगल' वि.।
—वार, सं. पुं. (सं.) मंगल-भौम,-वासरः।
मंगलाचरण, सं. पुं. (सं. न.) ग्रंथारम्भे कल्याणप्रार्थना।
मंगलाचार, सं. पुं. (सं.) मांगलिक,-संस्कारः-कृत्यं २. आशीर्वादः ३. स्तवः।
मंगलामुखी, सं. स्त्री. (सं.) दे. 'वेश्या'।
मंगली, वि. (सं. मंगलः) अमांगलिक,-कन्या-वरः (फलित ज्योतिष)।
मँगवाना, क्रि. प्रे., व. 'माँगना' के प्रे. रूप।
मंगेतर, वि. (हिं. मंगनी) वाग्दत्त।
मंच, मंचक, सं. पुं. (सं.) खट्वा २. पीठिका ३. उच्चासनं, इन्द्रकोशः-षः-पकः, वेदिका, ५. रंगः, रंग,-भूमिः (स्त्री.)पीठं ६. मंच-मंडपः।
मंजन, सं. पुं. (सं. न.) दंतधावन-दंत्य,-चूर्णं २. (पेस्ट) •दंतपिष्टं, दंतोदपेषः।
मँजना, क्रि. अ., व. 'माँजना' के कर्म. के रूप।
मँजवाना, क्रि. पे., व. 'माँजना' के प्रे. रूप।
मंजरी, सं. स्त्री. (सं.) मंजरिः-वल्लरी-रिः (सब स्त्री.), मंजी-जिः (स्त्री.) मंजरं, वल्लरं, वल्लिः (स्त्री.) २. पल्लवः, किसलयः ३. लता ४.मुक्ता।
मंज़िल, सं. स्त्री. (अ.) दे. 'पड़ाव' २. कोष्ठः, भूमिः (उ. दोमंज़िला = द्विभूमिकं गृहं) ३. गंतव्य-निर्दिष्ट,-स्थानम्।
मंजीर-रा, सं. पुं. (सं. पुं. न.) नूपुरः-रं २. झल्लरीभेदः।
मंजु, मंजुल, } वि. (सं.) सुंदर, मनोहर, मनोज्ञ, मनोरम, चारु, रम्य, रुचिर, रुच्य, हृद्य।
मंज़ूर, वि. (अ.) दे. 'स्वीकृत'।
मंज़ूरी, सं. स्त्री. (अ. मंज़ूर) स्वीकृतिः (स्त्री.)।
मंजूषा, सं. स्त्री. (सं.) पिटकः, दे. 'पिटारी'।
मँझला, वि. पुं., दे. 'मझला'।
मँझा, सं. पुं., दे. 'माँझा'।
मँझार, क्रि. वि., दे. 'मझदार'।
मंड, सं. पुं. (सं.) दे. 'माँड़'।
मंडन, सं. पुं. (सं. न.) अलंकरणं, परिष्करणं, भूषणं, प्रसाधनं २, दृढी-पुष्पी,-करणं, समर्थनं, सत्यापनं, प्रामाण्यसाधनम्।
मंडप, सं. पुं. (सं. पुं. न.) वितानः-नं, उल्लोचः, चंद्र,-उदयः-आतपः २. जनाश्रयः, विश्रामगृहं ३. (संस्कारादिभ्यः) शाला, आच्छादनं २. देवालयोर्ध्वभागः।
मँडराना, क्रि. अ., दे. 'मँडलाना'।
मंडल, सं. पुं. (सं. न.) वृत्तं, वर्तुलं, चक्रं, वलयः-यं २. गोलः-लं ३. परिवेशः-,पः-परिधिः, उपसूर्यकं ४. क्षितिजं, दिक्,-चक्रं-तटं, दिगंतः ५. द्वादशराजकं ६. समाजः, समुदायः ७. व्यूहभेदः ८. चक्रं, दे. 'पहिया' ९.ऋग्वेद-परिच्छेदः १०. गोलचिह्नं ११. ग्रह,-कक्षा-मार्गः १२. भूप्रदेशः।
मंडलाकार, वि. (सं.) गोल, वर्तुल, चक्राकार, वृत्त।
मँडलाना, क्रि. अ. (सं. मंडलं>)

उद्-,डी (भ्वा. दि. आ. से.) अथवा खे चर् (भ्वा. प. से.) २. परि,-भ्रम्-अट्-क्रम् (भ्वा. प. से.) । सं. पुं., चक्रवत् उड्डयनं; परि,-क्रमणं-भ्रमणम् ।

मंडली, सं. स्त्री. (सं.) समाजः, सभा, समितिः (स्त्री.), गोष्ठी २. संघः, समुदायः ३. दूर्वा ४. गुडूची ।

मँडवा, सं. पुं. (सं. मंडपः, दे.) ।

मंडित, वि. (सं.) भूषित, अलंकृत, परिष्कृत ।

मंडी, सं. स्त्री. (सं. मंडपः >) महाहट्टः, पण्याजिरं, बृहद्-आपणः-विपणी ।

मंडूक, सं. पुं. (सं.) दे. 'मेढक' ।

मंडूर, सं. पुं. (सं. पुं. न.) लौहमलं, शिघाणं, सिंहानं-णम् ।

मंतव्य, सं. पुं. (सं.) विचारः, मतम् । वि., स्वीकार्य, विश्वसनीय, अभ्युपगंतव्य २. मननीय, भाव्य ।

मंत्र, सं. पुं. (सं.) वेदवाक्यं २. वेदानां संहिताभागः ३. मंत्रणा, परामर्शः, विचारणा ४. गोप्यं, रहस्यं, गुह्यं ५. अभिचारमंत्रः(तंत्र) । यंत्र—, सं. पुं., दे. 'जादू टोना')

—विद्या, सं. स्त्री., तंत्रं, तंत्रविद्या ।

मंत्रणा, सं. स्त्री. (सं.) परामर्शः, विचारणा, संमतिः (स्त्री.) २. उपदेशः, अनुशासनम् ।

मंत्रित्व, सं. पुं. (सं. न.) साचिव्यं, मंत्रिता, अमात्यत्वं, मंत्रि-सचिव,-कार्य-पदम् ।

मंत्री, सं. पुं. (सं. मंत्रिन्) अमात्यः, सचिवः, धी,-सचिवः-सखः, सामवायिकः, राज,-अमात्यः-सचिवः । प्रधान—, सं. पुं. (सं.-त्रिन्) मुख्य-महा,-मंत्रिन् , प्रधानामात्यः, महामात्रः ।

मंथन, सं. पुं. (सं. न.) मथनं, विलोडनं, २. अनुसंधानं, अवगाहनं, निरूपणं ३. दे. 'मथनी' ।

मंथर, वि. (सं.) मंद, अलस २. जड, मंदमति ३. स्थूल, भारवत् ४. अधम । सं. पुं. (सं.) दे. 'मथनी' २. ज्वरभेदः ।

मंद, वि. (सं.) अलस, तंद्रालु, कार्यविमुख, उद्योगशून्य २. मंथर ३. शिथिल ४. मूर्ख ५. दुष्ट ।

—बुद्धि,-मति, वि. (सं.) मूढ, मूर्ख, जड, बालिश ।

—भाग्य, वि. (सं.) हतभाग्य, दुर्दैव । सं. पुं, (सं. न.) दुर्,-दैवं-भाग्यम् ।

—मंद, क्रि. वि. (सं.-दं.) शनैः-शनकैः (अव्य.) मंदगत्या, सौम्यतया, गाम्भीर्येण ।

मंदता, सं. स्त्री. (सं.) आलस्यं २. मंथरता ३. क्षीणता ।

मंदर, सं. पुं. (सं.) मंथशैलः, पर्वतविशेषः २. स्वर्गः ३. मुकुरः । वि., मंद, मंथर ।

मँदरा, वि., दे. 'बौना' ।

मंदा, वि. (सं. मंद) मंथर, बहल २. शिथिल ३. अल्प,-अर्घ-मूल्य, सुलभ ४. निकृष्ट, हीन ५. विकृत, भ्रष्ट ।

मंदाकिनी, सं. स्त्री. (सं.) स्वर्ग-वियद्,-गंगा, स्वर्नदी, सुरदीर्घिका ।

मंदाक्रान्ता, सं. स्त्री. (सं.) वर्णवृत्तभेदः ।

मंदाग्नि, सं. स्त्री. (सं. पुं.) अजीर्णं, अपचनं, अपाकः, अग्निमांद्यम् ।

मंदार, सं. पुं. (सं.) स्वर्गवृक्षविशेषः २. अर्कवृक्षः ३. मंदरपर्वतः ४. गजः ५. स्वर्गः ६. दे. 'धत्तूरा' ।

मंदिर, सं. पुं. (सं. न.), देवतायतनं, देव,-गृहं-भवनं-निकेतनं-आलयः २. गृहं, गेहं, सद्मन्-वेश्मन् (न.) ३. आ-नि,-वासः, वासस्थानम् ।

मंदी, सं. स्त्री. (सं. मंद >) अल्पार्घता, पथसुलभता, मूल्यापकर्षः ।

मंद्र, सं. पुं. (सं.) गंभीरध्वनिः (पुं.) (संगीत) २. मृदंगकः । वि., मनोहर २. प्रसन्न ३. गंभीर ४. मंद, गंभीर (शब्दादि) ।

मंशा, सं. स्त्री. (अ.) दे. 'मंसा' ।

मंसब, सं. पुं. (अ.) पदं, पदवी, स्थानं २. कर्तव्यं ३. अधिकारः ।

मंसा, सं. स्त्री. (अ. मंशा) इच्छा, कामना २. संकल्पः ३. आशयः ।

मंसूख, वि. (अ.) विलुप्त, अपसृष्ट, निरस्त, निवर्तित, खंडित ।

मंसूखी, सं. स्त्री. (अ. मंसूख) विलोपः, निरासः, निवर्तनं, खंडनम् ।

मंसूबा, सं. पुं. (फ़ा.) संकल्पः, विचारः २. युक्तिः (स्त्री.), उपायः ।

—बाँधना, मु., निश्चि (स्वा. उ. अ.), संकल्प् (प्रे.) २. उपायं चिंत् (चु.) ।

मई, सं. स्त्री. (अं. मे) आंग्लवर्षस्य पंचमो मासः, वैशाखज्येष्ठम् ।

मकई, सं. स्त्री. (सं. मकायः) कटिजः ।

मकड़ा, सं. पुं. (सं. मर्कटकः >) बृहल्लूता ।

मकड़ी, सं. स्त्री. (हिं. मकड़ा) लूता, तंतु,-वापः-नाभः, ऊर्णनाभः, मर्कटः-टकः, जालिकः, कोषकारः, अष्टापदः ।

—का जाला, सं. पुं., मर्कटकजालम् ।

मकतब, सं. पुं. (अ.) पाठशाला ।

मक़दूर, सं पुं. (अ.) सामर्थ्यं, शक्तिः (स्त्री.) ।

मक़नातीस, सं. पुं. (अ.) दे. 'चुंबक' ।

मक़बरा, सं. पुं. (अ.) समाधिः (पुं.), *मृतकमंदिरम् ।

मकरंद, सं. पुं. (सं.) मरंदः, मरंदकः, पुष्प,-रसः-सारः स्वेदः-निर्यासः-निर्यासकः, मधु(न-.), पुष्पजं २. किंजलः, किंजल्कः ३. कुंदक्षुपः ।

मकर, सं. पुं. (सं.) नक्रः, ग्राहः, कुंभीरः, अवहारः, जलकुंजरः २. दशमराशिः, आकोकेरः ३. माघमासः ४. व्यूहभेदः ५. दे. 'मछली' ।

—ध्वज, सं. पुं. (सं.) मकर,-केतुः-केतनः, कामदेवः ।

मकर[२], सं. पुं. (फ़ा.) कपटं, छलम् ।

मक़रूज़, वि. (अ.) दे. 'ऋणी' ।

मकरूह, वि. (फ़ा.) कलुष, मलीमस २. घृणोत्पादक ।

मक़सद, सं. पुं. (अ.) मनःकामना २. अभिप्रायः ।

मकान, सं. पुं. (फ़ा.) अ(आ)गारः-रं, भवनं-वेश्मन्-सद्मन् (न.), सदनं, दे. 'घर' ।

—किराये पर देना या लेना, क्रि. स., सदनं भाटकेन दा अथवा आ-दा (जु.आ.अ.) ।

मालिक—, सं. पुं., गृह-सदन,-स्वामिन्-पतिः ।

मकोड़ा, सं. पुं. (हिं. कीड़ा का अनु०) क्षुद्रकीटः ।

मकोय, सं. स्त्री. (सं. काकमाता से विप०) काकमाची-चिका, कुष्ठघ्नी, वायसी, रसायनी, वहुतिक्ता, काका, काकिनी २. काकमाचीफलं ३. दे. 'रसभरी' ।

मक्का, सं. पुं., दे. मकई ।

मक्कार, वि. (अ.) कपटिन्, छलिन् ।

मक्कारी, सं. स्त्री. (अ.) कपटं, छलम् ।

मक्खन, सं. पुं. (सं. भ्रक्षणं >) नवनीतं, मन्थजं, नवोद्धृतं, तक्र-जं-सारं, दधि,-जं-स्नेहः, पीथं, हैयंगवीनम् ।

मक्खी, सं. स्त्री. (सं. मक्षीका) मक्षिका, माक्षिका, गंधलोलुपा, भंभः, पतंगिका, वमनीया, पलंकषा, नीला, वर्वणा २. मधुमक्षिका ३. *अग्न्यस्त्रमक्षिका ।

—चूस, सं. पुं. (सं. कृपणः, मितंपचः कदर्यः) जीती मक्खी निगलना, मु., जानन्नपि पापं कृ ।

नाक पर मक्खी न बैठने देना, मु. उपकारं न सह् (भ्वा. आ. से.) ।

मक्खी छोड़ना और हाथी निगलना, मु., पापकानि परित्यज्य महापापेषु प्रवृत् (भ्वा. आ. से.) ।

मक्खी मारना या उड़ाना, मु., उद्योगहीन (वि.) स्था (भ्वा. प. अ.) ।

मख, सं. पुं. (सं.) यज्ञः, क्रतुः ।

मखतूल, सं. पुं. (सं. महार्घतूलं >) कृष्ण,-कौशेयं-कौटसूत्रम् ।

मख़मल, सं. स्त्री. (अ.) *मखमलं, श्लक्ष्णवस्त्रभेदः ।

मख़मली, वि. (अ. मख़मल) मखमल,-मय-निर्मित २. श्लक्ष्ण, स्निग्ध ।

मखौल, सं. पुं., (दे. 'ठट्ठा' ।

मग, सं. पुं., दे. 'मार्ग' ।

मग़ज़, सं. पुं. (अ. मग्ज़) मस्तिष्कं, मस्तुलुंगकः २. बुद्धिः-मतिः (स्त्री.) ३. दे. 'गिरी' ।

—चट, सं. पुं. (अ+हिं.) वाचालः, वाचाटः ।

—चट्टी, सं. स्त्री., वाचालता, प्रजल्पः ।

—पच्ची, सं. स्त्री. (अ.+हिं.) बौद्धिकश्रमः ।

—खाना या चाटना, मु., वावदूकतया खिद् (प्रे.) ।

—खाली करना या पचाना, मु., प्र-,जल्प् (भ्वा. प. से.) २. मस्तिष्कं खिद्-आयस् (प्रे.) ।

मगजी, सं. स्त्री, (अ. मग्ज़) चीरी-रिः (स्त्री.), दशा ।

मगध, सं. पुं. (सं.) कीकटदेशः, विहार-प्रांतस्य दक्षिणभागः २. चारणः, वंदिन् ।

मगन, वि., दे. 'मग्न' ।

मगर, अव्य (फ़ा.) किंतु, परं, परंतु ।

मगर, मगरमच्छ, सं. पुं. (सं. मकरः) दे. 'मकर' (१) २. महा,-मत्स्यः-मीनः ।

मग़रिब, सं. पुं. (अ.) दे. 'पश्चिम' ।

मग़रिबी, वि. (अ.) दे. 'पश्चिमी' ।

मग़रूर, वि. (अ.) दे. 'अभिमानी' ।

मग़रूरी, सं. स्त्री. (अ. मग़रूर) दे. 'अभिमान' ।

मग्न, वि. (सं.) जलांतःप्रविष्ट, निमज्जनेन मृत-नष्ट २. लीन, निरत, आसक्त,-पर,-परायण ३. मत्त, क्षीव, मदोदग्र ४. प्रसन्न, प्रहृष्ट ।

—होना, क्रि. अ., प्र-,हृष् (दि. प. से.) २. निरत-लीन-आसक्त (वि.) भू ।

मघवा, सं. पुं. (सं-वन्) इन्द्रः, आखण्डलः ।

मघा, सं. स्त्री. (सं.) नक्षत्रविशेषः, मघाः (स्त्री. बहु. भी) २. औषधभेदः, दे. 'पिप्पली' ।

मचक, सं. स्त्री. (हिं. मचकना) भारः, पीडनं २. अस्थिसंधिपीडा ३. कंपनम् ।

मचकना, क्रि. अ. (अनु. मच मच>) अस्थिसंधिः व्यथ् (भ्वा. आ. से.)-पीड् (कर्म.) २. भारेण समचमचध्वनि कंप् (भ्वा. आ. से.), निमिष् (तु. प. से.), निमील् (भ्वा. प. से.) ।

मचकाना, क्रि. स. (हिं मचकना) व. 'मचकना' के प्रे. रूप ।

मचकोड़, सं. स्त्री. (हिं. मचकना) सन्धि,-व्यावर्तनं-व्याक्षेपः ।

मचना, क्रि. अ. (अनु. मच)कृ-आरभ् (कर्म.), प्रवृत् (भ्वा. आ. से.) ।

मचलना, क्रि. अ. (अनु.) निर्बंधेन वद् (भ्वा. प. से.), साग्रह (वि.) अवस्था (भ्वा. आ. अ.) ।

मचला, वि. (हिं. मचलना) कपटमूढ, अज्ञलक्षण, व्याजजड ।

मचलाना, क्रि. अ. (अनु.) वम् (सन्नंत, विवमिषति), वमनेच्छया पीड् (कर्म.) ३. दे. 'मचलना' ।

मचलापन, सं. पुं. (हिं. मचलना) कपट-मूढता, व्याजजडत्वम् ।

मचलाहट, सं. स्त्री. (हिं. मचलना) निर्बंधः, आग्रहः २. विवमिषा, वमनवांछा ।

मचान, सं. पुं. (सं. मंचः) मंचकः, उच्चासनं, वेदिका, इंद्रकोषः ।

मचाना, क्रि. स. (हिं मचना) व. 'मचना' के प्रे. रूप ।

मच्छ-छ, सं. पुं. (सं. मत्स्यः>) महा-बृहत्,-मीनः-मत्स्यः-झषः ।

—अवतार, सं. पुं., दे 'मत्स्यावतार' ।

मच्छड़-र, सं. पुं. (सं. मशकः) वज्रतुण्डः, मशः, सूच्यास्यः, सूक्ष्ममक्षिकः, रात्रिजागरदः ।

—दानी, सं. स्त्री., मश(शक)हरी, चतुष्की, मसूरिका, नीशारः ।

मच्छी, सं. स्त्री (हिं. मच्छ) दे. 'मछली' ।

मछंदर, सं.पुं. (सं. मत्स्येन्द्र या बंदर से अनु.) कपिः, वानरः २. आखुः, मूषिकः ३. जडः, मूढः ४. मिथ्यावैद्यः ५. विदूषकः, वैहासिकः ६. भिक्षुकः ।

मछरायँध, सं. स्त्री. (हिं. मछली + सं. गंधः) मत्स्यगंधः, मीनपूतिः (स्त्री.) ।

मछली, सं. स्त्री. (सं. मत्स्यः) मीनः, झषः, अंडजः, विसारः, पृथुरोमन् (पुं.), शकुलिन्, वैसारिणः, आत्माशिन्, तिमिः, जलपिप्पकः । वि., शंवरः, संघचारिन्, स्थिरजिह्व, स्वकुलक्षयः २. मत्स्याकारो भूषणभेदः ।

—वाला, सं. पुं., दे. 'मछुआ' ।

—की तरह तड़पना, मु., जलहीनमीनवद् व्याकुलीभू ।

मछवा, सं. पुं. (हिं. मच्छी) मत्स्यभारिनौका २. दे. 'मछुआ' ।

मछुआ-वा, सं. पुं. (हिं. मच्छी) मत्स्य,-आजीवः-उपजीविन्,मात्स्यिकः,धीवरः,कैवर्तः ।

मज़दूर, सं. पुं. (फ़ा.) भार,-हरः-हारः-वाहकः वाहः, भारिकः, वोढृ, वाहः, वाहकः २. कार्मः कर्मिन्, श्रमजीविन्, कर्म,-करः-कारः ।

मज़दूरी, सं. स्त्री. (फ़ा.) भारवहनं, श्रमः, व्रातं २. कर्मण्या, भृतिः (स्त्री.), भृत्या, भर्मण्या, भर्म, पारिश्रमिकम् ।

मजनूँ, सं. पुं. (अ.) उन्मत्तः, उन्मादिन्, वातुलः २. लयला वल्लभः, कैसः ३. प्रणयिन्, प्रेमिन्, कामुकः, कामिन् ४. कृशांगः, क्षीणदेहः ।

मज़बूत, वि. (अ.) दृढ, २. स्थिर ३. बलवत्।
मज़बूती, सं. स्त्री. (अ. मज़बूत) दृढता २. स्थिरता ३. बलवत्ता ४. साहसम्।
मजबूर, वि. (अ.) दे. 'विवश'।
मजबूरन्, क्रि. वि. (अ.) बलेन, बलात्, हठात्, प्रसह्य, प्रसभम्।
मजबूरी, सं. स्त्री. (अ. मजबूर) विवशता, अगतिकता, अपरिहार्यता।
मजमा, सं. पुं. (अ.) जन,-संमर्दः-समुदायः।
मजमुआ, सं. पुं. (अ.) समुदायः, संग्रहः, समूहः।
मज़मून, सं. पुं. (अ.) प्रस्तावः, निबंधः, लेखः २. व्याख्यान-लेख,-विषयः।
मजलिस, सं. स्त्री. (अ.) सभा, समाजः, गोष्ठी।
मीर—, सं. पुं. (फ़ा+अ.) सभा,-पतिः-अध्यक्षः, प्रधानः।
जलिसी, वि. (अ.) सामाजिक।
ज़हब, सं. पुं. (अ.) धर्मः, संप्रदायः, मतम्।
ज़हबी, वि. (अ.) धार्मिक, सांप्रदायिक।
सं. पुं., खलपूः, शिष्यः, शिष्य(सिक्ख), जाति-विशेषः।
मज़ा, सं. पुं. (फ़ा.) आ-,स्वादः, रसः २. आनंदः, सुखं ३. विनोदः, हास्यम्।
—**उड़ाना** या **लूटना**, मु., मुद् (भ्वा. आ. से.), रम् (भ्वा.आ.अ.), नंद् (भ्वा.प.से.)।
—**दिखाना** या **चखाना**, मु., दंड् (चु., द्विकर्मक) २. प्रतिहिंस् (रु.प.से.), प्रत्यपकृ।
मजे से, मु., सानंदं, ससुखं, निर्विघ्नम्।
मज़ाक, सं. पुं. (अ.) दे. 'ठठ्ठा'।
मज़ार, सं. पुं. (अ.) समाधिः २. दे. 'क़ब्र'।
मजाल, सं. स्त्री. (अ.) सामर्थ्यं, शक्तिः(स्त्री.)।
म(मे)जिस्ट्रेट, सं. पुं. (अं.) दंड,-नायकः-अध्यक्षः-अधिकारिन्।
म(मे)जिस्ट्रेटी, सं. स्त्री. (अं. मेजिस्ट्रेट) दंडनायक-दण्डाध्यक्ष,-पदं-कार्यं २. दंडनायक-सभा।
मजीठ, सं. स्त्री. (सं. मंजिष्ठा) रक्ता, रोहिणी, रक्तपटिका, रागाढ्या, अरुणा, रागांगी, वस्त्रभूषणा, विकसा, जिंगी।
मजीठी, वि. (हिं. मजीठ) रक्त, लोहित, अरुण।
मजीरा, सं. पुं., दे. 'मंजीरा'।
मजेदार, वि. (फ़ा.) स्वादु, रुच्य, रुचिकर २. उत्कृष्ट, उत्तम ३. आनंद,-दायक-प्रद।
मज्जन, सं. पुं. (सं. न.) स्नानं, दे. 'नहाना' सं. पुं.।
मज्जा, सं. स्त्री. (सं.) शुक्रकरः, कौशिकः, अस्थि,-स्नेहः-सारः-संभवः, अस्थिजम्।
मज्झधार, सं. स्त्री. (सं. मध्यधारा) नद्याः मध्य-केन्द्रीय-मध्यस्थ-मध्यम,-धारा-प्रवाहः-मंदाकः-स्रोतस् (न.) २. कार्य,-मध्यः-मध्यम्।
मज्झ(झो)ला, वि. (सं. मध्य) मध्यम, मध्य,-वर्तिन्-स्थ २. मध्यमाकार, मध्यपरिमाण।
मटक, मटकन, सं. स्त्री. (हिं. मटकना) हावः, विभ्रमः, विलासः २. गतिः (स्त्री.), संचारः।
मटकना, क्रि. अ. [सं. मट् (सौत्रधातु)= अवसाद] विलस् (भ्वा. प. से.), सविलासं चल् (भ्वा. प. से.) विभ्रम् (भ्वा. दि. प. से.)।
मटका, सं. पुं. (हिं. मिट्टी) मणिकः-कं, अलिंजरः।
मटकाना, क्रि. स. (हिं. मटकना) सविलासं अंगानि चल् (प्रे.), विभ्रम् (प्रे.)।
मटकी, सं. स्त्री. (हिं. मटका) क्षुद्र,-मणिकः-अलिंजरः।
मटमैला, वि. (हिं. मिट्टी+मैला) दे. 'मटियाला'।
मटर, सं. पुं. (सं. मधुर) कलायः, कालपूरकः, मुण्डचणकः, रेणुकः, वातुलः, सतीन(ल)कः, हरेणुः, खंडिकः।
मटरगश्त, सं. पुं. स्त्री. (सं. मंथर+फ़ा. गश्त) सुखाटनं, विहारः, विहरणं, यथेष्टभ्रमणं, सुखसंचरणम्।
मटियामसान, मटियामेट } वि. दे. 'मलियामेट'
मटियाला, वि. (हिं. मट्टी+वाला) धूलि-रेणु-पांशु,-वर्ण-रंग।
मट्टी, सं. स्त्री., दे. 'मिट्टी'।
मट्ठा, सं. पुं. (सं. मथितं) असरोदकं घोलं, जलनवनीत-शून्यं घोलम्।
मट्ठी, सं. स्त्री. (सं. मंठः) पक्वान्नभेदः।
मठ, सं. पुं. (सं. पुं. न.) आ-नि,-वासः, २. आश्रमः, विहारः, मुनिवासः ३. धार्मिक-विद्यालयः ४. मंदिरं, देवालयः।

—धारी, सं. पुं. (सं.-रिन्) मठपतिः, मठिन्।

मढ़ना, क्रि. स. (सं. मंडनं>) कोशे निविश् (प्रे.), आवेष्ट् (भ्वा. आ. से.) २. चर्मादिभिर्वाद्यमुखं आच्छद् (प्रे.) ३. बलात् आरुह् (प्रे.), दे. 'थोपना'। सं. पुं., आवेष्टनं आच्छादनं, आरोपणम्।

मढ़ने योग्य, आवेष्टनीय, आच्छादनीय।

मढ़नेवाला, सं. पुं., आवेष्टकः, आच्छादकः।

मढ़ा हुआ, वि., आवेष्टित, चर्मादिभिराच्छादित बलादारोपित।

मढ़वाना, क्रि. प्रे., व. 'मढ़ना' के प्रे. रूप।

मढ़ी, सं. स्त्री. (सं. मठः>) क्षुद्रमठः-ठं, लघुमंदिरं ३. कुटी, पर्णशाला ४-५. क्षुद्र,-सदनं-मंडपः।

मणि, सं. स्त्री. (सं. पुं. स्त्री.) रत्नं २. नर,-पुंगवः-कुंजरः-ऋषभः।

—धर, सं. पुं. (सं.) सर्पः, अहिः।

—बंध, सं. पुं. (सं.) मणिः, पाणिमूलं, कलाचिका।

मतंगः, सं. पुं. (सं.) गजः २. मेघः ३. ऋषिविशेषः।

मत[१], सं. पुं. (सं. न.) धर्मः, संप्रदायः २. मतिः (स्त्री.), तर्कः ३. आशयः, अभिप्रायः। वि., पूजित।

मत[२], क्रि. वि. (सं. मा) न, नो, मा, अलं (तृतीया के साथ)।

मतलब, सं. पुं. (अ.) आशयः, अभिप्रायः, तात्पर्यं २. शब्द-वाक्य,-अर्थः ३. स्वार्थः ४. उद्देशः, उद्देश्यं ५. संबंधः, संपर्कः।

—निकालना, मु., स्वार्थं साध्-सिध् (प्रे.)।

बे, क्रि. वि., व्यर्थं, मोघं, निष्प्रयोजनं, निरर्थकं।

मतलबी, वि. (अ. मतलब) स्वार्थिन्, निजहित-स्वार्थ,-पर-परायण-निरत।

मतलाना, क्रि. अ., दे. 'मचलाना' (१)।

मतली, सं. स्त्री., दे. 'मचलाहट' (२)।

मतवाला, वि. (सं. मत्त) मदोद्धत, मदोदग्र, क्षीव २. उन्मत्त ३. अभिमानिन्।

मताधिकार, सं. पुं. (सं.) मतप्रकाशनाधिकारः।

मतावलंबी, सं. पुं. (सं.-बिन्) धर्म-मत,-अनुगामिन्-अनुयायिन्-अनुवर्तिन्-अनुसारिन्।

मति, सं. स्त्री. (सं.) धीः (स्त्री.), धि(धी)षणा, प्रज्ञा, बुद्धिः (स्त्री.) २. मत्तं, तर्कः, अभिप्रायः ३. इच्छा ४. स्मृतिः (स्त्री.)।

—मान्, वि. (सं.-मत्) प्राज्ञ, चतुर।

—हीन, वि. (सं.) जड, मूढ, मूर्ख।

मतीरा, सं. पुं., दे. 'तरबूज'।

मत्कुण, सं. पुं. (सं.) रक्तपायिन्, रक्तांगः, मंचकाश्रयः, उद्दंशः।

मत्त, वि. (सं.) शौंड, उत्कट, क्षीव, उन्मद, मदाढ्य, समद, मदिरोत्कट, [मद,-मत्त-उन्मत्त-उद्धत-उदग्र २. निर्विवेक ३. वातुल, उन्मत्त ४. प्रसन्न।

मत्था, सं. पुं., दे. 'मस्तक' (२)।

मत्सर, सं. पुं. (सं.) मात्सर्य्यं, परोत्कर्षद्वेषः, असूया, ईर्ष्या २. क्रोधः।

मत्स्य, सं. पुं. (सं.) द. 'मछली' २. मीनराशिः ३. विराटदेशः (दीनाजपुर-रंगपुर, अथवा प्राचीन पांचाल के अंतर्गत) ४. महापुराणविशेषः ५. विष्णोरवतारविशेषः, मत्स्यावतारः।

मथन, सं. पुं. (सं. न.) दे. मंथन १-२।

मथना, क्रि. स. (सं. मथनं) दे. 'बिलोना' २. ध्वंस्-नश् (प्रे.) ३. अन्विष् (दि. प. से.) ४. असकृत् अनेकवारं कृ। सं. पुं., दे. 'मथानी' २. मंथनं, मंथः।

मथनी-नियां, सं. स्त्री. (सं. मंथनी) मंथन-घटी, गर्गरी, मंथिनी २. दे. 'मथानी'।

मथानी, सं. स्त्री. (सं. मंथानः) मंथ-मंथन,-दंडः, मंथः, मंथनः, खजः, वैशाखः, मथिः, मथिन् (पुं.), तक्राटः।

मथुरा, सं. स्त्री. (सं.) मधुपुरं-री।

मद, सं. पुं. (सं.) मादः, शौंडता, क्षीवता २. वातुलता, उन्मादः, मतिभ्रंशः ३. दर्पः, अभिमानः ४. सुरा, मद्यं ५. हर्षः, मोदः ६. कस्तूरी-रिका, मृग,-मदः-नाभिः ७. गजगंड जलं, मद,-जलं-वारि (न.), दानं ८. शुक्रं, वीर्यं ९. अज्ञानं, प्रमादः १०. मदनः, कामः।

—माता[२], वि., दे. 'मत्त' (१) २. कामार्त्त, अनंगपीडित।

मद[२], सं. स्त्री. (अ.) लिखितपदं २. गणनापदं ३. प्रकरणम्।

मदक, सं. स्त्री. (सं. मदः>) मदकं, मादक-द्रव्यभेदः।

मदद, सं. स्त्री. (अ.) दे. 'सहायता'।

—गार, वि. (अ.+फ़ा.) दे. 'सहायक'।

मदन, सं. पुं. (सं.) मन्मथः, कंदर्पः, अनंगः दे. 'कामदेव' २. कामक्रीडा, मैथुनं ३. पिचुकः, मुचकुंदः, कंटकिन् ४. धुस्तूरः ५. भ्रमरः ६. खंजनः ७. दे. 'मैना'।

—कदन, सं. पुं. (सं.) शिवः मदनहननः।

—गोपाल, सं. पुं. (सं.) मदनमोहनः, कृष्णः।

—बाण, सं. पुं. (सं.) कामशरः, पुष्पभेदः।

—सदन, सं.पुं. (सं. न.) मदन,-गृहं-भवनं, भगम्।

—महोत्सव, सं. पुं. (सं.) मदनोत्सवः, सुवसंतकः, मदनपूजासंगीतरात्रिजागरणादियुक्तः चैत्रे भवः प्राचीनोत्सवभेदः।

मदरसा, सं. पुं. (अ.) विद्यालयः, पाठशाला।

मदांध, वि. (सं.) दे. 'मत्त' (१)।

मंदार, सं. पुं. (सं. मंदारः) दे. 'आक'।

मदारी, सं. पुं. (अ. मदार) दे. 'कलंदर' २. सौभिकः, दे. 'जादूगर'।

मदिरा, सं. स्त्री. (सं.) सुरा, हाला, मद्यं, वारुणी, कादंबरी, हलिप्रिया, गंधोत्तमा, इरा, प्रसन्ना, परिश्रुता, कश्यं, गंधमादनी, माधवी, मदः, मत्ता, मदगंधा, मधु, माध्वीकं, अब्धिजा, देवसृष्टा, मदना, शुंडा, मैरेयं, सीधुः, महानंदा, मदनी, मोदिनी, मनोज्ञा, अमृता, आसवः, प्रिया, चपला, मत्ता, कामिनी।

मदिराक्ष, वि. (सं.) मत्तलोचन (-नी स्त्री.)।

मदीय, वि. (सं.) मामकीन, मामक(-मिका स्त्री.), मत्।

मदीला, वि. (सं. मदः>) दे. 'नशीला'।

मदोन्मत्त, वि. (सं.) मद,-उत्कट-उदग्र-उद्धत।

मद्दि(द्ध)म, वि., दे. 'मध्यम'।

मद्य, सं. पुं. (सं. न.) दे. 'मदिरा'।

—प, वि. (सं.) सुराप, दे. 'शराबी'।

—पान, सं. पुं. (सं. न.) सुरापानं-णम्।

—भाजन, सं. पुं. (सं. न.) सुरा,-पात्रं-भांडं।

मधु, सं. पुं. (सं. न.) क्षौद्रं, माक्षि(क्षी)कं, कुसुम-पुष्प,-आसवः, पित्र्यं, पवित्रं, माध्वीकं, मारवं, पुष्परस,-उद्भवं-आद्यं, मक्षिका-वरटा-भव,-वांतं २. मदिरा ३. दुग्धं ४. जलं ५. मकरंदः, पुष्परसः ६. अमृतं ७. वसंतर्तुः ८. चैत्रमासः ९. दैत्यविशेषः। वि., मधुर, स्वादु।

—कंठ, सं. पुं. (सं.) कोकिलः, पिकः।

—कर, सं. पुं. (सं.) भ्रमरः २. कामुकः ३. भृङ्गराजवृक्षः।

—करी, सं. स्त्री. (सं.) षट्पदी, भ्रमरी २. सिद्धान्न-पक्वान्न,-भिक्षा।

—कार, सं. पुं. (सं.) मधुमक्षिका।

—कोष, सं. पुं. (सं.) मधु,-क्रमः-चक्रं-पटलं-कोशः, करंडः, चषालः।

—प, सं. पुं. (सं.) भ्रमरः २. मधुमक्षिका।

—पर्क, सं. पुं. (सं.) दधिमधुमिश्रं आज्यं, (अतिथ्यादिभ्यः)।

—मक्खी, सं. स्त्री. (सं.-मक्षिका) मधु,-कारः-कारिन्, सरघा।

—मय, वि. (सं.) मधुर, मधुल, मिष्ट, स्वादु, रुचिर।

—मास, सं. पुं. (सं.) चैत्रः।

—मेह, सं. पुं. (सं.), मधुप्रमेहः, मूत्ररोगभेदः।

मधुर, वि. (सं.) मिष्ट, मधुर, मधुल, मधुक, मधुमय २. रुच्य, रुचिकर, स्वादु ३. कर्णश्रुति,-मधुर, कल, मंजुल ४. सुंदर मनोज्ञ।

—भाषी, वि. (सं.-षिन्) प्रियंवद, मधुर-सु,-वाच्, चारुभाषिन्।

मधुरिमा, सं. स्त्री. [सं.-रिमन् (पुं.)] माधुर्यं २. सौन्दर्य्यम्।

मधूकरी, सं. स्त्री., दे. 'मधुकरी' (२)।

मध्य, वि. (सं.) दे. 'मध्यम'। क्रि. वि., मध्ये, अंतरे, अभ्यंतरे। सं.पुं., मध्यं, मध्य-भागः,-देशः-स्थलं-स्थानं २. गर्भः, अभि-, अंतरम्।

—देश, सं. पुं. (सं.) हिमाचलविंध्याचलकुरुक्षेत्रप्रयागमध्यस्थो देशः २. मध्यप्रांतः।

—भाग, सं. पुं. (सं.) मध्य,-स्थलं-स्थानं, केन्द्रम्।

—लोक, सं. पुं. (सं.) भूमिः (स्त्री.), पृथिवी।

—वर्ती, वि. (सं.-र्तिन्) केन्द्रीय, मध्य, मध्यम, मध्य,-स्थ-स्थित।

मध्यम, वि. (सं.) मध्य, मध्य,-स्थ-स्थित-वर्तिन् २. मध्यपरिमाण ३. सामान्य, साधारण ४. व्यवहित, अंतरालस्थ। सं. पुं. (सं.) चतुर्थस्वरः(संगीत.) २-४ नायक-मृग-राग,-भेदः

—**पुरुष,** सं. पुं. (सं.) पदविशेषः (व्या. त्वं पचसि इ.)।

मध्यमा, सं. स्त्री. (सं.) ज्येष्ठांगुली-लिः (स्त्री.), मध्या, ज्येष्ठा २. नायिकाभेदः ३. रजस्वला नारी।

मध्यस्थ, सं. पुं. (सं.) निर्णेतृ, प्रमाणपुरुषः २. उदासीनः, निष्पक्षः, तटस्थः। वि., दे. 'मध्यम'।

मध्यस्थता, सं. स्त्री. (सं.) माध्यस्थ्यं, निर्णयः २. तटस्थता।

मध्याह्न, सं. पुं. (सं.) मध्य(ध्यं)दिनं, मध्याह्न,-कालः-समयः-वेला।

मध्याह्नोत्तर, सं. पुं. (सं. न.) अपराह्णः, पराह्णः, विकालः।

मन[1], सं. पुं. [सं. मनस् (न.)] चित्तं, चेतस् (न.), हृदयं, स्वांतं, हृद् (न.), मानसं, अंगं, अनंगकं, अंतःकरणं २. अंतःकरणस्य संकल्पविकल्पात्मकवृत्तिः (स्त्री.) ३. विचारः, संकल्पः ४. इच्छा, कामना।

—**गढ़ंत,** वि., मनःकल्पित, काल्पनिक, अवास्तविक।

—**चला,** वि., निर्भय २. साहसिक ३. रसिक।

—**चाहा,-चीत,** वि., अभीष्ट, मनोवांछित।

—**जात,** सं. पु., मनोजः, कामदेवः।

—**भावता,-भावन,** वि., रुच्य, रुचिकर, प्रिय, अभिमत।

—**मथ,** सं. पुं., मन्मथः, कंदर्पः।

—**माना,** वि., रुच्य, रुचिकर २. अभिमत, मनोनीत ३. यथेष्ट, यथेच्छ, यथेप्सित। क्रि. वि., यथेष्टं, यथाभिलाषम्।

—**मुटाव,** सं. पुं., वैमनस्यं, वैमत्यं, दुष्ट,-भावः-बुद्धि, द्वेषः।

—**मोदक,** सं. पुं., काल्पनिकसुखं, मनःकल्पिता-नंदः।

—**मोहन,** सं. पुं., श्रीकृष्णः। वि., मनोहर, हृद्य।

—**मौजी,** वि., स्वैरिन्, स्वेच्छाचारिन्।

—**हर**
—**हरण**
—**हारी** } वि., मनोहर, मनोहर्तृ, मनोहारिन्, २. सुंदर, मनोज्ञ ३. प्रिय, हृद्य।

(टिप्पणी—मन के बहुत से यौगिक शब्दों और मुहावरों के पर्यायवाची 'जी', 'दिल' और 'कलेजा' के नीचे मिलेंगे; कुछ यहाँ देते हैं)।

—**अटकना,** मु., स्निह् (दि. प. से.), अनुरंज् (कर्म.)।

—**करना,** मु., अभिलष्-वांछ् (दि. भ्वा. प. से.)।

—**के लड्डू खाना,** मु. गगनकुसुमानि चि (स्वा. उ. अ.), मोघाशया हृष् (दि. प. से.)।

—**बहलाना,** मु., मनो विनुद्-रंज् (प्रे.), विह (भ्वा. प. अ.)।

—**बसना,** मु., रुच् (भ्वा. आ. से.), दे. 'मनमाना'।

—**भर,** वि., यथेष्ट, यथेच्छम्। (क्रि. वि.,) यथारुचि, यथाभिलाषं, यथेष्टम्।

—**भरना,** मु., परि-सं,-तृप्-तुष् (दि. प. अ.)।

—**भाना,** मु., इष् (तु. प. से.), अभिलष्, रुच्।

—**माने,** वि. तथा क्रि. वि., दे. 'मनभर'।

—**मारना,** मु., मनः निग्रह् (क्र्. प. से.) २. धैर्येण सह् (भ्वा. आ. से.)।

—**मिलना,** मु., सांमत्यं-ऐकमत्यं वृत् (भ्वा. आ. से.)।

—**भाना मुड़िया हिलाना,** मु., मनसि कामयमानोऽपि शिरःकंपेन (बाह्यतः) निषिध् (भ्वा. प. से.)।

—**ललचाना,** मु., लुभ् (दि. प. से.), अत्यधिकं स्पृह् (चु., चतुर्थी के साथ)।

—**हरा होना,** मु., मुद् (भ्वा. आ. से.)।

मन,[2] सं. पुं. (सं. मणः) चत्वारिंशत्सेरात्मकं भारमानम्।

—**भर,** वि., मण,-मित-परिमित-मात्र।

मनका,[1] सं. पुं. (सं. मणिकः >) अक्षः, गुटिका २. जपमाला।

मनका,[2] सं. स्त्री. (सं. मन्याका) मन्या, अवटुः, कृकाटिका, शिरःपीठं, घाटः-टा।

—**ढकलना,** मु., मरणोन्मुख-मुमूर्षु-आसन्नमृत्यु (वि.) वृत् (भ्वा. आ. से.)।

मनकूला, वि. (अ.) चर, चल, अस्थिर।

—**जायदाद,** सं. स्त्री., (अ.+फा.) उपकरणरिक्थं, चरसंपद् (स्त्री.)।

—**ग़ैरमनकूला जायदाद,** सं. स्त्री. (अ.+फा.) स्थावररिक्थं, स्थिरसंपद् (स्त्री.)।

मनन, सं. पुं. (सं. न.) अनुचिंतनं, ध्यानं, आलोचनम् ।

मनवाना, क्रि. प्रे., व. 'मानना' के प्रे. रूप ।

मनशा, सं. स्त्री. (अ.) दे. 'मंसा' ।

मनसा, सं. स्त्री., दे. 'मंसा' ।

मनसिज, सं. पुं. (सं.) कामदेवः, पंचशरः ।

मनसूख, वि., दे. 'मंसूख' ।

मनसूबा, सं. पुं., दे. 'मंसूबा' ।

मनस्ताप, सं. पुं. (सं.) मनोवेदना, आधिः २. अनु-पश्चात्,-तापः ।

मनस्वी, वि. (सं.-विन्) महाशय, महानुभाव २. बुद्धिमत, सुबुद्धि ३. स्वेच्छाचारिन् ।

मनहुँ, क्रि. वि., दे. 'मानो' ।

मनहूस, वि. (अ.) अशुभ, अमंगल २. कुरूप, दुर्दर्शन ३. अलस, मंथर ।

मना, वि. (अ.) नि-प्रति,-षिद्ध, वर्जित ।
सं. पुं., दे. 'मनाही' ।

—करना, क्रि. स., नि-प्रति-षिध् (भ्वा. प. से.), निवृ (प्रे.), नि-अव-रुध् (स्वा. उ. अ.)।

मनादी, सं. स्त्री. (अ. मुनादी) उद्घोषणा, प्रख्यापनम् ।

—करना, क्रि. स., उद्घुष् (चु.), प्रख्या (प्रे., प्रख्यापयति) ।

मनाना, क्रि. स., व. मानना के प्रे. रूप ।

मनाही, सं. स्त्री. (अ. मना) नि-प्रति,-षेधः, निरोधः, निवारणं, प्रत्यादेशः ।

मनिहार, सं. पुं. (सं. मणिकारः) रत्नकारः, रत्नाजीविन् २.,-३. काचकंकण,-कारः-विक्रयिन् ।

मनिहारी, सं. स्त्री. (हिं. मनिहार) मणि,-व्यवसायः-वाणिज्यं, रत्नव्यवहारः २. काचद्रव्य-व्यवसायः ।

मनी-आर्डर, सं. पुं. (अं.) धनादेशः ।

—फार्म, सं. पुं. (अं.) धनादेशपत्रम् ।

मनीषा, सं. स्त्री. (सं.) बुद्धिः (स्त्री.) २. स्तुतिः (स्त्री.) ।

मनीषी, वि. (सं.-षिन्) पंडित, बुद्धिमत् ।

मनु, सं. पुं. (सं.) ब्रह्मणः पुत्रः, धर्मशास्त्रकारो-मुनिविशेषः २. मनुष्यः ।

मनुज, सं. पुं. (सं.) मनुष्यः, मानवः ।

मनुष्य, सं. पुं. (सं.) मानुषः, मनुजः, मानवः, मर्त्यः, नरः, द्विपदः, मनुः, पंचजनः, पु(पू)रुषः, पुमस्-नृ (पुं.), मर्णः, विश् (पुं.) ।

मनुष्यता, सं. स्त्री. (सं.) मनुष्यत्वं, मानवता २. सभ्यता, शिष्टता ३. दया, सौहार्दम् ।

मनुष्यी, सं. स्त्री. (सं.) नारी, मानुषी, मानवी, मर्त्या, मनुजी, नरी ।

मनुहार, सं. स्त्री. (सं. मानहारः>) प्रसादनं, उपशमनं, सांत्वनं २. विनयः, प्रार्थनं-ना ३. आदरः, माननं-ना ।

मनो[1], क्रि. वि., दे. 'मानो' ।

मनो[2], (सं. मनस् न.) दे. 'मन' ।

—कामना, सं. स्त्री. (सं. मनःकामनाः) अभिलाषः, वांछा ।

—गत, वि. (सं.) हृदयस्थ, हार्दिक ।

—ज, सं. पुं. (सं.) मदनः, कंदर्पः ।

—ज्ञ, वि. (सं.) सुन्दर, अभिराम ।

—नीत, वि. (सं.) रुच्य, रुचिकर, हृद्य २. वृत ।

—योग, सं. पुं. (सं.) अनन्यमनस्कता, चित्तैकाग्र्यं, अवधानम् ।

—रंजक, वि. (सं.) चित्ताह्लादकः, सुखकर, हर्षावह, हृदयहारिन्, मनोविनोदक ।

—रंजन, सं. पुं. (सं. न.) मनोविनोदः, चित्ताह्लादनं-दः, क्रीडा, कौतुकम् ।

—रथ, सं. पुं. (सं.) स्पृहा, वांछा ।

—रथ सफल होना, क्रि. अ., सफलमनोरथ (वि.) भू, अभिलषितं अधिगम् ।

—रम, वि. (सं.) मनोज्ञ, सुंदर ।

—वांछित, वि. (सं.) अभिलषित, अभीष्ट ।

—विकार, सं. पुं. (सं.) चित्त,-विकृतिः (स्त्री.)-विकारः, मनो,-धर्मः-वृत्तिः (स्त्री.)-वेगः ।

—विज्ञान, सं. पुं. (सं. न.) मानसशास्त्रम् ।

—वृत्ति, सं. स्त्री. (सं.) चित्तवृत्तिः (स्त्री.), मनोविकारः, मानसी दशा ।

—हर, वि. (सं.) सुंदर, हृदयहारिन् ।

—हरता, सं. स्त्री. (सं.) सौन्दर्यं, चित्ताकर्षकता, मनोज्ञता ।

मनौती, सं. स्त्री. (हिं. मानना) दे. 'मनुहार' (१) २. दे. 'मन्नत' ।

मन्नत, सं. स्त्री. (हिं. मानना) देवपूजा,-प्रणः-प्रतिज्ञा-शपथः ।

—उतारना या बढ़ाना, मु., देवपूजाप्रतिज्ञां पा (प्रे. पालयति)।
—मानना, मु., अभीष्टसिद्धये देवपूजां प्रतिज्ञा (क्र. आ. अ.)।
मन्वंतर, सं. पुं. (सं. न.) एकसप्तति चतुर्युग्यात्मकः कालः, ब्रह्मादिनस्य चतुर्दशो भागः।
मपना, क्रि. अ., व. 'मापना' के कर्म. के रूप।
मपवाना, मपाना, क्रि. प्रे., व. 'मापना' के प्रे. रूप।
मम, सर्वः (सं.) दे. 'मेरा'।
ममता, सं. स्त्री. (सं.) } स्वान्यं, स्वामित्वं,
ममत्व, सं. पुं. (सं. न.) } अधिकारः, स्वत्वं, प्रभुत्वं २. स्नेहः, प्रेमन् (पुं. न.) ३. वात्सल्यं ४. मोहः ५. लोभः ६. अभिमानः, गर्वः।
ममियौरा, सं. पुं. (हिं. मामा) मातुलगृहम्।
ममीरा, सं. पुं. (अ. मामीरान) नेत्ररोगोपकारकः क्षुपमूलभेदः।
ममेरा, वि. (हिं. मामा) मातुलीय, मातुलिक।
—भाई, सं. पुं., मातुलपुत्रः, मातुलेयः (-यी स्त्री.), दे. 'भाई' के नीचे।
ममोला, सं. पुं., दे. 'खंजन'।
मयंक, सं. पुं. (सं. मृगांकः) दे. 'चाँद'।
मयस्सर, वि. (अ.) प्राप्त, लब्ध २. प्राप्य, सुलभ।
मयूख, सं. पुं. (सं.) किरणः, रश्मिः।
मयूर, सं. पुं. (सं.) दे. 'मोर'।
मयूरी, सं. स्त्री. (सं.) दे. 'मोरनी'।
मरक, सं. पुं. (सं.) दे. 'मरी'।
मरकत, सं. पुं. (सं. न.) हरिन्मणिः, अश्मगर्भ, मरक्तं, राजनीलं, गारुडम्।
मरकना, क्रि. अ. (अनु.) भारेण भंज्-भिद्-इ (कर्म.)।
मरघट, सं. पुं. (हिं. मरना + घाट) शतानकं, श्मशानं, पितृकाननं, प्रेतभूः (स्त्री.)।
मरज़, सं. पुं. (अ. मर्ज़) रोगः, व्याधिः २. दुर्व्यसनं, कुवृत्तिः (स्त्री.)।
मरण, सं. पुं. (सं. न.) दे. 'मृत्यु'।
मरजिया, वि. (हिं. मरना + जीना) मृत्युमुक्त, *मृतजीवित २. मरण,-उन्-मुख-आसन्न ३. मृत,-प्राय-कल्प। सं. पुं. (मुक्तार्थ) नियंक्तृ, विगाहकः।

मरण, सं. पुं. (सं. न.) मृत्युः, निधनम्।
—धर्मा, वि. (सं.-धर्मन्) मर्त्य,म रणशील।
मरतबा, सं. पुं. (अ.) पदं, पदवी २. वारः।
मरतबान, सं. पुं., दे. 'अमृतबान'।
मरदूद, वि. (अ.) तिरस्कृत, अपमानित २. क्षुद्र।
मरना, क्रि. अ. (सं. मरणं) मृ (तु.आ.अ.), पंचत्वं इ-या (अ. प. अ.), असून्-प्राणान्-देहं-तनुं-जीवितं त्यज् (भ्वा. प. अ.)-उत्सृज् (तु. प. अ.)-हा (जु. प. अ.), प्र-इ (अ. प. अ.), गतासु-परासु (वि.) भू, विपद् (दि. आ. अ.), प्र-मी (कर्म.), २. क्लेशातिशयं सह् (भ्वा. आ. से.) ३. शुष् (दि. प. अ.), म्लै (भ्वा. प. अ.) ४. अत्यन्तं लज् (तु. आ. से.)-लस्ज् (भ्वा. आ. से.) ५. परा-परि,-भू, (कर्म.), परा-वि-जि (कर्म.) ६. शम् (दि. प. से.) ७. क्रीडातो वहिष्कृ (कर्म.)। सं. पुं., मरणं, निधनं, दे. 'मृत्यु'।
मरने योग्य वि, मरणार्ह, व्यर्थजीवित, २.हतक, खल, दुष्ट।
मरनेवाला, सं. वि., मरिष्यमाण, मरणोन्मुख' आसन्नमृत्यु २. मर्त्य, मृत्युवश, नश्वर।
मरा हुआ, वि., मृत, गतासु, पंचत्वं,-गत-प्राप्त-इत, प्रेत, परेत, उपरत, संस्थित, विपन्न, प्रमीत, विचेतन, निष्-गत,-प्राण।
—जीना, मु., सुखदुःखं-खे, हर्षशोकं-कौ।
किसी पर—, मु., अनुरंज् (कर्म.), भावं-अनुरागं बंध् (क्र. प. अ.)।
पानी—, मु., कलंकित-दूषित-अपमानित (वि.) भू, अवगण्, अवमन् (कर्म.)।
मर कर, मु., अत्यायासेन, अतिकठिनतया।
मर के बचना, मु., मृत्युमुखात् मुच् (कर्म.), मरणासन्नोऽपि पुनः स्वास्थ्यं लभ् (भ्वा. आ. अ.)।
मर मिटना, मु., श्रमातिशयेन नश् (दि.प.से.)।
मरने तक की फुर्सत न होना, मु., अतिव्यापृत-अनवकाश (वि.) वृत् (भ्वा. आ. से.)।
मरभुक्खा, वि. (हिं. मरना + भूखा) क्षुधा,-अर्दित-पीडित-आर्त-अवसन्न २. अकिंचन, निर्धन।

मरमर, सं. स्त्री. (अनु.) मर्मर,-ध्वनिः-शब्दः, मर्मरः, पत्र-वस्त्र,-स्वनः।

मरमराना, क्रि. अ. (हिं. मरमर) मर्मर-रवं कृ, मर्मरायते (ना. धा.) २. समर्मरशब्दं अव-आ-नम् (भ्वा. प. अ.)।

मरम्मत, सं. स्त्री. (अ.) जीर्ण-,उद्धारः, प्रति-, समाधानं, संधानं, संस्कारः, नवीकरणं, पूर्वावस्थाप्रापणम्।

—करना, क्रि. अ., पूर्ववत्-नवी,-कृ, उद्धृ (भ्वा. प. अ.), सं-समा-प्रतिसमा,-धा (जु. उ. अ.) २. तड् (चु.)।

मरवाना, क्रि. प्रे., व. 'मारना' के प्रे. रूप।

मरसा, सं. पुं. (सं. मारिषः) कंधरः, मार्षिकः (शाकभेदः)।

मरसिया, सं. पुं. (अ.) निधनकाव्यं, शोकमयी कविता।

मरहटा-ठा, सं. पुं. (सं. महाराष्ट्रः >) महाराष्ट्रवासिन्, महाराष्ट्राः (बहु.)।

मरहटी-ठी, सं. स्त्री. (सं. महाराष्ट्री) माहाराष्ट्री।

मरहम, सं. पुं. (अ.) अनु,-लेपः, उपदेहः, समालंभः, अभ्यंजनम्।

—पट्टी, सं. स्त्री. (अ.+सं.) लेपपट्टी, व्रणोपचारः।

मरहूम, वि. (अ.) स्वर्,-गत-यात, दिवं गत, मृत।

मराल, सं. पुं. (सं.) राजहंसः २. कारंडवः ३. अश्वः ४. गजः ५. मेघः।

मरिच, सं. स्त्री. (सं. न.) दे. 'मिर्च'।

मरियल, वि. (हिं. मरना) मृतकल्प, कृश, निर्बल।

मरी, सं. स्त्री. (सं. मारी) जन-, मारः, महामारी, मारिका।

मरीचि[1], सं. स्त्री. (सं. पुं. स्त्री.) किरणः, रश्मिः २. कांतिः (स्त्री.) ३. मरुमरीचिका।

मरीचि[2], सं. पुं. (सं.) १-४. ऋषि-मरुद्-दानव-दैत्य,-विशेषः।

मरीज़, वि. (अ.) रुग्ण, रोगिन्।

मरीचिका, सं. स्त्री. (सं.) दे. 'मृगतृष्णा'।

मरु, सं. पुं. (सं.) धन्वन् (पुं.), मरु,-स्थलं-स्थली, ऊषरः-रं, खिलम्।

—भूमि, सं. स्त्री. (सं.) } दे. 'मरु'
—स्थल, सं. पुं. (सं. न.) }

मरुआ, सं. पुं. (सं. मरुवः) गंध-खर,-पत्रः, शीतलकः, बहुवीर्यः (क्षुपभेदः)।

मरुत, सं. पुं. (सं.) दे. 'वायु'।

मरोड़, सं. पुं. (हिं. मरोड़ना) आंकुचनं, व्यावर्तनं २. अंत्र-उदर,-वेदना-शूलं-पीडा ३. दर्पः ४. क्रोधः ५. दे. 'पेचिश'।

—फली, सं. स्त्री., मधूलिका, मूर्वा, मूर्वी, मधुरसा, रंग-दिव्य,-लता।

मरोड़ना, क्रि. स. (हिं. मोड़ना) कुच्-कुंच् (भ्वा. प. से.), व्यावृत् (प्रे.), कुटिली-वक्रीकृ. २. पीड् (चु.), दुःखयति (ना. धा.) ३. मुष्टिना-मुष्टया ग्रह् (क्र्. प. से.)-धृ (भ्वा. प. अ.)।

मरोड़ा, सं. पुं., (हिं. मरोड़ना) दे. 'मरोड़' (१-२) ३. दे. 'पेचिश'।

मरोड़ी, सं. स्त्री. (हिं. मरोड़ना) दे. 'मरोड़'(१). २. कुंचित-व्यावर्तित,-वस्तु (न.) ३. ग्रंथिः।

मर्कट, सं. पुं. (सं.) दे. 'बंदर'।

मर्ज़, सं. पुं. (अ.) दे. 'मरज़'।

मर्ज़ी, सं. स्त्री. (अ.) इच्छा, रुचिः (स्त्री.). २. प्रसन्नता २. स्वीकृतिः (स्त्री.), अनुज्ञा।

मर्त्य, सं. पुं. (सं.) मनुष्यः, मानवः २. शरीरम्।

—लोक, सं. पुं. (सं.) भूमिः (स्त्री.), भूलोकः।

मर्द, सं. पुं. (फ़ा.) मानवः, मनुजः २. पुंस् (पुं.), पुरुषः, नरः ३. वीरः, साहसिन्, योधः ४. पतिः।

—बच्चा, सं. पुं.. वीरबालः।

मर्दन, सं. पुं. (सं. न.) पद्भ्यां पीडनं-क्षोदनं-आक्रमणं २. अभ्यंजनं, संवाहनं, मर्दनं, धर्षणं ३. ध्वंसनं, नाशनं ४. पेषणं, चूर्णनम्।

मर्दानगी, सं. स्त्री (फ़ा.) शूरता, वीरता, पुरुषत्वम्।

मर्दाना, वि. (फ़ा) पुरुष-वीर-शूर,-उचित २. पुरुष-नर,-सदृश-उपम विक्रांत, नर-,पुरुष।

—भेष, सं. पुं, पुरुषवेशः, नरोचितवेषः।

मर्दित, वि. (सं.) पाद,-पीडित-क्षुण्ण-आक्रांत २. खंडित, चूर्णित ३. नाशित।

मर्दुम, सं. पुं. (फ़ा.) जनः, मनुष्यः ।
—शुमारी, सं. स्त्री. (फ़ा.) जन,-संख्यानं-गणना।
मर्म, सं. पुं. [सं. मर्मन् (न.)] तत्त्वं, स्वरूपं २. रहस्यं, गोप्यवृत्तं ३. संधिस्थानं ४. जीवस्थानम्।
—ज्ञ, वि. (सं.) तत्त्वज्ञ, मर्मवेदिन् २. रहस्यविद् (पुं.)।
—भेदी, वि. (सं.-दिन्): मर्म,-भिद् (पुं.)-भेदक-छेदक-विदारक ।
मर्मर, सं. स्त्री. (अनु.) दे. 'मरमर' ।
मर्यादा, सं. स्त्री. (सं.) स्थितिः (स्त्री.), धारणा, संस्था, नियमः २. सीमा ३. कूलं ४. प्रतिज्ञा, समयः ५. सदाचारः, सद्वृत्तं ६. गौरवं, प्रतिष्ठा ७. धर्मः ।
मलंग, सं. पुं. (फ़ा.) मलंगः, यवनभिक्षुभेदः २. वकभेदः ३. स्वेच्छाचारिन् ।
मल, सं. पुं. (सं. पुं. न.) अव(प)स्करः, कल्कः-कं, किट्टं २. कर्दमः, पंकः ३. उच्चारः, गूथः-थं, पुरीषं, विष् (स्त्री.), विष्ठा, शकृत् (न.), शमलम् ।
मलना, क्रि. स. (सं. मर्दनं) अंज् (रु. प. से.), लिप् (तु. प. अ.), दिह् (अ. उ. अ.), म्रक्ष् (भ्वा. प. से.) २. धृष् (भ्वा. प. से.), मृद् (क्र्. प. से.; प्रे.) ३. परि-प्र-मृज् (अ. प. से.), निज् (जु. उ. अ.) ४. करतलाभ्यां चूर्णं (चु.)। सं. पुं., अंजनं, लेपनं; घर्षणं, मर्दनं; मार्जनं; चूर्णनम् ।
हाथ—, मु., अनु-पश्चात्,-तप् (दि. आ. अ.), अनुशुच् (भ्वा. प. से.), अनुशी (अ. आ. से)।
मलबा, सं. पुं. (सं. मलः-लं) दे. 'मल' १-२ । ३. शकलराशिः ।
मलमल, सं. स्त्री. (सं. मलमलकः >) *मलमल्लकं, सूक्ष्मं तूलवस्त्रम् ।
मलमास, सं. पुं. (सं.) अधिमासः, मलिम्लुचः, असंक्रांतमासः, नपुंसकः ।
मलय, सं. पुं. (सं.) दक्षिणाचलः, चंदनाद्रिः, आषाढ़ः, मलयाचलः २. तैलपर्णिकं, श्वेतचंदनं ३. नंदनवनम् ।
मलयज, सं. पुं. (सं. न.) दे. 'चंदनम्' ।
मलाचल, सं. पुं. (सं.) मलय,-अद्रिः-गिरिः-पर्वतः ।
मलयानिल, सं. पुं. (सं.) मलय,-पवनः-वातः-समीरः ।
मलवाई, सं. स्त्री. (हिं. मलवाना) मर्दन-अंजन-घर्षण,-भृतिः (स्त्री.) ।
मलवाना, मलाना, क्रि. प्रे., व. 'मलना' के प्रे. रूप ।
मलहम, सं. पुं., दे. 'मरहम' ।
मलाई, सं. स्त्री. (फ़ा. वालाई) (दूध की) संतानी-निका, क्षीर-,शरः, दुग्ध,-अग्र्य-तालीयं, शार्करः, शार्ककः, (दही की) दे. 'शर' (४) २. सारः, उत्तमांशः ।
मलामत, सं. स्त्री. (अ.) दे. 'फटकार' ।
मलार, सं. पुं. (सं. मल्लारः) रागभेदः ।
मलाल, सं. पुं. (अ.) खेदः २. औदासीन्यम् ।
मलिक, सं. पुं. (अ.) नृपः २. अधीश्वरः ।
मलिका, सं. स्त्री. (अ.) राज्ञी २. अधीश्वरी ।
मलिन, वि. (सं.) आविल, कलुष, मलीमस, समल, पंकिल, सकर्दम, मलदूषित २. दूषित, विकृत ३. धूलिवर्ण ४. धूमवर्ण ५. पापात्मन् दुष्ट, पाप ६. विषण्ण, म्लानमुख ।
मलिनता, सं. स्त्री. (सं.) आविलत्वं, कालुष्यं, मालिन्यं, पंकिलत्वं इ. ।
मलियामेट, सं. पुं. (हिं. मलना + मिटाना)। वि-, ध्वंसः-नाशः, क्षयः, उच्छेदः ।
—करना, क्रि. स., उच्छिद् (रु. प. अ.), ध्वंस्-नश् (प्रे.), निर्मूल् (चु.)।
मलीदा, सं. पुं. (फ़ा. मालीदा) मर्दितः, स्निग्धमिष्टरोटिकाचूर्णं २. और्णवस्त्रभेदः, मर्दितः ।
मलीन, वि., दे. 'मलिन' ।
मलेरिया, सं. पुं. (अं.) विषमज्वरः, *मशककुपवन,-ज्वरः ।
मल्ल, सं. पुं. (सं.) प्राचीनजातिविशेष २. बाहु,-योधः-योधिन् । वि., महाबल, मांसल स्थूल-महा,-काय ।
—भूमि, सं. स्त्री. (सं.) मल्लशाला ।
—युद्ध, सं. पुं. (सं. न.) बाहु-नि,-युद्धं, दे 'कुश्ती' ।
—विद्या, सं. स्त्री. (सं.) नियुद्धविद्या ।
मल्लाह, सं. पुं. (अ.) नाविकः, नौ-पोत,-वाहः औडुपिकः, मार्गरः २. धीवरः, कैवर्तः ।

मल्लिका, सं. स्त्री. (सं.) दे. 'मोतिया' २. छन्दोभेदः।

मल्लू, सं. पुं. (सं. मल्लुकः) ऋक्षः, दे. 'रीछ' २. वानरः।

मवक्किल, सं. पुं. (अ. मुवक्किल) अभिभाषकनियोजकः।

मवाद, सं. पुं. (अ.) दे. 'पीप'।

मवेशी, सं. पुं. (अ. मवाशी) पशवः (पुं. बहु.), पशुसमूहः, गोकुलम्।

—**खाना**, सं. पुं. (अ.+फ़ा.) गोष्ठः-ष्ठं, व्रजः।

मश(स)क[1], सं. पुं. (सं.) दे. 'मच्छड़'।

मशक[2], सं. स्त्री. (फ़ा.) जलभस्त्रा-स्त्रिका।

मशक्कत, सं. स्त्री. (अ.) परिश्रमः, प्रयासः।

मशगूल, वि. (अ.) व्याकृत, व्यग्र, कार्यमग्न।

मशरिक, सं. स्त्री. (अ.) प्राची, दे. 'पूर्व' (दिशा)।

मशविरा, सं. पुं. (अ.) संमंत्रणा, परामर्शः।

मशहूर, वि. (अ.) विख्यात, प्रसिद्ध।

मशान, सं. पुं. (सं. श्मशानं) दे. 'मरघट'।

मशाल, सं. स्त्री. (अ.) दीपिका, झिंगिनी, अलातं, उल्मुकं, उल्का।

वाच्यावाच्य, वि. (सं.) भद्राभद्र (वाक्यादि)।

वाज़, सं. पुं. (अ.) उपदेशः, धार्मिकव्याख्यानम्।

वाजपेय, सं. पुं. (सं. पुं. न.) श्रौतयागभेदः।

वाजपेयी, सं. पुं. (सं.-यिन्) हुतवाजपेयः २. ब्राह्मणोपाधिभेदः ३. सुकुलजः।

वाजसनेय, सं. पुं. (सं.) यजुर्वेदस्य शाखाविशेषः २. याज्ञवल्क्यः।

वाजिब-बी, वि. (अ.) उचित, योग्य, यु

वाजी, सं. पुं. (सं.-जिन्) अश्वः, घोटकः २. आमिक्षामस्तु (न.), मोरटः (= फटे हुए दूध का पानी) ३. पक्षिन् ४. वाणः ५. वासकः।

—कर, वि. (सं.) कामोद्दीपक (औषधादि)।

—करण, सं. पुं. (सं. न.) वीर्यवृद्धिकरः प्रयोगः।

वाट, सं. पुं. (सं.) मार्गः २. वास्तु ३. मंडपः।

वाटर, सं. पुं. (अं.) जलम्।

—प्रूफ़, वि. (अं.) अक्लेद्य, जलाभेद्यम्।

—वर्क्स, सं. पुं. (अं.) *जलयंत्रं २. जलयंत्रालयः।

वाटिका, सं. स्त्री. (सं.) क्षुद्र,-आरामः-उद्यानं, दे. 'बग़ीचा'।

वाडवाग्नि, सं. स्त्री. (सं.) वाडवः, व(वा)ड-वानलः।

वाण, सं. पुं. (सं.) वाणः, दे.।

वाणिज्य, सं. पुं. (सं. न.) क्रयविक्रयः, निगमः, वणिक्कर्मन् (न.), व्यापारः।

वाणी, सं. स्त्री. (सं.) दे. 'बाणी'।

वात, सं. पुं. (सं.) पवनः, वायुः, दे.। २. देहस्थवायुः ३. रोगभेदः।

—चक्र, सं. पुं. (सं. न.) चक्रवातः, वातावर्त्तः।

—ज, वि. (सं.) वातप्रकोपज (रोगादि)।

—जात, सं. पुं. (सं.) हनुमत्, मारुतिः।

—तूल, सं. पुं. (सं. न.) वृद्धसूत्रकं, ग्रीष्म-हासम्।

—ध्वज, सं. पुं. (सं.) वातरथः, मेघः।

—पट, सं. पुं. (सं.) ध्वजः, पताका।

—पुत्र, सं. पुं. (सं.) हनुमत् २. भीमः ३. महाधूर्त्तः।

—प्रकोप, सं. पुं. (सं.) (शरीरे) वायुवृद्धिः (स्त्री.)।

—रोग, सं. पुं. (सं.) वायु-वात,-व्याधिः, चलातंकः, अनिलामयः, दे. 'गठिया'।

—वैरी, सं. पुं. (सं.-रिन्) वातादः, दे.।

वातादः, सं. पुं. (सं.) नेत्रोपमफलः, वाताम्रः, वातवैरिन्। (फल) वाताम्रं, वादामम्। (दे. वादाम)।

वातायन, सं. पुं. (सं. न.) क्षुद्रखडक्किका २. दे. 'रोशनदान'।

वातुल, सं. पुं. (सं.) उन्मत्तः, दे. 'बावला'।

वात्सल्य, सं. पुं. (सं.) रसविशेषः (काव्य.)। (सं. न.) पित्रोः अपत्यस्नेहः, वत्सलता।

वात्स्यायन, सं. पुं. (सं.) न्यायसूत्रभाष्य-कारः २. कामसूत्रप्रणेतृ, पक्षिलः, मंदनागः।

वाद, सं. पुं. (सं.) वादानुवादः, वादप्रति-वादः, ऊहापोहः, *शास्त्रार्थः, दे.। २. सिद्धांतः, राद्धांतः ३. कलहः, विवादः।

—विवाद, सं. पुं. (सं.) दे. 'वाद' (१)।

वादक, सं. पुं. (सं.) वाद्यवादयितृ २. वक्तृ ३. वादिन्, तार्किक।

वादन, सं. पुं. (सं. न.) वाद्य-वादित्र,-ध्वननं २. वाद्यं दे.।

वादरायण, सं. पुं. (सं.) महर्षिः वेदव्यासः।

वादा, सं. पुं. (अ. वाइदा) नियतसमयः २. प्रतिज्ञा, वचनं, संगरः।

वादानुवाद, सं. पुं. (सं.) दे. 'वाद' (१)।

वादी, सं. पुं. (सं.-दिन्) अभियोक्तृ, अभि-योगिन्, अर्थिन्, शिरोवर्तिन्, दे. 'मुद्दई' २. प्रस्तावकः, प्रस्तोतृ ३. वक्तृ।

—प्रतिवादी, सं. पुं. (सं. वादिप्रतिवादिनौ) अर्थिप्रत्यर्थिनौ २. पक्षिप्रतिपक्षिणौ (सब द्वि.)।

वाद्य, सं. पुं. (सं.) वादित्रं, आतोद्यम्।

वानप्रस्थ, सं. पुं. (सं.) तृतीयाश्रमिन्, वैखानसः, आरण्यकः, तापसः २. तृतीयाश्रमः ३-४. मधूक-पलाश,-वृक्षः।

वानर, सं. पुं. (सं.) कपिः, मर्कटः, दे. 'बंदर'।

वानरी, सं. स्त्री. (सं.) मर्कटी, वलीमुखी।

वापस, वि. (फ़ा.) वि-प्रत्या-प्रतिनि,-वृत्त, प्रति,-गत-आगत-यात-आयात।

—आना, क्रि. अ., प्रत्यागम्, प्रत्यावृत् (भ्वा. आ. से.)।

—करना, क्रि. स., प्रतिगम्, प्रतिनिवृत् (प्रे.) २. प्रतिदा (जु. उ. अ.), प्रति-ऋ (प्रे. प्रत्यर्पयति)।

—जाना, क्रि. अ., प्रति,-गम्-निवृत्।

—लेना, क्रि. स., प्रत्यादा, पुनः स्वीकृ।

—होना, क्रि. अ., दे. 'वापस जाना' २. प्रति-दा-आदा (कर्म.)।

वापसी, वि. (फ़ा. वापस) प्रत्या-प्रतिनि,-वृत्त। सं. स्त्री., प्रति,-गमनं-आगमनं-आवृत्तिः (स्त्री.) २. प्रति,-दानं-अर्पणं-आदानम्।

वापी, सं. स्त्री. (सं.) वापिः (स्त्री.), दीर्घिका, वापिका ।

वाम, वि. (सं.) सव्य, दक्षिणेतर, दे. 'बायाँ' २. प्रतिकूल, विरुद्ध, प्रतीप ३. कुटिल ४. दुष्ट, नीच ५. अभद्र, अमंगल ।

—देव, सं. पुं. (सं.) शिवः ।

—मार्ग, सं. पुं. (सं.) वामाचारः, वेदविरुद्ध-संप्रदायविशेषः ।

—मार्गी, सं. पुं. (सं.-र्गिन्) वामाचारिन्, वेदविरोधिन् ।

—लोचना, सं. स्त्री. (सं.) वामाक्षी, सुंदरी, शोभना ।

वामन, वि. (सं.) खर्व, ह्रस्व, लघुकाय । सं. पुं. (सं.) खट्टनः, खट्टेरकः, खर्वः, ह्रस्वः २. विष्णुः ३. शिवः ४. पुराणग्रंथविशेषः ।

—अवतार, सं. पुं. (सं. वामनावतारः) अदितिगर्भजो विष्णोः पंचमावतारः ।

वामनी, सं. स्त्री. (सं.) खर्वा, खट्टनी ।

वामा, सं. स्त्री. (सं.) नारी, रामा ।

वामी, सं. स्त्री. (सं.) वडवा २. रासभी ३ शृगाली ।

वायव्य, वि. (सं.) १-३. वायु,-संबंधिन्-देवताक-निर्मित, वायवीय ।

—कोण, सं. पुं. (सं.) पश्चिमोत्तर,-कोणः-दिशा, वायवी ।

वायस, सं. पुं. (सं.) काकः, ध्वांक्षः ।

वायु, सं. स्त्री. (सं. पुं.) वातः, पवनः, अनिलः, गंधव(वा)हः, समीरः-रणः, मरुत्, मा(म)रुतः, श्वसनः, मातरिश्वन्, सदागतिः, जगत्प्राणः, नभस्वत्, पवमानः, प्रभंजनः, धूलिध्वजः, फणिप्रियः ।

—कोण, सं. पुं. (सं.) पश्चिमोत्तरदिशा, वायवी ।

—गुल्म, सं. पुं. (सं.) वातचक्रं, चक्रवातः, वात्या २. जल,-गुल्मः-आवर्तः ३. वातगुल्मः, उदरव्याधिभेदः ।

—पुत्र, सं. पुं. (सं.) पवन,-सुतः-पुत्रः, हनुमत् ।

—भक्षण, सं. पुं. (सं.) वायु,-भक्षः-भुज्, यतिभेदः २. पवनाशनः, सर्पः ।

—मंडल, सं. पुं. (सं. न.) अंतरि(री)क्षं, गगनं २. वातावरणम् ।

वारंट, सं. पुं. (अं.) अधिकारपत्रम् ।

—गिरफ़्तारी, सं. स्त्री. (अं.+फ़ा.) *आसेधाधिकारपत्रम् ।

—तलाशी, सं. पुं. (अं.+फ़ा.) *अन्वेषणाधिकारपत्रम् ।

—रिहाई, सं. पुं. (अं.+फ़ा.) (कारागारादिभ्यः) मोचनाधिकारपत्रम् ।

वारंवार, क्रि. वि., दे. 'बारंबार' ।

वार, स. पुं. (सं.) पर्यायः, क्रमः २. अवसरः, समयः ३. सप्ताह,-दिनं-दिवसः, वासरः, ४. द्वारं ५. आघातः, प्रहारः, आक्रमणं ६. आवरणं ७. समूहः ८. पारः-रम् ।

—करना, क्रि. स., अभिद्रु (भ्वा. प. अ.), अवस्कंद् (भ्वा. प. अ.), आक्रम् (भ्वा. प. से.; भ्वा. आ. अ.) ।

—खाली जाना, मु., लक्ष्यं न व्यध् (कर्म.), अस्त्रं अपलक्ष्यं पत् (भ्वा. प. से.) २. युक्तिः निष्फलीभू ।

वारक, वि. (सं.) निषेधक, प्रतिबंधक ।

वारण, सं. पुं. (सं. न.) नि-प्रति,-षेधः, २. विघ्नः, अंतरायः । (सं. पुं.) गजः, वाणवारः, कवचः-चम् ।

वारदात, सं. स्त्री. (अ.) दुर्घटना २. विप्लवः, संक्षोभः ।

वारना, क्रि. स. (सं. वारणं >) अनिष्टवारणाय उत्सृज् (तु. प. अ.)-त्यज् (भ्वा. प. अ.) । सं. पुं., शांतिकरः उत्सर्गः, कष्टवारकं दानम् ।

वारनारी, सं. स्त्री. (सं.) वारमुखी, वारांगना, वेश्या, वारविलासिनी ।

वारपार, सं. पुं. [सं. अवारपारौ-रे (पुं. न.)] (नद्यादीनां) तटद्वयं २. अंतः, सीमा । क्रि. वि., अवारात् पारं यावत् २. निकटपार्श्वात् परपार्श्वपर्यंतम् ।

वारांगना, सं. स्त्री. (सं) वारनारी, दे. ।

वारा, सं. पुं. (सं. वारणं >) मितव्ययः २. लाभः ।

वाराणसी, सं. स्त्री. (सं.) काशी-शिका, शिवपुरी, तपःस्थली, व(वा)रणसी ।

वारान्यारा, सं. पुं. (हि. वार+न्यारा) निर्णयः, निश्चयः, निर्धारणं २. समाधानं, संधिः, शमः-मनम् ।

वारापार, सं. पुं. तथा क्रि. वि., दे. 'वारपार'।
वाराह, सं. पुं. (सं.) वराहः, दे.।
वारि, सं. पुं. (सं. न.) पानीयं, जलं, दे.।
—चर, सं. पुं. (सं.) जलजन्तुः २. मत्स्यः।
—ज, सं. पुं. (सं. न.) कमलं, वारि,-जातं-रुहम्।
—द, सं. पुं. (सं.) वारि,-धरः-वाहः, मेघः।
—धि, सं. पुं. (सं.) वारिनिधिः, सागरः।
—यंत्र, सं. पुं. (सं. न.) जलयंत्रं, दे. 'फव्वारा'।
वारिस, सं. पुं. (अ.) अंश,-हरः-हारिन्-भाज्, दायादः, दायिकः २. उत्तराधिकारिन्।
—होना, क्रि. अ., पैतृकसंपदधिकारी जन् (दि. आ. से.), दायादो भू।
वारींद्र, सं. पुं. (सं.) वारीशः, सागरः।
वारुणी, सं. स्त्री. (सं.) मदिरा, मद्यं, सुरा २. पश्चिमदिशा ३. वरुणानी।
वार्ड, सं. पुं. (अं.) रक्षणं, गोपनं २. पुर-विभागः ३. कारागारादीनां विभागः।
वार्डर, सं. पुं. (अं.) रक्षकः २. कारारक्षकः।
वार्त्ता, सं. स्त्री. (सं.) विषयः, प्रसंगः २. किंवदंती, जनश्रुतिः (स्त्री.) ३. समाचारः, वृत्तं ४. वार्त्तालापः, दे.।
वार्त्तालाप, सं. पुं. (सं.) संलापः, संवादः, संभाषणं, आलापः।
—करना, क्रि. अ., संलप्-संवद् (भ्वा. प. से.), संभाष् (भ्वा. आ. से.)।
वार्त्तिक, सं. पुं. (सं. न.) उक्तानुक्तदुरुक्तार्थ-प्रकाशको ग्रंथः;टीका। (सं. पुं.) चरः २. दूतः।
वार्द्धक्य, सं. पुं. (सं. न.) वार्द्धकं, वृद्धत्वं, वृद्धावस्था, स्थाविरम्।
वार्षिक, वि. (सं.) आब्दिक, वात्सरिक, सांवत्सरिक २. प्रावृषेण्य।
वालंटियर, सं. पुं. (अं.) स्वयंसेवकः, स्वेच्छा-सेवकः।
वालदैन, सं. पुं. (अ.) पितरौ, मातापितरौ (दोनों द्वि.)।
वालिद, सं. पुं. (अ.) पितृ, जनकः।
वालिदा, सं. स्त्री. (अ.) मातृ (स्त्री.), जननी।
वाल्मीकि, सं. पुं. (सं.) रामायणप्रणेतृमुनि-विशेषः, व(वा)ल्मीकः, प्राचेतसः, आद्यकविः, कविज्येष्ठः।
वावदूक, सं. पुं. (सं.) वाग्मिन् २. वाचालः।
वावैला, सं. पुं. (अ.) विलापः २. कोलाहलः।
वाष्प, सं. पुं. (सं.) उष्मन्, दे. 'भाप' २. अश्रु (न.)।
वासंती, सं. स्त्री. (सं.) माधवी, प्रहसंती, वसंतजा २. यूथी।
वास, सं. पुं. (सं.) अव,-स्थानं-स्थितिः (स्त्री.) नि-,वस्तिः (स्त्री.) २. गृहं, भवनं ३. सु-,गंधः ४. दुर्-,गंधः।
वासक, सं. पुं. (सं.) अटरूषः, वैद्य-भिषङ्,-मातृ (स्त्री.), वासा-सकः।
वासकेट, सं. स्त्री. (अं. वेस्टकोट) वासकटिः।
वासना, सं. स्त्री. (सं.) कामना, अभिलाषः, वांछा २. संस्कारः,भावना,स्मृतिहेतुः ३. ज्ञानं ४. प्रत्याशा ५. देहात्मबुद्धिजन्यो मिथ्यासंस्कारः (न्याय.)।
वासर, सं. स्त्री. (सं. पुं. न.) दिवसः, दिनम्।
वासव, सं. पुं. (सं.) इन्द्रः, दे.।
वासित, वि. (सं.) भावितः, सुरभीकृतः २. वस्त्रवेष्टित ३. पर्युषित।
वासी, सं. पुं. (सं.-सिन्) निवासिन्, वास्तव्य।
वासुदेव, सं. पुं. (सं.) श्रीकृष्णः।
वास्तव, वि. (सं.) सत्य, यथार्थ, अवितथ।
—में, क्रि. वि., वस्तुतः, सत्यम्।
वास्तविक, वि. (सं.) तथ्य, सत्य, तात्त्विक, दे. 'वास्तव'।
वास्ता, सं. पुं. (अं.) संबंधः, संपर्कः।
—पड़ना, मु., व्यवहारावसरः जन् (दि. आ. से.)।
वास्तु, सं. पुं. (सं. पुं. न.) वेश्मभूः, गृहपोतकः २. गृहं, सौधः।
—विद्या, सं. स्त्री. (सं.) भवननिर्माणकला, स्थापत्यम्।
वास्ते, अव्य. (अ.)-अर्थं,-निमित्तम्, चतुर्थी विभक्ति से भी (उ., तेरे वास्ते=त्वदर्थं, तुभ्यम्)।
वाह[1], अव्य. (फ़ा.) साधु, वरं, भद्रं, शोभनं २. अद्भुतं, आश्चर्यं ३. धिक् ४. हंत।
वाह[2], अव्य., साधु-साधु इ.।
——करना, क्रि. स., अभि-प्रति,-नंद् (भ्वा. प. से.), साधु-वादान् दा २. करतलध्वनिं कृ.।

——होना, मु., अभि-प्रति-नंद् (कर्म.)।

वाहक, सं. पुं. (सं.) भारवाहः, भारिकः २. सारथिः, यंतृ।

वाहन, सं. पुं. (सं.) यानं, युग्यं, दे. 'सवारी'।

वाहवाही, सं. स्त्री. (फ़ा.) ख्यातिः-विश्रुतिः (स्त्री.), साधुवादः, प्रशंसा।

—लेना या **लूटना,** मु., यशः वितन् (त. उ. से.), साधुवादान् लभ् (भ्वा. आ. अ.), प्रशंसापात्रं भू।

वाहिनी, सं. स्त्री. (सं.) सेना २. नदी ३. सैन्यभेदः (=८१ हस्ती, ८१ रथ, २४३ घोड़े, ४०५ पैदल)।

—पति, सं. पुं. (सं.) सेनापतिः।

वाहियात, वि. (अ. वाही+फ़ा. यात) व्यर्थ. निरर्थक २. दुष्ट, खल।

वाहीतबाही, वि. (अ.+फ़ा.) निरर्थक, निष्प्रयोजन २. असंगत, असंबद्ध। सं. स्त्री., प्र-, जल्पः-पनं २. गालिः (स्त्री.), अपभाषणम्।

वाह्य, वि. (सं.) वोढव्य २. वोढृ।

विंदु, सं. पुं., दे. 'विंदु'।

विंध्याचल, सं. पुं. (सं.) विंध्यः, पर्वतविशेषः।

वि, उप. (सं.) वैशिष्ट्यनिषेधादिबोधकः उपसर्गः (व्या.)।

विकच, वि. (सं.) विकसित, उत्फुल्ल २. केशहीन।

विकट, वि. (सं.) कठिन, दुस्साध्य, दुष्कर २. भीम, भीषण, भयप्रद ३. विशाल, विस्तीर्ण ४. दुर्गम ५. वक्र, कुटिल।

विकराल, वि. (सं.) दे. 'विकट' (२)।

विकल, वि. (सं.) विह्वल, उद्विग्न, वि-,आकुल, अशांत २. खंडित, अपूर्ण।

विकलांग, वि. (सं.) अ-,पोगंड, अंगहीन, विकल-न्यून,-अङ्ग-इंद्रिय।

विकला, सं. स्त्री. (सं. न.) कलायाः षष्टितमो भागः।

विकल्प, सं. पुं. (सं.) भ्रमः, भ्रांतिः (स्त्री.) २. संदेहः, संशयः ३. विभाषा (व्या.) ४. विरुद्ध-विपरीत,-विचारः-कल्पना ५. चित्तवृत्तिभेदः (योग.) ६. अर्थालंकारभेदः (सा.) ७. अवांतरकल्पः ८. ऐच्छिकविषयः।

विकसित, वि. (सं.) विकच, स्फुट-टित, स्मित, उज्जृंभ-भित, उन्निद्र, उन्मीलित, प्र-उत्-सं-, फुल्ल, भिन्न, उद्बुद्ध।

विकस्वर, वि. (सं.) विकासशील, विकश्वर, विकासिन्।

विकार, सं. पुं. (सं.) परिणामः, विक्रिया, विकृतिः (स्त्री.), विकृत्या २. रोगः, आमयः ३. दोषः, अवगुणः ४. मनो,-वृत्तिः (स्त्री.) -वेगः ५. उपद्रवः, हानिः (स्त्री.)।

विकारी, वि. (सं.-रिन्) विकारवत्, परिणामिन २. विकृत, परिवर्तित ३. कुवासनान्वित।

विकाल, सं. पुं. (सं.) अतिकालः, विलंबः २. सायः-यं, दिनांतः।

विकाश, सं. पुं. (सं.) प्रकाशः, दीप्तिः (स्त्री.) (२-४) दे. 'विकास' (१-३)।

विकास, सं. पुं. (सं.) क्रमशो वृद्धिः (स्त्री.), क्रमिकोन्नतिः (स्त्री.) २. प्रसारः, विस्तारः ३. विकसनं, प्रस्फुटनम्।

—का सिद्धांत, सं. पुं., विकासवादः।

विकीर्ण, वि. (सं.) विक्षिप्त, व्यस्त, प्रसृत, विश्लिष्ट २. विख्यात।

विकृत, वि. (सं.) परिणत, परिवर्तित, विकारान्वित, विकृतिमत् २. कुरूप, विरूप ३. अपूर्ण, विकल ४. रुग्ण ५. कृतक, कृत्रिम।

विकृति, सं. स्त्री. (सं.) (१-३) दे. 'विकार' (१-३)। ४. परि,-वर्तनं-वृत्तिः (स्त्री.) ५. मनोविक्षोभः ६. धातुप्रत्ययजं शब्दरूपं (व्या.) ७. माया ८. वैरूप्यं, कुरूपता।

विक्टोरिया, सं. स्त्री. (अं.) सम्राज्ञीविशेषः २. घोटकशकटीभेदः ३. उपग्रहविशेषः।

विक्रम, सं. पुं. (सं.) शौर्यं, पराक्रमः, वीर्यं, साहसं. पौरुषं २. विक्रमादित्यः, दे.।

विक्रमादित्य, सं. पुं. (सं.) साहसांकः, शकारिः, विक्रमसंवत्प्रवर्तक उज्जयिन्या नृपविशेषः।

—संवत्, सं. पुं. (सं. अव्य.) विक्रमाब्दः।

विक्रमी, सं.पुं. (सं.-मिन्) पराक्रमिन्, वीरः, शूरः २. सिंहः ३. विष्णुः।

विक्रय, सं. पुं. (सं.) विक्रयणं, विपणः-णनम्।

विक्रांत, सं. पुं. (सं.) दे. 'विक्रमी' (१-२)।

विक्रीत, वि. (सं.) विपणायित, मूल्येन दत्त, कृतविक्रय।

विक्रेता, सं. पुं. (सं.-तृ) विक्रयिन्, विक्रयिकः, विक्रायकः, विपणितृ ।
विक्रेय, वि. (सं.) पण्य, पणितव्य, विक्रेतव्य ।
विक्षत, वि. (सं.) विशेषेण व्रणित विद्ध भिन्नदेह।
विक्षिप्त, वि. (सं.) दे. 'विकीर्ण'(१) २. त्यक्त, उज्झित ३. उन्मत्त, वातुल ।
विक्षेप, सं. पुं. (सं.) (इतस्ततः) विक्षेपणं, प्रासनं, निपातनं, प्रेरणं २. चित्तचांचल्यं, संयमाभावः २. विघ्नः, अंतरायः ।
विक्षोभ, सं. पुं. (सं.) मनोलौल्यं, चित्त-चांचल्यं, उद्वेगः, क्षोभः ।
विख्यात, वि. (सं.) प्रसिद्ध, दे. ।
विख्याति, सं. स्त्री. (सं.) प्रसिद्धिः (स्त्री.),दे.।
विगत, वि. (सं.) वि-,अतीत, वीत, गत २. उपांत्य, उपांत ३. निष्प्रभ ४. विरहित, विहीन ।
विगलित, वि. (सं.) शिथिल, श्लथ, स्रस्त २. अव-अधः-,पतित ३. विकृत ४. प्रस्नुत, स्यन्न ।
विगुण, वि. (सं.) निर्गुण, गुणहीन ।
विग्रह, सं. पुं. (सं.) युद्धं, संग्रामः २. कलहः, कलिः ३. शरीरं, कायः ४. विभागः ५. विश्लेषणं, पृथक्करणं ६. व्यासः, विस्तरः, समासांगविश्लेषणं (व्या.) ७. आकारः, आकृतिः (स्त्री.) ।
विघटन, सं. पुं. (सं. न.) विश्लेषः-षणं, पृथक्,-करणं-क्रिया, विच्छेदः, विभेदः २. त्रोटनं ३. वि-,ध्वंसः-सनम् ।
विघटित, वि. (सं.) विश्लेषित, विश्लिष्ट २. त्रुटित, त्रोटित ३. नष्ट, नाशित ।
विघट्टन, सं. पुं. (सं. न.) उद्घाटनं, अपावरणं २. प्रसह्य अवपातनं ३. धर्षणं (४-६) दे. 'विघटन' (१-३) ।
विघात, सं. पुं. (सं.) विघ्नः २. आघातः, प्रहारः ३. खंडनं, शकलीकरणं ४. नाशः ५. वैफल्यम् ।
विघ्न, सं. पुं. (सं.) व्याघातः, अंतरायः, प्रत्यूहः, प्रतिबंधः, बाधः-धा, रोधः, प्रति-वि,-ष्टम्भः ।
—कारी, वि. (सं. रिन्) बाधाजनकः, विघ्न,-कर-कर्तृ, विघातिन् ।
—नाशक, सं. पुं. (सं.) विघ्न,-विनायकः-पतिः-राजः नायकः, गणेशः ।
विचक्षण, वि. (सं.) विद्वस्, बुद्धिमत् २. कुशल, दक्ष, निपुण ।
विचरण, सं. पुं. (सं.) चलनं, गमनं, २. भ्रमणं, पर्यटनं, विहरणम् ।
विचल, वि. (सं.) कंपमान, कंप्र २. चञ्चल, चल।
विचलता, सं. स्त्री. (सं.) अस्थैर्यं, चाञ्चल्यं २. वि-,आकुलता ।
विचलित, वि. (सं.) पतित, स्खलित २. लोल, अधीर, चञ्चल ।
विचार, सं. पुं. (सं.) मतिः (स्त्री.), कल्पना, भावना, संकल्पः, तर्कः, मतं, अभिप्रायः २. चिंतनं, ध्यानं, आलोचनं, विचारणं-णा, तत्त्व-,निर्णयः, वितर्कः-र्कणं, मनसा कल्पनं, विवेचनं ३. व्यवहारदर्शनं, विचारकरणम् ।
—शील, वि. (सं.) विचारवत्, विवेकिन् समीक्ष्य-विमृश्य,-कारिन् ।
—शीलता, सं. स्त्री. (सं.) विवेकिता, बुद्धिमत्ता ।
विचारक, सं. पुं. (सं.) विचार-धर्म न्याय,-अध्यक्षः, आधिकरणिकः २. विवेकिन्, गुण-दोषज्ञः, विवेचकः, आलोचकः ।
विचारणीय, वि. (सं.) विचार्य, चिंतनीय, विचारार्ह, ध्येय २. संदिग्ध ।
विचारना, क्रि. अ. (सं. विचारणं) विचर्-सभू (प्रे.), चिंत्-तर्क् (चु.), ध्यै (भ्वा. प. अ.), विमृश् (तु. प. अ.), आ-पर्या,-लोच् (चु.) ।
विचारित, वि. (सं.) ध्यात, चिंतित, तर्कित, पर्यालोचित, विमृष्ट २. निर्णीत, निश्चित ।
विचार्य, वि. (सं.) दे. 'विचारणीय' ।
विचिकित्सा, सं. स्त्री. (सं.) संशयः, संदेहः ।
विचित्र, वि. (सं.) कर्बुर-रित, कलमाष-षित, शार, शबल २. विशिष्ट, विलक्षण, असाधारण ३. अद्भुत, आश्चर्य, विस्मापक ४. सुन्दर ।
—वीर्य, सं. पुं. (सं.) चन्द्रवंशीयो नृपविशेषः।
—शाला, सं. स्त्री. (सं.) अद्भुतालयः ।
विच्छिन्न, वि. (सं.) निकृत्त, विलून, विवृक्ण २. वियुक्त, विश्लिष्ट, पृथक्-स्थित ३. समाप्त, अवसित ।
विच्छेद, सं. पुं. (सं.) लवनं, लावः, कर्तनं,

विच्छेदनं २. विश्लेषः-षणं, वियोजनं ३. क्रम,-भंगः-भञ्जनं ४. विरहः, वियोगः।

विछोह, सं. पुं. (सं. विक्षोभः>) वियोगः, विरहः।

विजन, वि. (सं.) निर्जन, विविक्त, निःशलाक, एकांत।

विजय, सं. पुं. (सं.) जयः, जयनं, वशी-स्वायत्ती,-करणम्।

—दशमी, सं. स्त्री. (सं.) दे. 'दशहरा'।

—पताका, सं. स्त्री. (सं.) जयकेतुः २. जयचिह्नं।

—शील, वि. (सं.) विजयिन्, सदाजयिन्, जिष्णु।

—श्री, सं. स्त्री. (सं) जयलक्ष्मीः (स्त्री.)।

विजया, सं. स्त्री. (सं.) भंगा, हर्षिणी, दे. 'भांग' २. उमासखी ३. दुर्गा।

—दशमी, सं. स्त्री. (सं.) आश्विनशुक्लदशमी, आर्याणां पर्वविशेषः, विजयोत्सवः।

विजयी, वि. (सं.) वि-, जेतृ, जयिन्, -जित्, जिष्णु (विजयिनी स्त्री.)।

विजातीय, वि. (सं.) भिन्न-असमान,-जाति-वर्ण २. साम्यरहित, असम।

विजिगीषा, सं. स्त्री. (सं.) विजयकामना २. उत्कर्षः।

विजिगीषु, वि. (सं.) जयाभिलाषिन्।

विज़िटिंग कार्ड, सं. पुं. (अं.) *दर्शकपत्रम्।

विजित, वि. (सं.) पराजित, अभि-परा,-भूत, वशी-स्वायत्ती,-कृत।

विजेता, सं. पुं. (सं.-तृ) दे. 'विजयी'।

विज्ञ, वि. (सं.) प्रवीण, कुशल, विशेषज्ञ २. धीमत्, बुद्धिमत् ३. कोविद, पंडित।

विज्ञता, सं. स्त्री. (सं.) प्रवीणता २. बुद्धिमत्ता ३. विद्वत्ता।

विज्ञप्ति, सं. स्त्री. (सं.) सूचनं, ख्यापनम्।

विज्ञात, वि. (सं.) अवगत, अवबुद्ध २. प्रसिद्ध।

विज्ञान, सं. पुं. (सं. न.) ज्ञानं, बोधः, अवगमः, उपलब्धिः (स्त्री.) २. विषयविशेषस्य विशिष्टज्ञानं ३. अध्यात्म,-विद्या-ज्ञानं ४. कर्मन् (न.) ५. आत्मानुभवः।

—मयकोष, सं. पुं. (सं.) ज्ञानेन्द्रियसहिता बुद्धिः (स्त्री.)।

विज्ञापन, सं. पुं. (सं. न.) बोधनं, सूचनं, घोषणं, ख्यापनं, विज्ञप्तिः (स्त्री.), विज्ञापना २. विज्ञापनपत्रम्।

विट, सं. पुं. (सं.) कामुकः, लंपटः २. धूर्त्तः ३. नायकभेदः (सा.) ३. कामुकानुचरः।

विटप, सं. पुं. (सं. पुं. न.) शाखा, शाखा-पल्लवसमुदायः २. क्षुपः, गुल्मः-ल्मं ३. वृक्षः।

विटपी, सं. पुं. (सं.-पिन्) वृक्षः, पादपः।

विटामिन, सं. पुं. (अं.) खाद्यौजस्।

विडंबना, सं. स्त्री. (सं.) अनु,-करणं-कारः-कृतिः (स्त्री.) २. अव-उप,-हासः, अवहेलना २. निर्भर्त्सनं-ना।

—करना, क्रि. स., अव-उप,-हस् (भ्वा. प. से.) २. सोपहासं अनुकृ, विडंब् (चु.) सावहासं अवमन् (दि. आ. अ.)।

विडारना, क्रि. स. (हिं. डालना) विकृ (तु. प. से.), विक्षिप् (तु. प. अ.) २. वि-, नश् (प्रे.) ३. विद्रु-प्रपलाय् (प्रे.)।

वि(बि)डाल, सं. पुं. (सं.) मार्जारः, दीप्त,-लोचनः-अक्षः, दे. 'बिल्ला'।

वितंडा, सं. स्त्री. (सं.) परपक्षव्युदासपूर्वकं स्वपक्षस्थापनं २. प्रतिपक्षस्थापनाहीनो जल्पः ३. व्यर्थ,-कलहः-विवादः।

वितत, वि. (सं.) विस्तृत, विस्तीर्ण।

वितथ, वि. (सं.) वितथ्य, असत्य, अनृत २. व्यर्थ।

वितरण, सं. पुं. (सं. न.) दानं, अर्पणं, उत्सर्गः २. विभाजनं, अंशनम्।

—करना, क्रि. स., अंश् (चु.), विभज् (भ्वा. उ. अ.)।

वितर्क, सं. पुं. (सं.) ऊहः-हनं, ऊहापोहः २. संदेहः ३. अनुमानं ४. अर्थालंकारभेदः (सा.)।

वितल, सं. पुं. (सं. न.) पातालविशेषः।

वितस्ता, सं. स्त्री. (सं.) पंचनदप्रांतवर्ती नदविशेषः।

वितस्ति, सं. स्त्री. (सं. पुं. स्त्री.) द्वादशांगुलः, दे. 'बित्ता'।

वितान, सं. पुं. (सं. पुं. न.) उल्लोचः, चंद्रातपः २. विस्तारः ३. यज्ञः।

वितुंड, सं. पुं. (सं. वि+तुंड>) गजः, द्विपः।

वितृष्ण, वि. (सं.) निःस्पृह, निष्काम, संतोषिन्।

वित्त, सं. पुं. (सं. न.) संपत्तिः (स्त्री.), धनं, दे.।

—वान्, वि. (सं.-वत्) धनाढ्य।

—हीन, वि. (सं.) निर्धन।

विदग्ध, वि. (सं.) चतुर, दक्ष, कुशल २. व्युत्पन्न, पंडित ३. प्लुष्ट, व्युष्ट । सं. पुं. (सं.) रसिकः २. विद्वस् ।

विदग्धता, सं. स्त्री. (सं.) चातुर्यं २. पांडित्यं, विद्वत्ता ।

विदा, सं. स्त्री. (अ. विदाअ) प्रस्थानं, प्रयाणं ३. गमनानुमतिः (स्त्री.), प्रस्थानानुज्ञा ।

—करना, क्रि. स., प्रस्था-प्रया (प्रे.) विसृज् (तु. प. अ.) ।

—होना, क्रि. अ., प्रस्था (भ्वा. आ. अ.), प्रया (अ. प. अ.) ।

विदाई, सं. स्त्री. (हिं. विदा) दे. 'विदा' (१-२) । ३. 'प्रास्थानिकं धनं द्रव्यं वा ।

विदारक, वि. (सं.) विपाटक, विभेदक, विदारण ।

विदारण, सं. पुं. (सं. न.) विपाटनं, विभेदनं, विदलनं २. हननं ३. युद्धम् ।

विदारीकंद, सं. पुं. (सं. पुं. न.) भूमिकुष्मांडः, विदारी-रिकां, वृष्य-स्वादु,-कंदा ।

विदित, वि. (सं.) अवगत, बुद्ध, ज्ञात, दे. ।

विदिशा, सं. स्त्री. (सं.) दशार्णानां राजधानी, नगरविशेषः (भेलसा) २. दिक्-दिशा,-कोणः ।

विदीर्ण, वि. (सं.) विपाटित, विदलित, विभिन्न २. त्रुटित, भग्न ३. हत ।

विदुर, सं. पुं. (सं.) धृतराष्ट्रस्य भ्राता मंत्री च ।

विदुष, सं. पुं. (सं. विद्वस्) पंडितः, प्राज्ञः ।

विदुषी, वि. (सं.) विप्रकृष्ट, सुदूरवर्तिन् ।

विदूर, सं. पुं. (सं.) वैहासिकः, प्रहासिन्, प्रीतिदः, वासंतिकः २. भंडः ।

विदेश, सं. पुं. (सं.) परदेशः, देशांतरम् ।

विदेशी, वि. (सं. विदेशीय) अन्य-पर,-देशीय, वै-पार,-देशिक ।

विदेह, वि. (सं.) अकाय, अशरीर-रिन् । सं. पुं. (सं.) जनकः, मिथिलेश्वरः ।

—पुर, सं. पुं. (सं. न.) जनकपुरी, मिथिला, विदेहा ।

विद्ध, वि. (सं.) सच्छिद्र, समुत्कीर्ण, सुषिर, वेधित, छिद्रित, निर्भिन्न २. क्षत, व्रणित ३. क्षिप्त, अस्त ।

विद्यमान, वि. (सं.) वर्तमान, भवत्, २. प्रत्यक्ष, समक्ष, उपस्थित ।

विद्यमानता, सं. स्त्री. (सं.) उपस्थितिः (स्त्री.), वर्तमानता ।

विद्या, सं. स्त्री. (सं.) ज्ञानं, विज्ञानं, बोधः २. अध्यात्मविद्या, परा विद्या ३. शास्त्रम् ।

—दान, सं. पुं. (सं. न.) अध्यापनं २. पुस्तक-दानम् ।

—प्राप्ति, सं. स्त्री. (सं.) ज्ञानाधिगमः, अध्ययनम् ।

—वान्, वि. (सं.-वत्) विद्वस्, प्राज्ञ ।

—हीन, वि. (सं.) अशिक्षित, निरक्षर, अज्ञ, अविद्य ।

विद्यार्थी, सं. पुं. (सं.-र्थिन्) छात्रः, शिष्यः, २. अधीयानः, अध्येतृ, पाठकः ।

विद्यालय, सं. पुं. (सं.) पाठशाला, विद्या,-गृहं-मन्दिरम् ।

विद्युत्, सं. स्त्री. (सं.) चंचला, चपला, तडित् (स्त्री.), दे. 'बिजली' ।

—प्रिय, सं. पुं. (सं. न.) कांस्यं २. कांस्य-पात्रम् ।

विद्रुम, सं. पुं. (सं.) प्रवालः, भोमीरः, दे. 'मूंगा' २. रत्नवृक्षः ३. पल्लवः-वं, किस(श)-लयः-यम् ।

विद्रोह, सं. पुं. (सं.) राज,-द्रोहः,-विरोधः, प्रजाक्षोभः, प्रकृतिप्रकोपः, राज्यविप्लवः ।

विद्रोही, सं. पुं. (सं.-हिन्) राज,-द्रोहिन्-विरोधिन्-द्रुह् ।

विद्वत्ता, सं. स्त्री. (सं.) पांडित्यं, व्युत्पत्तिः (स्त्री.), विद्वत्त्वं, विद्याप्रकर्षः ।

विद्वान्, सं. पुं. (सं. विद्वस्) पंडितः, प्राज्ञः, बहुश्रुतः, विपश्चित्, ज्ञानवत् ।

विद्वेष, सं. पुं. (सं.) वैरं, शत्रुता, विरोधः ।

विद्वषी, सं. पुं. (सं.-षिन्) वैरिन्, विरोधिन्, शत्रुः ।

विधवा, सं. स्त्री. (सं.) रंडा, मृतभर्तृका, विश्वस्ता, यतिनी, जालिका ।

—पन, सं. पुं. (सं+हिं.) वैधव्यं, दे. ।

विधवाश्रम, स. पुं. (सं.) *विश्वस्तालयः ।

विधाता, सं. पुं. (सं.-तृ) ब्रह्मन् (पुं.), जगदुत्पादकः, सृष्टिकर्तृ, परमेश्वरः २. विधायकः, रचयितृ ३. व्यवस्थापकः, *प्रबन्धकः ।

विधात्री, सं. स्त्री. (सं.) रचयित्री, विधायिका २. व्यवस्थापिका ।

विधान, सं. पुं. (सं. न.) अनुष्ठानं, करणं, संपादनं, निष्पादनं, साधनं २. व्यवस्था, आयोजनं, *प्रबन्धः ३. रीतिः-पद्धतिः (स्त्री.), प्रणाली ४. निर्माणं, रचनं-ना ५. उपायः, युक्तिः (स्त्री.) ६. पूजा, अर्चा ७. शासन-पद्धतिः (स्त्री.), राज्यव्यवस्था ८. विधिः, नियमः, कल्पः।
—**करना,** क्रि. स., विधा, आदिश् (तु. प.अ.), शाम् (अ. प. से.)।

विधायक, सं. पुं. (सं.) अनुष्ठातृ, कर्तृ, निष्पादकः, साधकः २. निर्मातृ, रचयितृ, विधातृ, ३. व्यवस्थापकः, प्रबन्धकः, प्रस्तोतृ।

विधि, सं. स्त्री. (सं. पुं.) (शास्त्राणां) आदेशः, नियोगः, नियमः, कल्पः, अनुशासनं २. रीतिः (स्त्री.), कार्यक्रमः, प्रणाली ३. व्यवस्था, संगतिः (स्त्री.), क्रमः ४ आचारः, व्यवहारः ५. प्रकारः, रीतिः (स्त्री.) ६. भाग्यम्।
सं. पुं. (सं.) ब्रह्मन्, विधातृ (पुं.)।
—**निषेध,** सं. पुं. [सं.-धौ (द्वि.)] नियोग-प्रतिषेधौ (द्वि.)।
—**पूर्वक,** क्रि. वि. (सं.-र्वकं) यथाविधि, यथाशास्त्रं २. यथातथं, यथोचितम्।
—**वत्,** क्रि. वि. (सं.) दे. 'विधिपूर्वक'।

विधु, सं. पुं. (सं.) चन्द्रः, सोमः।
—**वदनी,** सं. स्त्री. (सं.) चन्द्रमुखी २. सुंदरी।

विधुर, वि. (सं.) दुःखित, पीडित २. भीत, त्रस्त ३. वि-,आकुल ४. असमर्थ ५. परित्यक्त ६. विमूढ [विधुरा (स्त्री.)]।

विधेय, वि. (सं.) अनुष्ठेय, कर्तव्य, निष्पाद्य, साध्य २. वशवर्तिन्, विनीत, वश्य, विनेय, वचनेस्थित ३. विधानार्ह, अनु-शासनीय। सं. पुं. (सं. न.) विशेषकं, वाक्यांशभेदः (व्या.)।

विध्वंस, सं. पुं. (सं.) वि-,नाशः, अवसादः, निर्मूलनं, उच्छेदः।

विध्वंसी, वि. (सं.-सिन्) विध्वंसकः, वि-, नाशकः, निर्मूलयितृ।

विध्वस्त, वि. (सं.) वि-,नष्ट, उच्छिन्न, निर्मूलित, उत्सन्न।

विनत, वि. (सं.) प्रणत, वंदमान २. आवर्जित, प्रवण ३. वक्र, जिह्म ४. संकुचित ५. नम्र ६. शिष्ट।

विनती, सं. स्त्री. (सं.-तिः) प्रार्थना, याच्ञा २. विनयः, नम्रता, शिष्टता ३. प्रवणता, प्रह्वता।

विनय, सं. स्त्री. (सं. पुं.) प्रश्रयः, नम्रता, शालीनता, सौजन्यं, दाक्षिण्यं २. शिक्षा ३. निवेदनं, प्रार्थना ४. निर्भर्त्सना ५. नीतिः (स्त्री.)।
—**शील,** वि. (सं.) नम्र, विनीत, शिष्ट, दक्षिण, सभ्य, सुजन, सुशील।

विनश्वर, वि. (सं.) क्षयिष्णु, नश्वर, अनित्य, अस्थायिन्।

विनष्ट, वि. (सं.) वि-,ध्वस्त, अवसन्न, उच्छिन्न, निर्मूलित २. मृत ३. विकृत ४. भ्रष्ट।

विना, अव्य. (सं.) अन्तरेण, मुक्त्वा, वर्जयित्वा, विहाय (सब द्वितीया के साथ)। ऋते (पञ्चमी के साथ)।

विनायक, सं. पुं. (सं.) गणेशः, दे.।

विनाश, सं. पुं. (सं.) दे. 'विध्वंस' तथा 'नाश'।

विनिपात, सं. पुं. (सं.) वि-,नाशः-ध्वंसः २. वधः, हत्या ३. अव-अप,-मानः, अनादरः, अवधीरणा।

विनिमय, सं. पुं. (सं.) परि,-वर्तः-वृत्तिः (स्त्री.), प्रति-परि,-दानम्।
—**करना,** क्रि. स., विनि-मे (भ्वा. आ. अ.), प्रतिदा, परिवृत् (प्रे.)।

विनियोग, सं. पुं. (सं.) कृत्यविशेषे मंत्रप्रयोगः २. उपयोगः, प्रयोगः ३. प्रेषणं ४. प्रवेशः।

विनीत, वि. (सं.) दे. 'विनयशील' २. जितेंद्रिय ३. शिक्षित ४. अपनीत ५. दंडित ६. धार्मिक।

विनोद, सं. पुं. (सं.) कु(कौ)तूहलं, कौतुकं, मनोरंजकव्यापारः २. खेला, क्रीडा, लीला ३. परिहासः, प्रमोदः ४. आनंदः, हर्षः।

विनोदी, वि. (सं.-दिन्) कु(कौ)तूहलिन्, कौतकिन् २. लीलामय, क्रीडाशील ३. आनंदिन्. उल्लासिन् ४. परिहासशील, प्रमोदप्रिय।

विन्यास, सं. पुं. (सं.) स्थापनं, न्यसनं, निधानं २. रचनं, परिष्करणं, अलंकरणं ३. प्रणिधानं, उत्खचनं, अनुव्यधनं ४. क्षेपः-पणम्।

विपंची, सं. स्त्री. (सं.) वीणाभेदः २. केलिः (स्त्री.)।

विपक्ष, सं. पुं. (सं.) प्रति-विरुद्ध-विपरीत-प्रतियोगि-विरोधि,-पक्षः २. विरोधिवर्गः, प्रतिद्वंद्विवर्गः ३. प्रतिवादिन्, विरोधिन् ४. विरोधः ५. अपवादः, बाधकनियमः (व्या.) ६. साध्याभाववान् पक्षः (न्या.)। वि. (सं.) विरुद्ध २. असहाय ३. निश्छद, निर्बाज।

विपक्षी, सं. पुं. (सं.-क्षिन्) प्रतिपक्षिन्, प्रतिवादिन्, पर,-पक्षीयः-पक्ष्यः-पक्षपातिन्, प्रतिद्वंद्विन् २. शत्रुः, वैरिन् ३. निष्पतत्र, पक्षहीन (पंछी आदि)।

विपत्ति, सं. (सं.) आपद्-विपद्-आपत्तिः (स्त्री.), व्यसनं, महा,-दुखं-कष्टं २. आपत्-विपत्,-कालः-समयः।

—**आना** या **पड़ना,** क्रि. अ., व्यसनं उपस्था (भ्वा. प. अ.), कष्टं आ-समा-पत् (भ्वा. प. से.) विपद् उपनम् (भ्वा. प. अ.)।

विपथ, सं. पुं. (सं.) कु,-पथः-मार्गः २. कद्,-आचारः-आचरणम्।

विपद्-दा, सं. स्त्री. (स.) दे. 'विपत्ति'।

विपन्न, वि. (सं.) विपद्-आपद्,-ग्रस्त, २. दुःखित ३. भ्रान्त ४. मृत।

विपरीत, वि. (सं.) विरुद्ध, प्रतीप, अप-प्रति,-सव्य, प्रतिकूल, विलोमक २. रुष्ट, क्रुद्ध ३. कष्टकर, दुःखप्रद।

विपरीतता, सं. स्त्री. (सं.) प्रतीपता, प्रतिकूलता, विरोधः, वैपरीत्यम्।

विपर्यय, सं. पुं. (सं.) व्यत्यासः, व्यत्ययः, विपर्यासः, व्यतिक्रमः २. अव्यवस्था, क्रमाभावः ३. भ्रांतिः (स्त्री.), स्खलितं ४. मिथ्याज्ञानम्।

विपर्यस्त, वि. (सं.) व्यत्यस्त, अधरोत्तर २. अव्यवस्थित, भग्नक्रम, संकुल, संकीर्ण।

विपर्यास, सं. पुं. (सं.) दे. 'विपर्यय' (१,२,४)।

विपल, सं. पुं. (सं. न.) क्षणं, निमिषः, पलस्य षष्टितमो भागः।

विपाक, सं. पुं. (सं.) पचनं, पक्वता २. चरमोत्कर्षः, पूर्णता ३. फलं, परिणामः ४. कर्मफलं ५. जठरे भोजनस्य रसरूपेण परिणतिः (स्त्री.) ६. स्वादः ७. दुर्गतिः (स्त्री.)।

विपिन, सं. पुं. (सं. न.) जंगलं, वनं, दे.। २. उपवनं, वाटिका।

विपुल, वि. (सं.) बहु, भूरि, प्रभूत, अत्यधिक २. विशाल, विस्तीर्ण ३. बृहत्, महत् ४. अगाध, अतिगभीर।

विपुलता, सं. स्त्री. (सं.) आधिक्यं, बहुत्वं, अतिशयः २. विशालता, विस्तीर्णता ३. महत्ता, बृहत्ता।

विपुला, सं. स्त्री. (सं.) पृथिवी, दे.।

विप्र, सं. पुं. (सं.) ब्राह्मणः दे. २. पुरोहितः।

विप्रतिपत्ति, सं. स्त्री. (सं.) विरोधः, विसंवादः, असंगतिः (स्त्री.) २. परस्परविसंवादिवाक्यम् (न्या.), कुख्यातिः (स्त्री.) ४. विकृतिः (स्त्री.) ५. असिद्धिः (स्त्री.)।

विप्रतिषेध, सं. पुं. (सं.) मिथोविरोधः, असंगतिः (स्त्री.)।

विप्रलंभ, सं. पुं. (सं.) वियोगः, विरहः, रागिणोर्विच्छेदः २. छलं, वंचनं ना।

विप्लव, सं. पुं. (सं.) उपद्रवः, डिंबः, डमरः २. विद्रोहः, दे. ३. कुव्यवस्था, क्रमहीनता ४. आपद्-विपद् (स्त्री.) ५. विनाशः आप्लावः, जलबृंहणम्

विफल, वि. (स.) निष्फल, दे.।

विबुध, सं. पुं. (सं.) पंडितः-प्राज्ञः २. देवः ३. चंद्रः ४. शिवः।

विबोध, सं. पुं. (सं.) जागरणं २. सम्यग्ज्ञानं ३. सावधानता ४. विकासः।

विभक्त, वि. (सं.) कृतविभाग, परिकल्पित २. पृथक्कृत, विश्लेषित ३. विभिन्न, प्राप्तविभाग।

विभक्ति, सं. स्त्री. (सं.) विभजनं, विभागः २. वियोगः, पार्थक्यं ३. सुप्प्रत्ययः, तिङ्प्रत्ययः (व्या.)।

विभव, सं. पुं. (सं.) धनं, संपत्तिः (स्त्री.) २. ऐश्वर्यं, प्रतापः ३. मोक्षः, निःश्रेयसम्।

—**शाली,** वि. (सं.-लिन्) धनाढ्य २. प्रतापिन्।

विभा, सं. स्त्री. (सं.) कांतिः (स्त्री.), प्रभा २. किरणः ३. सौन्दर्यम्।

विभाग, सं. पुं. (सं.) परिकल्पनं, विभजनं, अंशनं, वंटनं २. अंशः, भागः, खंडः-डं, एकदेशः ३. दायांशः, रिक्थभागः ४. प्रकरणं, अध्यायः ५. शाखा, कार्यक्षेत्रम्।

—करना, क्रि. स., दे. 'बाँटना'।
विभाजक, सं. पुं. (सं.) विभाजयितृ, विभाग-, परिकल्पकः, वंट(ड)कः।
विभाजन, सं. पुं. (सं. न.) वंट(ड)नं, विभजनं, विभाग-,परिकल्पनम्।
विभाजित, वि. (सं.) कृतविभाग, परिकल्पित, वंटित, वंडित।
विभाज्य, वि. (सं.) विभजनीय, विभागार्ह, वंटि(डि)तव्य।
विभावना, सं. स्त्री. (सं.) अर्थालंकारभेदः (सा.)।
विभावरी, सं. स्त्री. (सं.) शर्वरी, रात्री २. दूती, कुट्टनी।
विभाषा, सं. स्त्री. (सं.) विकल्पः (व्या.)।
विभिन्न, वि. (सं.) विच्छिन्न, लून, कृन्त २. विभक्त, वियुक्त, पृथक्स्थित ३. नाना-अनेक-बहु-वि,-विध।
विभिन्नता, सं. स्त्री. (सं.) विविधता २. पृथक्ता-त्वम्।
विभीषण, सं. पुं. (सं.) रावणभ्रातृ। वि. (सं.) भयंकर, भीम।
विभु, वि. (सं.) सर्वव्यापक, विश्वव्यापिन्, सर्वग, सर्वगत २. नित्य ३. सुमहत् ४. शक्तिमत्। सं. पुं. (सं.) ईश्वरः २. स्वामिन् ३. आत्मन्।
विभूति, सं. स्त्री. (सं.) विभवः, ऐश्वर्य २. धनं, वित्तं ३. अलौकिक-दिव्य,-शक्तिः-सिद्धिः (दोनों स्त्री.) ४. शिवधृतभस्मन् (न.) ५. लक्ष्मीः (स्त्री.) ६. (विविध) सृष्टिः (स्त्री.), वृद्धिः (स्त्री.), उत्कर्षः।
विभूषण, सं. पुं. (सं. न.) अलंकरणं, मंडनं २. आभूषणं, अलंकारः।
विभूषित, वि. (सं.) अलंकृत, मंडित २. युक्त, सहित ३. सुशोभित।
विभ्रम, सं. पुं. (सं.) वि-,भ्रांतिः (स्त्री.), भ्रमः, स्खलितं २. संदेहः ३. भ्रमणं ४. स्त्रीणां हावभेदः ५. सौन्दर्यम्।
विमति, सं. स्त्री. (सं.) विपरीत-विरुद्ध-,मत-विचारः २. कुमतिः (स्त्री.)।
विमन, वि. (सं.-नस्) खिन्न, विषण्ण, दुर्मनस्।
विमर्श, सं. पुं. (सं.) विचारः-रणं-रणा, मंत्रणं-णा, विवेचनं २. समीक्षा, आलोचना ३. परीक्षा ४. परामर्शः।
विमल, वि. (सं.) स्वच्छ, निर्मल, दे. २. निर्दोष ३. सुन्दर।
—मणि, सं. पुं. (सं.) दे. 'स्फटिक'।
विमलता, सं. स्त्री. (सं.) निर्मलता, दे.।
विमाता, सं. स्त्री. (सं.-तृ) मातृसपत्नी।
विमान, सं. पुं. (सं. पुं. न.) देवरथः, वायु-व्योम,-यानं २. रथः, वाहनं ३. धोटकः ४. सप्तभूमिकं गृहं ५. शवयानम्।
विमुख, वि. (सं.) विरत, निरपेक्ष, निरीह, औत्सुक्यहीन २. विरुद्ध, विपरीत, प्रतिकूल ३. निराश, अपूर्णकाम ४. अवदन।
विमुखता, सं. स्त्री. (सं.) विरतिः (स्त्री.), औदासीन्यं २. विरोधः, विपरीतता।
विमूढ, वि. (सं.) अज्ञ, अज्ञानिन् २. निस्संज्ञ, मूर्च्छित ३. आ-व्या,-कुल, विकुव २. अति,-मुग्ध-मोहित।
विमोक्ष, सं. पुं. (सं.) दे. 'मोक्ष'।
वियोग, सं. पुं. (सं.) विरहः, विप्रलंभः, विप्रयोगः २. विच्छेदः, विश्लेषः, विभेदः ३ पार्थक्यं, पृथग्भावः ४. व्यवकलनं (गणित.)।
वियोगांत, वि. (सं.) दुःख,-अन्त-पर्यवसायिन् (नाटकादि)।
वियोगिनी, वि. स्त्री. (सं.) विरहिणी, वियुक्ता, प्रोषित,-पतिका-भर्तृका।
वियोगी, वि. (सं.-गिन्) विरहिन्, वियुक्त।
वियोजक, वि. (सं.) विश्लेषक, विच्छेदक।
विरंचि, सं. पुं. (सं.) विधातृ, ब्रह्मन् (पुं.)।
—सुत, सं. पुं. (सं.) नारदः।
विरक्त, वि. (सं.) विरत, विमुख, निरीह, निवृत्त २. उदासीन, निष्प्रयोजन ३. खिन्न, रुष्ट, ४. वैरागिन्, वैरागिक।
विरक्ति, सं. स्त्री. (सं.) विरतिः (स्त्री.), विरागः, विमुखता, वैराग्यं, विरक्तता २. औदासीन्यं ३. खेदः।
विरत, वि. (सं.) दे. 'विरक्त' (१, ४), सावकाश, अव्यापृत-अतिव्यापृत, -पर, -परायण।
विरति, सं. स्त्री. (सं.) दे. 'विरक्ति' (१-३) ४. विरामः, विच्छेदः, उपर(रा)मः।
विरद, सं. पुं., दे. 'विरुद'।

विरल, वि. (सं.) घनता-निविडता,-शून्य २. दुर्लभ, दुष् ,-प्राप-प्रापण ३. तनु ४. निर्जन ५. अल्प ६. विप्रकृष्ट, दूरस्थ ।

विरला, वि. (सं. विरल) दे. 'विरल' (१-२) ।

विरस, वि. (सं.) नीर, दे. २. अप्रिय ।

विरह, सं. पुं. (सं.) दे. 'वियोग' (१-३) । ४. वियोगजं दुःखम् ।

विरहिणी, वि. स्त्री. (सं.) वियोगिनी, दे. ।

विरही, वि. (सं.-हिन्) दे. 'वियोगी' ।

विराग, सं. पुं. (सं.) दे. 'वैराग्य' ।

विरागी, वि. (सं.-गिन्) दे. 'वैरागी' ।

विराजना, क्रि. अ. (सं. विराजनं) शुभ्-विराज् (भ्वा. आ. से.), प्र-वि-भा (अ. प. अ.) २. वृत् (भ्वा. आ. से.), विद् (दि. आ. अ.), उपविश् (तु. प. अ.), आस् (अ. आ. से.) ।

विराजमान, वि. (सं.) प्रकाशमान, शोभमान, भ्राजमान, भासुर २. विद्यमान, उपस्थित, वर्तमान ३. उपविष्ट, आसीन ।

विराट्, सं. पुं. (सं.-राज्) विश्वरूपं ब्रह्मन् (न.) २. क्षत्रियः ।

विराट, सं. पुं. (सं.) मत्स्यदेशः २. तद्देशीयो राजविशेषः ।

—पर्व, सं. पुं. [सं.-र्वन् (न.)] श्रीमहाभारतस्य चतुर्थं पर्वन् (न.) ।

विराम, सं. पुं. (सं.) दे. 'विरति' (४) । २. विश्रामः, विश्रांतिः (स्त्री.) ३. वाक्यावसानं ४. यतिः (स्त्री.) ।

विराव, सं. पुं. (सं.) शब्दः, ध्वनिः २. कलकलः ।

विरासत, सं. स्त्री. (अ.) दायः, पैतृकधनं, रिक्थं २. दायादत्वं, रिक्थहरत्वम् ।

विरुद, सं. पुं. (सं.) गुणोत्कर्षवर्णनं, यशःकीर्तनं, प्रशस्तिः (स्त्री.) २. यशस् (न.), कीर्तिः (स्त्री.) ३. नृपोपाधिशब्दः ।

विरुदावली, सं. स्त्री. (सं.) स्तवमाला, यशोवर्णनम् ।

विरुद्ध, वि. (-सं.) प्रतिकूल, विरोधिन् , विपरीत, प्रतीप २. रुष्ट, खिन्न ३. अनुचित, अन्याय्य ।

विरूप, वि. (सं.) बहुरूप, नानाकार २. कुरूप, कुदर्शन ३. परिवर्तित ४. निश्श्रीक, शोभाहीन ५. विरुद्ध ६. भिन्न ।

विरेचक, वि. (सं.) सारक, मलभेदक, विरेककारक, दे. 'रेचक' ।

विरेचन, सं. पुं. (सं. न.) मलभेदकौषधं, दे. 'रेचन' २. रेकः, रेचनं-ना, मलभेदः ।

विरोध, सं. पुं. (सं.) वैरं, शत्रुता-त्वं, वि-, द्वेषः, सापत्न्यं २. असंगतिः (स्त्री.), विसंवादः, विपरीतता ३. विप्रतिपत्तिः (स्त्री.), व्याघातः ४. अर्थालंकारभेदः (सा.) ।

—करना, क्रि. स., वि-प्रति-रुध् (रु. उ.अ.), प्रतिकृ, प्रत्यवस्था (भ्वा. आ. अ.), वि-प्रतिहन् (अ. प. अ.) २. विप्रलप् (भ्वा. प. से.), प्रतिक्षिप् (तु. प. अ.) ।

विरोधी, सं. पुं. (सं.-धिन्) वैरिन्, शत्रुः, ३. विपक्षिन्, प्रतिद्वंद्विन् ३. विरोधकरः, विघ्नकरः ।

विलंब, सं. पुं. (सं.) अतिकालः, वेलातिक्रमः, काल,-क्षेपः-हरणं, दे. 'देर' ।

विलंबित, वि. (सं.) चिरायित, व्याक्षिप्त २. प्रलंब, लंबमान ।

विलक्षण, वि. (सं.) असाधारण, असामान्य, अद्भुत, अपूर्व, विशिष्ट ।

विलक्षणता, सं. स्त्री. (सं.) वैलक्षण्यं, विशिष्टता इ. ।

विलय, सं. पुं. (सं.) विलयनं, द्रवीभवनं २. लोपः, अदर्शनं ३. मृत्युः ४. वि-, नाशः ५. प्रलयः ।

विलाप, सं. पुं. (सं.) परिदेवनं,-ना, शोकजं वचनं, अनुशोचनोक्तिः (स्त्री.) २. क्रंदनं, रु(रो)दनम् ।

—करना, क्रि. अ., विलप्-अनुशुच्-परिदेव् (भ्वा. प. से.) ।

विलायत, सं. पुं. (अ.) वि-पर,-देशः २. दूरदेशः (यूरोप, अमेरिका आदि) ।

विलायती, वि. (अ.) दे. 'विदेशी' ।

—बैंगन, सं. पुं. (अ+हिं.) दे. 'टमाटर' ।

विलास, सं. पुं. (सं.) विभ्रमः, लीला, हावभेदः, दे. 'नखरा' २. आनन्दः, हर्षः ३. मनो,-रंजनं-विनोदः, ४. सुखभोगः ५. कंपः-पनं, गतिः (स्त्री.) ६. आह्लादक-हर्षप्रद-मनोहर-ललित,-चेष्टा-क्रिया ।

विलासिनी, सं. स्त्री. (सं.) कामिनी, सुंदरी, वरांगना २. नारी ३. वेश्या ४. वर्णवृत्तभेदः ।

विलासी, वि. (सं.-सिन्) भोगिन्, विषय-भोग,-आसक्त, कामिन् २. लीलापर, क्रीडा-प्रिय, कौतुकिन् ३. सुखैषिन् ।

विलीन, वि. (सं.) अन्तर-तिरो,-हित, लुप्त २. नष्ट ३. गुप्त, गूढ ।

विलोकना, क्रि. स. (सं. विलोकनं) दे. 'देखना' ।

विलोड़ना, क्रि. स., दे. 'विलोना' ।

विलोम, वि. (सं.) प्रतिकूल, विपरीत, प्रति-लोम, प्रतीप २. स्वरावरोहः (संगीत.) ।

विलोल, वि. (सं.) चल, अस्थिर २. सुंदर ।

विवक्षा, सं. स्त्री. (सं.) वक्तुमिच्छा, विव-दिषा २. तात्पर्य ३. संदेहः ।

विवक्षित, वि. (सं.) वक्तुमिष्ट २. अपेक्षित ।

विवर, सं. पुं. (सं. न.) छिद्रं, बिलं २. गर्तः-तं, अवटः, खातं ३. कंदरा, गुहा ।

विवरण, सं. पुं. (सं. न.) व्याख्यानं, विवे-चन २. विस्तृत,-वर्णनं-वृत्तांतः ३. टीका, भाष्यं, व्याख्या ।

विवर्जित, वि. (सं.) निषिद्ध, वर्जित २. उपे-क्षित, अनादृत ३. वंचित, रहित ।

विवर्ण, वि. (सं.) निस्तेजस्, निष्प्रभ, कांति-हीन २. क्षुद्र, नीच ।

विवर्त, सं. पुं. (सं.) भ्रमः, भ्रांतिः (स्त्री.) २. रूपांतरं, दशांतरम् ।

—वाद, सं. पुं. (सं.) वेदांतसिद्धांतविशेषः ।

विवश, वि. (सं.) अगतिक, निरुपाय २. परा-धीन ३. दुर्दांत ४. निर्बल ।

विवस्वान्, सं. पुं. (सं.-स्वत्) सूर्यः २. अरुणः, सूर्यसारथिः ।

विवाद, सं. पुं. (सं.) वाद,-अनुवादः-प्रति-वादः, वाग्-वाद,-युद्धं, तर्कवितर्कः २. कलहः, कलिः ३. मतभेदः ४. व्यवहारः, ऋणादि-न्यायः, दे. 'मुकदमेबाजी' ।

—करना, क्रि. अ., विवद् (भ्वा. आ. से.), विप्रतिपद् (दि. आ. अ.), विप्रलप् (भ्वा. प. से.) ।

विवादास्पद, वि. (सं.) विवाद-अर्ह-ग्रस्त-योग्य, सदिग्ध ।

विवाह, सं. पुं (सं.) पाणि,-ग्रहणं-करणं-पाडन, उपय(या)मः, परिणयः, उद्वाहः, दार,-परिग्रहः-कर्मन् ।

—करना, क्रि. स., उद्-वि वह् (भ्वा. उ. अ.), दारान् परिग्रह् (क्र. प. से.), परिणी (भ्वा. प. अ.) ।

—(में) देना, क्रि. स., विवाहे दा, पाणिं ग्रह् (प्र.), उद्वह् (प्रे.) ।

विवाहित, वि. पुं. (सं.) ऊढ, परिणीत, निविष्ट, कृतविवाह, उपयत, स्त्रीमत्, सपत्नीक ।

विवाहिता, सं. स्त्री. (सं.) पतिवती, सभर्तृका, ऊढा, परिणीता, उपयता ।

विविध, वि. (सं.) अनेक-नाना-बहु,-विध-प्रकार-रूप-जातीय ।

विवेक, सं. पुं. (सं.) परिच्छेदः, सदसज्ज्ञानं, मिथो व्यावृत्त्या वस्तुस्वरूपनिश्चयः, पृथग्भावः, पृथगात्मता, विवेचनं २. भद्राभद्र-सदसद्,-परिच्छेदशक्तिः (स्त्री.) ३. बुद्धिः-मतिः (स्त्री.) ४. सत्यज्ञानम् ।

विवेकी, वि. (सं.-किन्) परिच्छेदक, विवेचक, गुणदोषज्ञ, विशेषज्ञ, विवेकवत् २. बुद्धि-मति,-मत् ३. ज्ञानिन् ४. न्यायशील ५. आधि-करणिक ।

विवेचक, वि. (सं.) दे. 'विवेकी' ।

विवेचन, सं. पुं. (सं. न.) दे. 'विवेक' (१) । २. सम्यक्, परीक्षा-क्षणं, गुणदोषविचारणं, परि,-आलोचनं-ना ३. अनुसंधानं ४. तर्कवि-तर्कः ५. मीमांसा ।

विवेचना, सं. स्त्री. (सं.) दे. 'विवेचन' ।

विशद, वि. (सं.) निर्मल, विमल, स्वच्छ २. सु-वि-,स्पष्ट, व्यक्त, प्रकट, स्फुट ३. सित, उज्ज्वल, श्वेत ४. सुंदर ।

विशाखा, सं. स्त्री. (सं.) राधा, नक्षत्रविशेषः ।

विशारद, वि. (सं.) कुशल, दक्ष, प्रवीण २. विज्ञ, विशेषज्ञ, व्युत्पन्न, निष्णात ।

विशाल, वि. (सं.) विस्तृत, विस्तीर्ण, महत्, बृहत्, पृथु, उरु २. भव्य, सुंदर ३. विख्यात ।

विशालता, सं. स्त्री. (सं.) प्रथिमन्, विस्तारः, बृहत्ता, पृथुता ।

विशिख, सं. पुं. (सं.) बाणः, इषुः । वि. (सं.) शिखाहीन ।

विशिष्ट, वि. (सं.) युत, युक्त, अन्वित, सहित २. विशेष-, असामान्य ३. अद्भुत, विलक्षण ३. अतिशिष्ट ४. यशस्विन् ५. प्रसिद्ध ।

विशिष्टाद्वैतवाद, सं. पुं. (सं.) भेदाभेदवादः, द्वैताद्वैतवादः ।

विशीर्ण, वि. (सं.) शुष्क २. क्षीण ३. जीर्ण ।

विशुद्ध, वि. (सं.) दे. 'शुद्ध' २. सत्य ।

विशूचिका, सं. स्त्री., दे. 'विसूचिका' ।

विशेष, वि. (सं.) असाधारण (-णी स्त्री.), विशिष्ट, विलक्षण । सं. पुं. (सं.) सप्तपदार्थान्तर्गतपदार्थविशेषः (वैशेषिक) २. अंतरं, भेदः ३. अर्थालंकारभेदः (सा.) ।

विशेषज्ञ, वि. (सं.) प्रवीण, निपुण, विज्ञ, पारंगत, पारदर्शिन् ।

विशेषण, सं. पुं. (सं. न.) संज्ञादीनां विशेषतावोधकं पदं (व्या.) २. उपाधिः, गुणः, विशेष्यधर्मः ।

विशेषतः, अव्य. (सं.) विशेषेण, प्रधानतः ।

विशेषता, सं. स्त्री. (सं.) विशिष्टता, असाधारणता, विलक्षणता ।

विशेष्य, सं. पुं. (सं. न.) विशेषणान्वितं संज्ञादिपदं (व्या.) ।

विशोक, वि. (सं.) शोकहीन, प्रसन्न, मुदित, प्रहृष्ट ।

विश्रंभ, सं. पुं. (सं.) विश्वासः, प्रत्ययः २. अनुरागः, प्रेमन् (पुं. न.) ।

विश्रब्ध, वि. (सं.) विश्वसनीय, विश्वासार्ह २. शांत ३. निर्भय ।

विश्रांत, वि. (सं.) व्यपगतश्रम, क्लान्ति-श्रान्ति,-शून्य ।

विश्रांति, सं. स्त्री. (सं.) विश्रामः, दे. ।

विश्राम, सं. पुं. (सं.) विश्रामः, विश्रांतिः (स्त्री.), श्रमोपशमः, कार्य-व्यापार,-निवृत्तिः (स्त्री.) २. सुखं ३. शांतिः (स्त्री.) ।

—करना, क्रि. अ., विश्रम् (दि. प. से.), आ-वि-रम् (भ्वा. प. अ.), कार्यात् निवृत् (भ्वा. आ. से.) ।

विश्रुत, वि. (सं.) विख्यात, प्रसिद्ध, दे. ।

विश्लिष्ट, वि. (सं.) पृथग्भूत, भिन्न, विघटित २. विकसित ३. प्रकट ४. अपावृत ५. श्रांत ६. व्याकृत ।

विश्लेष, सं. पुं. (सं.) विघटनं, विच्छेदः, पृथग्भावः २. विरहः, वियोगः ।

विश्लेषण, सं. पुं. (सं. न.) व्यवच्छेदः, व्याकृतिः (स्त्री.), पृथक्करणम् ।

विश्वंभर, सं. पुं. (सं.) परमेश्वरः २. विष्णुः ।

विश्वंभरा, सं. स्त्री. (सं.) धरणी, पृथिवी दे. ।

विश्व, सं. पुं. (सं. न.) जगत् (न.), जगती (स्त्री.), त्रिभुवनं, ब्रह्मांडं २. भू-पृथिवी,-लोकः । वि. (सं.) सर्व, सकल, समस्त ।

—कर्ता, सं. पुं. (सं.-र्तृ) परमेश्वरः ।

—कर्मा, सं. पुं. (सं.-र्मन्) विश्वकृत्, देव,-वर्द्धकिः-शिल्पिन्, त्वष्टृ २. परमेश्वरः ३. ब्रह्मन् (पुं.) विधिः ४. सूर्यः ५. तक्षकः, वर्धकिः ६. लोहकारः ७. गृहकारकः, पलगंडः ।

—कोश(-ष), सं. पुं. (सं.) सर्वविषय-बृहत्,-कोषः ।

—जित्, सं. पुं. (सं.) यज्ञ-याग,-भेदः । वि. (सं.) जितविश्व, विश्वविजयिन् ।

—देव, सं. पुं. (सं.-वाः बहु) देवगणभेदः ।

—नाथ, सं. पुं. (सं.) शिवः २. साहित्यदर्पणकारः पंडितविशेषः ।

—पति, सं. पुं. (सं.) ईश्वरः ।

—बंधु, सं. पुं. (सं.) शिवः २. जगत्सख ।

—विद्यालय, सं. पुं. (सं.) दे. 'यूनिवर्सिटी' ।

—व्यापी, वि. (सं.-पिन्) विश्व-सर्व,-व्यापक (ईश्वरादि) ।

—साक्षी, सं. पुं. (सं.-क्षिन्) सर्वद्रष्टा जगदीश्वरः ।

विश्वसनीय, वि. (सं.) विश्वास्य, विश्वास,-योग्य-अर्ह, विश्रंभ,-पात्रं-भाजनं-आस्पदम् ।

विश्वस्त, वि. (सं.) दे. 'विश्वसनीय' ।

विश्वामित्र, सं. पुं. (सं.) गाधेयः, गाधिजः, कौशिकः (ब्रह्मर्षिविशेषः) ।

विश्वास, सं. पुं. (सं.) प्रत्ययः, विश्रंभः, २. श्रद्धा, दे. ।

—करना, क्रि. अ., विश्वस् (अ. प. से.), श्रद्धा (जु. उ. अ.), प्रति-इ (अ. प. अ.) ।

—दिलाना, क्रि. स., उपर्युक्त धातुओं के प्रे. रूप ।

—घात, सं. पुं. (सं.) विश्रंभभंगः, प्रत्ययभञ्जनं, समय,-लंघनं-भंगः ।

—घातक, वि. (सं.) विश्रंभभञ्जक, विश्वास-घातिन् ।

—पात्र, तं. पुं. (सं. न.) विश्वास्यः, विश्वसनीयः ।

विश्वेश्वर, सं. पुं. (सं.) परमेश्वरः २. शिवमूर्तिविशेषः ।

विष, सं. पुं. (सं. पुं. न.) गरलं, जं(जां)गुलं, क्ष्वेडः, कालकूटं, ह(हा)लाहलं, गरं, गरदं, घोरं, तीक्ष्णम् ।

—कन्या, सं. स्त्री. (सं.) मैथुनमात्रेण संभोक्तृहंत्री कुमारी नारी वा ।

—धर, सं. पुं. (सं.) सर्पः ।

—हर, वि. (सं.) विष,-नाशक-घातिन् ।

—की गांठ, मु., अपकारक, हानिप्रद ।

—देना, मु., विषेण मृ-हन् (प्रे.) ।

विषम, वि. (सं.) असम, नतोन्नत, पिंडलावृत, २. अयुग्म, दे. 'ताक' ३. विकट, कठिन, दुस्साध्य ४. अति,-तीव्र-तीक्ष्ण ५. भीषण, घोर ।

—ज्वर, सं. पुं. (सं.) ज्वरभेदः २. दे. 'मलेरिया' ।

—नयन, सं. पुं. (सं.) विषमनेत्रः, शिवः ।

—बाण, सं. पुं. (सं.) कंदर्पः, कामः ।

—वृत्त, सं. पुं. (सं. न.) असमचरणं वृत्तं (छंद.) ।

विषमता, सं. स्त्री. (सं.) वैषम्यं, समताऽभावः २. अयुग्मता ३. वैरं, विरोधः ।

विषय, सं. पुं. (सं.) गोचरः, इन्द्रियार्थः (=शब्दस्पर्शरूपरसगंधाः) २. देशः, जनपदः ३. प्रकरणं, प्रसंगः ४. उपभोगः, आस्वादः-दनं ५. सुरतं, मैथुनं ६. द्रव्यं, पदार्थः ७. कार्यं, व्यापारः, अर्थः ।

—सुख, सं. पुं. (सं. न.) इंद्रियसौख्यम् ।

—विषयक, वि. (सं)-संबंधिन्, उद्दिश्य, अधिकृत्य, आश्रित्य ।

विषयी, वि. (सं.-यिन्) भोग-विषय,-आसक्त, लंपट,विषय-निरत-पर-परायण-अधीन,कामिन्, विलासिन्, रतहिण्डकः, टांकरः, औपस्थिकः ।

विषाण, सं. पुं. (सं. न.) शृंगं, दे. 'सींग' २. गजदंतः ३. कोलदंतः ।

विषाद, सं. पुं. (सं.) अवसादः, दुःखं, शोकः, परि-सं,-तापः, आधिः (पुं.), आर्तिः (स्त्री.) २. जाड्यं ३. मौर्ख्यम् ।

विषुव, सं. पुं. (सं. न.) विषुवत् (न.), विषुपं, विषुणः, समरात्रिंदिवकालः [= सौर चैत्र मास की नवीं (२१ मार्च) तथा सौर आश्विन मास की नवीं (२२ सितंबर)] ।

—रेखा, सं. स्त्री. (सं.) निरक्षः, भूकक्षा, भूमध्यरेखा, विषुवद्रेखा ।

जल—, सं. पुं. (सं. न.) विषुपदं (२२ सितंबर) ।

महा—, सं. पुं. (सं. न.) हरिपदं (२१ मार्च) ।

विषूचिका, सं. स्त्री., दे. 'हैजा' ।

विष्ठा, सं. स्त्री. (सं.) उच्चारः, गूथः-थं, मलः-लं, पुरीषं, शमलं, शकृत् (न.), विष् (स्त्री.) ।

विष्णु, सं. पुं. (सं.) चक्रिन्, चतुर्भुजः, चक्रपाणिः, जनार्दनः, त्रिविक्रमः, हरिः, हृषीकेशः, श्री,-पतिः-निवासः-वत्सः-करः-धरः, वैकुंठः, माधवः, मधुसूदनः, पुरुषोत्तमः, पीतांबरः, दामोदरः, पद्मनाभः, नारायणः, केशवः; कृष्णः, गोपालः इ. । २. अग्निः ३. आदित्यविशेषः ।

—गुप्त, सं. पुं. (सं.) वैयाकरणविशेषः २. चाणक्यः ।

—पद, सं. पुं. (सं. न.) आकाशः-शं २. पद्मं ३. क्षीरोदः ।

—पदी, सं. स्त्री. (सं.) गंगा ।

—पुराण, सं. पुं. (सं. न.) पुराणग्रंथविशेषः ।

विसर्ग, सं. पुं. (सं.) विसर्जनीयः, वर्णविशेषः (= व्या.) २. दानं ३. त्यागः ४. मुक्तिः (स्त्री.), निःश्रेयसं ५. मृत्युः ६. प्रलयः ७. विरहः ।

विसर्जन, सं. पुं. (सं. न.) परि-,त्यागः, उत्सर्गः, मोचनं, उज्झनं २. सं-,प्रेषणं, प्रस्थापनं ३. प्रस्थानं, प्रयाणं ४. समाप्तिः (स्त्री.), अंतः ५. दानं, वितरणम् ।

विसाल, सं. पुं. (अ.) संयोगः, संगमः ।

विसूचिका, सं. स्त्री. (सं.) विसूची, दे. 'हैज़ा' २. अजीर्णरोगभेदः ।

विस्तर, सं. पुं. (सं.) विस्तारः, दे. २. आसनं, पीठम् ।

विस्तार, सं. पुं. (सं.) विस्तरः, प्रस(सा)रः,

आयामः, वितति: (स्त्री.), विग्रहः, व्यासः, विस्तीर्णता २. विटपः, शाखा ।

—करना, क्रि. स., प्रस्-विस्तृ (प्रे.), दे. 'फैलाना' ।

विस्तीर्ण, वि. (सं.) विस्तृत, प्रसृत, वितत, आयत २. विपुल, प्रचुर ३. विशाल, महत्, बृहत् ।

विस्तृत, वि. (सं.) दे. 'विस्तीर्ण' ।

विस्फोट, सं. पुं. (सं.) सशब्द,-भंगः-स्फुटनं-स्फोटनं २. पि(वि)टकः-कं-का, स्फोटः-टकः ।

विस्फोटक, सं. पुं. (सं.) दे. 'विस्फोट' (२) । २. स्फोटनशील ३. दे. 'चेचक' ।

विस्मय, सं. पुं. (सं.) आश्चर्यं, चमत्कारः २. गर्वः ३. संदेहः । वि. (सं.) हृतदर्प ।

विस्मरण, सं. पुं. (सं. न.) विस्मृतिः (स्त्री.), स्मृति,-नाशः लोपः ।

विस्मित, वि. (सं.) विस्मय-आश्चर्य,-आपन्न-अन्वित, चकित, विस्मयाकुल ।

विस्मृत, वि. (सं.) स्मृतिभ्रष्ट, स्मृतिपथात् अपेत ।

विस्मृति, सं. स्त्री. (सं.) विस्मरणं, दे. ।

विस्रंभ, सं. पुं. (सं.) विश्वासः, प्रत्ययः २. हत्या, वधः ।

विहंग, विहंगम, विहग, सं. पुं. (सं.) खगः, दे. 'पक्षी' ।

विहरण, सं. पुं. (सं. न.) विचरणं, अटनं, भ्रमणं २. वियोगः ३. प्रसरणम् ।

विहार, सं. पुं. (सं.) परिक्रमः-मणं, पर्यटनं, परिभ्रमणं, विहरणं, विचरणं २. सुरतं, संभोगः ३. सुरतालयः ४. संघारामः, आश्रमः, मठः, दे. ।

विहारी, सं. पुं. (सं.-रिन्) भोगासक्तः २. विहारकृत् ३. श्रीकृष्णः ।

विहित, वि. (सं.) (शास्त्रादिभिः) आदिष्ट, शिष्ट, उपदिष्ट २. न्याय्य, धर्म्य, उचित ३. कृत, अनुष्ठित ४. दत्त ।

विहीन, वि. (सं.) परि-, त्यक्त, उज्झित २. रहित, वंचित, हीन, वर्जित, शून्य ।

विह्वल, वि. (सं.) विक्लव, व्याकुल, दे. ।

विह्वलता, सं. स्त्री. (सं.) व्याकुलता, दे. ।

वीची, सं. स्त्री. (सं.) लहरी, तरंगः, दे. ।

वीज, सं. पुं. (सं. न.) बीजं, दे. ।

वीजन, सं. पुं. (सं. न.) व्यजनं, दे. 'पंखा' ।

वीणा, सं. स्त्री. (सं.) वल्लकी, विपंची-चिका, ध्वनिमाला, वंगमल्ली, परिवादिनी, घोषवती, कंठकूणिका २. विद्युत् (स्त्री.) ।

—दंड, सं. पुं. (सं.) प्रवालः ।

—पाणि, सं. स्त्री. (सं.) सरस्वती ।

वीत, वि. (सं.) प्रस्थित, प्रयात २. परित्यक्त ३. मुक्त ४. समाप्त ५. रहित, हीन ।

—भय, वि. (सं.) विगत-निर्, भय ।

—राग, वि. (सं.) विरक्त, निस्स्पृह ।

—शोक, वि. (सं.) निश्शोक । सं. पुं. (सं.) अशोकवृक्षः ।

वीथी, सं. स्त्री. (सं.) वीथिः (स्त्री.), वीथिका, रथ्या, मार्गः २. पंक्तिः (स्त्री.) ३. रूपकभेदः (सा.) ।

वीर, सं. पुं. (सं.) शूरः, शौटीरः, सुविक्रमः, प्र-महा-सु,-वीरः, जेतृ २. योधः, योद्धृ, भटः, सैनिकः ३. नायकः, अग्रणीः (पुं.) ४. पुत्रः ५. पतिः ६. भ्रातृ । वि. (सं.) विक्रांत, वीर्यवत्, साहसिक, पराक्रमिन् ।

—केसरी, सं. पुं. (सं.-रिन्) वीर,-पुंगवः-उत्तमः ।

—गति, सं. स्त्री. (सं.) युद्धे मरणात् स्वर्ग-लाभः २. स्वर्गः ।

—पत्नी, सं. स्त्री. (सं.) वीरभार्या ।

—प्रसू, सं. स्त्री. (सं.) वीर,-सूः-मातृ (स्त्री.)-जननी ।

—भद्र, सं. पुं. (सं.) अश्वमेधाश्वः २. वीरोत्तमः ३. शिवगणविशेषः ।

—लोक, सं. पुं. (सं.) स्वर्गः ।

वीरता, सं. स्त्री. (सं.) वीर्यं, शूरता, शौर्यं, परा-वि,-क्रमः, साहसं, रणोत्साहः, ओजस्-धामन् (न.) ।

वीरान, वि. (फ़ा.) निर्मानुष, निर्-वि,-जन २. निश्श्रीक, शोभाहीन ।

वीराना, सं. पुं. (फ़ा.) विजनं, निर्जनप्रदेशः ।

वीरानी, सं. स्त्री. (फ़ा.) विजनता, निर्जनता ।

वीर्य, सं. पुं. (सं. न.) शुक्रं, रेतस्-तेजस् (न.) बीजं, चरमधातुः, इन्द्रियं २. दे. 'रज' ३. वीरता, दे. ४. बीजम् ।

—के कीड़े, सं. पुं., शुक्रकीटाः।
वीर्यवान्, वि. (सं.-वत्) बलवत्, दृढांग २. मांसल।
वृंत, सं. पुं. (सं. न.) चूचुकः-कं, स्तन-कुच,-अग्रं २. प्रसवबंधनं, दे. 'बौंडी'।
वृंद, सं. पुं. (सं. न.) समूहः, निकरः २. कोटि-शतकं, अर्बुदम्।
वृंदा, सं. स्त्री. (सं.) तुलसी (पौदा) दे. २. राधा।
—**वन**, सं. पुं. (सं.) वृंदारण्यं २. तीर्थविशेषः।
वृक, सं. पुं. (सं.) कोकः, ईहामृगः २. शृगालः।
वृक्ष, सं. पुं. (सं.) तरुः, पादपः, शाखिन्, विटपिन्, द्रुः, द्रुमः, पलाशिन्, मही-क्षिति-भू,-रुहः-जः, अगः, नगः, विटपः।
वृत्त, सं. पुं. (सं. न.) चरितं, चरित्रं, आचारः, आचरणं २. सद्,-वृत्तं-आचारः ३. समाचारः, वृत्तान्तः, उदंतः ४. वर्णिकछंदस् (न.) ५. मंडलं, वर्तुलम्।
—**खंड**, सं. पुं. (सं. पुं. न.) मंडल-वर्तुल,-अंशः।
वृत्ति, सं. स्त्री. (सं.) आजीवः-वनं विका, जीवनं, जीविका २. उपजीविका, भृतिः (स्त्री.) ३. संक्षिप्तगंभीरव्याख्या, सूत्रार्थविवरणं, टीका ४. वृत्तं, वृत्तांतः ५. नाटकीयशैली (सा. कौशिकी इ.) ६. व्यवहारः ७. चित्तावस्था (योग., क्षिप्तमूढादि) ७. स्वभावः, प्रकृतिः (स्त्री.)।
छात्र—, सं. स्त्री. (सं.) शिक्षणोपजीविका।
मनो—, सं. स्त्री. (सं.) स्वभावः, प्रकृतिः (स्त्री.), प्रवणता।
वृथा, वि. (सं.) व्यर्थ, निरर्थक, मोघ। क्रि. वि. (सं.) मुधा, व्यर्थं, निष्फलम्।
वृद्ध, वि. (सं.) स्थविर, वयस्क, जीन, जीर्ण, जरित-न। सं. पुं. (सं.) जरठः, स्थविरः इ., दे. 'बूढ़ा' २. पंडितः।
वृद्धता, सं. स्त्री. (सं.) जरा, वार्द्धकं,-क्यं, दे. 'बुढ़ापा'।
वृद्धा, सं. स्त्री. (सं.) स्थविरा, जरती, दे. 'बुढ़िया'।
वृद्धावस्था, सं. स्त्री. (सं.) दे. 'वृद्धता'।
वृद्धि, सं. स्त्री. (सं.) वर्धनं, वृंहणं, उन्नतिः (स्त्री.), उत्कर्षः, उपचयः, आधिक्यं, विस्तारः २. कुसीदं, वार्द्धुषं-ष्यं, दे. 'सूद' ३. अभ्युदयः, समृद्धिः (स्त्री.) ४. कृष्याद्यष्टवर्गोपचयः (राजनीति.), स्फीतिः-स्फातिः (स्त्री.) ५. जीवभद्रा (औषधविशेषः)।
—**जीवक**, सं. पुं. (सं.) कुसीदिन्, वार्द्धुषिकः।
—**जीवन**, सं. पुं. (सं. न.) कौसीद्यं, वृद्धि-जीविका।
वृश्चिक, सं. पुं. (सं.) वृश्चनः, पृदाकुः, दे. 'बिच्छू' २. अष्टमराशिः (ज्यो.) ३. अग्रहायणभासः।
वृष, सं. पुं. (सं.) ऋषभः, वृषभः, दे. 'बैल' २. पुरुषप्रकारः (कामशास्त्र) ३. धर्मः ४. द्वितीयराशिः (ज्यो.) ५. पतिः।
वृषभ, सं. पुं. (सं.) बलीवर्दः, उक्षन्, दे. 'बैल'।
वृष्टि, सं. स्त्री. (सं.) वर्ष, वर्षणं, परामृतं, दे. 'वर्षा'।
वृहस्पति, सं. पुं. (सं.) सुराचार्यः, दे. 'बृहस्पति' २. नवग्रहांतर्गतपंचमग्रहः ३. गुरुवारः।
वे, सर्व. (हिं. वह का बहु.) ते, अमी (दोनों पुं. बहु.) ताः, अमूः (दोनों स्त्री. बहु.); तानि, अमूनि (दोनों न. बहु.)।
वेग, सं. पुं. (सं.) प्रवाहः, धारा, वेणी, ओघः २. जवः, स्यदः, रयः, तरस्-रंहस् (न.), रभसः, प्रसभः ३. मूत्रविष्ठादिनिर्गमप्रवृत्तिः (स्त्री.) ४. त्वरा, शीघ्रता ५. आनंदः ६. प्रवृत्तिः (स्त्री.) ७. उद्योगः ८. वृद्धिः (स्त्री.) ९. वीर्यं, शुक्रं १०. गुणभेदः (न्याय.)।
वेगवान्, वि. (सं.-वत्) क्षिप्र, द्रुत, शीघ्र, जवन, आशु।
वेणी, सं. स्त्री. (सं.) वेणिः (स्त्री.), प्रवेणी-णिः, वेणिका २. जलौघः, तोयप्रवाहः।
वेणु, सं. पुं. (सं.) वंशः, दे. 'बांस' २. वंशी, दे. 'बाँसुरी'।
वेतन, सं. पुं. (सं. न.) भरणं-ण्यं, निर्वेशः, भृतिः (स्त्री.), भृत्या, भर्मण्या, कर्मण्या २. मासिकं, मासिकभृतिः (स्त्री.)।
—**भोगी**, सं. पुं. (सं.-गिन्) वेतन-भृति,-भुज्, वैतनिकः।
वेताल, सं. पुं. (सं. पुं.) द्वारपालः २. भूत-भेदः ३. भूताधिष्ठितशवः।

वेत्ता, सं. पुं. (सं.-तृ) ज्ञातृ, बोद्धृ, विद् ।

वेद, सं. पुं. (सं.) श्रुतिः (स्त्री.), छंदस् (न.), आम्नायः, निगमः, ब्रह्मन् (न.), प्रवचनं, आर्यधर्मग्रन्थविशेषाः (ऋग्, यजुः, साम, अथर्व=४ वेद) २. सत्यज्ञानम् ।

—त्रयी, सं. स्त्री. (सं.) वेदत्रयम् ।

—निंदक, सं. पुं. (सं.) श्रुतिविरोधिन्, नास्तिकः २. बुद्धः ३. बौद्धः ।

—पारग, सं. पुं. (सं.) वेद,-ज्ञः-विद्-मूर्तिः-वेत्तृ-ज्ञानिन्-दर्शिन् ।

—मंत्र, सं. पुं. (सं.) श्रुति,-वचनं-वाक्यम् ।

—माता, सं. स्त्री. (सं.-तृ) गायत्री, सावित्री २. सरस्वती ३. दुर्गा ।

—वाक्य, सं. पुं. (सं. न.) वेद,-मंत्रः-वचनं २. प्रामाणिकवचनम् ।

—विद्, सं. पुं. (सं.) दे. 'वेदपारग' ।

—विहित, वि. (सं.) वेद,-प्रतिपादित-आदिष्ट-उक्त ।

—व्यास, सं. पुं. (सं.) दे. 'व्यास' ।

वेदना, सं. स्त्री. (सं.) पीडा, व्यथा, यातना, संतापः २. वेदनं, अनुभवः, संवेदः, ज्ञानम् ।

वेदांग, सं. पुं. (सं. न.) श्रुत्यवयवषट्प्रकार-शास्त्रं [= शिक्षा, कल्पः, व्याकरणं, निरुक्तं, ज्योतिषं, छंदस् (न.)] ।

वेदांत, सं. पुं. (सं.) ब्रह्म-अध्यात्म,-विद्या, ज्ञानकांडं २. उपनिषद् (स्त्री.) ३. उत्तरमीमांसा, दर्शनशास्त्रविशेषः ।

वेदांती, सं. पुं. (सं.-तिन्) वेदांतशास्त्रवेत्तृ, ब्रह्मवादिन् ।

वेदाभ्यास, सं. पुं. (सं.) वेद,-अध्ययन-स्वाध्यायः-पाठः ।

वेदी,[१] सं. स्त्री. (सं.) वेदिः, वेदिका, वितर्दी-र्दिका (सब स्त्री.) ।

वेदी,[२] सं. पुं. (सं.-दिन्) पंडितः २. ज्ञातृ ।

वेदोक्त, वि. (सं.) वेदविहित, दे. ।

वेध, सं. पुं. (सं.) वेधनं, निर्भेदः-दनं, व्यधः । यंत्रैर्ग्रहनक्षत्रावलोकनम् ।

—शाला, सं. स्त्री. (सं.) मानमंदिरम् ।

वेधक, सं. पुं. (सं.) वेधनकरः, छिद्रकारः, वेधिन् ।

वेधना, क्रि. स. (सं. वेधनं) व्यध् (दि. प. अ.), विध्-समुत्कृ (तु. प. से.), छिद्रयति (ना. धा.) । सं. पुं., वेधः-धनं, व्यधः-धनं, समुत्किरणं (दे. वेधक, विद्ध द.) ।

शील, सं. पुं. (सं. न.) चरित्रं, आचरणं, वृत्तिः (स्त्री.) ३. स्वभावः, प्रकृतिः (स्त्री.) ४. सदाचारः, सच्चरित्रम् ५. सत्-स्वभावः-प्रकृतिः (स्त्री.) ६. हृदयमार्दवं ७. संकोचः, आदरः वि.,-पर,-परायण (उ. दानशील)।

शीलवान, वि. (सं.-वत्) सदाचारिन्, सद्वृत्त २. सत्स्वभाव, कोमलप्रकृति, सुशील।

शीशम, सं. स्त्री. (फ़ा.) शिंशपा, पिच्छि-(च्छ)ला, पिंगला, कपिला, भस्मगर्भा।

शीशमहल, सं. पुं. (फ़ा.शीशा+अ. महल) काच-स्फटिक, भवनं २. काचकोष्ठः, आदर्शावासः।

—का कुत्ता, मु., उन्मत्तः, वातुलः।

शीशा, सं. पुं. (फ़ा.) काचः, दे. २. आदर्शः, मुकुरः, दर्पणः, दे. ३. काचफलकः-कम्।

शीशी, सं. स्त्री. (फ़ा. शीशा) काचकूपी।

—सुँघाना, औषधगंधेन मूर्च्छां (प्रे.)।

शुंठी, सं. स्त्री. (सं.) कटुग्रंथिः, दे. 'सोंठ'।

शुक, सं. पुं. (सं.) कीरः, वक्रतुंडः, दे. 'तोता' २. महर्षि-व्यासपुत्रः।

शुक्ति, सं. स्त्री. (सं.) मुक्तामातृ (स्त्री.), दे. 'सीपी'।

—बीज, सं. पुं. (सं. न.) मौक्तिकं, शुक्तामणिः।

शुक्र, सं. पुं. (सं.) सितः, श्वेतः, काव्यः, कविः, भार्गवः, दैत्यगुरुः २. अग्निः ३. ज्येष्ठमासः ४. शुक्रवासरः। (सं. न.) बीजं, वीर्यं-रेतस् (न.) २. बलं, सामर्थ्यम्। वि. (सं.) भासुर, देदीप्यमान २. स्वच्छ, उज्ज्वल।

शुक्र,[२] सं. पुं. (अ.) धन्यवादः, कृतज्ञता-प्रकाशः।

—गुज़ार, वि. (अ.+फ़ा.) कृतज्ञ, दे.।

—गुज़ारी, सं. स्त्री. (अ.+फ़ा.) कृतज्ञता।

शुक्ल, वि. (सं.) धवल, सित, श्वेत, दे. 'सफ़ेद'।

—पक्ष, सं. पुं. (सं.) शुक्लकः, दे. 'पक्ष' में।

शुक्लता, सं. स्त्री. (सं.) धवलता, दे. 'सफ़ेदी'।

शुचि, वि. (सं.) वि-शुद्ध, पवित्र, पूत २. उज्ज्वल, निर्मल ३. निर्दोष, निष्पाप ४. शुद्ध मानस।

शुतुरमुर्ग़, सं. पुं. (फ़ा.) * उष्ट्रकुक्कुटः।

शुदनी, सं. स्त्री. (फ़ा.) नियतिः (स्त्री.), भवितव्यता।

शुद्ध, वि. (सं.) केवल, स्वच्छ, मिश्रणशून्य २. उज्ज्वल, श्वेत ३. त्रुटिरहित, यथातथ, यथार्थ ४. निर्दोष ५. पूत, पवित्र, पावन, मेध्य।

—करना, क्रि. स., परि-,पू (क्र. उ. से.), शुचीकृ। परि-वि-सं-, शुध् (प्रे.), निर्मलीकृ २. प्रतिसमा-समा-धा (जु. उ. अ.), त्रुटिरहितं विधा (जु. उ. अ.)।

शुद्धता, सं. स्त्री. (सं.) शुचिता, शौचं, पवित्रता, पूतता, वि,-शुद्धिः (स्त्री.) २. निर्दोषता, यथार्थता।

शुद्धि, सं. स्त्री. (सं.) दे. 'शुद्धता' (१)। २. स्वच्छता, नैर्मल्यं ३. वैदिकधर्मप्रवेशसंस्कारः।

—पत्र, सं. पुं. (सं. न.) त्रुटिदर्शकपत्रम्।

शुबहा, सं. पुं. (अ.) संदेहः २. भ्रमः।

शुभ, वि. (सं.) मंगल, हित, कल्याण २. उत्तम, भद्र। सं. पुं. (सं.न.) मंगलं, हितं, कल्याणम्।

—कर्म, सं. पुं. (सं.-र्मन् न.) सुकृत्यं, पुण्यम्।

—चिंतक, वि. (वि.) हितैषिन्, हितचिंतक।

—दर्शन, वि. (वि.) प्रिय-सु,-दर्शन, सुन्दर।

—फल, सं. पुं. (सं. न.) सुपरिणामः ।
—घड़ी, सं. स्त्री., मांगलिकमुहूर्तः तम् ।
शुभ्र, वि. (सं.) श्वेत, शुक्ल, भासुर ।
शुभ्रता, सं. स्त्री. (सं.) शुक्लता, भासुरता ।
शुमार, सं. पुं. (फ़ा.) 'गणनं', संकलनम् ।
शुमाल, सं. पुं. (अ.) उदीची, दे. 'उत्तर' (दिशा) ।
शुरू, सं. पुं. (अ.) उपक्रमः, आरंभः दे. २. प्रभवः, आदिः ।
शुल्क, सं. पुं. (सं. पुं. न.) घट्टपथादीनां करः २. वरात् ग्राह्योऽर्थः ३. युतकं, दे. 'दहेज़' ४. पणः, ग्रहः ५. मूल्यं ६. भाटं, भाटकं ७. प्रतिफलं, वेतनम् ।
शुश्रूषा, सं. स्त्री. (सं.) परिचर्या, सेवा दे. २. श्रवणेच्छा ।
शुष्क, वि. (सं.) निर्जल, आर्द्रतारहित, वान २. वि-नी-अ,-रस, निःस्वाद ३. खेदकर, अरुचिकर ४. मोघ, निरर्थक ५. रूक्ष, स्नेहहीन ६. जीर्ण, शीर्ण ।
शुष्कता, सं. स्त्री. (सं.) शोषः, शुष्कता २. नीरसता ३. अरोचकता ४. रूक्षता ५. जीर्णता ।
शूकर, सं. पुं. (सं.) वराहः, दे. 'सूअर' ।
शूद्र, सं. पुं. (सं.) वृषलः, दासः, पादजः, पद्यः, पज्जः, जघन्यः, द्विजसेवकः, उपासकः, चतुर्थः २. निकृष्टः ३. सेवकः ।
शूद्रक, सं. पुं. (सं.) मृच्छकटिकरचयिता महाकविः २. शूद्रः ३. शंबुकः, तपस्विशूद्रविशेषः (रामायण) ।
शूद्रा, सं. स्त्री. (सं.) शूद्रजातेः स्त्री ।
शूद्री, सं. स्त्री. (सं.) शूद्रस्य पत्नी ।
शून्य, वि. (सं.) रिक्त, वशिक, शून्य-रिक्त,-गर्भ-मध्य २. निराकार ३. असत् ४. रहित । सं. पुं. (सं. न.) आकाशः-शं दे. २. विंदुः, खं ३. रिक्त-एकांत-निर्जन,-स्थानं ४. अभावः ।
शून्यता, सं. स्त्री. (स.) शून्यत्वं, रिक्तता ।
शूप, सं. पुं. (सं. शूर्पः-र्पं) सूर्पः, कुल्यः, प्रस्फोटनं-नी, दे. 'छाज' ।
शूर, सं. पुं. (सं.) दे. 'वीर' ।
शूरण, सं. पुं. (सं.) दे. 'सूरन' ।
शूरता, सं. स्त्री. (सं.) दे. 'वीरता' ।
शूर्प, सं. पुं. (सं. पुं. न.) दे. 'शूप' ।
—कर्ण, सं. पुं. (सं.) गजः २. गणेशः ।
—णखा, सं. स्त्री. (सं.) रावणभगिनी ।
शूल, सं. पुं. (सं. पुं. न.) उदरवेदना, जठर-व्यथा, वातरोगभेदः २. पीडा, क्लेशः व्यथा ३. कुंतः, प्रासः ४. त्रिशूलं, त्रिशीर्षकं ५. ध्वजः ६. मृत्युः ७. अयःकीलः ८. शलाका ९. दे. 'सूली' ।
—धारी, सं. पुं. (सं.-रिन्) शूल,-धर-ग्राहिन्-पाणिः, शिवः ।
शूली, सं. पुं. (सं.-लिन्) शिवः, शूलपाणिः २. शशकः ३. शूलार्त्तः । सं. स्त्री., दे. 'सूली' ।
शृंखला, सं. स्त्री. (सं.) शृंखलः-लं, निगडः, बंधः, बंधनं २. क्रमः, परंपरा ३. श्रेणी, पंक्तिः (स्त्री.) ४. मेखला, पुंस्कटिवस्त्रबन्धः ५. कांची, रश(स)ना ।
—बद्ध, वि. (सं.) शृङ्खलित, निगडित २. क्रम-श्रेणी, बद्ध ।
शृंग, सं. पुं. (सं. न.) विषाणं, दे. 'सींग' २. सानुः, कूटः-टं, शिखरं, शैलाग्रं ३. वाद्य-भेदः ४. कामोत्तेजना ५. क्रीडाजलयंत्रं (पिचकारी, दे. रघुवंश १६।७०) ६. दे. 'कंगूरा' ।
शृंगार, सं. पुं. (सं.) रसविशेषः (सा.) २. मैथुनस्पृहा ३. मंडनं, भूषणं, प्रसाधनं, अलंकरणं, परिष्करणं ४. संभोगः, मैथुनं ५. मंडन-प्रसाधन,-साधन-द्रव्य (चंदनादि) दे. 'षोडश संस्कार' ।
—करना, क्रि. स., अलंकृ, परिष्कृ, प्रसाध् (प्रे.), भूष्-मंड् (चु.) ।
—योनि, सं. पुं. (सं.) मदनः, कंदर्पः ।
शृंगी, सं. पुं. (सं.-गिन्) गजः २. वृक्षः ३. पर्वतः ४. ऋषिविशेषः ५. शृङ्गवत् पशुः ६. वाद्यभेदः ७. महादेवः ।
शृगाल, सं. पुं. (सं.) गोमायुः, क्रोष्टुः, जंबु-(वू)कः, दे. 'गीदड़' । वि., भीरु २. खल ३. निष्ठुर ।
शेख, सं. पुं. (अ.) श्रीमोहंमदवंशजानामुपाधिः २. यवनवर्गविशेषः ३. यवनोपदेशकः ४. वृद्धः ।
—चिल्ली, सं. पुं. (अ.+हिं.) मंदः, जडः २. भंडः, विदूषकः ।

शेखर, सं. पुं. (सं.) शिरोमाल्यं, शीर्षमाला २. शिरोभूषणमात्रं ३. शीर्षं ४. किरीटः, मौलिः ५. पर्वताग्रं, सानुः ।

शेखी, सं. स्त्री. (अ. शेख़ः) दर्पः, गर्वः २. विकत्थनं, गर्वोक्तिः (स्त्री.) ।

—बाज़, वि. (हिं.+फ़ा.) विकत्थक, आत्मश्लाघिन् २. दृप्त ।

—झड़ना या **निकलना,** मु., गर्वः खंड् (कर्म.), मदः व्यपगम् (भ्वा. प. अ.) लघूभू ।

—बघारना,-मारना या-**हाँकना,** मु., विकत्थ् (भ्वा. आ. से.), आत्मानं श्लाघ् (भ्वा. आ. मे.) ।

शेर[1], सं. पुं. (फ़ा.) द्वीपिन्, भेलः, मृगांतकः, शार्दूलः, व्याघ्रः. दे. २. केसरी, सिंहः दे. ३. वीरः, शूरः ।

—पंजा, सं. पुं. (फ़ा.+हिं.) दे. 'बघनखा' ।

—बच्चा, सं. पुं. (फ़ा.+हिं.) सिंह-व्याघ्र,-पोतः-शावकः २. वीरः, शूरः ।

—बबर, सं. पुं. (फ़ा.) दे. 'शेर' (२) ।

—मर्द, वि. (फ़ा.) वीर, निर्भय ।

—होना, मु., भयं मुच् (तु. प. अ.), निर्भय (वि.) भू ।

शेर[2], सं. पुं. (अ.) कवितायाश्चरणद्वयं (उर्दू, फ़ारसी आदि) ।

शेरनी, सं. स्त्री. (फ़ा. शेर) व्याघ्री, द्वीपिनी २. सिंही, केसरिणी इ. ।

शेरवानी, सं. स्त्री. (देश.) *आजानुलंबी कञ्चुकभेदः ।

शेष, सं. पुं. (सं.) अनंतः, सर्पराजः, शेषनागः, फणींद्रः, फणीश्वरः २. परमेश्वरः ३. लक्ष्मणः ४. बलरामः ५. अंतरम् (गणित) ६. अन्तः ७. परिणामः ८. गजः ९. मृत्युः १०. नाशः । (सं. पुं. न.) अव-परि,-शेषः, उद्वर्तः, अवशिष्ट-उपयुक्तेतर,-वस्तु (न.) २. अध्याहार्य-शब्दः । वि., अवशिष्ट २. समाप्त ३. इतर, अपर, अन्य ।

—नाग, सं. पुं. (सं.) दे. 'शेष' सं. पुं. (१) ।

—शायी, सं. पुं. (सं.-शायिन्) विष्णुः ।

शेषांश, सं. पुं. (सं.) १-२. अवशिष्ट-अंतिम,-भागः ।

शैतान, सं. पुं. (अ.) ईश्वरविरोधी देवविशेषः (सामी धर्म) २. भूतः, प्रेतः ३. क्रूरः ४. दुष्टः, खलः ५. कामः, मदनः ६. क्रोधः ।

शैतानी, सं. स्त्री. (अ. शैतान) दुष्टता, कुचेष्टा ।

शैत्य, सं. पुं. (सं. न.) शीतता, शीतलत्वम् ।

शैथिल्य, सं. पुं. (सं. न.) शिथिलता, दे. ।

शैल, सं. पुं. (सं.) गिरिः, अद्रिः, पर्वतः, दे. । २. गंडशैलः, दे. 'चट्टान' ३ दे. 'शिलाजीत' ।

—कुमारी, सं. स्त्री. (सं.) अद्रितनया, शैल,-कन्या-जा, दे. 'पार्वती' ।

शैली, सं. स्त्री. (सं.) भाषण-लेखन,-रीतिः-सरणिः (दोनों स्त्री.)-प्रकारः २. प्रथा, रीतिः ३. परिपाटिः (स्त्री.), प्रणाली ४. चर्या, वर्तनं, वृत्तिः (स्त्री.) ।

शैलेंद्र, सं. पुं. (सं.) हिमगिरिः, हिमालयः ।

शैव, सं. पुं. (सं.) शिव,-भक्तः-उपासकः-अनुयायिन् २. संप्रदायविशेषः । वि. (सं.) शिव-संबन्धिन् ।

शैव्या, सं. स्त्री. (सं.) सत्यहरिश्चन्द्रपत्नी ।

शैशव, सं. पुं. (सं. न.) शिशुता-त्वं, बाल्यम् । वि. (सं.) बाल-बाल्य,-संबंधिन् ।

शोक, सं. पुं. (सं.) आर्तिः (स्त्री.) आधिः, दुःखं, परितापः, खेदः, शुच् (स्त्री.), शुचा, मन्युः, निस्समः, शोचनम् ।

शोकार्त, वि. (सं.) शोकिन्, शोक,-आकुल-आतुर-ग्रस्त-उपहत-विह्वल, सशोक, परितप्त ।

शोख, वि. (फ़ा.) धृष्ट, वियात २. चंचल, चपल ३. गाढ, भासुर (रंग) ४. दुर्ललित, कुचेष्टक ।

शोख़ी, सं. स्त्री. (फ़ा.) धार्ष्ट्यं, वैयात्यं २. चाञ्चल्यं ३. गाढ़ता, प्रखरता ।

शोच, सं. पुं. (सं. शोचनं) शोकः २. चिंता ।

शोचनीय, वि. (सं.) आपन्न, दुःख, आर्त्त, निरानंद २. सांशयिक, संदिग्ध ।

शोण, सं. पुं. (सं.) रक्त-लोहित,-वर्ण-रंगः २. नदविशेषः, हिरण्यवाहः ३. माणिक्यं ४. रक्तेक्षुः ५. अग्निः ६. लोहिताश्वः । सं. न., रुधिरं २. सिंदूरम् ।

—रत्न, सं. पुं. (सं. न.) पद्मरागमणिः, शोणितोपलः ।

शोणित, सं. पुं. (सं. न.) रुधिरं, रक्तं दे. । वि. (सं.) लोहित, रक्त, शोण ।

शोथ, सं. पुं. (सं.) शोफः, शोथकः, श्वयथुः ।

शोध, सं. पुं. (सं.) शोधनं, निस्तारः (ऋणादि का) २. अनुसंधानं, अन्वेषणं ३. शुद्धिः (स्त्री.), शुद्धिसंस्कारः ४. परीक्षा-क्षणम् ।

शोधक, सं. पुं. (सं.) पावन, शोधन, मलहर २. अन्वेषक, अनुसंधातृ ३. दे. 'सुधारक' ।

शोधन, सं. पुं. (सं. न.) पावनं, संस्करणं, निर्मली-पवित्री-शुची,-करणं, मार्जनं, प्रक्षालनं, धावनं २. प्रतिसमा-समा,-धानं, त्रुटिनिरसनं ३. धातूनां निर्दोषीकरणं ४. अन्वेषणं, अनुसंधानं ५. परीक्षणं ६. ऋणनिस्तारणं ७. दंडः ८. प्रायश्चित्तं ९. विरेचनं १०. निंबूकं ११. व्यवकलनम् ।

शोधना, क्रि. स. (सं. शोधनं) दे. 'शुद्ध करना' (१-२) ३. औषधार्थं धातुं संस्कृ ४. अन्विष् (दि. प. से.), अनुसंधा (जु. उ. अ.) । सं. पुं., दे. 'शोधन' ।

शोधनीय, वि. (सं.) पवनीय ; मार्जनीय २. निस्तार्य, प्रत्यर्पयितव्य ३. अनुसंधेय ।

शोभन, वि. (सं.) सुंदर, रम्य, रमणीय, २. उत्तम, श्रेष्ठ ३. उचित, उपयुक्त ४. मांगलिक, मंगल्य, मंगलीय ।

शोभा, सं. स्त्री. (सं.) कांतिः-द्युतिः-दीप्तिः (स्त्री.), भा, भासा, श्रीः (स्त्री.) २. छवीविः (स्त्री.), सुन्दरता, रुचिरता ३. भूषा, परिष्क्रिया ४. वर्णः, रंगः ५. श्रेष्ठगुणः ।

—देना, क्रि. अ., राज्-शुभ् (भ्वा. आ. से.) ।

शोभायमान, वि. (सं. शोभमान) राजमान, भ्राजमान, भासुर, देदीप्यमान, सुन्दर २. विद्यमान, उपस्थित ।

शोभित, वि. (सं.) शोभान्वित, सुन्दर, छविमत् । २. मंडित, भूषित ३. उपस्थित, विद्यमान ।

शोर, सं. पुं. (फ़ा.) महारवः. कलकलः, कोलाहलः दे. ।

—मचाना, क्रि. अ., कोलाहलं कृ, उत्क्रुश् (भ्वा. प. अ.) ।

शोरवा, सं. पुं. (फ़ा.) यूषः-षं, सूपः, लासः, *रसः २. मांसरसः, दे. 'यख़नी' ।

शोरा, सं. पुं. (फ़ा. शोर) यवक्षारः, विषाकिन्, निपीतिन्, पाक्यः ।

शोरे का तेज़ाब, सं. पुं., भूयिकाम्लः, पाक्यद्रावकं, नत्रिक-यवक्षार,-अम्लः ।

शोला, सं. पुं. (अ.), ज्वाला, अर्चिस् (न.) ।

शोशा, सं. पुं. (फ़ा.) अद्भुत-विलक्षण,-वार्त्ता २. व्यंग्योक्तिः (स्त्री.)३. कलहोत्पादिका वार्त्ता ।

शोषक, वि. (सं.) रसाकर्षक, शोषणकर २. क्षय-ध्वंस,-कारिन् ।

शोषण, सं. पुं. (सं. न.) रसाकर्षणं, शुष्कीकरणं २. क्षपणं ३. वि,-नाशनं, वि,-ध्वंसनं ४. सारोद्धारः ५. चूषणम् ।

शोहदा, सं. पुं. (अ.) दे. 'लुच्चा' ।

शोहरत, सं. स्त्री. (अ.) ख्यातिः-प्रसिद्धिः (स्त्री.) ।

शोहरा, सं. पुं. (अ. शोहरत, दे.) ।

शौक, सं. पुं. (अ.) अभि,-रुचिः (स्त्री.), प्रवृत्तिः (स्त्री.), प्रवणता २. लालसा, उत्कंठा, औत्सुक्यम् ।

—करना, मु., भुज् (रु. आ. अ.) ।

—चर्राना, मु , तीव्रम् अभिलष् (भ्वा.प.से.) ।

—पूरा करना, मु., कामं उपभोगेन शम् (प्रे.) ।

—से, मु., सानंदं, सहर्षं, समोदम् ।

शौकीन, सं. पुं. (अ. शौक) प्रसाधन-शृङ्गार-सुवेश,-प्रियः, वेषाभिमानिन् , छेकः २. वेश्यागामिन् ३. प्रेमिन्, अनुरागिन्, स्नेहिन्, अभिलाषिन् ।

शौकीनी, सं. स्त्री. (हिं. शौकीन) वेषाभिमानः, शृङ्गारप्रियता २. वेश्यागमनम् ।

शौच, सं. पुं. (सं. न.) शुद्धता, शुद्धिः (स्त्री.), पवित्रता, पूतता, शुचिता-त्वं, पुण्यता, निष्पापता २. प्रातः-कृत्यानि-कार्याणि (न. बहु०) (शौच, स्नान, संध्या आदि) ३. पुरीषोत्सर्गः, हदनम् ।

शौरसेनी, सं. स्त्री. (सं.) १-२. प्राकृत-अपभ्रंश,-भाषाविशेषः ।

शौर्य, सं. पुं. (सं. न.) शूरता, वीरता, पराक्रमः ।

शौहर, सं. पुं. (फ़ा.) पतिः, भर्तृ ।

श्मशान, सं. पुं. (सं. न.) पितृ,-वनं,-काननं, अंतशय्या, शतानकं, रुद्राक्रीडः, दाहसरः (पुं.), शवसानम् ।

—वासी, सं. पुं. (सं.-सिन्) शिवः, २. चांडालः ।

श्मश्रु, सं. पुं. (सं. न.) कूर्चः,-र्चं, चोटः, व्यंजनं, मुखरोमन् (न.), शिंगिन् (न.), शिंघाणं, दे. 'दाढ़ी' ।

—वर्धक, सं. पुं. (सं.) नापितः ।

श्याम, सं. पुं. (सं.) श्रीकृष्णः २. कृष्णवर्णः । वि. (सं.) काल, कृष्ण २. कालनील, कृष्ण-मेचक ।

—सुंदर, सं. पुं. (सं.) श्रीकृष्णः ।

श्यामता, सं. स्त्री. (सं.) कालिमन्-कृष्णिमन् (पुं.) २. नीलता, मेचकता ।

श्यामल, वि. (सं.) काल २. कालीन ।

श्यामा, सं. स्त्री. (सं.) राधा-धिका २. शकुनी, कालिका, कृष्णा (खगभेदः) ३. अप्रसूतांगना ४. (तप्तकांचनवर्णाभा) नारी ५. कृष्णा गौः (स्त्री.) ६. यमुना ७. रात्रौ ।

श्येन, सं. पुं. (सं.) शशादः-दनः, कपोतारिः, खगांतकः, धाति-रण,-पक्षिन्, नीलपिच्छः ।

श्येनी, सं. स्त्री. (सं.) श्येनिका, नीलपिच्छी-च्छा ।

श्रद्धा, सं. स्त्री. (सं.) आदरः, संमानः, सत्कारः २. विश्वासः, प्रत्ययः, विश्रंभः ३. निष्ठा, आस्था, भक्तिः (स्त्री.) ।

—करना या **—रखना,** क्रि अ., श्रद्धा (जु उ. अ.), विश्वस् (अ. प. से.) ।

—हीन, वि. (सं.) अविश्वासिन्, अश्रद्दधान २. आस्था-निष्ठा-भक्ति,-हीन ।

श्रद्धालु, वि. (सं.) श्रद्धा,-वत्-युक्त-अन्वित, श्रद्दधान, विश्वासिन्, प्रत्ययिन् २. (स्त्री.) दोहदवती ।

श्रद्धेय, वि. (सं.) विश्वास-श्रद्धा,-पात्रं-आस्पदं, श्रद्धातव्य, पूज्य, सं-,मान्य, नमस्य ।

श्रम, सं. पुं. (सं.) परिश्रमः, दे. । २. श्रांतिः (स्त्री.) ३. व्यायामः ।

—जल, सं. पुं. (स. न.) प्र,-स्वेदः, श्रम,-कणाः-शीकराः (बहु०) दे. 'पसीना' ।

—जीवी, सं. पुं. (सं.-विन्) श्रमिकः, कर्मकरः, दे. 'मज़दूर' ।

श्रवण, सं. पुं. (सं. पुं. न.) कर्णः, श्रवः, श्रोत्रं, दे. 'कान' सं. न. निशमनं, आकर्णनम् (सं. पुं. स्त्री.) श्रवणानक्षत्रम् ।

श्रवणा, सं. स्त्री. (सं.) श्रवणः-णं, नक्षत्र-विशेषः ।

श्रव्य, वि. (सं.) दे. 'श्राव्य' ।

श्रांत, वि. (सं.) क्लांत, ग्लान, खिन्न, श्रमार्त्त, अवसन्न, जातश्रम २. शांत ३. निवृत्त ।

श्रांति, सं. स्त्री. (सं. स्त्री.) श्रमः, आयासः, अवसादः, खेदः ।

श्राद्ध, सं. पुं. (सं. न.) श्रद्धया क्रियमाणं कर्मन् (न.) २. पितॄन् उद्दिश्य श्रद्धया अन्नादिदानं ३. पितृ-आश्विनकृष्ण,-पक्षः ।

श्राप, सं. पुं., दे. 'सराप' ।

श्रावण, सं. पुं. (सं.) श्रावणिकः, नभः (पुं.) ।

श्रावणी, सं. स्त्री. (सं.) श्रावणमासीयपूर्णिमा ।

श्राव्य, वि. (सं.) श्रव्य, श्रोतव्य, श्रवणार्ह, आकर्णनीय, निशमनीय ।

श्री, सं. स्त्री. (सं.) कमला, लक्ष्मीः दे० २. सरस्वती ३. धनं, संपद् (स्त्री.) ४. विभूतिः (स्त्री.), विभवः ५. यशस् (न.) ६. शोभा, प्रभा ७. कांतिः-द्युतिः (स्त्री.) ८. नामपुरोवर्ति संमानपदं. श्रीयुत, श्रीमन् ९. वृद्धिः (स्त्री.) १०. साफल्यं, सिद्धिः (स्त्री.) ११. रागभेदः । वि., योग्य २. मनोज्ञ ३. उत्तम ४. मंगल ।

—कंठ, सं. पुं. (सं.) शिवः, शंभुः ।

—खंड, सं. पुं. (सं. पुं. न.) हरिचंदनं २. दे. 'शिखरन' ।

—धर, सं. (सं.) विष्णुः, श्री,-निवासः-निकेतनः । वि., तेजस्विन् ।

—पति, सं. पुं. (सं.) विष्णुः २. श्रीरामः ३. श्रीकृष्णः ४. कुबेरः ५. नृपः ।

—पथ, सं. पुं. (सं.) राज,-मार्गः-पथः ।

—पाद, वि. (सं.) पूज्य २. संपन्न ।

—पुष्प, सं. पुं. (सं. न.) लवंगं, श्रीप्रसूनम् ।

—फल, सं. पुं. (सं.) विल्ववृक्षः २. नारिकेलः ३. राजादनीवृक्षः ४. आमलकः-की ।

—फली, सं. स्त्री. (सं.) आमलकी २. नीली ।

श्रीमंत, वि. (सं-मत्) धनिक, धनाढ्य ।

श्रीमत्, वि. (सं.) धनवत्, धनिन्, श्रील, २. शोभान्वित, द्युतिमत् ३. छविमत्, सुन्दर । सं. पुं., विष्णुः २. कुबेरः ३. शिवः ।

श्रीमती, सं. स्त्री. (सं.) स्त्रीनामपुरोवर्तिसंमानपदं २. लक्ष्मीः (स्त्री.) ३. राधा । वि., धनाढ्या २. शोभान्विता ३. सुन्दरी ।

श्रीमान्, सं. पुं. (सं. श्रीमत्) नरनामपुरोवर्तिसंमानपदं, श्रीयुत, श्रीयुक्त । दे. 'श्रीमत्' वि. तथा सं. पुं. ।

श्रीरस, सं. पुं. (सं.) श्रीवेष्टः, दे. 'श्रीवास' ।

श्रीराग, सं. पुं. (सं.) षड्रागमध्ये तृतीयो रागः ।

श्रीवत्स, सं. पुं. (सं.) विष्णुः २. विष्णुवक्षःस्थशुक्लवर्णदक्षिणावर्तरोमावली ।

—लांछन, सं. पुं. (सं.) विष्णुः ।

श्रीवास, सं. पुं. (सं.) पायसः, वृकधूपः, श्रीवेष्टः, सरलद्रवः दे. 'गंधाबिरोज़ा' तथा 'तारपीन' २. पद्मं ३. विष्णुः ४. शिवः ।

श्रीहर्ष, सं. पुं. (सं.) नैषधकाव्यरचयिता २. सम्राट् हर्षवर्द्धनः ।

श्रुत, वि. (सं.) आकर्णित, श्रवणगोचरतां गत, निशान्त २. प्र-,ख्यात ।

श्रुति, सं. स्त्री. (सं.) वेदः २. कर्णः, दे. 'कान' ३. श्रवणं ४. ध्वनिः ५. किंवदंती ।

—कटु, सं. पुं. (सं.) (काव्ये दोषभेदः) कर्कशशब्दप्रयोगः, दुःश्रवत्वम् ।

—पथ, सं. पुं. (सं.) कर्णः २. वेदोक्तमार्गः ।

श्रेणी, सं. स्त्री. (सं.) श्रेणिः (स्त्री.), कक्षा, वर्गः, छात्रगणः २. पंक्तिः-क्तिका, विजोली, आली-लिः, आवलि-लीः, राजी-जिः, वीथी-थिका, रेखा, लेखा, पाली-लिः (सब स्त्री.) ३. क्रमः, परंपरा, शृङ्खला ४. समव्यवसायिसंघः ।

—बद्ध, वि. (सं.) पंक्ति,-बद्ध-स्थ, वर्गीकृत ।

श्रेय, सं. पुं. [सं. श्रेयस् (न.)] कल्याणं, आनन्दः, मंगलं २. धर्मः, सुकृतं ३. मोक्षः, समृद्धिः (स्त्री.) ५. कीर्तिः (स्त्री.), यशस् (न.) । वि., भद्रतर, साधीयस्, उत्कृष्टतर २. उत्तम, श्रेष्ठ ३. शुभंकर, मंगल ४. कीर्तिकर, यशोदायक ।

श्रेयस्कर, वि. (सं.) कल्याण-हित-मंगल,-कारक-कारिन् ।

श्रेष्ठ, वि. (सं.) उत्तम, परम, प्रशस्ततम, वरेण्य, मुख्य, प्रथम, अग्रि(ग्री)य ३. पूज्य, मान्य ४. वृद्ध, ज्येष्ठ ५. अभिजात, अभिजनवत्, कुलीन ६. आर्य, महानुभाव, महाशय ।

श्रेष्ठता, सं. स्त्री. (सं.) औदार्यं, माहात्म्यं, प्रधानता, भद्रता, आर्यत्वं, कुलीनता २. उत्तमता, उत्कृष्टता ।

श्रोतव्य, वि. (सं.) दे. 'श्राव्य' ।

श्रोता, सं. पुं. (सं.-तृ) श्रावकः, श्रवण-निशमन,-कर्तृ, आकर्णयितृ ।

श्रोत्र, सं. पुं. (सं. न.) श्रवणः-णं, कर्णः, दे. 'कान' ।

श्रोत्रिय, सं. पुं. (सं.) वेद,-विद्-पाठकः, छांदसः २. ब्राह्मणजातिभेदः ।

श्रौत, वि. (सं.) श्रुति-वेद, विहित-प्रतिपादित २. वैदिक, छांदस ३. यज्ञीय । (स. न.) गार्हपत्याहवनीय-दक्षिणाग्नयः (बहु.) ।

—सूत्र, सं. पुं. (सं. न.) यज्ञविधायकग्रन्थविशेषः ।

श्लाघनीय, वि. (सं.) श्लाघ्य, प्रशंसनीय, दे. २. उत्तम, श्रेष्ठ ।

श्लाघा, सं. स्त्री. (सं.) स्तुति-नुतिः (स्त्री.), प्रशंसा, दे. २. चाटु (पुं. न.), चाटूक्तिः (स्त्री.) ३. इच्छा ।

श्लाघ्य, वि. (सं.) श्लाघनीय, दे. ।

श्लिष्ट, वि. (सं.) संयुक्त, संलग्न २. आलिंगित ३. अनेकार्थक, श्लेषयुक्त (शब्दादि) ।

श्लीपद, सं. पुं. (सं. न.) पादवल्मीकं, दे. 'फीलपांव' ।

श्लील, वि. (सं.) उत्तम, उत्कृष्ट २. शुभ, भद्र ।

श्लेष, सं. पुं. (सं.) अनेकार्थकशब्दप्रयोगः, शब्दालंकारभेदः (सा.) २. परिरंभः, आलिंगनं ३. संयोगः, संधिः ।

श्लेष्मा, सं. पुं. (सं.-मन्) कफः, दे. 'बलग़म' ।

श्लोक, सं. पुं. (सं) अनुष्टुप्छंदस् (न.) २. पद्यं, छंदस् (न.) ३. यशस् (न.) ४. प्रशंसा ।

श्वसुर, सं. पुं. (सं.) दे. 'ससुर' ।

श्वशुर्य, सं. पुं. (सं.) देवरः २. श्यालः ।

श्वश्रू, सं. स्त्री. (सं.) दे. 'सास' ।

श्वान, सं. पुं. (सं.) श्वन्, कुक्कुरः, दे. 'कुत्ता'।
श्वापद, सं. पुं. (सं.) हिंस्रपशुः।
श्वास, सं. पुं. (सं.) प्राणाःअसवः (बहु.), दे. 'सांस' २. श्वासरोगः, दे. 'दमा'।
—धारण, सं. पुं. (सं. न.) श्वासरोधः, प्राणायामः।
श्वासोच्छ्वास, सं. पुं. (सं.) *प्राण,-गतिः-क्रिया, श्वसितोच्छ्वासितम्।
श्वित्र, सं. पुं. (सं. न.) श्वेतं-त्रं, श्वेतकुष्ठम्। वि. (सं.) श्वेत २. श्वित्रिन्।
श्वित्री, वि. (सं.-त्रिन्) श्वित्र-श्वेतकुष्ठ,-युक्त।
श्वेत, वि. (सं.) धवल, गौर, शुक्ल, दे. 'सफ़ेद' २. निर्मल, स्वच्छ ३. निर्दोष, निष्कलंक। सं. पुं. (सं.) शुक्लवर्णः २. शंखः ३. शुक्रग्रहः। (सं न.)रूप्यं, रजतम्।
—कुष्ठ, सं. पुं (सं. न.) दे. 'श्वित्र'।
—कृष्ण, वि. (सं.) सितासित, शुक्लश्याम २. पक्षविपक्ष।
—केतु, सं. पुं. (सं.) उद्दालकपुत्रः।
—प्रदर, सं. पुं. [सं. प्रदरभेदः (स्त्रीरोग)]।
श्वेतता, सं. स्त्री. (सं.) श्वेतिमन् (पुं.), शुक्लता, दे. 'सफ़ेदी'।
श्वेतांबर, सं. पुं. (सं.) जैनसंप्रदायविशेषः, धवलवेषः।

ष

ष, देवनागरीवर्णमालाया एकत्रिंशो व्यंजनवर्णः, षकारः।
षंड, सं. पुं. (सं.) दे. 'शंड' (१-२)।
षट्, वि. (सं. षष्) सं. पुं., उक्ता संख्या, तद्बोधकांकश्च (६) २. दीपकरागपुत्रः।
—कर्म, सं. पुं. (सं.-र्मन् (न.) षट् ब्राह्मणकर्माणि (यजनं, याजनं, अध्ययनं, अध्यापनं, दानं, प्रतिग्रहः)।
—कोण, सं. पुं. (सं. न.) षड्भुजः। वि., षड्भुज।
—पद, सं. पुं. (सं.) षडंघ्रिः, षट्चरणः, भ्रमरः।
—पदी, सं. स्त्री. (सं.) भ्रमरी २. छन्दोभेदः (छप्पय) ३. यूका।
—शास्त्र, सं. पुं. (सं. न.) सांख्ययोगन्याय वैशेषिकमीमांसावेदांतशास्त्राणि (न. बहु.)।
—शास्त्री, सं. पुं. (सं.-स्त्रिन्) षड्दर्शनविद्।
षट्क, सं. पुं. (सं. न.) षट् इति संख्या २. षड्वस्तुसमूहः।
षडंग, सं. पुं. (सं. न.) वेदांगषट्शास्त्राणि (शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दस् (न.), ज्योतिषं) २. षट् शरीरावयवाः (जंघे बाहू शिरोमध्यं षडंगमिदमुच्यते)। वि., षडवयवयुक्त।
षडंघ्रि, सं. पुं. (सं.) भ्रमरः, षट्पदः।
षडानन, सं. पुं. (सं.) कार्तिकेयः, षण्मुखः।
षड्गुण, सं. पुं. (सं. न.) षाड्गुण्यं, राज्यरक्षणस्य षड्डपायाः (= संधिः, विग्रहः, यानं, आसनं, द्वैधीभावः, संश्रयः)। वि., गुणषट्कयुत २. षड्गुणित।
षड्ज, सं. पुं. (सं.) स्वरसप्तके प्रथमः, चतुर्थो वा स्वरः (संगीत)।
षड्दर्शन, सं. पुं. (सं. न.) दे. 'षट्शास्त्र'।
षड्यंत्र, सं. पुं. (सं. न.) कूटः-टं, कूट-, युक्तिः (स्त्री.)-उपायः, उपजापः, *षडयंत्रं, *षट्चक्रं, कुमंत्रणा।
षड्रस, सं. पुं. (सं.-रसं,-रसाः) रसषट्कं (= मधुरः, अम्लः, लवणः, कटुः, तिक्तः, कषायः)।
षड्रिपु, सं. पुं. (सं. न.) षड्वर्गः, विकारषट्कं (= कामः क्रोधस्तथा लोभो मदमोहौ च मत्सरः)।
षष्ठी, सं. स्त्री. (सं.) शुक्लकृष्णपक्षयोः षष्ठी तिथिः (स्त्री.) २. संबन्धविभक्तिः (व्या.) ३. कात्यायनी, दुर्गा।
षाड्गुण्य, सं. पुं. (सं. न.) दे. 'षड्गुण' सं. पुं.।
षोडश, वि. तथा (सं.) 'सोलह'।
—कला, सं. स्त्री. (सं. बहु.) चंद्रमण्डलस्य षडधिकदश भागाः (= अमृता, मानदा, पूषा, तुष्टिः, पुष्टिः, रतिः धृतिः, शशिनी, चन्द्रिका, कांतिः, ज्योत्स्ना, श्रीः, प्रीतिः, अंगदा, पूर्णा, पूर्णामृता = १६ कला)।

—शृङ्गार, सं. पुं. (सं. बहु.) षोडशसंख्याकानि प्रसाधनसाधनानि।
(अंग शुची, मंजन, वसन, मांग, महावर, केश। तिलक भाल, तिल चिबुकमें, भूषण, मेंहदीवेष। मिस्सी, काजल, अर्गजा, बीरी और सुगंध। पुष्पकली, युत होय कर तव नवसप्त निवन्ध।)

—संस्कार, सं. पुं. (सं. बहु.) धार्मिककृत्यभेदः (=गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणनिष्क्रमणान्नप्राशनचूड़ाकर्मकर्णवेधोपनयनवेदारंभसमावर्तनविवाहवानप्रस्थसन्न्यासांत्येष्टिसंस्काराः (स्वामी दयानन्द)।

षोडशी, सं. स्त्री. (सं.) षोडशवर्षा युवतिः (स्त्री.) २. प्रेतक्रियाभेदः।

षोडशोपचार, सं. पुं. (सं. बहु.) षोडशपूजनं, (=आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्। मधुपर्काचमस्नानं वसनाभरणानि च॥ गंधपुष्पे धूपदीपौ नैवेद्यं वंदनं तथा। प्रयोजयेदर्चनायां उपचारास्तु षोडश॥)

स

स, देवनागरीवर्णमालाया द्वात्रिंशो व्यंजनवर्णः सकारः।

संकट, सं. पुं. (सं. न.) आपद्-विपद्-आपत्तिः-विपत्तिः (स्त्री.) २. दुःखं, कष्टं ३. जन. समूहः-संमर्दः ४ गिरिद्वारं, दे. 'दर्रा' ५. संबाधपथः।

संकर, सं. पुं. (सं.) सम्मिश्रणं, संमिलनं २. सांकरिकः, मिश्रजः, संकरजः ३. अधर्म्यविवाहः।

संकरता, सं. स्त्री. (सं.) संमिश्रता, सांकर्य्यं, क्रमभंगः, व्यतिकरः, अस्तव्यस्तता।

संकल, सं. स्त्री. (सं. शृंखला, दे.)।

संकलन, सं. पुं. (सं. न.) संग्रहणं, संचयनं २. संचयः; राशिः, ३. परिगणनं, परिसंख्या ३. संग्रहः, संग्रहग्रन्थः।

—करना, क्रि. स., संकल् (चु.), संग्रह् (क्र. प. से.), समाहृ (भ्वा. प. अ.)।

संकलित, वि. (सं.) संगृहीत, संचित २. परिसंख्यात, परिगणित ३. राशी एकत्री,-कृत।

संकल्प, सं. पुं. (सं.) चिकीर्षा, भावः, विचारः, इच्छा, कामः २. विशिष्टमन्त्रपूर्वक,-दानं वितरणं-उत्सर्जनं ३. मंत्रविशेषः ४. निश्चयः, अवधारणं, अध्यवसायः।

—करना, निश्चि (स्वा. प. अ.), दृढं अवधृ (चु.), संकल्प् (प्रे.) २. संकल्पमंत्रपूर्वकं वितृ (भ्वा. प. से.), दा।

संकाश, वि. (सं.) तुल्य, सदृश २. निकट-समीप,-वर्तिन्। (सं. पुं.) सामीप्यं, नैकट्यम्।

संकीर्ण, वि. (सं.) संबाध, संकट, संकुचित २. मिश्रित, संमिश्र, संसृष्ट ३. क्षुद्र, तुच्छ ४. संकुल, निचित, व्याप्त, समा-आ,-कीर्ण।

संकीर्णता, सं. स्त्री. (सं.) संबाधता २. मिश्रितत्वं ३. संकुलता ४. क्षुद्रता, नीचता।

संकीर्तन, सं. पुं. (सं. न.) (देवादीनां) गुणगानं, कीर्तिकथनम्।

संकुचित, वि. (सं.) संकीर्ण, संबाध २. सलज्ज, सत्रप ३. कदर्य, किंपचान ४. संहृत, संपिंडित, आकुंचित ५. मुद्रित, मीलित, मुकुलित।

संकुल, वि. (सं.) आ-सं,-कीर्ण, निचित, व्याप्त, कलिल, गहन, संभृत, सं-परि,-पूर्ण, पूरित। सं. पुं. (सं. न.) युद्धं २. जन,-ओघः-संमर्दः ३. पशुकुलं, गो,-वृंदं-कुलं, यूथं, निवहः ४. असंगतवाक्यम्।

संकेत, सं. पुं. (सं.) इङ्गितं, संज्ञा, संज्ञानं, अंगविक्षेपः, प्रज्ञप्तिः (स्त्री.), आकारः, अभिप्रायव्यंजकचेष्टा २. (प्रेमिणोः) संकेतनिकेतनं, संमिलनस्थानं ३. शृंगारचेष्टा, हावः, विभ्रमः, विलासः ४. चिह्नं ५. उपक्षेपः, आकूतं, उपन्यासः।

—करना, क्रि. स., इंगितेन सूच् (चु.), उपक्षिप् (तु. प. अ.), साकूतं उपन्यस् (दि. प. से.)।

संकोच, सं. पुं. (सं.) आकुंचनं, संकोचनं, समाकर्षः, संपीडनं २. लज्जा, त्रपा ३. निश्चयाभावः, विकल्पः, संशयः ४. संक्षेपः-पणम्।

संकोचन, सं. पुं. (सं. न.) दे. 'संकोच'(१)।

संकोचना, क्रि. स. (सं. संकोचनं) संकुच् (प्रे.), आकुंच् (प्रे.), अल्पीकृ, संहृ (भ्वा. प. अ.)। क्रि. अ., लज्ज् (तु. आ. से.) त्रप् (भ्वा. आ. से.)।

संकोची, वि. (सं.-चिन्) लज्जालु, लज्जाशील, विनीत, शालीन ।

संक्रमण, सं. पुं. (सं. न.) गमनं, व्रजनं २. भ्रमणं, पर्यटनं ३. सूर्यस्य राश्यंतरप्रवेशः ।

संक्रांति, सं. स्त्री. (सं.) दे. 'संक्रमण' (३) । २-३. सूर्यसंक्रमण,-समयः-दिवसः ।

संक्रामक, वि. (सं.) स्पर्श,-जन्य-संचारिन् (रोग) ।

संक्षिप्त, वि. (सं.) संहृत, समस्त, संकुचित, लघु, अल्पीभूत ।

—करना, क्रि. स., संक्षिप् (तु. प. अ.), समस् (दि. प. से.), समाहृ-संहृ (भ्वा. प. अ.) ।

संक्षेप, सं. पुं. (सं.) सारः-रं, संग्रहः, समासः, समाहारः ।

संक्षेपतः, अव्य. (सं.) संक्षेपेण, समासेन, साररूपेण ।

संख, सं. पुं., दे. 'शंख' (१-२) ।

संखिनी, सं. स्त्री., दे. 'शंखिनी' ।

संखिया, सं. पुं. (सं. शृङ्गिकं) फेनाश्मन्, आखु-गौरी,-पाषाणः, शत-,मल्लः, करवीरा, कुनटी, नाग,-जिह्विका-मातृ (स्त्री.) ।

संख्या, सं. स्त्री. (सं.) गणना २. अंकः ३. बुद्धिः (स्त्री.) ४. विचारणा ।

—करना, क्रि. स., गण् (चु.), संख्या (अ. प. अ.) ।

संग[1], सं. पुं. (सं.) मेलः, संमिलनं, समागमः २. संगतं-तिः (स्त्री.), साहचर्यं, संसर्गः, संवासः, संपर्कः ३. विषय,-अनुरागः-आसक्तिः (स्त्री.) ४ सरित्संगमः । क्रि. वि., सह, सार्द्धं, साकं, समं (तृतीया के साथ) ।

—करना, क्रि. अ., संगम् (भ्वा. आ. अ.), सह चर् (भ्वा. प. से.), सवस् (भ्वा. प. अ.) ।

संग[2], सं. पुं. (फ़ा.) पाषाणः, प्रस्तरः, दे. 'पत्थर' । वि., कीकस, कर्कर, कक्खट २. कठोर ।

—जराहत, सं. पुं. (फ़ा.+अ.) ?

—तराश, सं. पुं. (फ़ा.) मूर्ति-प्रतिमा,-कारः, आश्मिकः, औपलिकः ।

—तराशी, सं. स्त्री., मूर्त्ति-प्रतिमा,-निर्माणम् ।

—दिल, वि. (सं.) पाषाण-कठोर,-हृदय, निर्दय ।

—दिली, सं. स्त्री., निर्दयता, निष्करुणता ।

—मर्मर, सं. पुं. (फ़ा.+अ.) राजाश्मन् (पुं.), मणिशिला, मर्मर,-उपलः-प्रस्तरः ।

—मूसा, सं. पुं. (फ़ा.) *मूषोपलः, *मूषाश्मन् (कृष्णश्लक्ष्णप्रस्तरभेदः) ।

संगठन, सं. पुं. (सं. सं.+हिं. गठना) संघटनं-ना, संव्यवस्थानं, संविधानं, दे. 'संघटन' २. संस्था, संघः ३. ऐक्यं, संधिः, सं,-हतिः (स्त्री.) योगः-गमः ।

संगठित, वि. (हिं. संगठन) संघटित, संविहित, संव्यवस्थापित ।

संगत, सं. स्त्री. (सं. न.) दे. 'संग' (२) । २. सहचरः, संगिन् ३. मैथुनम् ।

—करना, क्रि. अ., दे. 'संग करना' ।

संगतरा, सं. पुं. (पुर्त.) (वृक्ष) नारंगः, नागरंगः, ऐरावतः । (फल) नारंगं इ., दे. 'नारंगी' ।

संगति, सं. स्त्री. (सं.) दे. 'संग' (१-२) । ३. मैथुनं ४. संबन्धः ५. संवादः, विरोधाभावः, आनुरूप्यं ६. ज्ञानं ७. युक्तिः (स्त्री.) ।

संगती, सं. पुं. (सं. संगतं>) सहचरः, मित्रं, सहायः ।

संगम, सं. पुं. (सं.) दे. 'संग' (१-२) । ३. वेणी-णिः (स्त्री.) सरित्,-संयोगः-समागमः-मेलकः ४. मैथुनं ५. ग्रहयोगः (ज्यो.) ।

संगर, सं. पुं. (सं.) युद्धं २. प्रतिज्ञा ३. नियमः ४. आपद् (स्त्री.) ५. अंगीकारः ६. विषम् ।

संगसार, सं. पुं. (फ़ा.) * उपलभारः, प्राण-दंडभेदः । वि., नष्ट, ध्वस्त ।

संगिनी, सं. स्त्री. (हिं. संगी) सहचरी, सहगामिनी २. पत्नी ।

संगी, सं. पुं. (हिं. संग) सहचरः, सहायः २. मित्रं ३. बन्धुः ।

संगीत, सं. पुं. (सं. न.) प्रेक्षणार्थं नृत्यगीतवाद्यम् ।

—शास्त्र, सं. पुं. (सं. न.) गधर्व,-विद्या-वेदः ।

संगीन, सं. स्त्री. (फ़ा.) * नाल्यस्त्रसंगिनी । वि., अश्म-पाषाण,-मय-रचित २. स्थूल ३. स्थायिन्, दृढ ४. घोर, विकट ५. संकीर्ण ।

संगृहीत, वि. (सं.) संचित, समाहृत, एकत्रीकृत २. संकलित, परिसंख्यात ।

संग्रह, सं. पुं. (सं.) सञ्चयः-यनं, संग्रहणं,

समा,-हारः-हृतिः (स्त्री.)-हरणं, संकलनं, राशी-एकत्री,-करणं २. संग्रहग्रंथः ३. संक्षेपः ४. मुष्टिः (पुं. स्त्री.) ५. निग्रहः, संयमः ६. रक्षा ७. बद्धकोष्ठः, दे. 'कबज़' ८. स्वीकृतिः (स्त्री.) ९. ग्रहणम्।

संग्रहणी, सं. स्त्री. (सं.) ग्रहणी (अजीर्णभेदः)।

संग्राम, सं. पुं. (सं.) रणं, आहवः, युद्ध, दे.।

संघ, सं. पुं. (सं.) सभा, समाजः, समितिः (स्त्री.), गोष्ठी, परिषद्-संसद् (स्त्री.) २. समूहः, गणः, वृंदं, दलं ३. प्राचीनप्रजातंत्रभेदः ४. बौद्धश्रमणसमाजः ५. विहारः, मठः-ठम्।

—चारी, वि. (सं.-रिन्) गण-यूथ,-गामिन्। सं. पुं., मीनः।

—शासन, सं. पुं. (सं. न.) *संयुक्ततंत्रम्।

संघटन, सं. पुं. (सं. न.) दे. 'संगठन' (१-३) ४. निर्माणं, रचनं ५. घटना, रचना।

संघट्टन, सं. पुं. (सं. न.) संघर्षः-र्षणं २. संघट्टः, संमर्दः ३. रचना, घटना ४. संमिलनं, संयोगः ५. दे. 'संगठनम्'।

संघर्ष, सं. पुं. (सं.) संघट्टिः (स्त्री.), सं-अभि-आ,-घर्षः-र्षणं, आ-वि,-घट्टनं, परस्पर,-घर्षणं-मर्दनं २. प्रति-,स्पर्द्धा, विजिगीषा, प्रतियोगिता, अहमहमिका ३. सं,-घट्टः-मर्दः ४. युद्धम्।

संघर्षण, सं. पुं. (सं. न.) दे. 'संघर्ष'।

संघात, सं. पुं. (सं.) समूहः, वृंदं २. हननं, वधः ३. आघातः ४. निविडसंयोगः ५. आवासः।

संघाती, सं. पुं. (सं. संघाः>) सहचरः, मित्रम्।

संघाराम, सं. पुं. (सं.) आश्रमः, विहारः, मठः-ठम्।

संचय, सं. पुं. (सं.) राशिः, निकरः, पुंजः-जिः (स्त्री.) २. आधिक्यं, बाहुल्यं ३. दे. 'संग्रह' (१)।

संचयी, वि. (सं.-यिन्) संचेतृ-संग्रहीतृ, संचय-संग्रह,-कारक २. कृपण।

संचार, सं. पुं. (सं.) सं-वि, चरणं-चलनं, व्रजनं, गमनं, अटनं, भ्रमणं २. प्रचारः, प्रसारः, प्रचरणं, प्रसरणं ३. पथप्रदर्शनं ४. प्र,-चालनं-चारणं-सारणं ५. ग्रहाणां राश्यंतरप्रवेशः।

संचारिका, सं. स्त्री. (सं.) कुट्ट(ट्टि)नी, चुंदी, दूती-तिका।

संचारित, वि. (सं.) प्रचालित, प्रसारित।

संचारी, वि. (सं.-रिन्) संचरण-गमन-गति,-शील, चल २. परिवर्तनशील, परिवर्तिन्। सं. पुं. (सं.) पवनः २. व्यभिचारिभावः (सा०) ३. आगंतुकः ४. धूपः, दे.।

संचालक, सं. पुं. (सं.) परिचालकः, चालयितृ २. अधिष्ठातृ, अध्यक्षः ३. निर्वाहकः, व्यवस्थापकः।

संचालनं, सं. पुं. (सं.) परि-,चालनं, प्रेरणं, प्रवर्तनं २. निर्वाहः, व्यवस्था ३. अध्यक्षता, निरीक्षणं ४. नियंत्रम्।

संचित, वि. (सं.) दे. 'संगृही' (१)।

संजय, सं. पुं. (सं.) धृतराष्ट्रसचिवः २. शिवः ३. ब्रह्मन् (पुं.)।

संजाफ़, सं. स्त्री. (फ़ा.) अंचलः, दशा, चीरी-रिः (स्त्री.)-वस्त्रप्रांतः।

संजीदगी, सं. स्त्री. (फ़ा.) गंभीरता, गांभीर्यम्।

संजीदा, वि. (फ़ा.) शांत, ग(गं)भीर २. बुद्धिमत्।

संजीवक, वि. (सं.) नव-पुनर्,-जीवनदायक, उज्जीवकः।

संजीवन, सं. पुं. (सं. न.) दे. 'संजीवक' २. सम्यक् प्राणधारणं ३. नरकविशेषः।

संजीवनी, वि. स्त्री. (सं.) उज्जीविका, नव-पुनर्,-जीवनदात्री। सं. स्त्री. (सं.) उज्जीवकौषधविशेषः (कल्पित) २. भेषजभेदः।

—विद्या, सं. स्त्री. (सं.) मृतकजीवनप्रदकल्पितविद्याविशेषः।

संज्ञा, सं. स्त्री. (सं.) चेतना, चैतन्यं, वेदनं, बोधः २. अभिधा-धानं, आख्या, दे. 'नाम' ३. वस्तुबोधकः शब्दः (व्या०), नामन् (न.), विशेष्यं ४. इंगितं, संज्ञानं, संकेतः।

—हीन, वि. (सं.) मूर्च्छित दे., अ-विगत,-चेतन, मूर्च्छापन्न।

संड-डा, सं. पुं. [सं. शं(षं)डः] वृषभः २. पीनो मानवः।

—मुसंड-डा, वि. (सं.+अनु०) मांसल, पीन, उपचित, दृढांग (-गी स्त्री.)।

संडसा-सी, सं. पुं. स्त्री.(सं.) दे. 'संडासा-सी'

संडास, सं. पुं. (?) शौचकूपः, दे. 'पाख़ाना'।

संडासा, सं. पुं. (सं. संदशः) संदंशकः, कंक,-मुखः(-खं)-वदनम्।

संडासी, सं. स्त्री. (हिं. संडासा) संदंशिका, सुचु(चू)टी।

संत, सं. पुं. (सं. सत्) महात्मन्, धर्मात्मन्, हरिभक्तः २. विरक्तजनः। वि., भद्र, धार्मिक, श्रेष्ठ।

संतत, अव्य. (सं.-तं) सदा, सर्वदा, सततं, निरंतरम्।

संतति, सं. स्त्री. (सं.) संतानः, दे.।

संतप्त, वि. (सं.) उत्-अति-सु,-तप्त, ज्वलित, दग्ध २.अति, दुःखित-पीडित-अर्दित ३.विषण्ण, विमनस्क ४. श्रांत, क्लांत, श्रमार्त्त।

संतरा, सं. पुं., दे. 'संगतरा'।

संतरी, सं. पुं. (अं. सेंट्री) दे. 'सिपाही' २. द्वारपालः।

संतान, सं. पुं. (सं.) संततिः-प्रसूतिः (स्त्री.), प्रजा, प्रसवः, अपत्यं, तोकं, बीजं २. अन्वयः, वंशः ३. कल्पवृक्षः ४. विस्तारः। (सं. न.) अस्त्रभेदः।

संताप, सं. पुं. (सं.) (अनलादिजः) तापः, संज्वरः, प्रोषः, उष्णः णं, दाहः,ऊष्मन्, घर्मः २. कष्टं, व्यथा ३. आधिः, मनोव्यथा ४. ज्वरः ५. शत्रुः ६. दाहनामको रोगः।

—देना, क्रि. स., परि-सं,-तप् (प्रे.), अर्द् (प्रे.), पीड् (चु.) २. दे. 'जलाना'।

संतापित, वि. (सं.) दे. 'संतप्त' (२)।

संतापी, वि. (सं.-पिन्) दुःखदायिन्।

संतुष्ट, वि. (सं.) सं,-तृप्त, परि-, तुष्ट, वितृष्ण, कृतार्थ २. अनुनीत, तोषित, प्रीत, सांत्वित, प्रसादित।

संतोष, सं. पुं. (सं.) सं-परि,-तोषः-तुष्टिः (स्त्री.), वितृष्णा, शांतिः-तृप्तिः (स्त्री.), प्रीतिः, २. आनन्दः, हर्षः, सुखम्।

—करना, क्रि. अ., संतुष्-संतृप् (दि. प. अ.), नंद् (भ्वा. प. से.)।

संतोषी, वि. (सं.-षिन्) दे. 'संतुष्ट' (१)।

संधा, सं. पुं. (सं. संहिता > ?) आह्निकं, दैनिक,-पाठः।

संदर्भ, सं. पुं. (सं.) रचना, घटना, निर्मितिः (स्त्री.) २. प्रस्तावः, लेखः, प्र-नि,-बंधः ३. भाष्य-टीका,-आत्मकग्रन्थः ४. लघु,-ग्रन्थः-पुस्तकं ५. संग्रहः, संकलनं (ग्रंथ) ६. विस्तारः।

संदल, सं. पुं. (फ़ा.) मलयजं, श्रीखंडं, चंदनं, दे.।

संदली, वि. (फ़ा. संदल) चंदनवर्ण, ईषत्पीत २. चंदन,-मय-निर्मित।

संदिग्ध, वि. (सं.) संदेह-संशय,-युक्त-पूर्ण, निश्चयशून्य, सविकल्प, विकल्प्य।

—व्यक्ति, सं. पुं. (सं. स्त्री.) शंकित-शंक्य,-जनः।

संदूक़, सं. पुं. (अ.) संपुटः, पेटा, मंजूषा, समुद्गः।

संदूकचा, सं. पुं. **संदूकची,** सं. स्त्री. (अ.+फ़ा.) पेटिका, समुद्गकः। करण्डकः, संपुट(टि)का।

संदेश, सं. पुं. (सं.) संवादः, वार्ता, वाचिकं, दिष्टं, आख्यायनी २. वंगप्रांतीयमिष्टान्नभेदः।

—भेजना, क्रि. स., संदिश् (तु. प. अ.), वाचिकं-दिष्टं प्रेष् (प्रे.)।

—हर, सं. पुं., वार्ताहरः, वार्तिकः, सांदेशिकः, दूतः, आख्यायकः।

संदेसा, सं. पुं., दे. 'संदेश' (१)।

संदेह, सं. पुं. (सं.) संशयः, विचिकित्सा, द्वापरः, विकल्पः, द्वैधं, आशंका, निश्चय-निर्णय-, अभावः २. प्रत्यय-विश्वास,-अभावः ५. अर्थालंकारभेदः (सा.)।

संदोह, सं. पुं. (सं.) समूहः, निकरः।

संधान, सं. पुं. (सं. न.) अभिषवः, संधानी, मद्यसज्जीकरणं, संधिका २. चापे बाणयोजनं ३. मदिराभेदः ४. संघट्टनं, संयोजनं ५. अन्वेषणं ६. सञ्जीवनं, दे. ७. संधिः ८. अवदंशः ९. कांजिकं १०. संधानिका।

संधि, सं. स्त्री. (सं. पुं.) संयोगः, संमिलनं, संगमः, संहतिः (स्त्री.) २. ग्रंथिः, पर्वन् (न.), संधिस्थानं ३. मित्रीकरणं, राज्यरक्षायाः गुणविशेषः (राजनीति) ४. मैत्री, सख्यं ५. वर्णद्वयमेलनं, संहिता (व्या.) ६. रूपकांगभेदः (सा.) ७. दे. 'सेंध' ८. युगसंधिः ९. वयःसन्धिः।

—चौर, सं. पुं. (सं.) संधिहारकः।

—च्छेद, सं. पुं. (सं.) संहितापदवि

—जीवक, सं. पुं. (सं.) विटः, संचारकः ।
—वंधन, सं. पुं. (सं.) स्नसा, स्नायुवंधः ।
—वेला, सं. स्त्री. (सं.) अहोरात्रमिलनसमयः, संधिकालः २. सायम् ।
संध्या, सं. स्त्री. (सं.) संधिकालः, अहोरात्र-संयोगसमयः २. सायंकालः, दे. ३. उपासना-भेदः ४. युगसंधिः ।
सन्निकर्ष, सं. पुं. (सं.) सन्निधिः, सन्निधानं, सामीप्यं २. इन्द्रियार्थसम्बन्धः ।
संनिपात, सं. पुं. (सं.) वातपित्तकफानां युगपद् विकारः, विकारोत्पादकं मिलितदोषत्रयं २. समाहारः, समूहः ३. समवपातः ४. समुद्भवनं ५. संयोगः, मिश्रणम् ।
संनिवेश, सं. पुं. (सं.) समुपवेशः-शनं २. उपवेशः-शनं, आसितं, निषदनं ३. आ-नि,-धानं, स्थापनं ४. प्रतिवन्धनं, उत्खचनं, प्रणिधानं ५. गृहं ६. समूहः ७. रचना ८. संस्थानं ९. प्रतिमादीनां स्थापनम् ।
संनिहित, वि. (सं.) निकट-समीप,-स्थ-वर्तिन् २. (समीपे) स्थापित ।
संन्यास, सं. पुं. (सं.) आर्यजीवनस्य चतुर्थाश्रमः, प्रव्रज्या, वैराग्यं २. काम्यकर्मन्यासः (गीता) ३. जटामांसी ।
संन्यासी, सं. पुं. (सं.-सिन्) चतुर्थाश्रमिन्, परि,-व्राजकः-व्राज्, श्रमणः, भिक्षुः, मस्करिन्, कर्मन्दिन्, पाराशरिन् ।
संपत्ति, सं. स्त्री. (सं.) विभवः, वैभवं, ऐश्वर्यं, अर्थः, धनं, वित्तं, श्रीः-लक्ष्मीः-समृद्धिः (स्त्री.) २. रिक्थं, दायः ३. सिद्धिः (स्त्री.), सफलता, पूर्णता ४. लाभः, प्राप्तिः (स्त्री.) ।
संपद्-दा, सं. स्त्री. (सं संपद्) दे. 'संपत्ति' ।
संपन्न, वि. (सं.) धनाढ्य, धनिक, धनिन् दे. २. सिद्ध, निष्पन्न, पूर्ण ३. सहित, युक्त ४. संमृद्ध, धनधान्ययुत ।
संपरायः सं. पुं. (सं.) उत्तरकालः २. युद्धं ३. आपद् (स्त्री.) ।
संपर्क, सं. पुं. (सं.) संसर्गः, सम्बन्धः, साहचर्यं २. मिश्रणं दे. ३. संयोगः, मिलनं ४. स्पर्शः ५. योगः, संकलनं (गणित) ।
संपात, सं. पुं. (सं.) सह पतनं २. समागमः ३. संगमस्थानं ४. संवृत्तिः-समापत्तिः (स्त्री.) ।
संपादक, सं. पुं. (सं.), पत्र-पत्रिकादीनां-संपादयितृ, संपादनकरः २. साधक, निष्पादक, ३. अनुष्ठातृ, कर्तृ, निर्वर्तयितृ ।
संपादकता, सं. स्त्री. (सं.) सम्पादकत्वम् ।
संपादकीय, वि. (सं.) १-२ सम्पादक,-लिखित-सम्बन्धिन् ।
संपादन, सं. पुं. (सं. न.) मुद्रणार्थं सज्जीकरणं २. परिकल्पनं, प्रसाधनं, सज्जीकरणं ३. साधनं निष्पादनं, समापनं ४. करणं, निर्वर्तनं, अनुष्ठानम् ।
संपादित, वि. (सं.) मुद्रणार्थं सज्जीकृत २. निष्पादित, पूर्त्तिं गमित-नीत, संपूरित, साधित ३. प्रस्तुत, सज्ज ।
संपुट, सं. पुं. (सं.) समुद्गकः, करंडकः, संपुट-(टि)का, मंजूषा, दे. 'डिब्बा' २. अञ्जलिः, कर-हस्त-पाणि,-पुटः ३. *द्रोणं, पत्रपुटः, दे. 'दोना' ।
संपूर्ण, वि. (सं.) व्याप्त, पूरित, पूर्ण, आकर्ण भृत २. समग्र, समस्त, सकल, कृत्स्न ३. समाप्त, अवसित । सं. पुं., सप्तस्वरयुतो रागः (संगीत) ।
संपूर्णतः संपूर्णतया } क्रि. वि. (सं.) साकल्येन, सामस्त्येन २. सम्यक्, सुष्ठु (सब अव्य.)
संपूर्णता, सं. स्त्री. (सं.) समग्रता, कात्स्न्यं, साकल्यं २. समाप्तिः (स्त्री.), अवसानम् ।
संपृक्त, वि. (सं.) मिश्र, मिश्रित २. खचित ३. स्पृष्ट ४. संसृष्ट, जातसम्पर्क ।
सँपेरा, सं. पुं. (हिं. साँप) अ(आ)हितुंडिकः, गारुडिकः, जांगलिकः, जांगलिः, व्यालग्राहिन् ।
सँपोला, सं. पुं. (हिं. साँप) अहि-सर्प,-शावः-शावकः ।
संप्रति, अव्य. (सं.) अधुना, इदानीं २. अद्यत्वे, वर्तमाने ।
संप्रतिपत्ति, सं. स्त्री. (सं.) ऐकमत्यं, सामत्यं २. स्वीकृतिः (स्त्री.) ३. लाभः, प्राप्तिः (स्त्री.) ४. प्रवेशः ५. सम्यक् वोधः ६. कार्यसिद्धिः(स्त्री.)।
संप्रदान, सं. पुं. (सं. न.) दानं, वितरणं, विश्राणनं, प्रतिपादनं २. कारकभेदः, चतुर्थी (व्या.) ३. दीक्षा, मंत्रोपदेशः ४. उपहारः ।
संप्रदाय, सं. पुं. (सं.) मतं, धर्म,-शाखा-पथः-मार्गः २. आम्नायः, गुरुपरंपरागतसदुपदेशः, गुरुमंत्रः ३. अनुयायिमंडलं ४. प्रथा, रीतिः (स्त्री.) ।

संप्रदायी, वि. (सं.-यिन्) मतावलंबिन्, मतानुयायिन् ।

संबंध, सं. पुं. (सं. न.) संयोगः, संश्लेषः, सम्मिलनं २. सम्पर्कः, संसर्गः ३. बन्धुता, सगोत्रता, सजातीयता, ज्ञातित्वं ४. प्रगाढसख्यं ५. षष्ठी, विभक्तिभेदः (व्या.) ।

संबंधी, वि. (सं.-धिन्) संबन्धविशिष्ट २. संयुक्त, संसृष्ट ३. प्रसंगगत । सं. पुं. (सं.) बंधुः, बांधवः, सगोत्रः, ज्ञातिः (स्त्री.) २. दे. 'समधी' ।

संबद्ध, वि. (सं.) संयुक्त, संश्लिष्ट, संलग्न २. सम्बन्धविशिष्ट ३. (अ–) पिहित, संवृत ४. संग्रथित, सन्नियंत्रित ।

संबल, सं. पुं. (सं. पुं. न.) पाथेयं, संबलः-लम् ।

संबोधन, सं. पुं. (सं. न.) आभिमुख्यविधानं, आमंत्रणं, सम्बुद्धिः (स्त्री.), आकारणं, आह्वानं २. आह्वानार्थकः शब्दरूपभेदः (व्या., उ. राम!) ३. प्रबोधनं, निद्रात उत्थापनं ४. आख्यापनं, ज्ञापनं ५. आकाशभाषितं (नाटक) ।

सँभलना, क्रि. अ. (हिं. सम्भालना) उत्तम्भ्-उपस्तंभ्-धृ-भृ (सब कर्म.) २. निश्चल-दृढं स्था (भ्वा. प. अ.) ३. सावधान-अवहित-जागरूक (वि.) भू ४. पातप्रहारपराजयादिभ्यो रक्ष्-मुच् (कर्म.) ५. उत्कर्षं या (अ. प. अ.), अभिवृध् (भ्वा. आ. से.) ६. पुनः स्वास्थ्यं लभ् (भ्वा. आ. अ.), प्रकृतिं आपद् (दि. आ. अ.) ।

संभव, सं. पुं. (सं.) उत्पत्तिः (स्त्री.), जन्मन् (न.) २. मेलः, समागमः ३. शक्यता, सम्भवनीयता । वि. (सं.>) शक्य, सम्भवनीय, सम्भाव्य २. साध्य, सम्पाद्य ।

संभवतः, क्रि. वि. (सं.) कदाचित्, स्यात्, सम्भाव्यते, शक्यते (विधिलिङ् से भी) ।

संभार, सं. पुं. (सं.) संग्रहणं, सञ्चयनं, समाहरणं २. सामग्री, आवश्यकवस्तूनि (न. बहु.) ३. सम्पत्तिः (स्त्री.) ४. राशिः, चयः ५. भरणपोषणम् ।

सँभाल, सं. स्त्री. (सं. सम्भारः) पोषणं, भरणं, संवर्द्धनं २. रक्षणं, त्राणं, पालनं ३. पर्यवेक्षणं, अवेक्षा-क्षणं, अधिष्ठानं, कार्यनिर्वाहणम् ।

सँभालना, क्रि. स. (हिं. सँभाल) उत्-उप-संस्तंभ् (क्र. प. से., प्रे.), आ-अव-लंब् (भ्वा. आ. से.), सं-धृ (भ्वा. प. अ., चु.), २. ग्रह् (क्र. प. से.), धृ, विरम् (प्रे.), रुध् (रु. उ. अ.) (पातप्रहारपराजयादिभ्यो) रक्ष् (भ्वा. प. से.)-त्रै (भ्वा. आ. अ.) ३. संवृध् (चु.), पुष् (चु.) ४. उपकृ, साहाय्यं विधा (जु. उ. अ.) ५. अधिष्ठा (भ्वा. प. अ.), निर्वह्-सम्पद् (प्रे.) ६. मनोवेगं नियम् (भ्वा. प. अ.) ७. पर्यवेक्ष् (भ्वा. आ. से.) ८. प्रोत्सह्-समाश्वस् (प्रे.) । सं. पुं., आ-अव,-लंबः-लंबनं, धारणं, उत्तम्भनं २. ग्रहणं ३. रक्षणं, त्राणं ४. संवर्धनं, पोषणं ५. साहाय्यदानं, उपकारः ६. अधिष्ठानं, निर्वाहणं ७. पर्यवेक्षणं ८. प्रोत्साहनं इ. ।

संभालने योग्य, वि., धारयितव्य, उत्तम्भनीय, रक्ष्य, त्रातव्य, पोष्य, पर्यवेक्षणीय, इ. ।

संभालनेवाला, सं. पुं., उत्तंभकः, धारकः, आधारः, आश्रयः, आलम्बनं, पोषकः, संवर्द्धकः, रक्षकः, प्रोत्साहकः इ. ।

संभाला हुआ, वि., संस्तंभित, धृत, धारित, रक्षित, संवर्धित, उपकृत, पर्यवेक्षित, प्रोत्साहित इ. ।

संभावना, सं. स्त्री. (सं.) शक्यता, सम्भवनीयता, सम्भाव्यता, सम्भवः २. आदरः, सत्कारः ३. प्रतिष्ठा, मानः ४. कल्पना, अनुमानम् ।

संभावित, वि. (सं.) दे. 'संभव' वि. २. कल्पित, उद्भावित ३. आदृत, सम्मानित ।

संभाव्य, वि. (सं.) दे. 'संभव' वि. ।

संभाषण, सं. पुं. (सं.) आ-सं,-लापः, वार्तालापः, स,-कथा वादः-भाषा २. प्रवचनं, व्याख्यानम् ।

संभूत, वि. (सं.) (सह–) जात-उत्पन्न-उद्भूत ।

संभूति, सं. स्त्री. (स.) उद्भवः, उत्पत्तिः (स्त्री.) २. विभूतिः-वृद्धिः (स्त्री.) ३. क्षमता ।

संभोग, सं. पुं. (सं.) रतिः (स्त्री.), मैथुनं दे. २. सम्यक्,–उपयोगः–व्यवहारः–प्रयोगः ३. संयोगशृंगारः (सा.) ।

संभ्रम, सं. पुं. (सं.) व्याकुलता, वैक्लव्यं,

व्यग्रता २. त्वरा-रिः (स्त्री.), रभसः, रभस् (न.), आ-सं,-वेगः ३. आदरः, मानः ४. भ्रांतिः (स्त्री.), भ्रमः, स्खलितम् ।

संभ्रांत, वि. (सं.) व्याकुल, व्यग्र, उद्विग्न २. प्रतिष्ठित, संमानित ।

संमत, वि. (सं.) संप्रतिपन्न, २. समादृत, संमानित ।

संमति, सं. स्त्री. (सं.) संमतं, ऐकमत्यं, मतैक्यं, सांमत्यं, ऐक्यं २. अनुमतिः (स्त्री.)-तं, अनुज्ञा, अनुमोदनं ३. मतं-तिः (स्त्री.), अभिप्रायः, आशयः, बुद्धिः (स्त्री.) ।

संमन, सं. पुं. (अं. संमन्स्) (धर्माधिकारिणः) आह्वानपत्रम् ।

संमर्द, सं. पुं. (सं.) युद्धं २. विवादः ३. जन,-समुदायः-संकुलम् ।

संमान, सं. पुं. (सं.) सम-, आदरः, सत्कारः, पूजा, अर्हणा, अभ्यर्चनं, संभावना, प्रतिष्ठा, गौरवं, अर्चा ।

—करना, क्रि. स., संमन् (प्रे.) आद्द (तु. आ. अ.), मह पूज् (चु.), संभू (प्रे.) ।

संमानित, वि. (सं.) समादृत, सत्कृत, पूजित, गौरवान्वित, अभ्यर्चित, पूज्य, उपास्य, नमस्य, सं,-मान्य २. प्रधान, मुख्य, अग्रिय ।

संमिलन, सं. पुं. (सं. न.) संगमः, समागमः, संगः, संयोगः, संगतं-तिः (स्त्री.) ।

संमिलित, वि. (सं.) संमिश्र, मिश्रित, संयुक्त, संहत, संयुक्त, समवेत ।

संमिश्रण, सं. पुं. (सं. न.) संपर्कः, संसर्गः, संयोगः, संमिलनं २. मिश्रं, मिश्रद्रव्यं, संनिपातः, संकरः, नानाद्रव्यसमुदायः ।

संमुख, क्रि. वि. (सं. संमुखं-खे) अभिमुखं-खे, पुरः, पुरतः, पुरस्तात्, समक्षं, साक्षात्, प्रत्यक्षम् ।

संमेलन, सं. पुं. (सं. न.) समाजः, सभा, परिषद् (स्त्री.) २. बृहदधिवेशनं ३. संमंत्रणं, संवादः ४. दे. 'संमिलन' ।

संयत, वि. (सं.) अव-नि-सं,-रुद्ध, नियत, निगृहीत २. नि-प्रति,-बद्ध, नियंत्रित, पिनद्ध ३. वशं नीत, वशीकृत, दमित ४. क्रम-नियम,-बद्ध, व्यवस्थित ५. मित, समर्याद, सावधिक ६. जितेन्द्रिय, आत्म-इन्द्रिय,-निग्रहिन् ।

संयम, सं. पुं. (सं.) इन्द्रिय,-जयः-निग्रहः, दमः, आत्मनियंत्रणं २. निग्रहः, निरोधः, नियंत्रणं-णा ३. पथ्यसेवनं, मिताशनं ४. परिमितता-त्वं, मर्यादापालनं ५. पिधानं, निमीलनं, संवरणं ६. बंधनम् ।

संयमी, वि. (सं.-मिन्) इन्द्रिय-आत्म,-निग्रहिन्, संयत, जितेन्द्रिय, दमिन्, संयमशील, योगिन् २. मित-अल्प-संयत,-आहार-भोजिन् ।

संयुक्त, वि. (सं.) समवेत, संहत, संलग्न, संश्लिष्ट २. सहित, अन्वित, युक्त ३. संबद्ध, संपृक्त ४. संमिलित, संमिश्रित ।

संयोग, सं. पुं. (सं.) दे. 'संमिलन' २. संश्लेषः, संमिश्रणं ३. संभोगशृंगारः (सा.) ४. संबंधः, संपर्कः ५. अनेकव्यंजनसंश्लेषः ६. योगः, संकलनं (गणित) ७. दैवं, दैव,-घटना-गतिः (स्त्री.)-योगः ।

—से, मु., दैवात्, दैव,-योगात्-वशात्, अकस्मात् ।

संयोगी, सं. पुं. (सं.-गिन्) गृहस्थसाधुः २. दयितायुतः ।

संयोजक, वि. (सं.) संमेलक, संश्लेषक । सं. पुं. (सं. न.) १-२. शब्द-वाक्य,-योजक-पदम् ।

संरक्षक, सं. पुं. (सं.), आश्रयदातृ, पुरस्कर्तृ, २. पोषकः, प्रतिपालकः, भरणकृत्, संवर्द्धकः, संरक्षिन् ३. त्रातृ, गोप्तृ, पालकः, रक्षितृ ४. सहायकः, उपकारकः ।

संरक्षण, सं. पुं. (सं. न.) गोपनं, रक्षा, त्राणं २. अवेक्षा, पर्यवेक्षणं ३. अधिकारः ४. रोधः, प्रतिबंधः ।

संलग्न, वि. (सं.) संयुक्त, संहत, संश्लिष्ट, संहित, संमिलित, संबद्ध ।

संलाप, सं. पुं. (सं.) वार्तालापः, संवादाः ।

संवत्, सं. पुं. (सं. अव्य.) वर्षः र्षं, अब्दः, वत्सः, परि-, वत्सरः २. विक्रमाब्दः ३. शाकः ।

संवत्सर, सं. पुं. (सं.) दे. 'संवत्' ।

संवरण, सं. पुं. (सं. न.) गोपनं, प्रच्छादनं, निगूहनम् ।

सँवरना, क्रि. अ. (सं. संवर्णनं >) व 'सँवारना' के कर्म. के रूप ।

संवाद, सं. पुं. (सं.) दे. 'संभाषण' (१)। २. वृत्तं, वृत्तांतः, समाचारः ३. कथा, प्रसंगः ४. व्यवहारः, अभियोगः ५. ऐकमत्यं, संमतिः (स्त्री.) ६. संदेशः, दे. ७. स्वीकृतिः-अनुमतिः (स्त्री.)।

—दाता, सं. पुं. (सं.-तृ) *वृत्तप्रेषकः, वृत्तांत-लेखकः।

सँवारना, क्रि. स. (सं. सवर्णनं >) अलंकृ, परिष्कृ, भूष्-मंड् (चु.), प्रसाध् (प्रे.), २. संस्कृ, सं-, शुध् (प्रे.) ३. व्यवस्था (प्रे.), विन्यस् (दि. प. से.), रच् (चु.) ४. कार्यं सम्यक् संपद्-निष्पद् (प्रे.)। सं. पुं., अलं-परिष्-,करणं, मंडनं, प्रसाधनं २. संस्कारः, शोधनं ३. व्यवस्थापनं ४. सम्यक् संपादनं।

संवारने योग्य, वि., अलंकार्य, परिष्करणीय, भूषयितव्य; संस्कार्य; व्यवस्थाप्य।

संवारनेवाला, सं. पुं., अलं-परिष्-,कर्तृ-कारकः, प्रसाधकः, मंडयितृ २. संशोधकः, संस्कर्तृ ३. व्यवस्थापकः, सुसंपादकः।

संवारा हुआ, वि., अलं-परिष्-,कृत, मंडित, प्रसाधित २. संस्कृत, सं-,शोधित ३. व्यवस्था-पित ४. सुसंपादित।

संवेदना, सं. स्त्री. (सं.) संवेदनं, अनुभवः, सुखदुःखादि-प्रतीतिः (स्त्री.)।

संशय, सं. पुं. (सं.) संदेहः, दे.।

संशयात्मा, सं. पुं. (सं.-त्मन्) विश्वासहीन, संदेहशील, श्रद्धाशून्य, संशयालु।

संशयापन्न, वि. (सं.) संदिग्ध, अनिश्चित।

संशयालु, वि. (सं.) दे. 'संशयात्मा'।

संशोधक, सं. पुं. (सं.) संशोधयितृ; प्रति,-समाधातृ २. संस्कर्तृ, संस्कारक. ३. निस्तारक (ऋणादि)।

संशोधन, सं. पुं. (सं. न.) पावनं, निर्मली-करणं २. दोषनिवारणं, त्रुटिनिष्कासनं, संस्कारः, प्रति-,समाधानं ३. निस्तारणं (ऋणादि)।

—करना, क्रि. स., सं-परि-शुध् (प्रे.), पू (क्र. उ. से.) २. दोषान् निवृ (प्रे.), संस्कृ ३. निस्तृ (प्रे.)।

संशोधित, वि. (सं.-) सुपूत, सम्यक् निर्मली-कृत २. संस्कृत, परिशोधित ३. निस्तारित।

संसर्ग, सं. पुं. (सं.) संपर्कः, संबंधः २. साह-चर्यं, संगतिः (स्त्री.) ३. संयोगः, संमिलनं ४. सुपरिचयः, अभ्यंतरत्वम्।

संसार, सं. पुं. (सं.) सृष्टिः (स्त्री.), भुवनं, विश्वं, जगत्(न.)-ती, चराचरं, संसृतिः (स्त्री.) २. पुनर्जन्मन् (न.) प्रेत्यभावः, ३. भू-मर्त्य-इह,-लोकः ४. प्रपंचः, जगज्जालं ४. सततपरिवर्तनं ५. गार्हस्थ्यम्।

—चक्र, सं. पुं. (सं. न.) १-२. दे. 'संसार' (२, ४) ३. दशापरिवर्तः-र्तनम्।

संसारी, वि. (सं.-रिन्) लौकिक, सांसारिक २. ऐहिक, प्रापंचिक ३. व्यवहारकुशल ४. अमुक्तात्मन्। सं. पुं. (सं.) प्राणिन् २. जीवात्मन्।

संसृति, सं. स्त्री. (सं.) दे. 'संसार' (१-२)।

ससृष्ट, वि. (सं.) मिश्रित, संश्लिष्ट २. संबद्ध, संलग्न।

संसृष्टि, सं. स्त्री. (सं.) संमिश्रणं, संश्लेषः २. संबंधः, संपर्कः ३. सुपरिचयः, सौहार्द ४. संग्रहणं, संचयनं ५. अलंकारमिश्रणभेदः (सा.)।

संस्करण, सं. पुं. (सं. न.) ग्रन्थमुद्रणवारः, आवृत्तिः (स्त्री.) २. संशोधनं ३. परिष्करणम्।

संस्कार, सं. पुं. (सं.) परि-सं,-शोधनं, संस्क-रणं २. परिष्,-कारः-करणं, परिमार्जनं ३. शौचं, शरीरशुद्धिः (स्त्री.) ४. मानसी शिक्षा ५. शिक्षा-संगत्यादीनां प्रभावः ६. पूर्वजन्मवासना ७. पावनं, शुद्धिः (स्त्री.) ८. धार्मिककृत्यभेदः (दे. 'षोडशसंस्कार') ९. अंत्येष्टिक्रिया, दाह-कर्मन् (न.)।

संस्कृत, वि. (सं.) सं-परि,-शोधित, निर्मली,-कृत २. परिष्कृत, परिमार्जित, परिमृष्ट ३. पाचित, सिद्ध, पक्व ४. कृतसंस्कार, संस्कार-पूत। सं. स्त्री. (सं. न.) देववाणी, सुरगिर् (स्त्री.), आर्याणां भाषाविशेषः।

संस्कृति, सं. स्त्री. (सं.) सभ्यता, आचार-विचाराः (बहु०) २. संस्क्रिया, संस्कारः, शुद्धिः (स्त्री.) ३. परिष्कारः।

संस्था, सं. स्त्री. (सं.) मंडलं, दलं, गणः २. सभा, समाजः, परिषद् (स्त्री.)।

संस्थान, सं. पुं. (सं. न.) चतुष्पथः, चतुष्कं २. आकृतिः (स्त्री.), आकारः, ३. रचना ४. सन्निवेशः ५. स्थितिः (स्त्री.), दशा ६. नाशः ७. मृत्युः ८. आयोजनं, व्यवस्था (९-१०), दे. 'ढाँचा' तथा 'खाका'।

संस्थापक, सं. पुं. (सं.) प्रवर्तकः, प्रवर्तयितृ, आरंभकः, प्रतिष्ठापकः।

संस्थापन, सं. पुं. (सं.) प्रवर्तनं, प्रारंभणं, प्रतिष्ठापनं, प्रारंभः २. निर्माणं ३. दृढीकरणम्।

संस्थापित, वि. (सं.) प्रवर्तित, प्रतिष्ठापित, प्रारब्ध २. निर्मित ३. दृढीकृत।

संस्मरण, सं. पुं. (सं. न.) संस्मृतिः (स्त्री.), सम्यक्-स्मरणं-अनुचिंतनं-अनुबोधनं २. स्मारकं, स्मारकघटना ३. संस्कारजं ज्ञानम्।

संहत, वि. (सं.) घन, दृढ, निविड, अनंतर २. संयुक्त, संबद्ध ३. संमिलित, संमिश्रित ४. आहत ५. संगृहीत।

संहति, सं. स्त्री. (सं.) संगतिः (स्त्री.), संमिलनं २. राशिः, चयः ३. गणः, समूहः ३. घनत्वं, निविडता ४. संधिः, संयोगः।

संहार, सं. पुं. (सं.) हिंसा-सनं, हननं, हत्या, वधः, घातः २. वि-,नाशः-ध्वंसः ३. (मुक्ता-स्रस्य) संहरणं-संकोचनं-संहृतिः (स्त्री.), ४. संग्रहः, संकोचः ५. संक्षेपः, सारः ६. समाप्तिः (स्त्री.), अंतः ७. प्रलयः, कल्पांतः।

—करना, क्रि. स., मृ-व्यापद्-निषूद् (प्रे.) २. वि-,नश्-ध्वंस् (प्रे.)।

संहारक, सं. पुं. (सं.) संहर्तृ, नाशकः २. संग्रहीतृ, संचेतृ।

संहिता, सं. स्त्री. (सं.) संधिः, वर्णसंनिकर्षः (व्या.) २. संयोगः, मिलनं ३. धर्मसंहिता, स्मृतिः (स्त्री.), श्रुतिजीविका ४. वेदानां मंत्रभागः।

सइँयाँ, सं. पुं. (सं. स्वामिन्) पतिः २. कांतः ३. ईश्वरः।

सइयाँ, सं. स्त्री. (हिं. सखियां) दे. 'सखी'।

सकता, सं. पुं. (अ.-तः) सन्न्यासः, मूर्च्छा (रोगभेदः) २. यतिः (स्त्री.), विरामः (छन्द.)।

सकना, क्रि. अ. (सं. शकनं) शक् (स्वा. प. अ.), प्रभू (भ्वा. प. से.), क्षम-समर्थ (वि.) भू। (यह क्रिया सदा दूसरी क्रियाओं के साथ ही प्रयुक्त होती है)।

सकपकाना, क्रि. अ. (अनु. सकपक) विस्मि (भ्वा. आ. अ.), विस्मयाकुलीभू। २. अभिशंक् (भ्वा. आ. से.), दोलायते (ना. धा.) ३. लज्ज् (तु. आ. से.), व्रप् (भ्वा. आ. से.)।

सकर्मक, वि. (सं.) कर्मविशिष्ट (व्या.)।

सकल, वि. (सं.) दे. 'सब'।

सकाम, वि. (सं.) फलाभिलाषिन्, कामना-विशिष्ट २. लब्धकाम, पूर्णमनोरथ ३. कामुक, कामिन्।

सकारण, वि. (सं.) सहेतुक, कारणविशिष्ट।

सकुचना, क्रि. अ. (सं. संकोचनं) व्रीड् (दि. प. से.), ह्री (जु. प. अ.), लज्ज् (तु. आ. से.) २. संकुच्-संह्र (कर्म.), मुद्रित-संकुचित (वि.) भू।

सकुचाना, क्रि. अ. (सं. संकोचनं) दे. 'सकुचना'। क्रि. स., व. 'सकुचना' के प्रे. रूप।

सकुचीला, वि. (सं. संकोचः >) संकोचशील दे. 'लज्जाशील'।

सकूनत, सं. स्त्री. (अ.) नि-,वासः, निकेतनं, नि-,वासस्थानम्।

सकृत्, अव्य. (सं.) एकवारं २. सदा ३. सह।

सकोड़ना, क्रि. स., दे. 'सिकोड़ना'।

सकोरा, सं. पुं. (हिं. कसोरा, दे.)।

सखरा, सं. पुं.
सखरी, सं. स्त्री. } दे. 'रसोई कच्ची'।

सखा, सं. पुं. (सं. सखि) मित्रं, सुहृद् २. सह,-चारिन्-चरः, संगिन् ३. नायकसहचरः (सा.)।

सखावत, सं. स्त्री. (अ.) वदान्यता २. औदार्य्यम।

सखित्व, सं. पुं. (सं. न.) सख्यं, मैत्री।

सखी, सं. स्त्री (सं.) सहचरी, आली-लिः (स्त्री.), वयस्या, आर्श्वाची, * संगिनी २. नायिकायाः सहचरी (सा.)।

सखी, वि. (अ.) दानशील, वदान्य।

सख़ुन, सं. पुं. (फ़ा.) वार्तालापः, संवादः २. काव्यं, कविता ३. वचनम्।
—तकिया, सं. पुं. (फ़ा.) दे. 'तकिया कलाम'
—दाँ, सं. पुं. (फ़ा.) काव्यमर्मज्ञः, रसिकः २. वाक्पटुः ३. कविः।
—दानी, सं. स्त्री. (फ़ा.) काव्यमर्मज्ञता, रसिकता २. वाक्पाटवं ३. काव्यकला।
—शनास, सं. पुं. (फ़ा.) दे. 'सख़ुनदाँ'।
—साज़, सं. पुं. (फ़ा.) कविः २. दे. 'गप्पी'
सख़्त, वि. (फ़ा.) कीकस, कर्कर, कक्खट, घन, दृढसंधि, संहत २ दुष्कर, कठिन, दुस्साध्य, निर्दय, निष्करुण ४. चंड, परुष, कठोर, दुस्सह ५. कुशील, दुष्प्रकृति ६. कृपण ७. अतिशय, अत्यधिक। क्रि. वि., परुषं, निर्दयं, तीव्रम्।
—सुस्त कहना, (मु.) भर्त्स् (चु. आ. से), आक्रुश् (भ्वा. प. अ.)।
सख़्ती, सं. स्त्री. (फ़ा.) कक्खटता, कीकसता, घनता २. दुष्करता ३. निर्दयता ४. चंडता ५. कुशीलता ६. आधिक्यं इ.।
—से, क्रि. वि. चंडं, घोरं २. निर्दयम्।
—करना, मु., बलं प्रयुज् (रु. आ. अ.), निर्दयं व्यवहृ (भ्वा. प. अ.)।
सख्य, सं. पुं. (सं. न.) सौहार्द, साप्तपदीनं, मित्रता, दे.।

सगवग, वि. (अनु) अति-क्लिन्न-आर्द्र, दे. 'लथपथ' २ आर्द्री-द्रवी-भूत ३. परिपूर्ण।
सगर्व, वि. (सं.) गर्वित, दृप्त। क्रि. वि., सगर्वं, साभिमानम्।
सगा, वि. (सं. स्वक>) सोदर, सहोदर, सोदर्य, सयोनि, सगर्भ २. स्वकुलज। सं. पुं., सकुल्यः, सगोत्रः, बंधुः।
—भाई, सं. पुं., सोदरः, सहोदरः, सगर्भ्यः।
—बहिन, सं. स्त्री., सोदरा, सगर्भ्या।
सगापन, सं. पुं. (हिं. सगा) सोदरता, सगर्भता २. संबंधनैकट्यम्।
सगाई, सं. स्त्री. (हिं. सगा) दे. 'नंगनी'।
सगुण, वि. (सं.) गुणिन्, गुणान्वित। सं. पुं. (सं.) साकारेश्वरः २. अवतारपूजक-भक्त-संप्रदायः।
सगुन, सं. पुं., दे. 'शकुन'।

सगोती, सं. पुं. (सं. सगोत्र) एक-सम-गोत्रः २ बंधुः, ज्ञातिः (स्त्री.)।
सगोत्र, वि. (सं.) संबंधिन्, सजाति, सजातीय, एक-स,-गोत्र। (सं. न.) कुलम्।
सघन, वि. (सं.) निविड, सांद्र, घन, अनन्तर, गाढ २. स्थूल, संहत।
सच, वि. (सं. सत्य) यथार्थ, अवितथ, दे. 'सत्य'। सं. पुं., सत्यं, तथ्यं, अवितथम्। क्रि. वि., वस्तुतः, यथार्थतः (दोनों अव्य.)।
